श्रीगणेशायनमः ॥ ॐ नमो भगवते वासुदेवाय ॥ श्रियं सरस्वतीं गौरीं गणेशं स्कंदमीश्वरं ॥ ब्रह्माणं वन्हिमिंद्रादीन्वा
सुदेवं नमाम्यहं ॥ नैमिषे हरिमीजाना ऋषयः शौनकादयः ॥ तीर्थयात्राप्रसंगेन स्वागतं सूतमब्रुवन् ॥ २ ॥ ऋषय ऊचुः सू
त त्वं पूजितोस्माभिः सारात्सारं वदस्व नः ॥ येन विज्ञातमात्रेण सर्वज्ञत्वं प्रजायते ॥ सूत उवाच ॥ सारात्सारो हि भगवान् वि-
ष्णुः सर्गादिकृद्विभुः ॥ ब्रह्माहमस्मि तं ज्ञात्वा सर्वज्ञत्वं प्रजायते ॥ द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ॥ द्वे विद्ये वेदित
व्ये हि इति चाथर्वणी श्रुतिः ॥ अहं शुकश्च पैलाद्या गत्वा बदरिकाश्रमं ॥ व्यासं नत्वा पृष्टवंतः सोस्मान् सारमथाब्रवीत् ॥ व्या
स उवाच ॥ शुकाद्यैः शृणु सूत त्वं वसिष्ठो मां यथाब्रवीत् ॥ ब्रह्मसारं हि पृष्टं तं मुनिभिश्च परापरं ॥ वसिष्ठ उवाच ॥ द्वैविध्यं ब्रह्म व
क्ष्यामि शृणु व्यास खिलात्मगं ॥ यथाग्निर्मां पुरा प्राह मुनिभिर्दैवतैः सह ॥ पुराणं परमाग्नेयं ब्रह्मविद्याक्षरं परं ॥ ऋग्वेदा
द्यपरं ब्रह्म सर्ववेदमुखं परं ॥ अग्निनोक्तं पुराणं यदाग्नेयं वेदसंमितं ॥ भुक्तिमुक्तिप्रदं पुण्यं पठतां शृण्वतां नृणां ॥ कालाग्निरू
पिणं विष्णुं ज्योतिर्ब्रह्म परापरं ॥ मुनिभिः पृष्टवान् देवं पूजितं ज्ञानकर्मिभिः ॥ वसिष्ठ उवाच ॥ संसारसागरोत्तारनावं ब्र
ह्मेश्वरं वद ॥ विद्यासारं यद्विदित्वा सर्वज्ञो जायते नरः ॥ अग्निरुवाच ॥ विष्णुः कालाग्निरुद्रोहं विद्यासारं वदामि ते ॥
ब्रह्माग्नेयं पुराणं यत् सर्वं सर्वस्य कारणं ॥ सर्गस्य प्रतिसर्गस्य वंशमन्वंतरस्य च ॥ वंशानुचरितादेश्च मत्स्यकूर्मादिरू
पधृक् ॥ द्वे विद्ये भगवान् विष्णुः परा चैवापरा द्विज ॥ ऋग्यजुःसामाथर्वाख्या वेदा अंगानि यत् द्विज ॥ शिक्षाकल्पो
व्याकरणं निरुक्तं ज्योतिषां गतिः ॥ छंदोभिधानं मीमांसा धर्मशास्त्रं पुराणकं ॥ न्यायो वैद्यक गांधर्वं धनुर्वेदोर्थशा
स्त्रकं ॥ अपरेयं परा विद्या यया ब्रह्माधिगम्यते ॥ यत्तदद्रश्यमग्राह्यमगोत्रचरणं ध्रुवं ॥ विष्णुनोक्तं यथा मह्यं देवेभ्यो
ब्रह्मणा पुरा ॥ तथा ते कथयिष्यामि हेतुं मत्स्यादिरूपिणं ॥ इत्यादिमहापुराणे आग्नेये प्रथमोध्यायः ॥ १ ॥ ॥वसिष्ठ उ॥

भि: था

अग्निपु.

॥ २ ॥

मत्स्यादिरूपिणं विष्णुं ब्रूहि सर्गादिकारणं॥ पुराणं ब्रह्मचाग्नेयं यथा विष्णोः पुराश्रुतं॥१॥ अग्निरुवाच॥ मत्स्यावता
रं वक्ष्येहं वसिष्ठ शृणु वै हरेः॥ अवतारक्रिया दुष्टनष्टयै सत्पालनाय हि॥२॥ आसीदतीतकल्पांते ब्रह्मो नैमित्तिको
लयः॥ समुद्रोपप्लुतास्तत्र लोका भूरादिका मुने॥ मनुर्वैवस्वतस्तेपे तपो वै भुक्तिमुक्तये॥ एकदा कृतमालायां कुर्वतो
जलतर्पणं॥४॥ तस्यांजल्युदके मत्स्यः स्वल्प एकोभ्यपद्यत॥ क्षेप्तुकामं जले प्राह न मां क्षिप नृपोत्तम॥५॥ ग्राहादिभ्यो
भयं मेत्र त श्रुत्वा कलशेक्षिपत्॥ मनुं वृद्धः पुनर्मत्स्यः प्राह तं देहि मे बृहत्॥६॥ स्थानमेतद्वचः श्रुत्वा राजाथोदंचने
क्षिपत्॥ तत्र वृद्धोब्रवीद्भूपं पृथु देहि पदं मनो॥७॥ सरोवरे पुनः क्षिप्तो ववृधे तत्प्रमाणवान्॥ ऊचे देहि बृहत्स्थानं प्रा १
क्षिपच्चांबुधौ मनुः॥८॥ लक्षयोजनविस्तीर्णः क्षणमात्रेण सोभवत्॥ मत्स्यं तमद्भुतं दृष्ट्वा विस्मितः प्राब्रवीन्मनुः॥९॥
कोभवान्ननु विष्णुस्त्वं नारायण नमोस्तु ते॥ मायया मोहयसि मां किमर्थं त्वं जनार्दन॥ मनुनोक्तोब्रवीन्मत्स्यो मनुं वै पाल
नेरतः॥ अवतीर्णो भवाय अस्य जगतो दुष्टनष्टये॥११॥ सप्तमे थ दिने त्वब्धिः प्लावयिष्यति वै जगत्॥ उपस्थितायां
नावि त्वं बीजादीनि निधाय च॥१२॥ सप्तर्षिभिः परिवृतो निशां ब्राह्मीं चरिष्यसि॥ उपस्थितस्य मे शृंगे निबध्नीहि म
हाहिना॥१३॥ इत्युक्त्वांतर्दधे मत्स्यो मनुः कालप्रतीक्षकः॥ स्थितः समुद्र उद्वेले नावमारुरुहे तदा॥१४॥ एकशृंगध
रो मत्स्यो हैमो नियुतयोजनः॥ नावं बध्वा तस्य शृंगे मत्स्याख्यं च पुराणकं॥ शुश्राव मत्स्यात्पापघ्नं संस्तुवन् स्तुतिभि
श्च तं॥ ब्रह्मवेदप्रहर्तारं हयग्रीवं च दानवं॥१६॥ अवधीद्वेदमंत्राद्यान् पालयामास केशवः॥ प्राप्ते कल्पेथ वाराहे कूर्मरूपो
भवद्धरिः॥१७॥ इत्यादिमहापुराणे आग्नेये मत्स्यावतारो द्वितीयोध्यायः॥ अग्निरुवाच॥ वक्ष्ये कूर्मावतारं च संश्रु
तं पापनाशनं॥ पुरा देवासुरे युद्धे दैत्यैर्देवाः पराजिताः॥ दुर्वाससश्च शापेन निश्रीकाश्चाभवंस्तदा॥ स्तुत्वा क्षीराब्धि

गं विष्णुमूचुः पालयचास्मरान्॥२॥ ब्रह्मादिकान् हरिः प्राह संधिं कुर्वंतु चासुरैः॥ क्षीराब्धिमथनार्थं हि अमृतार्थं श्रियेस्म
राः॥३॥ अरयोपि हि संधेयाः सति कार्यस्य गौरवे॥ युष्मानमृतभाजो हि करिष्यामि न दानवान्॥४॥ मंथानं मंदरं कृत्वा नेत्रं कृत्वा
च वासुकिं॥ क्षीराब्धिं मत्सहायेन निर्मथध्वमतंद्रिताः॥५॥ विष्णूक्ताः संविदं कृत्वा दैत्यैः क्षीराब्धिमागताः॥ ततो मथितु
मारब्धा यतः पुच्छं ततः सुराः॥६॥ फणिनिश्वाससंग्लाना हरिणाप्यायिताः सुराः॥ मथ्यमानेर्णवे सोद्रिरनाधारो ह्यपोवि
शत्॥७॥ कूर्मरूपं समास्थाय दधे विष्णुश्च मंदरं॥ क्षीराब्धेर्मथ्यमानाच्च विषं हालाहलं ह्यभूत्॥८॥ हरेण धारितं कंठे नी
लकंठस्ततो हरः॥ ततो भूद्वारुणी देवी पारिजातश्च कौस्तुभः॥९॥ गावश्चाप्सरसो दिव्या लक्ष्मीर्देवी हरिं गता॥ पश्यंतः स
र्वदेवास्तां स्तुवंतः सश्रियो भवन्॥१०॥ ततो धन्वंतरिर्विष्णुरायुर्वेदप्रदर्शकः॥ बिभ्रत्कमंडलुं पूर्णममृतेन समुत्थितः॥११॥
अमृतं तत्करादैत्याः सुरेभ्योर्द्धमदाय च॥ गृहीत्वा जग्मुर्जंभाद्या विष्णुः स्त्रीरूपगतः॥१२॥ तां दृष्ट्वा रूपसंपन्नां दैत्या ऊ ५
चुर्विमोहिताः॥ भव भार्यामृतं गृह्य पाययास्मान्वरानने॥१३॥ तथेत्युक्त्वा हरिस्तेभ्यो गृहीत्वापाययत्सुरान्॥ चंद्ररूप-
धरो राहुः पिबंश्चार्केंदुनार्पितः॥१४॥ हरिणाप्यरिणाच्छिन्नं सबाहुतच्छिरः पृथक्॥ कृपयामरतां नीतं वरदं हरिमब्रवीत्॥१५॥
राहुर्मत्तकृचंद्रार्कौ प्राप्स्येते ग्रहणं ग्रह॥ भवेययेतदादानं दास्यंते स्यात्तदक्षयं॥१६॥ तथेत्याहाथ तं विष्णुस्ततः सर्वैः स-
गृह्य हामरैः॥ स्त्रीरूपं संपरि हरेणोक्तः प्रदर्शय॥१७॥ दर्शयामास रुद्राय स्त्रीरूपं भगवान् हरिः॥ मायया मोहितः शं
भुर्गौरीं त्यक्त्वा स्त्रियं गतः॥१८॥ नग्न उन्मत्तरूपोपि स्त्रियः केशान धारयत्॥ अगाद्विमुच्य केशौं स्त्री अनुधावच्च तां
स्व गतां॥१९॥ [illegible] लिंगं तस्य वीर्यं कौ यत्र यत्र हरस्य हि॥ तत्र तत्राभवत् क्षेत्रं लिंगानां कनकस्य च॥२०॥ मायेयमिति तं ज्ञात्वा स्व
रूपस्थो भवद्धरः॥ शिवमाह हरी रुद्र जिता माया त्वया हि मे॥२१॥ न जेतुमेनां शक्तो मे त्वद न्यः पुमान् भुवि॥ अप्राप्याथा ते

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

मृतं दैत्या देवैर्युद्धे निपातिताः २२ त्रिदिवस्थाः सुराश्चासन् दैत्याः पातालवासिनः यो नरः पठते देवविजयं त्रिदिवं व्रजेत्
॥२३॥ इत्याग्नेये पुराणे कूर्मावतारस्तृतीयोध्यायः ॥ ॥अग्निरुवाच॥ अवतारं वराहस्य वक्ष्येहं पापनाशनं हिर
ण्याक्षोसुरेशोभूद्देवान् जित्वा दिवि स्थितः १ देवैर्गत्वा स्तुतो विष्णुर्यज्ञरूपो वराहकः अभूत्तं दानवं हत्वा दैत्यैः सार्द्धं तु
कंटकं २ धर्मदेवादिरक्षाकृत्ततः सोंतर्दधे हरिः हिरण्याक्षस्य वै भ्राता हिरण्यकशिपुस्तदा ३ जितदेवयज्ञभा
गः सर्वदेवाधिकारकृत् नारसिंहं वपुः कृत्वा तं जघान सुरैः सह स्वपदस्थान् सुरांश्चक्रे नारसिंहः सुरैः स्तुतः देवा
सुरे पुरा युद्धे बलिप्रभृतिभिः सुराः ५ जिताः स्वर्गात्परिभ्रष्टा हरिं वै शरणं गताः सुराणामभयं दत्वा आदित्या क
श्यपेन च ६ स्तुतोसौ वामनो भूत्वा ह्यदित्यां स कृतुं ययौ बलेः श्रीयजमानस्य गंगाद्वारे गृणन् श्रुतिं ७ वेदान्पठं
तं तं श्रुत्वा वामनं वरदोब्रवीत् निवारितोपि शुक्रेण बलिर्ब्रूहि यदिच्छसि ८ तत्तेहं संप्रदास्यामि वामनो बलिम-
ब्रवीत् पदत्रयं मे गुर्वर्थं देहि दास्ये तमब्रवीत् ९ तोये तु पतिते हस्ते वामनोभूदवामनः भूर्लोकं स भुवर्लोकं स्व
र्लोकं च पदत्रयं १० चक्रे बलिं च सुतलं तच्छक्राय ददौ हरिः शक्रो देवैर्हरिं स्तुत्वा भुवनेशः सुखी त्वभूत् ११ वक्ष्ये परशुरा
मस्य चावतारं शृणु द्विज उद्धतान् क्षत्रियान्वीक्ष्य भूभारहरणाय सः १२ अवतीर्णो हरिः साक्षात् देवविप्रपालकः ज
मदग्नेरेणुकायां भार्गवः शस्त्रपारगः १३ दत्तात्रेयप्रसादेन कार्तवीर्यो नृपस्त्वभूत् सहस्रबाहुः सर्वोर्वीपतिः स मृग
यां गतः १४ श्रांतो निमंत्रितोरण्ये मुनिना जमदग्निना कामधेनुप्रभावेन भोजितः सबलो नृपः १५ अप्रार्थयद्धोम
धेनुं यदा स न ददौ तदा हृतवानथ रामेण शिरश्छित्वा निपातितः १६ रामे वनं गते वैरात् स पुत्रः समागतः पितरं निह
तं दृष्ट्वा पितृनाशाभिमर्षितः १७ त्रिःसप्तकृत्वः पृथिवीं निःक्षत्रामकरोत्प्रभुः कुरुक्षेत्रे पंच कुंडान् कृत्वा संतर्पयेत् पितॄन् १८

युद्धे परशुना राजा स धेनुश्चाश्रमं ययौ कार्तवीर्यस्य पुत्रैस्तु जमदग्निर्निपातितः

सु

म

नृ

दि

२

काश्यपाय महीं दत्वा महेंद्रे पर्वते स्थितः कूर्मस्य च वराहस्य नृसिंहस्य वामनं १९ अवतारं च रामस्य श्रुत्वा याति दिवं नरः
॥ इति अग्निपुराणे वराहनृसिंहरामावतारे चतुर्थोध्यायः अग्निरुवाच रामायणमहं वक्ष्ये नारदेनोदितं पुरा वा
ल्मीकाय यथा तत्त्वं पठितं भुक्तिमुक्तिदं १ नारद उवाच विष्णुनाभ्यब्जजो ब्रह्मा मरीचिर्ब्रह्मणः सुतः मरीचेः कश्यपस्तस्मात्
सूर्यो वैवस्वतो मनुः २ ततस्तस्मात्तथेक्ष्वाकुस्तस्य वंशे ककुत्स्थकः ककुत्स्थस्य रघुस्तस्मादजो दशरथस्ततः ३
रावणादेर्वधार्थाय चतुर्धाभूत् स्वयं हरिः राज्ञो दशरथाद्रामः कौशल्यायां बभूव ह ४ कैकेय्यां भरतः पुत्रः सुमित्रायां च
लक्ष्मणः शत्रुघ्नः ऋष्यशृंगेण तासु संदत्तपायसात् ५ प्राशिताद्यज्ञसंसिद्धाद्रामाद्याश्च समाः पितुः यज्ञविघ्नविनाशा
य विश्वामित्रार्थितो नृपः ६ रामं संप्रेषयामास लक्ष्मणं मुनिना सह रामो गतोस्त्रशस्त्राणि शिक्षितस्ताटकांतकृत् ७ मा
रीचं मानवास्त्रेण मोहितं दूरतोनयत् सुबाहुं यज्ञहंतारं सबलं चावधीद्बली ८ सिद्धाश्रमनिवासी च विश्वामित्रादिभिः
सह गतः क्रतुं मैथिलस्य द्रष्टुं चापं सहानुजः ९ शतानंदनिमित्तेन विश्वामित्रप्रभावकः रामाय कथितो राज्ञा समुनिः पू
जितः क्रतौ १० धनुरापूरयामास लीलया स बभंज तत् वीर्यशुल्कां च जनकः सीतां कन्यां त्वयोनिजां ११ ददौ रामाय रामोपि
पित्रादौ हि समागते उपयेमे जानकीं तामूर्मिलां लक्ष्मणस्तदा १२ श्रुतकीर्तिमाण्डवीं च कुशध्वजसुते तथा जनकस्यानुजस्यै
ते शत्रुघ्नभरतावुभौ १३ कन्ये द्वे उपयेमाते जनकेन सुपूजितः रामोगात्सवसिष्ठाद्यैर्जामदग्न्यं विजित्य च १४ अयो
ध्यां भरतोथागात्सशत्रुघ्नो युधाजितं इत्यादिपुराणे आग्नेये बालकांडे पंचमोध्यायः नारद उवाच भरतेथ गते रामः पि
त्रादीनभ्यपूजयत् राजा दशरथो राममुवाच शृणु राघव १ गुणानुरागाद्राज्ये त्वं प्रजाभिरभिषेचितः मनसाहं प्रभाते ते
यौवराज्यं ददामि ह २ रात्रौ त्वं सीतया सार्द्धं संयतः सुव्रतो भव राज्ञश्च मंत्रिणश्चाष्टौ सवसिष्ठास्तदाब्रुवन् ३ सृष्टि
र्जयंतो विजयः सिद्धार्थो राज्यवर्द्धनः अशोको धर्मपालश्च सुमंत्रश्च वसिष्ठकः ४ पित्रादिवचनं श्रुत्वा तथेत्युक्त्वा

दि

अ

सराघवः स्थितोदेवार्चनं त्वोक्तं कौशल्यायै निवेदयत् ५ राजोवाच वसिष्ठादीन् रामराज्याभिषेचने संभारान्संभरंतुस्म
इत्युक्ता केकयीं गतः ६ अयोध्यालंकृतिं दृष्ट्वा ज्ञात्वा रामाभिषेचनं ७ भविष्यतीत्या
चचक्षे केकेयीं मंथरा सखी पादौ गृहीत्वा रामेण कर्षिता सापराधतः तेन वैरेण सा रामं वनवासं च कांक्षति केकयित्वं स
मुत्तिष्ठ रामराज्याभिषेचनं ९ मरणं तव पुत्रस्य मम तेनात्र संशयः कुब्जयोक्तं च तत् श्रुत्वा एकमाभरणं ददौ १० उ
वाच च यथा रामः तथा मे भरतः सुतः उपायं तु न पश्यामि भरतो येन राज्यभाक् ११ केकयीमब्रवीत् क्रुद्धा हारं त्यक्त्वा
थ मंथरा बालिशे रक्ष भरतमात्मानं मां च राघवात् १२ भविता राघवो राजा राघवस्य ततः सुतः राजवंशस्तु कैकेयि भरता
त् परिहास्यते १३ देवासुरे पुरा युद्धे शंबरेण हताः सुराः रात्रौ भर्ता गतस्तत्र रक्षितो विद्यया त्वया १४ वरद्वयं तदा
प्रादाद्याचेदानीं नृपं च तत् रामस्य वेचने वासं नव वर्षाणि पंच च १५ यौवराज्यं च भरते तदिदानीं प्रदास्यति प्रोत्सा-
हिता कुब्जया सा अनर्थे चार्थदर्शिनी १६ उवाच सदुपायं मे कच्चित्तं कारयिष्यति क्रोधागारं प्रविश्याथ पतितभुवि मू
र्छिता १७ द्विजादीनर्चयित्वाथ राजा दशरथस्तदा ददर्श केकयीं रुष्टामुवाच कथमीदृशी रोगार्तासि किं भयोद्वि-
ग्ना किमिच्छसि करोमि तत् येन रामेण हि विना न जीवामि मुहूर्तकं १९ शपामि तेन कुर्यां ते वांछितं त-
व सुदरि सत्यं ब्रूहीति सोवाच नृप मह्यं ददासि चेत् २० वरद्वयं पूर्वदत्तं सत्यात्वं देहि मे नृप चतुर्दश समाः रामो व
ने वसतु संयतः २१ संभारैरेभिरद्यैव भरतोत्राभिषिच्यतां विषं पीत्वा मरिष्यामि दास्यासि त्वं न चेन्नृप २२
तच्छ्रुत्वा मूर्छितो भूमौ वज्राहत इवापतत् मुहूर्ताच्चेतनां प्राप्य कैकेयीमिदमब्रवीत् २३ किं कृतं तव रामेण मया वा
पापनिश्चये यन्मामेवं ब्रवीषि त्वं सर्वलोकाप्रियंकरी २४ केवलं त्वत्प्रियं कृत्वा भविष्यामि सुनिंदितः न त्वं भार्या

सुतः
कालरात्रिर्भरतो नेदृशः २५ सुत प्रशाधि विधवा राज्यं मृते मयि गते सुते सत्यपाशनिबद्धस्तु राममाहूय चाब्रवीत् २६
कैकेय्या वंचितो राम राज्यं कुरु निगृह्य तां त्वया वने न वस्तव्यं कैकेयीभरतो नृपः २७ पितरं चैव कैकेयीं नमस्कृत्य प्रद
क्षिणं कृत्वा नत्वा च कौशल्यां समाश्वास्य सलक्ष्मणः २८ सीतया भार्यया सार्द्धं सर थः ससुमंत्रकः दत्वा दानानि वि
विप्रेभ्यो दीनानाथेभ्य एव सः २९ मातृभिश्चैव विप्राद्यैः शोकार्तैर्निर्गतः पुरात् उषित्वा तमसातीरे रात्रौ पौरान् विहा-
य च ३० प्रभाते तमपश्यंतो योध्यां ते पुनरागताः रुदन् राजापि कौशल्या गृहमागात् सदुःखितः ३१
पौरा जनाः स्त्रियः सर्वा रुरुदू राजयोषितः रामो रथस्थश्चीराढ्यः शृंगवेरपुरं ययौ ३२ गुहेन पूजितस्तत्र इंगु-
दीमूलमाश्रितः लक्ष्मणः सगुहो रात्रौ चक्रतुर्जागरं हितौ ३३ सुमंत्रं सरथं त्यक्त्वा प्रातर्नावाथ जान्हवीं रामलक्ष्मण
सीताश्च तीर्णास्ते युः प्रयागकं ३४ भरद्वाजं नमस्कृत्य चित्रकूटं गिरिं ययुः वास्तुपूजां ततः कृत्वा स्थिता मंदाकिनी
तटे ३५ सीतायै दर्शयामास चित्रकूटं च राघवः नखैर्विदारयंतं तां काकं तच्चक्षुराक्षिपत् ३६ ऐषिकास्त्रेण शरणं
प्राप्तो देवान्विहाय सः रामे वनं गते राजा षष्ठेन्हि निशि चाब्रवीत् ३७ कौशल्यां स कथां पूर्वां यदज्ञानाद्धतः पुरा-
कौमारे शरयूतीरे यज्ञदत्तकुमारकः ३८ शब्दवेधात्कुंभेन शब्दं कुर्वंश्च तत्पिता शशाप विलपन्मात्रा शोकं कृ
त्वा रुदन्मुहुः ३९ पुत्रं विना मरिष्याव त्वं च शोकान्मरिष्यसि पुत्रं विना स्मरन् शोकात् कौशल्ये मरणं मम ४०
कथामुक्त्वाथ हा राम मुक्त्वा राजा दिवं गतः सुसं मत्वाथ कौशल्या सुप्ता शोकार्तमेव सा ४१ सुप्रभाते गायना
श्च सूतमागधवंदिनः प्रबोधका बोधयंति न च बुध्यत्यसौ मृतः ४२ कौशल्या तं मृतं ज्ञात्वा हा हतास्मीति चा
ब्रवीत् नरा नार्योथ रुरुदू रानीतो भरतस्तदा ४३ वसिष्ठाद्यैः सशत्रुघ्नः शीघ्रं राजगृहात्पुरीं दृष्ट्वा सशोकां कैकेयीं नि

दयामास दुःखितः ४४ अकीर्तिः पातिता मूर्ध्नि कौशल्यां संप्रशस्य च पितरं तैलद्रोणिस्थं संस्कृत्य सरयूतटे ४५
वसिष्ठाद्यैर्जनैरुक्तो राज्यं कुर्विति सोऽब्रवीत् व्रजामि राममानेतुं रामो राजा मतो बली ४६ शृंगवेरं प्रयागं च भरद्वा
जेन भोजितः नमस्कृत्य भरद्वाजं रामं लक्ष्मणमागतः ४७ पिता स्वर्गं गतो राम अयोध्यायां नृपो भव अहं वनं प्रया
स्यामि त्वदादेशप्रतीक्षकः ४८ रामः श्रुत्वा जलं दत्वा गृहीत्वा पादुके व्रज राज्यायाहं न यास्यामि त्यक्त्वा चीरजटाधरः
१ ४९ रामोक्तो भरतश्चायान्नंदिग्रामे स्थितो बली त्यक्त्वायोध्यां पादुके तु न्यस्य राज्यमपालयत् ५०

नारद उवाच रामो वसिष्ठं मातॄंश्च नत्वात्रिं च प्रणम्य सः अनुसूयां च तत्पत्नीं शरभंगं सुती
क्ष्णकं १ अगस्त्यभ्रातरं नत्वा अगस्त्यं तत्प्रसादतः धनुःखड्गं च संप्राप्य दंडकारण्यमागतः २ जनस्थाने पंचवट्यां
स्थितो गोदावरीतटे तत्र शूर्पणखा याता भक्षितुं तान् भयंकरी ३ रामं सुरूपं दृष्ट्वा सा कामिनी वाक्यमब्रवीत् क
स्त्वं कस्मात्समायातो भर्ता मे भव चा र्थितः ४ एतौ च भक्षयिष्यामि इत्युक्त्वा तं समुद्यता तस्या नासां च कर्णौ च रामो
क्तो लक्ष्मणोऽच्छिनत् ५ रक्तं क्षरंती प्रययौ खरं भ्रातरमब्रवीत् मरिष्यामि विनासाहं खर जीवामि वै तदा ६ रामस्य
भार्या सीतासौ तस्यासील्लक्ष्मणोऽनुजः तेषां यद्रुधिरं सोष्णं पाययिष्यसि मां यदि ७ खरस्तथेति तामुक्त्वा चतुर्दशसह
स्रकैः रक्षसां दूषणेनागाद्योद्धुं त्रिशिरसा सह ८ रामं रामोऽपि युयुधे शरैर्विव्याध राक्षसान् हस्त्यश्वरथपादातं
बलं निन्ये यमक्षयं ९ त्रिशीर्षाणं खरं रौद्रं युध्यंतं चैव दूषणं ययौ शूर्पणखा लंकां रावणाग्रे पतद्भुवि १० अब्रवीद्रा
वणं क्रुद्धा न त्वं राजा न रक्षकः खरादिहंतू रामस्य सीतां भार्यां हरस्व च ११ रामलक्ष्मणरक्तस्य पानाज्जीवामि नान्यथा
तथेत्याह च तच्छ्रुत्वा मारीचं प्राह वै व्रज १२ स्वर्णचित्रो मृगो भूत्वा रामलक्ष्मणकर्षकः सीताग्रे तां हरिष्यामि अन्यथा मर ६

णं तव ॥१३॥ मारीचो रावणं प्राह रामो मृत्युर्धनुर्धरः ॥ रावणादपि मर्तव्यं मर्तव्यं राघवादपि ॥१४॥ अवश्यं यदि मर्तव्यं वरं रा
मो न रावणः ॥ इति मत्वा मृगो भूत्वा सीताग्रे व्यचरन्मुहुः ॥१५॥ सीतया प्रेरितो रामः शरेणाथावधीच्च तं ॥ म्रियमाणो मृगः प्रा
ह हा सीते लक्ष्मणेति च ॥१६॥ सौमित्रिः सीतया प्रोक्तो विरुद्धं राममागतः ॥ रावणोऽप्यहरत्सीतां हत्वा गृध्रं जटायुषं ॥१७॥
जटायुषा स विरथो ह्यंके नादाय जानकीं ॥ गतो लंकामशोकाख्ये धारयामास चाब्रवीत् ॥१८॥ भव भार्या ममाग्र्या त्वं राक्षस्यो
रक्षतामियं ॥ रामो हत्वा तु मारीचं दृष्ट्वा लक्ष्मणमब्रवीत् ॥१९॥ मायामृगोऽसौ सौमित्रे यथा त्वमिह चागतः ॥ तथा सीता हृता नूनं ना
पश्यत्स गतो गतां ॥२०॥ शुशोच विललापार्तो मां त्यक्त्वा क्व गतासि वै ॥ लक्ष्मणाश्वासितो रामो मार्गयामास जानकीं ॥२१॥ दृष्ट्वा
जटायुस्तं प्राह रावणो हृतवांश्च तां ॥ मृतोऽथ संस्कृतस्तेन कबंधं चावधीत्ततः ॥२२॥ शापमुक्तोऽब्रवीद्रामं स त्वं सुग्रीवमाव्रज
इत्याग्नेये रामायणे अरण्यकांडे सप्तमोऽध्यायः ॥ नारद उवाच ॥ रामः पंपासरो गत्वा सशोचन् शबरीं ततः ॥ हनूमता स सुग्रीवं नी
तो मित्रं चकार ह ॥१॥ सप्त तालान् विनिर्भिद्य शरेणैकेन पश्यतः ॥ पादेन दुंदुभेः कायं चिक्षेप दश योजनं ॥२॥ तद्रिपुं वालि
नं हत्वा भ्रातरं वैरकारणं ॥ किष्किंधां कपिराज्यं च हृतां तारां समर्पयत् ॥३॥ ऋष्यमूके हरीशाय किष्किंधेशोऽब्रवीत्स च
सीतां प्राप्स्यसे यद्वत्तथा राम करोमि तत् ॥४॥ तच्छ्रुत्वा माल्यवत्पृष्ठे चातुर्मास्यं चकार सः ॥ किष्किंधायां च सुग्रीवो दैवे
नायाति दर्शनं ॥५॥ तदाब्रवीद्रामोक्तो लक्ष्मणो व्रज राघवं ॥ न स संकुचितः पंथा येन वाली हतो गतः ॥६॥ समये तिष्ठ
सुग्रीव मा वालिपथमन्वगाः ॥ सुग्रीव आह संसक्तो गतं कालं न बुद्धवान् ७ इत्युक्त्वा स गतो रामं नत्वोवाच हरीश्वरः ॥ आ
नीता वानराः सर्वे सीतायाश्च गवेषणे ॥८॥ त्वन्मताः प्रेषयिष्यामि विचिन्वंतु च जानकीं ॥ पूर्वादौ मासमायां
तु मासादूर्ध्वं निहन्मि तान् ॥९॥ इत्युक्ता वानराः पूर्वपश्चिमोत्तरमार्गगाः ॥ जग्मू रामं स सुग्रीवमपश्यंतस्तु जानकीं ॥१०॥ रा

सांगुलीयसंगृह्य हनूमान्वानरैः सह दक्षिणामार्गयामास स्कप्रभायां गुहांतिके ११ मासादूर्ध्वंच विंध्यस्था अपश्यंनच
जानकीं ऊचुर्वृथामरिष्यामो जटायुर्धन्यएवसः १२ सीतार्थेयोत्यजत्प्राणान्रावणेनहतोरणे तच्छ्रुत्वाप्राहसंपाति विहा
यकपिभक्षणं १३ भ्रातासोमेजटायुर्वैमयोड्डीनोर्कमंडलं अर्कतापाद्रक्षितो वा दग्धपक्षोहमत्रवै १४ रामवार्ताश्र-
वात्पुनः पक्षो जातो भूयोथजानकीं पश्याम्यशोकवनिकागतां लंकागतां किल शतयोजनविस्तीर्णे लवणाब्धौ त्रिकूटके
ज्ञात्वारामंसुग्रीवं वानराः कथयंतुवै १६

नारदउवाच संपातिवचनंश्रुत्वा हनूमानंगदादयः अब्धिंदृष्ट्वाब्रुवंऽब्धिं लंघयेत्कोनुजीवयेत् १ कपीनांजीवनार्था
य रामकार्यप्रसिद्धये शतयोजनविस्तीर्णं पुप्लुवेऽब्धिं समारुतिः २ दृष्टोत्थितंचमैनाकं सिंहिकां विनिपात्यच लंकां
दृष्ट्वा राक्षसानां गृहाणि वनिता गृहे ३ दशग्रीवस्यकुंभस्य कुंभकर्णस्यरक्षसः विभीषणस्येंद्रजितो गृहेन्येषांच-
रक्षसां ४ नापश्यत्पानभूम्यादौ सीतांचिंतापरायणः अशोकवनिकांगत्वा दृष्टवान्शिंशपातले ५ राक्षसीर
क्षितांसीतां भवभार्येति यादिनं रावणंशिंशपास्थो थनेति सीतांतुवादिनीं ६ भवभार्यारावणस्य राक्षसीर्वादि
नीः कपिः गतेतु रावणेप्राह राजादशरथोभवत् ७ रामोस्यलक्ष्मणः पुत्रौ वनवासंगतौवरौ रामपत्नीजानकीत्वं-
रावणेनहृताबलात् रामः सुग्रीवमित्रस्त्वा मार्गयन्प्रेषयच्चमां साभिज्ञानंचांगुलीयं रामदत्तंगृहाणवै ९
सीतांगुलीयंजग्राह साऽपश्यन्मारुतिंतरौ भूयोग्रेचोपविष्टंतमुवाचयदिजीवति १० रामः कथंनमयतिशं
कितामब्रवीत्कपिः रामःसीतेनजानीते ज्ञात्वात्वांसनयिष्यति ११ रावणंराक्षसंहत्वा सबलंदेवि मारुचः
साभिज्ञानंदेहिमेत्वं मणिंसीताददत्कपौ १२ उवाचमांयथारामो नयेच्छीघ्रंतथाकुरु काकाक्षिपातनकथां-

प्रानर्याहिहिशोकह १३ मणिंकथांगृहीत्वाहहनूमानेष्यतेपतिः अथयातेत्वयिराकाचित्पृष्टमारुहमेशुभे १४ अथत्वांदर्श
यिष्यामि ससुग्रीवंसराघवं सीताब्रवीद्धनूमंतं नयतांमांहिराघवः १५ हनूमान्सदशग्रीवदर्शनोपायमाकरोत् वनंबभं
जतत्पालान्हत्वादंतनखादिभिः १६ हत्वातु किंकरान्सर्वान्सप्तमंत्रिसुतानपि पुत्रमक्षकुमारंच शक्रजिच्चबबंधतं १७
नागपाशेनपिंगाक्षंदर्शयामासरावणं उवाचवानरंकस्त्वं मारुतिःप्राहरावणं १८ रामदूतो राघवाय सीतांदेहिमरिष्यसि
रामबाणैर्हतः सार्द्धंलंकास्थैराक्षसैर्ध्रुवं १९ रावणो हंतुमुद्युक्तो विभीषणनिवारितः दीपयामासलांगुलं दीप्तपुच्छः समा-
रुतिः २० दग्ध्वालंकांराक्षसीश्च दृष्ट्वा सीतांप्रणम्यतां समुद्रपारमागम्य दृष्टा सीतेतिचाब्रवीत् २१ अंगदादीनंगदाद्यैः
पीत्वामधुवनेमधु जित्वादधिमुखादींश्च दृष्ट्वारामंचतेब्रुवन् २२ दृष्टा सीतेतिरामोपि हृष्टःपप्रच्छमारुतिं कथंदृष्टात्वया
सीता किमुवाचचमांप्रति २३ सीताकथामृतेनैव सिंचमांकामवह्निगं हनूमानब्रवीद्रामं लंघयित्वाब्धिमागतः २३ सीतांदृ
ष्ट्वापुरींदग्ध्वा सीतामणिंगृहाणवै हत्वात्वंरावणंसीतां प्राप्स्यसेराममाशुचः २५ गृहीत्वातंमणिंरामो रुरोदविरहातुरः
मणिंदृष्ट्वाजानकीमे दृष्टासीतानयस्वमां २६ तयाविना नजीवामि सुग्रीवाद्यैः प्रबोधितः समुद्रतीरंगतवान्तत्ररा
मंविभीषणः २७ गतस्तिरस्कृतोभ्रात्रा रावणेनदुरात्मना रामायदेहिसीतांत्वमित्युक्तेनासहायवान् २८ रामो
विभीषणंमित्रं लंकैश्वर्येभ्यषेचयत् समुद्रंप्रार्थयन्मार्गं यदानादात्तदाशरैः २९ भेदयामासरामंच उवाचाब्धिः
समागतः नलेनसेतुंबध्वाब्धौ लंकांव्रजगभीरकः ३० अहंत्वयाकृतःपूर्वं रामोपिनलसेतुना कृतेनतरुशैलाद्यैर्ग-
तःपारंमहोदधेः ९३१ वानरैःससुवेलस्थः सहलंकांददर्शवै

नारदउवाच रामोक्तश्चांगदोगत्वा रावणंप्राहजानकीं दीयतांराघवाया शुअन्यथात्वंमरिष्यसि१

२ राक्षसावानरांजघ्नुःशरशक्तिगदादिभिः॥

अग्निपु०

रावणोहंतुमुद्युक्तःसंगोप्ताःतराक्षसः रामायाहदशग्रीवोयुद्धमेकंतुमन्यते २ रामोयुद्धायतच्छ्रुत्वालंकांसकपिराययौ वा
नराहनुमान्मैंदोद्विविदोजांबवान्नलः ३ नीलस्तारोंगदोधूम्रःसुषेणःकेसरीगजः पनसोविनतोरंभःशरभःक्रथनोबली
गवाक्षोदधिवक्त्रश्चगवयोगंधमादनः एतेचान्येचसुग्रीवएतैर्युक्तोह्यसंख्यकैः ५
. वानराराक्षसांजघ्नुःर्नखदंतशिलादिभिः ६ हस्त्यश्वरथपादातंराक्षसानांबलंहतं हनूमान्गिरिशृंगेणधूम्रा
क्षमवधीद्रिपुं ७ अकंपनंप्रहस्तंचयुध्यंतंनीलआवधीत् इंद्रजिच्छरबंधाच्चविमुक्तौरामलक्ष्मणौ ८ तार्क्ष्यसंदर्शनाद्
बाणैर्जघ्नतूराक्षसंबलं रामःशरैर्जर्जरीतंरावणंचाकरोद्रणे ९ रावणःकुंभकर्णंच्यबोधयान्महासदुःखितः कुंभकर्णःप्र
बुद्धोथपीत्वाघटसहस्रकं १० मद्यस्यमहिषादीनांभक्षयित्वाहरावणं सीतायाहरणंपापंकृतंत्वंगुरुर्यतः ११ अतोगच्छा-
मियुद्धायरामंहन्मिसवानरं इत्युक्त्वावानरान्सर्वान्कुंभकर्णोममर्दह १२ गृहीतस्तेनसुग्रीवःकर्णनासंचकर्तसः कर्ण
नासाविहीनोसौभक्षयामासवानरान् १३ रामोथकुंभकर्णस्यबाहुचिच्छेदसायकैः ततःपादौततश्छित्वाशिरोभूमौव्य
पातयत् १४ अथकुंभोनिकुंभश्चमकराक्षश्चराक्षसः महोदरमहापार्श्वौमत्तउन्मत्तराक्षसः १५ प्रघसोभासकर्णश्च
विरूपाक्षश्चसंयुगेदेवांतकोनरांतश्चत्रिशिराश्चातिकायकः १६ रामेणलक्ष्मणेनैतेवानरैःसविभीषणैः युध्यमानास्त
थान्येराक्षसाभुविपातिताः १७ इंद्रजिन्माययायुध्यन्रामादीन्सबबंधह वरदत्तैर्नागबाणैरोषध्यानौविशल्यकौ १८ वि
शल्ययाव्रणरूतामारुत्यानीतपर्वते हनूमान्धारयामासतत्रामंयत्रसंस्थितं १९ निकुंभिलायांहोमादिकुर्वंतंतंहिलक्ष्मणः
शरैरिंद्रजितंवीरंयुद्धेनंत्वव्यशातयत् २० रावणःशोकसंतप्तःसीतांहंतुंसमद्यतः अविंध्यवारितोराजारथस्थःसब
लोययौ २१ इंद्रोक्तमातलीरामंरथस्थंप्रचकारसं रामरावणयोर्युद्धंरामरावणयोरिव २२ रावणोवानरान्हंतिमारुता
द्याश्चरावणं रामःशस्त्रैस्तमस्त्रैश्चववर्षजलदोयथा २३ तस्यध्वजंसचिच्छेदरथमश्वांश्चसारथिं धनुर्बाहुंशिरांश्चै-

रारभः

६

Dr. BHAU DAJI MEMORIAL

श्चैवउत्तिष्ठंतिशिरांसिह २४ पैतामहेनहृदयंभित्वारामेणरावणः भूतलेपतितेसर्वेराक्षसैरुरुदुःस्त्रियः २५ आश्वा
स्यतंचसंस्कृत्यरामाज्ञयोविभीषणः हनूमतानयद्रामःसीतांशुद्धांगृहीतवान् २६ रामोवन्हौप्रविष्टांतांशुद्धामिंद्रादि
भिःस्तुतः ब्रह्मणादशरथेनत्वंविष्णूराक्षसमर्दनः २७ इंद्रोर्चितोमृतश्चाजीवयामासवानरान् रामेणपूजिताजग्मुर्युद्धं
दृष्ट्वादिवंचते २८ रामोविभीषणायादाद्धकाममभ्यर्च्यवानरान् ससीतःपुष्पकेस्थित्वागतमार्गेणवैगतः २९ दर्शयन्वनदु
र्गाणिसीतायेहृष्टमानसः भरद्वाजंनमस्कृत्यनंदिग्रामंसमागतः ३० भरतेननतश्चागादयोध्यांतत्रसंस्थितः वसिष्ठादी
न्नमस्कृत्यकौशल्यांचैवकैकयीं ३१ सुमित्रांप्राप्यराज्योथद्विजादीन्सोभ्यपूजयत् वासुदेवंस्वमात्मानमश्वमेधैरथायज
त् ३२ सर्वदानानिसद्देपालयामाससप्रजाः पुत्रवद्धर्मकामादीन्दुष्टनिग्रहणेरतः ३३ सर्वधर्मपरोलोकःसर्वसस्या
चमेदिनी नाकालमरणंचासीद्रामेराज्यंप्रशासति ३४
नारदउवाच राजास्थंराघवंजग्मुरगस्त्याद्याःसुपूजिताः धन्यस्त्वंविजयीयस्मादिंद्रजिद्विनिपातितः ३५ ब्रह्मात्मजःपुलस्त्यो पाति
तोविश्रवास्तस्यकैकसी पुष्पोत्कटाभूत्प्रथमातत्पुत्रोभूद्धनेश्वरः २ नैकश्यांरावणोजज्ञेविंशद्बाहुर्दशाननः तपसाब्रह्म
दत्तेनवरेणजितदैवतः ३ कुंभकर्णःसनिद्रोभूद्धर्मिष्ठोभूद्विभीषणः स्वसाशूर्पणखातेषांरावणान्मेघनादकः ४ इंद्रंजि
त्वेंद्रजिच्चाभूद्रावणादधिकोबली हतस्त्वयालक्ष्मणेनदेवादेःक्षेममिच्छता ५ इत्युक्त्वातेगताविप्राअगस्त्याद्यानमस्कृताः
देवप्रार्थितरामोक्तःशत्रुघ्नोलवणार्दनः ६ सोभवन्मधुराकारीरामोक्तोभरतोवधीत् कोटित्रयंचशैलूषपुत्राणां-
निशितैःशरैः ७ शैलूषदुष्टगंधर्वसिंधुतीरनिवासिनं तक्षंचपुष्करंपुत्रंस्थापयित्वाथदेशयोः ८ भरतोगात्सशत्रुघ्नो

श्रात

राघवं पूजयंस्थितः रामो दुष्टान्निहत्याश्वो शिष्टांसंपाल्यमानवः ९ पुत्रौकुशलवौजातौ वाल्मीकेराश्रमेपरे लोकापवादत्यक्ता
यां त्वातौ स्वचरितश्रवात् १० राज्येभिषिच्य ब्रह्माहमस्मीति ध्यानतत्परः दशवर्षसहस्राणिदशवर्षशतानिच ११ राज्यंकृत्वा
क्रतून्कृत्वा स्वर्गंदेवार्चितोययौ सपौरःसानुजःसीतापुत्रोजनपदान्वितः अग्निरुवाच वाल्मीकिर्नारदाच्छ्रुत्वारामायणमका
रयत् सविस्तरंयएतच्च शृणुयात्सदिवंव्रजेत् १२
अग्निरुवाच हरिवंशंप्रवक्ष्यामि विष्णुनाभ्यंबुजादजः ब्रह्मणोत्रिस्ततःसोमः सोमाज्जातःपुरूरवाः १ तस्मादायुर-
भूत्तस्मान्नहुषोतोययातिकः यदुंचतुर्वसुंतस्माद्देवयानीव्यजायत २ द्रुह्युंचानुंचपूरुंच शर्मिष्ठावार्षपर्वणी यदोःकु
लेयादवाश्चवसुदेवस्तदुत्तमः ३ भुवोभारावतारार्थ देवक्यांवसुदेवतः हिरण्यकशिपोःपुत्राः षड्गर्भायोगनिद्रया
४ विष्णुप्रयुक्तयानीतादेवकीजठरंपुरा अभूच्चसप्तमोगर्भो देवक्याजठराद्बलः ५ संक्रामितोभूद्रोहिण्यांरौहिणेय
स्ततोहरिः कृष्णाष्टम्यां चनभसि अर्धरात्रेचतुर्भुजः ६ देवक्यावसुदेवेन स्तुतोबालोद्विबाहुकः वसुदेवंकंसभया-
द्यशोदाशयनेनयत् ७ यशोदाबालिकांगृह्य देवकीशयनेनयत् कंसोबालध्वनिंश्रुत्वातांचिक्षेपशिलातले ८ वारितोपिसदेव
क्यामृत्युर्गर्भोष्टमोमम श्रुत्वाशरीरिणींवाचंमत्तोगर्भास्तुमारिताः ९ समर्पितास्तुदेवक्या विवाहसमयेरिताः साक्षिप्ताबालि
कांकंसमाकाशस्थाब्रवीदिदं १० किंमयाक्षिप्तयाकंस जातोयस्त्वांवधिष्यति सर्वस्वभूतोदेवानां भूभारहरणायसः ११
इत्युक्त्वासाचशुंभादीन्हत्वाइंद्रेणचस्तुता आर्यादुर्गावेदगर्भा अंबिकाभद्रकाल्यपि १२ भद्राक्षम्याक्षेमकरीनैकबा
हुर्नामभितां त्रिसंध्यंयःपठेन्नाम सर्वान्कामानवाप्नुयात् १३ कंसोपिपूतनादींश्चप्रेषयद्बालनाशने यशोदापतिनंद
यवसुदेवनचार्पितौ १४ रक्षणायचकंसादेर्भीतेनैवहिगोकुले रामकृष्णौचेरतुस्तौगोभिर्गोपालकैःसह १५ सर्वस्य
जगतःपालौ गोपालौतौबभूवतुः कृष्णश्चोलूखलेबद्धोदाम्नाव्यग्रयशोदया १६ यमलार्जुनमध्येगाद्भग्नौचयमलार्जुनौ

परिवृत्तश्चशकटःपादक्षेपात्स्तनार्थिना १७ पूतनास्तनपानेनसाहताहंतुमुद्यता वृंदावनगतःकृष्णःकालीयंयमुनाह्रदा
दात् १८ जित्वानिःसार्यचाब्धिस्थं चकारबलसंस्तुतः क्षेमंतालवनंचक्रेहत्वाधेनुकगर्दभं १९ अरिष्टंवृषभंहत्वा
केशिनंहयरूपिणं शक्रोत्सवंपरित्यज्य कारितोगोत्रयज्ञकः २० पर्वतंधारयित्वाचशक्राद्वृष्टिर्निवारिता नमस्कृतमहेंद्रेण
गोविंदस्यानुनोर्पितः २१ इंद्रोत्सवस्तुतुष्टेनभूयःकृष्णेनकारितः रथस्थोमथुरांचागात्कंसोक्ताक्रूरसंस्तुतः २२ गोपी-
भिरनुरक्ताभिःक्रीडिताभिर्निरीक्षितः रजकंचाप्रयच्छंतंहत्वावस्त्राणिचाग्रहीत् २३ सहरामेणमाल्यभून्मालाकारेवरंद
दौ कृतानुलेपनांकुब्जामृजुंचक्रेहनद्धजं २४ मत्तंकुवलयापीडंद्वारिरंगंप्रविश्यच कंसादीनांपश्यतांचमंचस्थानां-
नियुद्धकं २५ चक्रेचाणूरमल्लेनमुष्टिकेनबलोकरोत् चाणूरमुष्टिकौताभ्यांहतौमल्लौतथापरौ २६ मथुराधिपतिंकंसंह
त्वातत्पितरंहरिः चक्रेयादवराजानमस्तिप्राप्तीचकंसगे २७ जरासंधस्यतेपुत्र्योजरासंधस्तदीरितः चक्रेसमथुरा
रोधंयादवैर्युयुधेशरैः २८ रामकृष्णौचमथुरांत्यक्त्वागोमंतमागतौ जरासंधंविजित्याजौपौंड्रकंवसुदेवकं २९ पुरीं
तुद्वारकांकृत्वान्यवसद्यादवैर्वृतः भौमंतुनरकंहत्वा तेनानीताश्चकन्यकाः ३० देवगंधर्वयक्षाणांताउवाहजनार्दनः षो-
डशस्त्रीसहस्राणिरुक्मिण्याद्यास्तथाष्टच ३१ सत्यभामासमायुक्तोगरुडेनरकार्दनः मणिशैलंसरत्नंच इंद्रंजित्वा
हरिर्दिवि ३२ पारिजातंसमानीयसत्यभामागृहेकरोत् सांदीपनेश्चशस्त्रास्त्रंज्ञात्वातद्बालकंददौ ३३ जित्वापंचजनं
दैत्यंयमेनचसपूजितः अवधीत्कालयवनं मुचुकुंदेनपूजितः ३३ वसुदेवंदेवकींचभक्तविप्रांश्चसोर्चयत् रेवत्यांब
लभद्राच्चजज्ञातेनिशठोल्मुकौ ३४ कृष्णात्सांबोजांबवत्यांअन्यास्वन्येभवन्सुताः प्रद्युम्नोभूच्चरुक्मिण्यांषष्ठेन्हि-
सहृतोबलात् ३५ शंबरेणांबुधौक्षिप्तोमत्स्योजग्राहधीवरः समत्स्यंशंबरायादान्मायावत्यैचशंबरः ३६ मायावतीम-

त्स्यमध्ये दृष्ट्वास्वपतिमादरात् पुपोष स्वात्तं चाथाब्रवीत् रति स्ते हं पतिर्मम ३७ कामस्त्वं शंभुनानंगः रतो हं शंबरेणच हृतान
तस्य पत्नीत्वं मामज्ञः शंबरंजहि ३८ तच्छ्रुत्वाशंबरं हत्वाप्रद्युम्नः सहभार्यया मायावत्यायेयौ कृष्णं कृष्णोनोक्ताथरुक्मि
णी ३९ प्रद्युम्नादनिरुद्धोभूदुषापतिरुदारधीः बाणोबलि सुतस्तस्य सुतो बाणो शोणितंपुरं ४० तपसा शिवपुत्रोभूत्
मयूरध्वजपाततः युद्धं प्राप्स्यसि बाण त्वं बाणं तुष्टः शिवो भ्यधात् ४१ शिवेन क्रीडतीं गौरीं दृष्ट्वोषा सस्पृहा पतौ तामाह गौरी
भर्त्तानिशि स्वप्ने तु दर्शनात् ४२ वैशाखमासद्वादश्यां पुमान् भर्ता भविष्यति गौर्युक्ताहर्षिता चोषा गृहे सुप्ता ददर्श तं ४३
आत्मनासंगतं ज्ञात्वा तत्सख्या चित्रलेखया लिखितात् चित्रपटादनिरुद्धं समानयत् ४४ कृष्णपौत्रं द्वारकातो दुहिता बा
णमंत्रिणः कुभांडस्यानिरुद्धो गा द्रामह्युषया सह ४५ बाणध्वजस्य संपाते रक्षिभिः सनिवेदितः अनिरुद्धस्य बाणे
नयुद्धमासीत्सुदारुणं ४६ श्रुत्वा तु नारदात् कृष्णः प्रद्युम्नबलभद्रवान् गरुडस्थोथ जित्वाग्नीन् ज्वरं माहेश्वरं तथा
४७ हरिशंकरयोर्युद्धं बभूवाथ शराशरि नंदीवि नायकस्कंदमुखास्तार्क्ष्यादिभिर्जिताः ४८ जृंभिते शंकरे नष्टे जृं
भणास्त्रेण विष्णुना छिन्नं सहस्रबाहूनां रुद्रेणाभयमर्थितं ४९ विष्णुना जीवितो बाणो द्विबाहुः प्राब्रवीच्छिवं त्वया द
त्तं भयं दत्तं बाणस्यास्य मयाच्युत ५० आवयोर्नास्ति भेदो वै भेदी नरकमाप्नुयात् शिवाद्यैः पूजितो विष्णुः सोनिरुद्ध उषा
दियुक् ५१ द्वारकां तु गतो रेमे उग्रसेनादियादवैः अनिरुद्धात्मजो वज्रो मार्कंडेयात्तु सर्ववित् ५२ बलभद्रः प्रलंबघ्नोय
मुनाकर्षणो भवत् द्विविदस्य कपेर्भेत्ता कौरवोन्मादनाशनः ५३ हरी रेमे नैकमूर्ती रुक्मिण्यादिभिरीश्वरः पुत्रानुत्पा
दयामास त्वसंख्यातान्स यादवान् हरिवंशं पठेद्यः स प्राप्तकामो हरिं व्रजेत्

अग्निरुवाच भारतं संप्रवक्ष्यामि कृष्णमाहात्म्यलक्षणं भूभारमहरद्विष्णुर्निमित्तीकृत्य

स्ति

य

पांडवान् १ विष्णुनाभ्यब्जजो ब्रह्मा ब्रह्मपुत्रोत्रिरत्रितः सोमः सोमाद्बुधस्तस्मादैल आसीत्पुरूरवाः २ तस्मादायुस्ततो
राजा नहुषोतो ययातिकः ततः पुरुस्तस्य वंशे भरतोथ नृपः कुरुः ३ तद्वंशे शंतनुस्तस्माद्भीष्मो गंगासुतोनुजौ चित्रांग
दो विचित्रश्च सत्यवत्यां च शंतनोः ४ स्वर्गं गते शंतनौ च भीष्मो भार्याविवर्जितः अपालयत् भ्रातृराज्यं बालश्चित्रांगदो ह
तः ५ चित्रांगदेन द्वे कन्ये काशिराजस्य चांबिका अंबालिका च भीष्मेण आनीते विजितारिणा ६ भार्ये विचित्रवीर्यस्य
यक्ष्मणा स दिवं गतः सत्यवत्या ह्यनुमतादंबिकायां नृपोभवत् ७ धृतराष्ट्रोंबालिकायां पांडुश्च व्यासतः सुतः गांधा
र्यां धृतराष्ट्राच्च दुर्योधनमुखं शतं ८ शतशृंगाश्रमपदे भार्यायोगाच्च तन्मृतिः ऋषिशापात्ततो धर्मात् कुंत्यां पांडोर्युधिष्ठि
ष्ठिरः ९ वाताद्भीमोर्जुनः शक्राद्यमावश्विकुमारतः नकुलः सहदेवश्च पांडुर्माद्रीयुतो मृतः १० कर्णः कुंत्या हि कन्याया जातो दु
र्योधनाश्रितः कुरुपांडवयोर्वैरं दैवयोगाद्बभूव ह ११ दुर्योधनो जतुगृहे पांडवान् दहत् कुधीः दग्धागाराद्विनिष्क्रांता मातृस
हास्तु पांडवाः १२ ततस्त एकचक्रायां ब्राह्मणस्य निवेशने मुनिवेषास्थिताः सर्वे निहत्य बकराक्षसं १३ ययुः पांचालवि
षयं द्रौपद्यास्ते स्वयंवरे संप्राप्ता बाहुवेधेन द्रौपदी पंचपांडवैः १४ अर्द्धराज्यं ततः प्राप्ता ज्ञाता दुर्योधनादिभिः गांडिवं च
धनुर्दिव्यं पावकाद्रथमुत्तमं १५ सारथिं चार्जुनः संख्ये कृष्णमक्षय्यसायकान् ब्रह्मास्त्रादीं स्तथा द्रोणात् सर्वे स
र्वविशारदाः १६ कृष्णेन सोर्जुनो वह्निं खांडवे समतर्पयत् इंद्रदृष्टिं वारयंश्च शरवर्षेण पांडवाः १७ जिता दिशः पां
डवैश्च राज्यं चक्रे युधिष्ठिरः बहुस्वर्णं राजसूयं न सेहे तं सुयोधनः १८ भ्रात्रा दुःशासनेनोक्तः कर्णेन प्राप्तसूनिना द्यूतका
र्ये शकुनिना द्यूतेन स युधिष्ठिरं १९ अजयेनैकस्य राज्यं च सभास्थो मायया सैहत् जितो युधिष्ठिरो भ्रातृयुक्तश्चारण्यकं
ययौ २० वने द्वादश वर्षाणि प्रतिज्ञातानि सोनयत् अष्टाशीतिसहस्राणि भोजयन् पूर्ववद्द्विजान् २१ सधौम्यो द्रौ

र्व

पदीपश्च सूतः प्रायाद्विराटकं कंकोद्विजोस्य विज्ञातो राजाभीमोथसूपकृत् २२ बृहन्नलार्जुनोभार्यासैरंध्री यमजौ
तथा अन्यनामा भीमसेनः कीचकंचावधीत् निशि २३ द्रौपदीं हर्तुकामं तं अर्जुनश्चाजयत् कुरून् कुर्वतो गोग्रहादींश्च
तैर्ज्ञाताः पांडवा अथ २४ सुभद्रा कृष्णभगिनी अर्जुनात्समजीजनत् अभिमन्युं ददौ तस्मै विराटश्चोत्तरां सुतां २५ स-
प्ताक्षौहिणीश आसीद्धर्मराजो रणाय सः कृष्णो दूतोब्रवीद्गत्वा दुर्योधनममर्षणं २६ एकादशाक्षौहिणीशं नृपं दुर्योधनं त
तदा युधिष्ठिरायार्द्धराज्यं देहि ग्रामांश्च पंच च २७ युध्यस्व वा वचः श्रुत्वा कृष्णमाह सुयोधनः भूसूच्यग्रं न दास्यामि-
त्स्ये यो[?] संग्रहणोद्यतः २८ विश्वरूपं दर्शयित्वा अधृष्यं विदुरार्चितः प्रागाद्युधिष्ठिरं प्राह योधयेनं सुयोधनं २९

अग्निरुवाच यौधिष्ठिरी दौर्योधनी कुरुक्षेत्रं ययौ चमूः भीष्मद्रोणादिक
नृद्दृष्ट्वा नायुध्यत गुरूनिति १ पार्थं तु वाच भगवान् शोच्या भीष्ममुख्यकाः शरीराणि विनाशीनि न शरीरी विनश्यति २
अयमात्मा परं ब्रह्म अहं ब्रह्मास्मि विद्धि तत् सिध्यसिद्ध्योः समो योगी राजधर्मं प्रपालय ३ कृष्णोक्तोथार्जुनो युध्यद्रथस्थो
वाद्यशब्दवान् भीष्मसेनापतिरभूदादौ दौर्योधने बले ४ पांडवानां शिखंडी च तयोर्युद्धं बभूव ह धार्तराष्ट्रान् शिखंड्याद्याः
पांडवा जघ्नुराहवे ५ देवासुरसमं युद्धं कुरुपांडवसेनयोः बभूव स्वस्थदेवानां पश्यतां प्रीतिवर्द्धनं ६ भीष्मास्त्रैः पांडवं सै
न्यं दशाहोभिर्न्यपातयत् दशमेह्न्यर्जुनो बाणैर्भीष्मं वीरं ववर्ष ह ७ शिखंडी द्रुपदोक्तोस्त्रैर्ववर्ष जलदो यथा हस्त्यश्वरथ
पादातमन्योन्यास्त्रनिपातितं ८ भीष्मः स्वच्छंदमृत्युश्च युद्धमार्गं प्रदर्श्य च वसूक्तो वसुलोकाय शरशय्यागतः स्थितः
९ उत्तरायणमीक्षंश्च ध्यायन् विष्णुं स्तुवन् स्थितः दुर्योधने तु शोकार्ते द्रोणः सेनापतिस्त्वभूत् १० पांडवे हर्षिते सैन्ये धृ
ष्टद्युम्नश्च भूपतिः तयोर्युद्धं बभूवोग्रं यमराष्ट्रविवर्द्धनं ११ विराटद्रुपदाद्याश्च निमग्ना द्रोणसागरे दौर्योधनी महासे

६ धार्तराष्ट्राः पांडवांश्च जघ्नुर्युद्धे सभीष्मकाः ५

५ गदयाऽत्यानुजांस्तस्य तस्मिन्नष्टादशेऽहनि ॥
रात्रौ ससुप्तं च बलं पांडवानां न्यपातयत् ॥

नाहस्त्यश्वरथपत्तिनी १२ धृष्टद्युम्नाधिपतिना द्रोणः काल इवाबभौ हतोश्वत्थामा चेत्युक्ते द्रोणः शस्त्राणि चात्यजत् १३
धृष्टद्युम्नः शराक्रांतः पतितः स महीतले पंचमे हनि दुर्धर्षः सर्वक्षत्रप्रमथ्य च १४ दुर्योधने तु शोकार्ते कर्णः सेनापतिस्त्व
भूत् अर्जुनः पांडवानां च तयोर्युद्धं बभूव ह १५ शस्त्राशस्त्रि महारौद्रं देवासुररणोपमं कर्णार्जुनाख्ये संग्रामे कर्णोरी
नवधीच्छरैः १६ द्वितीयेहनि कर्णस्तु अर्जुनेन निपातितः शल्योदिनार्द्धं युयुधे ह्यवधीत्तं युधिष्ठिरः १७ युयुधे भीम-
सेनेन हतसैन्यः सुयोधनः बहून् हत्वा नरादींश्च भीमसेनमथाद्रवत् १८ गदया प्रहरंतं तु भीमस्तं तु व्यपातयत् अ
क्षौहिणी प्रमाणं तु अश्वत्थामा महाबलः १९ द्रौपदेयान्स पांचालान् धृष्टद्युम्नं च सोवधीत् पुत्रहीनां द्रौपदीं तां रुदंतीमर्जुन
स्ततः २० शिरोमणिं तु जग्राह ऐषिकास्त्रेण तस्य च अश्वत्थामास्त्रनिर्दग्धं जीवयामास वै हरिः २१ उत्तरा या स्ततो गर्भं स
परिक्षिद्भून्नृपः कृतवर्मा कृपो द्रौणिस्त्रयो मुक्ता स्ततो रणात् २२ पांडवाः सात्यकिः कृष्णः सप्त मुक्ता न चापरे स्त्रि
यश्चार्ताः समाश्वास्य भीमाद्यैः स युधिष्ठिरः २३ संस्कृत्य प्रहतान् वीरान् दत्तोदकधनादिकः भीष्माच्छांतनवाच्छ्रुत्वा
धर्मान् सर्वांश्च शांतिदान् २४ राजधर्मान्मोक्षधर्मान्दानधर्मान्नृपोभवत् अश्वमेधे ददौ दानं ब्राह्मणेभ्योरिमर्दनः
२५ श्रुत्वार्जुनान्मौशले यं यादवानां च संक्षयं राज्ये परिक्षितं स्थाप्य सानुजः स्वर्गमाप्तवान् २६

अग्निरुवाच युधिष्ठिरे तु राज्यस्थे आश्रमादाश्रमांतरं धृतराष्ट्रो वनमगाद्गांधारी च पृथा
द्विज १ विदुरस्त्वग्निना दग्धो वनजेन दिवं गतः एवं विष्णुर्भुवो भारमहरद्दानवादिकं २ धर्मायाधर्मनाशाय निमित्तीकृत्य
पांडवान् स वि[?] प्रशापव्याजेन मुसलेनाहरत्कुलं ३ यादवानां भारकरं वज्रं राज्येभ्यषेचयत् देवादेशात्प्रभासे स
देहं त्यक्त्वा स्वयं हरिः ४ इंद्रलोके ब्रह्मलोके पूज्यते स्वर्निवासिभिः बलभद्रोनंतमूर्तिः पातालः स्वर्गमीयिवान् ५
अविनाशी हरिर्देवो ध्यानिभिर्ध्येय एव सः विना तद्द्वारकास्थानं प्लावयामास सागरः ६ संस्कृत्य यादवान् पार्थो दत्तोदक
धनादिकः स्त्रियोष्टावक्रशापेन भार्या विष्णोश्च याः स्थिताः ७ पुनस्तच्छापतो नीता गोपालैर्लगुडायुधैः अर्जु-

अग्निपु. नंहितिरस्कृत्य पार्थः शोकंचकारह ८ व्यासेनाश्वसितोमेनेबलंमे कृष्णसंनिधौ हास्तिनं पुरमागत्य पार्थः सर्वंन्यवेदय
त् ९ युधिष्ठिराय स भ्रात्रे पालकाय नृणां तदा तद्धनुस्तानि चास्त्राणि स रथस्ते च वाजिनः १० विना कृष्णेन तन्नष्टं दानं चा
श्रोत्रियेयथा तच्छ्रुत्वा धर्मराजस्तु राज्ये स्थाप्य परीक्षितं ११ प्रस्थानं प्रस्थितो धीमान् द्रौपद्या भ्रातृभिः सह सं
१० सारानित्यतां ज्ञात्वा जपन्नष्टशतं हरेः १२ महापथे तु पतिता द्रौपदी सहदेवकः नकुलः फाल्गुनो भीमो राजा शोकप
रायणः १३ इंद्रानीतरथारूढः सानुजः स्वर्गमाप्तवान् दृष्ट्वा दुर्योधनादींश्च वासुदेवं च हर्षितः १४ एतत्ते भारतं
प्रोक्तं यः पठेत्स दिवं व्रजेत् अग्निरुवाच वक्ष्ये बुद्धा
वतारं च पठतः शृण्वतोर्थदं पुरा देवासुरे युद्धे दैत्यैर्देवाः पराजिताः १ रक्ष रक्षेति शरणं वदंतो जग्मुरीश्वरं मायामुत
स्वरूपो सौ शुद्धोदनसुतो भवत् २ मोहमायास दैत्यांस्तांस्त्याजिता वेदधर्मकं ते च बौद्धा बभूवुर्हि तेभ्योन्ये वेदवर्जिताः ८
३ अर्हतः सोभवत्पश्चादर्हतानकरोत्परान् एवं पाषंडिनो जाता वेदधर्मादिवर्जिताः ४ नरकार्हं कर्म चक्रुर्ग्रहीष्यंत्य
धमादपि सर्वे कलियुगांते तु भविष्यंति च संकराः ५ दस्यवः शीलहीनाश्च वेदो वाजसनेयकः दशपंच च शाखा वै प्रमा
णेन भविष्यति ६ धर्मकंचुकसंवीता अधर्मरुचयस्तथा मानुषान् भक्षयिष्यंति म्लेच्छाः पार्थिवरूपिणः ७ कल्की विष्णु
यशःपुत्रो याज्ञवल्क्यपुरोहितः उत्सादयिष्यति म्लेच्छान् गृहीतास्त्रः कृतायुधः ८ स्थापयिष्यसि मर्यादां चातुर्व-
र्ण्ये यथोचितां आश्रमेषु च सर्वेषु प्रजाः सद्धर्मवर्त्मनि ९ कल्किरूपं परित्यज्य हरिः स्वर्गं गमिष्यति ततः कृतयुगं नाम
पुरातत्संभविष्यति १० वर्णाश्रमाश्च धर्मेषु स्वेषु स्थास्यंति सत्तम एवं सर्वेषु कल्पेषु सर्वमन्वंतरेषु च ११ अवतारा-
असंख्याता अतीतानागतादयः विष्णोर्दशावताराख्यान् यः पठेत् शृणुयान्नरः १२ सोवाप्तकामो विमलः सकुलः स्व १०
र्गमाप्नुयात् धर्माधर्मव्यवस्थानमेवं वै कुरुते हरिः १३ अवतीर्णः स च गतः सर्गादेः कारणं हरिः ॥

अग्निरुवाच जगत्सर्गादिकां क्रीडां विष्णोर्वक्ष्येधुना शृणु सर्गादिकृत्स
र्गादिः सृष्ट्यादिः सगुणोगुणः १ ब्रह्माव्यक्तं सदग्रे भूत्न खं रात्रिर्दिनादिकं प्रकृतिं पुरुषं विष्णुं प्रविश्याक्षोभयत्ततः २
सर्गकाले महत्तत्त्वमहंकारस्ततो भवत् वैकारिकस्तैजसश्च भूतादिश्चैव तामसः ३ अहंकाराच्छब्दमात्रमाकाशमभवत्त
तः स्पर्शमात्रोनिलस्तस्माद्रूपमात्रोनलस्ततः ४ रसमात्रा आपइतो गंधमात्रा मही स्मृता अहंकारात्तामसात्तु तैजसानीं
द्रियाणि च ५ वैकारिका दश देवा मन एकादशेंद्रियं ततः स्वयंभूर्भगवान् सिसृक्षुर्विविधाः प्रजाः ६ आप एव ससर्जादौ ता
सु वीर्यमवासृजत् आपो नारा इति प्रोक्ता आपो वै नरसूनवः ७ अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः हिरण्यगर्भमभ
वत्तदंडमुदकेशयं ८ तस्मिंजज्ञे स्वयं ब्रह्मा स्वयंभूरिति नः श्रुतं हिरण्यगर्भो भगवानुषित्वा परिवत्सरं ९ तदंडम
करोद्द्वैधं दिवं भुवमथापि च तयोः शकलयोर्मध्ये आकाशमसृजत्प्रभुः १० अप्सु पारिप्लवां पृथ्वीं दिशश्च दशधा दधे
तत्र कालं मनो वाचं कामं क्रोधमथो रतिं ११ ससर्ज सृष्टिं तद्रूपां स्रष्टुमिच्छन् प्रजापतिः विद्युतोशनिमेघांश्च रोहितेंद्रधनूं
षि च १२ वयांसि च ससर्जादौ पर्जन्यं चाथ वक्त्रतः ऋचो यजूंषि सामानि निर्ममे यज्ञसिद्धये १३ साध्यास्तैरजयं देवा भूत
मुच्चावचं भुजात् सनत्कुमारं रुद्रं च ससर्ज क्रोधसंभवं १४ मरीचिमत्र्यंगिरसं पुलस्त्यं पुलहं क्रतुं वसिष्ठं मानसान् सप्त
ब्रह्माण इति निश्चिताः १५ सप्तैते जनयंति स्म प्रजा रुद्राश्च सत्तम द्विधा कृत्वात्मनो देहमर्धेन पुरुषोभवत् १६ अर्धेन
नारी तस्यां स ब्रह्मणा चासृजत्प्रजाः अग्निरुवाच प्रिय-
व्रतोत्तानपादौ हि मनोः स्वायंभुवात् सुतौ अजीजनत् स तां कन्यां शतरूपां तपोन्वितां १ काम्या कर्दमभार्यातः सम्राट् कुक्षिर्वि-
राट् प्रभुः सुरुच्यामुत्तमो जज्ञे पुत्र उत्तानपादतः २ सुनीत्यां च ध्रुवः पुत्रस्तपस्तेपे सकीर्तये ध्रुवो वर्षसहस्राणि त्रीणि दिव्या
नि हे मुने ३ तस्मै प्रीतो हरिः प्रादान्मुन्यग्रे स्थानकं स्थिरं श्लोकं पपाठ स्युशना वृद्धिं दृष्ट्वा स तस्य च ४ अहो स्य तपसो वी
र्यमहोश्रुतमहोद्भुतं यमद्य पुरुतः कृत्वा ध्रुवं सप्तर्षयः स्थिताः ५ तस्मात् श्लिष्टिं च भव्यं च ध्रुवाच्छंभुर्व्यजायत श्लिष्टे

ख्या त्

रा धन्नसुख्यायापंचपुत्रानकल्मषान् ६ रिपुं रिपुंजयं पुत्रं रुकलं रकनेजसं ^ अजीजनत्पुष्करिण्यां वीरिण्यां चाक्षुषो मनुः मनो रिपोरधनत्वृहती चाक्षुषंसर्वतेजसं
रजायं नद्वशनद्वलायांस्तोत्तमाः पुरुः पूरुः शतद्युम्नस्तपस्वी सत्यवाक्कविः ८ अनुष्टु बनिरा त्रंच प्रद्युम्नश्चाभिमन्युकः
ख्या उरोरजनयत्पुत्रान् षडाग्नेयीमहाप्रभान् ९ अंगं सुमनसं [illegible]तिं क्रतुमं गिरसंगयं अंगात् सुनीथापत्यं वै वेनमेकंव्यजायत
१० अरक्षकः पापरतः सहतो मुनिभिः कुशैः प्रजार्थमृषयोथास्य ममं थुर्दक्षिणं करं ११ वेनस्य मथिते पाणौ सव भूव पृथुर्नृपः
११ तंदृष्ट्वा मुनयः प्राहुरेषवैमुदिताः प्रजाः १२ करिष्यति महातेजा यशश्च प्राप्स्यते महत् सधन्वीकवचीजातस्तेजसा निर्दहन्
निव १३ पृथुर्वैन्यः प्रजाः सर्वारररक्षक्षत्रपूर्वजः राजसूयाभिषिक्तानामाद्यः सपृथिवीपतिः १४ तस्माच्चैव समुत्पन्नौ निपुणौ
सूतमागधौ तत्स्तोत्रंच्चक्रतु वीरो राजा भूज्जनरंजनात् १५ दुग्धा गौस्तेन सस्यार्थं प्रजानां जीवनाय च सहदेवैर्मुनिगणैर्ग
धर्वैः साप्सरो गणैः १६ पितृभिर्दानवैः सर्पैर्वीरुद्भिः पर्वतैर्जनैः तेषु तेषु च पात्रेषु दुह्यमाना वसुंधरा १७ प्रादाद्यथेप्सितं क्षीरं तेन
प्राणानधारयन् पृथोः पुत्रौ तु धर्मज्ञौ जज्ञातेंतर्द्धिपालिनौ १८ शिखंडिनी हविर्धानमंतर्द्धानाद् व्यजायत हविर्धानात् षडाग्नेयी
धिषणाजनयत्सुतान् १९ प्राचीनबर्हिषं शुक्रं गयं रुष्णं प्रजाजिनौ प्राचीनाग्राः कुशास्तस्य पृथिव्यां यजतो यतः २० प्रा
चीनबर्हिर्भगवान्महानासीत्प्रजापतिः सवर्णाधत्त सामुद्री दश प्राचीनबर्हिषः २१ सर्वे प्राचेतसोनाम धनुर्वेदस्य पारगाः
अपृथग्धर्मचरणास्तेतप्यंत महत्तपः २२ दशवर्षसहस्राणि समुद्र सलिलेशयाः प्रजापतित्वं संप्राप्य तुष्टाद्विष्णोश्च विनिर्ग-
ताः २३ भूः खंव्याप्तं हि तरुभिस्तांस्तरूनदहंश्च ते मुखजाग्निमरुद्भ्यां च दृष्ट्वा चाथ द्रुमक्षयं २४ उपगम्याब्रवीदेतान्राजासो
मः प्रजापतीन् कोपं यच्छत दास्यंति कन्यां वो मारिषां वरां २५ तपस्विनो मुनेः कंडोः प्रम्लोचायां मयैव च भविष्यं ज्ञानतासृष्टाभा
र्या वोस्तु कुलंकरी २६ अस्यामुत्पत्स्यते दक्षः प्रजाः संवर्द्धयिष्यति प्राचेतसस्तां जगृहुर्दक्षोस्यां च ततो भवत् २७ अचरांश्चच
रांश्चैव द्विपदोथ चतुष्पदः सदृष्ट्वा मनसा दक्षः पश्चादसृजत स्त्रियः २८ ददौ स दश धर्माय कश्यपाय त्रयोदश सप्त ११

विंशति सोमाय चतस्रो अरिष्टनेमिने २९ द्वे चैव बाहुपुत्राय द्वे चैवांगिरसे प्रदात् तासु देवाश्च नागाद्या मैथुनान्मनसा पुरा ३० धर्मस
र्गं प्रवक्ष्यामि दशपत्नीषु धर्मतः विश्वेदेवास्तु विश्वाया साध्यास्साध्यान्व्यजायत ३१ मरुत्वत्यां मरुत्वंतो वसोस्तु वसवोभवन् भा
नोस्तु भानवः पुनामुहूर्तास्तु मुहूर्तजाः ३२ लंबायां धर्मतो घोषो नागवीथी च यामिजा पृथिवी विषयं सर्वं मरुत्वत्यां व्यजायत ३३
संकल्पायास्तु संकल्पो इंदोर्नक्षत्र तत्सुताः आपो ध्रुवश्च सोमश्च धरश्चैवानिलोनलः ३४ प्रत्यूषश्च प्रभासश्च वसवोष्टौ च नाम-
तः आपस्य पुत्रो वैतंडयः श्रमः शांतो मुनिस्तथा ३५ ध्रुवस्य कालो लोकांतो वर्चाः सोमस्य वै सुतः धरस्य पुत्रो द्रविणो हुतहव्यवहस्त-
था ३६ मनोहरायाः स्तु शरः प्राणो [illegible]य्यमणस्तथा पुरोजवोनिलस्या दृविज्ञातो नलस्य च ३७ अग्निपुत्रः कुमारश्च शरस्तं
बे व्यजायत तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठतः ३८ कृत्तिकातः कार्तिकेयो यतिः सनत्कुमारकः प्रत्यूषाद्देवलो जज्ञे विश्व
कर्मा प्रभासतः ३९ कर्ता शिल्पसहस्राणां त्रिदशानां च वर्धकिः मनुष्याश्चोपजीवंति शिल्पं वै भूषणादिकं ४० सुरभीकश्य
पाद्रुद्रानेकादश विनिर्ममे महादेव प्रसादेन तपसा भाविता सती ४१ अजैकपादहिर्बुध्न्यस्त्वष्टा रुद्रश्च सत्तम त्वष्टुश्चैवा
नुजः श्रीमान्विश्वरूपो महायशाः ४२ हरश्च बहुरूपश्च त्र्यंबकश्चापराजितः वृषाकपिश्च शंभुश्च कपर्दी रैवतस्तथा ४३
मृगव्याधश्च सर्पश्च कपाली दश चैककः रुद्राणां च शतं लक्षं यैर्व्याप्तं सचराचरं ४४
अग्निरुवाच कश्यपस्य वदे सर्गमादित्यादिषु हे मुने चाक्षुषे तुषितादेवास्ते दित्यां कश्यपात्पुनः १ आसन्विष्णुश्च शक्रश्च
त्वष्टा धाता तथार्यमा पूषा विवस्वान्सविता मित्रोथ वरुणो भगः ॥ अंशश्च द्वादशादित्या आसन्वैवस्वतेंतरे अरिष्टनेमि पत्नी
नामपत्यानीह षोडश ३ बहुपुत्रस्य विदुषश्चतस्रो विद्युतः स्मृताः प्रत्यंगिरसजाः श्रेष्ठाः कृशाश्वस्य सुरायुधाः ४ उदयास्त सं
मने सूर्यं नह्वदेते युगे युगे हिरण्यकशिपुर्दित्यां हिरण्याक्षश्च कश्यपात् ५ सिंहिका चाभवत्कन्या विप्रचित्तेः परिग्रहः
राहुप्रमृतयस्तस्यां सैंहिकेया इति श्रुताः ६ हिरण्यकशिपोः पुत्राश्चत्वारः प्रथितौजसः अनुह्रादश्च ह्रादश्च प्रह्रादश्चा

अग्निपु०
१२

निवेष्णवाः ७ संह्रादश्चचतुर्थोभूत् ह्रादपुत्रो ह्रदस्तथा संह्रादपुत्र आयुष्मान् शिबिर्बाष्कलएवच ८ विरोचनस्तुप्र-
ह्रादिर्बलिर्जज्ञेविरोचनात् बलेःपुत्रशतं चासीत् बाणश्रेष्ठंमहामुने ९ पुराकल्पेहिबाणेनप्रसाद्योमापतिंप्रभुं पार्श्व
तोविहरिष्यामिइत्येवंप्राप्तमीश्वरात् १० हिरण्याक्षसुताःपंचशंबरःशकुनिस्त्विति द्विमूर्धाशंकुरश्वाश्च शतमासन्
दनोःसुताः ११ स्वर्भानोस्तुप्रभाकन्यापुलोम्नस्तुशचीस्मृता उपदानवीहयशिरा शर्मिष्ठावार्षपर्वणी १२ पुलोमाका
लकाचैववैश्वानरसुतेउभे कश्यपस्यतुभार्येद्वेतयोःपुत्राश्चकोटिशः १३ प्रह्रादस्यचतुःकोट्योनिवातकवचाःकु-
ले ताम्रायाःषट्सुताः स्युश्चकाकीश्येनीचभास्यपि १४ गृध्रिकाशुचिसुग्रीवीताभ्यःकाकादयोभवन् अश्वाश्चो
ष्ट्राश्चताम्रायाअरुणोगरुडस्तथा १५ विनतायाःसहस्रंतुसर्पाश्चसुरसाभवाः काद्रवेयाःसहस्रंतुशेषवासुकि
तक्षकाः १६ दंष्ट्रिणःक्रोधवशजाधरोत्थाःपक्षिणोजले सुरभ्यांगोमहिष्यादिइरोत्पन्नास्तृणादयः १७
खसायांयक्षरक्षांसिमुनेरप्सरसोभवन् अरिष्टायास्तुगंधर्वाःकश्यपाधिस्थिरंचरं १८ एषांपुत्रादयोसंख्या·
देवैर्दैत्यदानवाजिताः दितिर्विनष्टपुत्रावैतोषयामासकश्यपं १९ पुत्रमिंद्रप्रहर्तारमिच्छतीप्रापकश्यपात् पादप्रक्षाल
नात्सुस्नानस्यागर्भजघानह २० छिद्रमन्विष्यचेंद्रस्तुतेदेवामरुतोभवन् शक्रस्यैकोनपंचाशत्सहायादीप्ततेजसः
एतत्सर्वंहरिर्ब्रह्माअभिषिच्यपृथुंनृपं ददौक्रमेणराज्यानिअन्येषामाधिपोहरिः २२ द्विजौषधीनांचंद्रस्तुअपां
तुवरुणोनृपः राज्ञांवैश्रवणोराजासूर्याणांविष्णुरीश्वरः २३ वसूनांपावकोराजामरुतांवासवःप्रभुः गंधर्वाणांचित्र
रथोनागानामथवासुकिः २४ सर्पाणांतक्षकोराजागरुडःपक्षिणामथ ऐरावतोगजेंद्राणांगोवृषोथगवामपि २५
मृगाणामथशार्दूलःप्लक्षोवनस्पतीश्वरः उच्चैःश्रवास्तथाश्वानांसुधन्वापूर्वपालकः २६ दक्षिणस्यांशंखपदः
केतुमान्पालकोजले हिरण्यरोमकःसोम्येप्रतिसर्गोयमीरितः २७ इत्याग्नेयेमहापुराणेप्रतिसर्गो

४ प्रजापतीनांदक्षोथप्रह्लादोदानवा सं.
धिपः पितृणांचयमोराजाभूतादीनां
हरःप्रभुः हिमवांश्चैवशैलानांनदीनां
सागरःप्रभुः

DR. BHAU DAJI MEMORIAL

अग्निरुवाच प्रथमोमहतःसर्गोविज्ञेयोब्रह्मणस्तुसः तन्मात्राणांद्वितीयस्तुभूतसर्गोहिसस्मृतः १ वैकारिकस्तृती
यस्तुसर्गऐंद्रियकःस्मृतः इत्येषप्राकृतःसर्गःसंभूतोबुद्धिपूर्वकः २ मुख्यःसर्गश्चतुर्थस्तुमुख्यावैस्थावराःस्मृताः तिर्य
क्स्रोतःस्तुयःप्रोक्तःस्तिर्यग्योन्यस्ततःस्मृतः ३ ततोर्ध्वस्रोतसांषष्ठोदेवसर्गस्तुसस्मृतः ततोर्वाक्स्रोतसांसर्गःसप्तमः
ससमानुषः ४ अष्टमोनुग्रहःसर्गःसात्विकस्तामसश्च सः पंचैतेवैकृताःसर्गाःप्राकृताश्चत्रयःस्मृताः ५ प्राकृतोवै-
कृतश्चैवकौमारोनवमस्तथा ब्रह्मतोनवसर्गास्तुजगतोमूलहेतवः ६ ख्यात्याद्यादक्षकन्यास्तुभृग्वाद्याउपयेमिरेनित्यो
नैमित्तिकःसर्गस्त्रिधाप्रकथितोजनैः ७ प्राकृतोदैनंदिनीस्यादंतरप्रलयादनु जायंतेयत्रानुदिनंनित्यसर्गोहिसस्मृतः ८ देवौ
धाताविधातारौभृगोःख्यातिरसूयत श्रियंचपत्नीविष्णोर्यास्तुताशक्रेणवर्द्धये ९ धातुर्विधातुर्द्वौपुत्रौक्रमात्प्राणोमृकंडकः
मार्कंडेयोमृकंडाच्चजज्ञेवेदशिरास्ततः १० पौर्णमासश्चसंभूत्यांमरीचेरभवत्सुतः स्मृत्यामंगिरसःपुत्राःसिनीवालीकुहूस्तथा-
११ राकाचानुमतिश्चात्रिरनुसूयाप्यजीजनत् सोमंदुर्वाससंपुत्रंदत्तात्रेयंचयोगिनं १२ प्रीत्यांपुलस्त्यभार्यायांदत्तोलिस्तत्सुतो-
भवत् क्षमायांपुलहाज्जातंसहिष्णुःसर्ववादिकः १३ सन्नत्यांचक्रतोरासन्वालखिल्यामहौजसः अंगुष्ठपर्वमात्रास्तेयेहिषष्टि
सहस्रिणः १४ ऊर्जायांचवसिष्ठाच्चराजागात्रोर्ध्वबाहुकः सवनश्चानघःशुक्रःसुतपाःसप्तर्षयः १५ पावकःपवमानाभूच्छु
चिःस्वाहाग्नितोभवत् अग्निष्वात्ताबर्हिषदोनग्नयःसाग्नयोप्यजान् १६ पितृभ्यश्चस्वधायांचमेनांवैधारणीसुते हिंसाभार्या
त्वधर्मस्यतयोर्जज्ञेतथानृतं १७ कन्याचनिकृतिस्ताभ्यांभयंनरकएवच मायाचवेदनाचैवमिथुनंत्विदमेतयोः १८ तयोर्ज
ज्ञेथवैमायामृत्युंभूतापहारिणं वेदनाचसुतंचापिदुःखंजज्ञेचरौरवात् १९ मृत्योर्व्याधिजराशोकतृष्णाक्रोधाश्चजज्ञिरे ब्रह्म
णश्चरुदन्जातोरोदनाद्रुद्रनामकः २० भवंसर्वमथेशानंतथापशुपतिंद्विज भीममुग्रंमहादेवमुवाचसपितामहः २१ दक्षकोपाच्चतद्भार्यादेहंतत्याजसासती हिमवद्दुहिताभूत्वापत्नीशंभोरभूत्पुनः २२ ऋषिभ्योनारदाद्युक्ताःपूजाःस्नानादिपूर्वकाः
स्वायंभुवाद्यास्ताःकृत्वाविष्ण्वादेर्भुक्तिमुक्तिदाः॥

अ. २१

अग्निपु०

नारदउवाच सामान्यपूजां विष्ण्वादेर्वक्ष्ये मंत्रांश्च सर्वदान् समस्तपरिवाराय अच्युतायनमोयजेत् १ धात्रेविधात्रेगंगायैय
सु मुनायैनिधिरतथा द्वारश्रियंवास्तुरं शक्तिंकूर्ममनंतकं २ पृथिवींधर्मकंज्ञानंवैराग्यैश्वर्यमेवच अधर्मादीन्कंदनाल
त्वा पद्मकेसरकर्णिकाः ३ ऋग्वेदाद्यंहृदाद्यंच सत्वादर्कादिमंडलं विमलोत्कर्षणीज्ञानाक्रियायोगाच्चतांयजेत् ४ प्रह्वी द
सत्यातथेशान्यानुग्रहासनमूर्तिकाः दुर्गांगिरं गणंक्षेत्रंवासुदेवादिकंयजेत् ५ हृदयंचशिरश्चूलावर्मनेत्रमथास्त्रकं श्चू
शंखंचक्रंगदांपद्मंश्रीवत्संकौस्तुभंयजेत् ६ वनमालांश्रियंपुष्टिंगरुडंगुरुमर्चयेत् इंद्रमग्निंयमंरक्षोजलंवायुंधनेश्व-
१३ नेश्वरं ७ इशानंतमजंशस्त्रंवाहनंकुमुदादिकं विष्वक्सेनंमंडलादौसिद्धिः पूजादिनाभवेत् ८ शिवपूजाथसामान्यापूर्व
नंदिनमर्चयेत् महाकालंयजेद्दुर्गांयमुनांचगणादिकं ९ गिरंश्रियंगुरुंवास्तुंशक्त्यादिधर्मकादिकं वामाज्येष्ठातथारौद्री
कालीकलविकारिणी १० बलविकारिणीचापिबलप्रमथिनीक्रमात् सर्वभूतदमनीच मनोन्मनीशिवासनं। हांहूंहः
शिवमूर्तयेसांगवक्त्रंशिवंयजेत् ११ हौंशिवाय-हामित्यादि-हामीशानादिवक्त्रं कं हींगौरींगंगणःशक्रमुखाश्चंडोहृदादि
काः १२ शिवपूजाक्रमः क्रमात्सूर्यार्चनेमंत्रादंडीपूज्यश्चपिंगलः उच्चैश्रवाश्चारुणश्चप्रभूतंविमलंयजेत् १३ हंसंध्ये
परमंमुख्यंस्कंदाद्यंमध्यतोयजेत् दीप्तासूक्ष्माजयाभद्राविभूतिर्विमलातथा १४ अमोघाविद्युतांचैवपूज्या सर्वतोमुखी थो
अर्कासनंहिहंसःसहस्रोल्कायेतिचमूर्तिकान् १५ हांह्रींसः सूर्यायनमओंनमो हृदयायच अर्काय शिरसेतद्वदग्नीशा
श्रयवायुगान् १६ भूर्भुवस्स्वरेज्वालिनि शिखा हूंकवचंस्मृतं भानेत्रंरस्तथा राज्ञीशक्तिश्चनिक्षुभा १७ सोमोंगार
कोथबुधोजीवःशुक्रः शनिःक्रमात् राहुःकेतुस्तेजश्चंडः संक्षेपादथपूजनं १८ आसनंमूर्तयोमूलंहृदाद्यंपरिवारकः
विष्ण्वासनंविष्णुमूर्देरांश्रींश्रीधरोहरिः १९ हींसर्वमूर्तिमंत्रोयमितित्रैलोक्यमोहनः क्लींहृषीकेशोहूंविष्णुःस्वरेदीर्घे- १३
र्हृदादिकं २० समस्तैःपंचमीपूजासंग्रामादौजयादिदा चक्रंगदांक्रमात् शंखंमुसलंखड्गशार्ङ्गकं २१ पाशांकुशौचश्रीव-
त्सकौस्तुभंवनमालया श्रींश्रींमहालक्ष्मीस्ताक्ष्योगुरुरिंद्रादयोर्चनं २२ सरस्वत्यासनंमूर्तिवांह्रींदेवीसरस्वती हृदाद्या

लक्ष्मीर्मेधाचकलातुष्टिश्चपुष्टिका ॥ गौरीप्रभामतीदुर्गागणोगुरुश्चक्षेत्रपः ॥ तथागंगणपतयेच ह्रींगौर्यैच श्रींतथा
श्रियै २४ ह्रींत्वरिताक्लींसौःत्रिपुराचतुर्थ्यंतानमोंतकाः ॥ प्रणवाद्याश्चनामाद्यमक्षरंबिंदुसंयुतं ॐ युतंवासर्वमं
त्राःपूजनाज्जपतःस्मृताः ॥ होमास्तिलघृताद्येश्चधर्मकामार्थमोक्षदाः २६ पूजामंत्रान्पठेद्यस्तुभुक्तभोगोदिवंव्रजेत्
इत्याग्नेयेवासुदेवादिपूजा नारदउवाच वक्ष्येस्नानंक्रियार्थंनृसिंहेनतुमृत्तिकां गृहीत्वातांद्विधाकृत्वामलस्नान
ग मेकया विमृज्याचम्यविन्यस्यसिंहेनकृतरक्षकः विधिस्नानंततःकुर्यात्प्राणायामपुरःसरं हृदिध्यायन्हरिंज्ञा-
नंमंत्रेणाष्टाक्षरेणहि त्रिधापाणितलेमृत्स्नांदिग्बंधंसिंहजप्यतः वासुदेवप्रजप्तेनतीर्थंसंकल्प्यमारभेत् गात्रंवेदादि
नामंत्रैःसंमार्ज्याराध्यमूर्तिना कृत्वाघमर्षणंवस्त्रंपरिधायसमाचरेत् विन्यस्यमंत्रैर्निर्मृज्यपाणिस्थंलैजेमेवच नारायणेनसं
यम्यवायुमाघ्रायचोत्सृजेत् जलेध्यायन्हरिंपश्चात्दत्वार्घंद्वादशाक्षरं जप्त्वान्यान्शक्तितस्तत्रयोगपीठादितःक्रमात्
मंत्रान्दिक्पालपर्यंतान्ऋषीन्पितृगणानपि मनुष्यान्सर्वभूतानिस्थावरांतान्यथार्चयेत् न्यस्यचात्मनिसंहृत्यमंत्रान्याग्र ग
हंव्रजेत् एवमन्यासुपूज्यासुमूलाद्यैःस्नानमाचरेत् २२ नारदउवाच वक्ष्ये
ध्रि पूजाविधिंविप्राय त्कृत्वासर्वमाप्नुयात् प्रक्षालितांघ्रिराचम्यवाग्यतःकृतरक्षकः प्राङ्मुखस्वस्तिकंबध्वापद्माद्यपरमेवच॥
यंबीजंनाभिमध्यस्थंधूम्रचंडानिलात्मकं २ विश्लेषयेदशेषंतुध्यायेत्कायात्तुकल्मषं क्षंहृत्पंकजमध्यस्थंबीजंतेजो निधिं
धिंस्मरेत् ३ अधोर्ध्वतिर्यगाभिस्तुज्वालाभिःकल्मषंदहेत् शशांकाकृतिवद्ध्यायेदंबरस्थंसुधांबुभिः ४ हृत्पद्मव्यापिभि
र्देहंस्वकमाप्लावयेत्सुधीः सुषुम्णायोनिमार्गेणसर्वनाडीविसर्पिभिः ५ शोधयित्वान्यसेत्तत्वंकरशुद्धिरथास्त्रकं व्यापकं
हस्तयोरादौदक्षिणांगुष्ठतोंगकं ६ मूलंदेहेद्वादशांगंन्यसेन्मंत्रैर्विसर्गकैः हृदयंचशिरश्चैवशिखावर्मास्त्रलोचनं ७ उ
रू दरंचतथापृष्ठंबाहूजानुनीपादकं मुद्रांधृत्वास्मरेद्विष्णुंजप्त्वाष्टशतमर्चयेत् ८ वामेतुवर्धनींन्यस्यपूजाद्रव्यंतुदक्षि ध्रि
णे प्रक्षाल्यास्त्रेणचार्घ्यंथगंधपुष्पान्वितेन्यसेत् ९ चैतन्यंसर्वगंज्योतिरस्त्रजप्तेनवारिणा फडंतेन तुसंसिच्य-

 हृत्संध्यात्वाहरिंपरे १० धर्मज्ञानंचवैराग्यमैश्वर्यंवह्निदिङ्मुखाः अधर्मादीनिगात्राणिपूर्वादौयोपीठके ११ कूर्मपीठेत्यनंतं
चपद्मसूर्यादिमंडलं विमलाद्याःकेसरस्थाः गृहाःकर्णिकसंस्थिताः १२ पूर्वंसुहृदयेध्यात्वाआवाह्यार्चेच्चमंडले अर्घ्यं
१४ पाद्यंतथाचामंमधुपर्कंपुनश्चवन्न १३ स्नानंवस्त्रोपवीतंचभूषणंगंधपुष्पकं धूपदीपनिवेद्यानिपुंडरीकाक्षविद्यया
१४ यजेदंगानिपूर्वादौद्वारिपूर्वेपरेंडजं दक्षेचकंगदांसौम्येकोणेशंखंधनुर्न्यसेत् १५ देवस्यवामतोदक्षेचेषुधीं
खड्गमेवच वामेचर्मश्रियंदक्षेपुष्टिंवामेग्रतोन्यसेत् १६ वनमालांचश्रीवत्सकौस्तुभौदिक्पतीन्बहिः स्वमंत्रैःपू-
जयेत्सर्वान्विष्णोरर्चावसानतः १७ व्यस्तेनचसमस्तेनअंगैर्बीजेनवै[illegible]न् नत्वाप्रदक्षिणीकृत्यस्तुत्वार्घ्यंचस यजे
मर्प्यच १८ हृदयेविन्यसेद्ध्यात्वाअहंब्रह्माहरिस्त्विति आगच्छावाहनेवाच्यंक्षमस्वेतिविसर्जने १९ एवमष्टाक्षरा
द्याश्चपूजांकृत्वाविमुक्तिभाक् एकमूर्त्यर्चनंप्रोक्तंनवव्यूहार्चनंशृणु २० अंगुष्ठकद्वयेन्यस्यवासुदेवबलादिकान् त
र्जन्यादौशरीरेथशिरोललाटवक्त्रके २१ हृन्नाभिगुह्यजान्वंघ्रौमध्यपूर्वादिकंयजेत् एकपीठंनवव्यूहंनवपीठंचपूर्ववत्
२२ नवाब्जेनवमूर्त्याचनवव्यूहंचपूर्ववत् इष्टंमध्येततस्थानेवासुदेवंचपूजयेत्
२३ नारदउवाच अग्निकार्यंप्रवक्ष्यामियेनस्यात्सर्वकामभाक् चतुरभ्यधिकंविंशमंगुलंचतुरस्रकं
१ सूत्रेणसूत्रयित्वातुक्षेत्रंतावत्खनेत्समं खातस्यमेखलाकार्यात्यक्त्वाचैवांगुलद्वयं २ सत्वादिसंज्ञापूर्वाशाद्वादशां
ध्यं गुलमुच्छ्रिताः अष्टांगुलांगुलाथचतुरंगुलविस्तृता ३ योनिर्दशांगुलारम्याषट्चतुर्द्व्यंगुलाग्रगा क्रमान्निम्नातुकर्त
व्यापश्चिमाशाव्यवस्थिता ४ अश्वत्थपत्रसदृशीकिंचित्कुंडनिवेशिता तूर्यांगुलायतंनालंपंचदशांगुलायतं ५
मूलंतुद्व्यंगुलंयोन्याअग्रंतस्याःषडंगुलं लक्षणंचैकहस्तस्यद्विगुणंद्विकरादिषु ६ एकत्रिमेखलंकुंडंवर्तुलादि
वदाम्यहं कुंडार्द्धेतुस्थितंसूत्रंकोणाद्यदतिरिच्यते ७ तदर्द्धंदिशिसंस्थाप्यभ्रामितंवर्तुलंभवेत् कुंडार्द्धंकोणभा
गार्द्धंदिशिचोत्तरतोबहिः ८ पूर्वपश्चिमतोयत्नाल्लांछयित्वातुमध्यतः संस्थाप्यभ्रामितंकुंडंअर्द्धचंद्रंभवेच्छुभं ९ द्रं

पद्माकारेदलानिस्युर्मेखलायांतुवर्तुले बाहुदंडप्रमाणंतुहोमार्थंकारयेत्स्रुवं १० सप्तपंचांगुलंचापिचतुरस्रंतुकारयेत् त्रिभा
गेनभवेद्गर्त्तंमध्येरत्तंसुशोभनं ११ तिर्यगूर्ध्वंसमंखात्वाबहिरर्धंतुशोधयेत् अंगुलस्यचतुर्थांशंशेषार्द्धार्द्धंतथांततः १२
खातस्यमेखलांरम्यांमेखलार्धेनकारयेत् कंठंत्रिभागविस्तारंमंगुष्ठकसमायतं १३ सार्द्धमंगुष्ठकंवास्यादेतैरग्रंतुमुखंभवेत्
चतुरंगुलविस्तारंपंचांगुलमथापिवा १४ त्रिकद्व्यंगुलकंतस्यान्मध्यात्तत्तुसुशोभनं आयामस्तत्समस्तस्यमध्यनिम्नःसु
शोभनः १५ सुषिरंकंठदेशेस्याद्विशेद्यावत्कनीयसी शेषंदंडेतुकर्तव्यंयथारुचिविचित्रितं १६ स्रुवंतुहस्तमात्रंस्याद्दं
डकेनसमन्वितं वटुकंद्व्यंगुलंवृत्तंकर्तव्यंतुसुशोभनं १७ गोपदंतुयथामग्नमल्पपंकेतथाभवेत् उपलिप्यलिखेद्रेखा-
मंगुलांवज्रनामकां १८ सौम्याग्राप्रथमातस्यांरेखेपूर्वामुखेतयोः मध्येतिस्रस्तथाकुर्याद्दक्षिणादिक्रमेणतु १९
एवमुल्लिख्यचाभ्युक्ष्यप्रणवेनतुमंत्रवित् विष्टरंकल्पयेत्तेनतस्मिन्शक्तिंतुवैष्णवीं २० अलंकृत्वाऋतुमतींक्षिपेद
ग्निंहरिंस्मरन् प्रादेशमात्राःसमिधोदत्वापरिसमुह्यतांदर्भैस्त्रिधापरिस्तीर्यपूर्ववदीतत्रपात्रकं आसादये-
यो दिध्मबर्हिर्द्वयंस्रुक्स्रुवौद्वयं २२ आज्यस्थालीचरुस्थालीकुशाद्यंचप्रणीतया प्रोक्षयित्वाप्रोक्षणींचगृहीत्वापूर्यवारि
णा २३ पवित्रांतर्हितेहस्तेअभिस्राव्यचतज्जलं अग्निंदत्वाथप्रोक्षण्याज्योतिरग्रेनिधायच २४ तदद्भिस्त्रिश्चसंप्रो
क्ष्यइध्मान्विन्यस्यचायतः प्रणीतायांसपुष्पायांविष्णुंध्यात्वोत्तरेणच २५ आज्यस्थालीमथाज्येनसंपूर्याग्नौनिधाय
च संप्रवोत्पूवनाभ्यांतुकुर्यादाज्यस्यसंस्कृतिं २६ आखंडिताग्रौनिर्गर्भौकुशौप्रादेशमात्रकौ ताभ्यामुत्तानपाणि
भ्यामंगुष्ठानामिकेनतु २७ आज्यंतयोरुक्तसंगृह्यत्रीन्वारानूर्ध्वमुत्क्षिपेत् स्रुक्स्रुवौचापिसंगृह्यताभ्यांप्रक्षाल्यवा
रिणा २८ आतप्यदर्भैःसंगृह्यपुनःप्रक्षाल्यचैवहि निष्टप्यस्थाप्यतुप्रणवेनैवसाधकः २९ प्रणवादीनमोंतेनपश्चा पयित्वा
द्धोमंसमाचरेत् गर्भाधानादिकर्माणियावदंगव्यवस्थया ३० नामांतंव्रतबंधांतंसमावर्तावसानकं अधिकारावसानंवाकुर्यादंगानुसारतः ३१ प्रणवेनोपचारंतुकुर्यात्सर्वत्रसाधकः अंगैर्होमस्तुकर्तव्योयथावित्तानुसारतः ३२

गर्भाधानंतु प्रथमं ततः पुंसवनं स्मृतं ॥ सीमंतोन्नयनं जातकर्म निष्क्रामनं ततः ३३ चूडाकृतिं व्रतबंधं वेदव्रतान्यशेषतः समाव
र्तनं पत्न्याच योगो याधिकारकः ३४ हृदादिक्रमतो ध्यात्वा एकैकं कर्म पूज्य च अष्टावष्टौ तु जुहुयात् प्रतिकर्माहुतीः पुनः ३५
पूर्णाहुतिं ततो दद्यात् स्रुचा मूलेन साधकः वौषडंतेन मंत्रेण प्लुतं सुस्वरमुच्चरन् ३६ विष्णोर्वन्हिं तु संस्कृत्य श्रपयेद्वैष्णवं चरुं
१८ ३७ आराध्य स्थंडिले विष्णुं मंत्रान्संस्मृत्य संश्रयेत् आसनादिक्रमेणैव सांगावरणमुत्तमं ३८ गंधपुष्पैः समभ्यर्च्य ध्यात्वा देवं सु
रोत्तमं आधारौ पश्चिमे धारौ वायाग्नीश संस्थितौ ३९ वायव्यनैरृताशादि प्रवृत्तौ तु यथाक्रमं आज्यभागौ ततो हुत्वा च
क्षुषी दक्षिणोत्तरे ४० मध्ये थ जुहुयात्सर्वमंत्रानर्चाक्रमेण तु आज्येन तर्पयेन्मूर्तिं दशांशेनांगहोमकं ४१ शतं सहस्रं चा
ज्याद्यैः समिद्भिर्वा तिलैः सह समाप्याथ तु होमांतां शुचीन् शिष्यानुपोषितान् ४२ आहूयाये निवेश्याथ अस्त्रेण प्रोक्षयेत् पशू
न् शिष्यानात्मनि संयोज्य अविद्याकर्मबंधनैः ४३ लिंगानुवृत्तं चैतन्यं सह लिंगेन पालितं ध्यानलिंगेन संप्रोक्ष्य वायुबीजेन
शोषयेत् ४४ ततो दहनबीजेन सृष्टिं ब्रह्मांडसंज्ञिकां निर्दग्धां सकलां ध्यायेद्भस्मकूटनिभां स्थितां ४५ प्लावयेद्वारिणा
भस्मसंसारे वार्मयं स्मरेत् ततः शक्तिं न्यसेत्पश्चात् पार्थिवीं बीजसंज्ञिकां ^ ४६ तन्मध्ये चिंतयेन्मूर्तिं पौरुषीं प्रणवात्मि
कां लिंगं संक्रामयेत् पश्चात् पार्श्वस्थां सर्वसंहृतां ४७ विभक्तेंद्रियसंस्थानां क्रमाद्वृद्धां विचिंतयेत् ततोंडमध्यमेकं तु स्थि
त्वा द्विशकलीकृतं ४८ द्यावापृथिव्यौ शकले तयोर्मध्ये प्रजापतिं जातं ध्यात्वा पुनः प्रोक्ष्य प्रणवेन तु तं शिशुं ४९ मंत्रात्म
कं तनुं कृत्वा यथान्यासं पुरोदितं विष्णुहस्तं ततो मूर्ध्नि दत्वा ध्यात्वा तु वैष्णवं ५० एवमेकं बहून् वापि जनित्वा ध्यानयोगतः
करौ संपूज्य मूलेन नेत्रे बद्ध्वा तु वाससा ५१ नेत्रमंत्रेण मंत्री तान् संदेशेनाहतेन तु कृतपूजो गुरुः सम्यक् देवदेवस्य तत्त्ववान्
५२ शिष्याञ्जलि ततः प्राङ्मुखानुपवेशयेत् अर्चयेयुश्च ते प्येवं प्रसूती गुरुणा हरिं ५३ क्षिप्त्वा पुष्पांजलिं तत्र पुष्पादिभि
रनंतरं अमंत्रमर्चनं कृत्वा गुरुपादार्चनं ततः ५४ धियायदक्षिणाद्यात् सर्वस्वं वा धर्ममेव वा गुरुः संशिक्षयेच्छिष्यान्
तैः पूज्यो नामभिर्हरिः ५५ विष्वक्सेनं यजेदीशं शंखचक्रगदाधरं तर्जयंतं च तर्जन्या मंडलस्थं विसर्जयेत् ५६ बुभु १८

पुस्तकांतरे द्वश्लो = यं श्लोकः तन्मात्राभिः समस्ताभिः संवृतं पार्थिवं शुभं अंडं तद्वद्ध्यायेत्तदाधारं तदात्मकं

क्षुः सर्वमाप्नोति मुमुक्षुर्लीयते हरौ
२४ नारद उवाच वासुदेवादिमंत्राणां
पूजानां लक्षणं वदे वासुदेवः संकर्षणः प्रद्युम्नश्चानिरुद्धकः १ नमो भगवते चादौ अआअंअः सबीजकाः ओंकाराद्या
नमोंताश्च नमो नारायणस्ततः २ ॐ तत्सत् ब्रह्मणे हूं नमो ब्रह्मणे नमः ॐ क्ष्रौं ॐ नमो भगवते नारसिंहाय वैनमः ॐ भू
र्नमो भगवते वराहाय नराधिप जपारुणहरिद्राभानीलश्यामललोहिताः ४ मेघाग्निमधुपिंगाभा वस्तुभा नरनायकाः अं
गानि स्वबीजानां स्वनामांतैर्यथाक्रमं ५ हृदयादीनि कल्पेत विभक्तैः स्वैश्च येदिभिः व्यंजनादीनि बीजानि तेषां लक्षणमन्यथा
६ दीर्घस्वरैस्तु भिन्नानि नमोंतानि स्थितानि तु अंगानि ह्रस्वयुक्तानि उपांगानीति वर्ण्यते ७ विभक्तनामवर्णांतस्थि
तबीजात्ममुत्तमं दीर्घस्वरैश्च संयुक्तमंगोपांगैः स्वरैः क्रमात् ८ व्यंजनानां क्रमोद्येषु हृदयादिप्रकृप्तये स्वरबीजेषु नामोंते
र्विभक्तांगनामभिः ९ युक्तानि हृदयादीनि द्वादशांतानि पंच नः आरभ्य कल्पयित्वा तु जपेत्सिध्यनुरूपतः १० हृदयं चाशि
श्री रश्चूलाकवचं नेत्रमस्त्रकं षडंगानीति जानां मूलस्य द्वादशांगकं ११ हृच्छिरश्च शिखा चर्म चास्त्रं नेत्रं तथोदरं पृष्ठबाहूरु
जानूंश्च जंघा पादौ क्रमान्न्यसेत् १२ कं टं षं शं वैनतेयः खं ठं फं षं गदानुजं गं डं बं सं पुष्टिमंत्रो घं ढं भं हं श्रियैनमः १३ चं णं मं क्षं पां
चजन्यं छं तं पं कौस्तुभाय च जं थं रं सुदर्शनाय श्रीवत्साय सं वं दं चं लं १४ ॐ बं चं वनमालायै यमुनाभायै नमः निर्बीजपदमंत्रा
णां पदैरंगानि कल्पयेत् १५ जात्यंतैर्नाम संयुक्तैर्हृदयादीनि पंचधा प्रणवं हृदयं पूर्वं पराये तिशिव: शिरवा १६ नाम्नात्मना
तु कवचं अस्त्रं नामांतकं भवेत् ॐ परस्यादि च नमोंता च तुर्थ्यंतो नमोंतकः एकव्यूहादिशाद्वैंशव्यूहांतस्यात्समो मनुः कानि द्
ष्ठादिकरायेषु प्रकृतिं देहके चर्चयेत् १८ पराय पुरुषात्मास्यात्प्रकृत्यात्माहि रूपकः ॐ पराया प्यात्मने चैव व क्रौं वन्हि स्व
रूपकः १९ अग्निस्त्रिमूर्तौ विन्यस्य व्यापकं करदेहयोः वायवौ कर शाखासु सव्येतरकरकद्वये २० हृदि मूर्तौ तनावेषा त्रिव्यूहे
तुर्यरूपके ऋग्वेदं व्यापकं हस्ते अंगु लीषु यजुर्न्यसेत् २१ तलद्वये थर्वरूपं शिरोह्रच्चरणांतकः आकाशं व्यापकं न्यस्य करे
देहे तु पूर्ववत् २२ अंगुलीषु च वाय्वादि शिरोहृद्गुह्यपादके वायुर्ज्योतिर्जलं पृथ्वीं पंचव्यूहः समीरितः २३ मनः श्रोत्रं त्वग् दृग्जिह्वाघ्रा

ह

अग्नि·पु· णं सद्भूर्ईरितः व्यापकं मानसं न्यस्य न तोंगुष्ठादितः क्रमात् २४ मूर्धास्यहृन्गुह्यपद्म कथितं करणार्थकं आदिमूर्तिस्तु सर्व
१६ त्र व्यापकोतीवसंज्ञितः २५ भूर्भुवस्स्वर्महर्जनस्तपःसत्यं च सप्तधा करे देहे न्यसेहार्द्य मंगुष्ठादिक्रमेण तु २६ तलसंस्थः स
समश्च लोकात्मा देहके क्रमात् देहे शिरोललाटस्य हृन्गुह्यांघ्रिपु संस्थितः २७ अग्निष्टोमस्तथोक्थ्यस्तु षोडशी वाजपेयकः
अतिरात्रो सोर्या मश्च यज्ञात्मा सप्तरूपकः २८ धीरहंमनःशब्दश्च स्पर्शरूपरसास्ततः गंधो बुद्धिर्व्यापकं तु करे देहे
न्यसेत् क्रमात् २९ न्यसेद्दंतौ च तलयोः कै ललाटे मुखे हृदि नाभौ गुह्ये च पादौ च अष्टव्यूहः पुमान् स्मृतः ३० जीवो बुद्धिर
हंकारो मनःशब्दो गुणोनिलः रूपं रसो नवात्मायं जीवमंगुष्ठकद्वये ३१ तर्जन्यादिक्रमाच्छेषं यावद्वाम प्रदेशिनी देहे शिरो
ललाटस्य हृन्नाभिगुह्यजानुषु ३२ पादयोरेकादशात्मा मनः श्रोत्रं त्वगेव च चक्षुर्जिह्वा तथा घ्राणं वाक्पाण्यंघ्रीश्च पायु च
३३ उपस्थ मानसो व्यापी श्रोत्रमंगुष्ठकद्वये तर्जन्यादि क्रमाद्दशो अतिरिक्ततलद्वये ३४ उत्तमांगे ललाटस्य हृन्नाभा-
वथ गुह्यके ऊरुयुग्मे तथा जंघे गुल्फपादेषु च क्रमात् विष्णुर्मधुहरश्चैव त्रिविक्रमकवामनौ श्रीधरोथ हृषीकेशः पद्मना
भस्तथैव च ३६ दामोदरः केशवश्च नारायण इतः परः माधवश्चाथ गोविंदो विष्णुर्वै व्यापकं न्यसेत् ३७ अंगुष्ठौ तलेद्वे च पा दौ
देजानुनी वकटौ शिरः शिखरकट्यां च जानुपादादिषु न्यसेत् ३८ द्वादशात्मा पंचविंशद्व्यूहकस्तथा ~~पुरुषो धीरहं कारो मन~~ षड्विंश
~~श्चित्तं च शब्दकः~~ ३९ ~~तथास्पर्शो रसो रूपं गंधः श्रोत्रं त्वचस्तथा~~ पुरुषो धीरहंकारो मनश्चित्तं च शब्दकः ४० तथास्प
र्शो सो रूपं गंधः श्रोत्रं त्वचस्तथा चक्षुर्जिह्वा नासिका पि वाक्पाण्यंघ्रिश्च पायवः ४१ उपस्थो भूर्जलं तेजो वायुराकाशमेव
च पुरुषं व्यापकं न्यस्य अंगुष्ठादौ दशन्यसेत् ४२ शेषान् हस्ततलेन्यस्य शिरस्यथ ललाटके मुखे हृन्नाभिगुह्योरुजान्वं
घ्रौकरणोद्भवे ४३ पदे जान्वोरुपस्थे च हृदये मूर्ध्नि च क्रमात् परश्च पुरुषात्मादौ षड्विंशत्पूर्ववत्परं ४४ संचिंत्य मंडले
पूजेतु प्रकृतिं पूजयेद्बुधः पूर्वयाम्यथ सौमीषु हृदयानीति विन्यसेत् ४५ अस्त्रमग्न्यादिपत्रेषु पैनतेयादि पूर्ववत् दिक्पा

श्री

धि पालांश्च विष्वक्सेनं व्यूहे मिश्र मध्यतः ४६ पूर्वादिदिग्दलावासैर्वासुदेवादिभिरलंकृतः कर्णिकायां नाभसश्च मानसः कर्णि
कास्थितः ४७ विश्वरूपं सर्वसिद्ध्यै यजेद्राज्यजयाय च सर्वव्यूहैः समायुक्तमंगैरपि च पंचभिः ४८ गरुडाद्यैस्तथेंद्राद्यैः
सर्वान् कामानवाप्नुयात् विष्वक्सेनं यजेन्नाम्ना रौं बीजं नाम संयुतं ४९
नारद उवाच समुद्राणां लक्षणं वक्ष्ये सान्निध्यादिप्रकारकं अंजलिः प्रथमा मुद्रा वंदनी हृदयानुगा १ ऊर्ध्वांगुष्ठो वाममु
ष्टिर्दक्षिणांगुष्ठबंधनः सव्यस्य तस्य चांगुष्ठो यस्य चोर्ध्वं प्रकीर्तितं २ तिस्रः साधारणा व्यूहे अथासाधारणा इमाः क-
निष्ठादिविमोकेन अष्टौ मुद्रा यथाक्रमं ३ अष्टानां पूर्वबीजानां क्रमशस्तु अधारयेत् अंगुष्ठेन कनिष्ठां तु नामापि त्वं
गुलित्रयं ४ ऊर्ध्वं कृत्वा संमुखं च वीनायनवमाय च वामहस्तमथोत्तानं कृत्वा हूं नामयच्छनैः ५ वराहस्य स्मृता मुद्रा अं
गानां च क्रमादिमाः एकैकां मोचयेन्मुद्रां वाममुष्टेन थांगुलीं ६ आकुंचयन् पूर्वमुक्तां दक्षिणेप्येवमेव च ऊर्ध्वांगुष्ठो वाममु
ष्टिमुद्रा सिद्धिस्ततो भवेत् ७ नारद उवाच वक्ष्ये दीक्षां सर्वदां च मंडले
पूजेहरिं यजेत् दशम्यामुपसंस्कृत्य यागद्रव्यं समस्तकं १ विन्यस्य नारसिंहेन समंत्र्य शतवारकं सर्षपोस्तु फडंतेन रक्षो
घ्नान् सर्वतः क्षिपेत् २ शक्तिं सर्वात्मिकीं तत्र न्यसेत्प्रासादरूपिणीं सर्वौषधीः समाहृत्य विकिरानभिमंत्रयेत् ३ शतवा
रं शस्त्रमेपात्रे वासुदेवेन साधकः संसाध्य पंचगव्यं तु पंचभिर्मूलमूर्तिभिः ४ नारायणांतैः संप्रोक्ष्य कुशाग्रैस्तेन तां भुवं विकि
रन् वासुदेवेन क्षिपेदुत्तानपाणिना ५ त्रिधा पूर्वामुखस्तिष्ठन् ध्यायन् विष्णुं तदा हृदि वर्द्धन्या सहिते कुंभे सांगं विष्णुं प्रपूज-
येत् ६ शतवारं मंत्रयित्वा त्वस्त्रेणैव च वर्द्धनीं अच्छिन्नधारया सिंचन् ईशानां तं नयेच्च तां ७ कलशं पृष्ठतो नीत्वा स्थापये
रा द्विकिरोपरि संहृत्य विकिरान् दर्भैः कुंभे शंखे केशीं यजेत् ८ सवत्सं पंचरत्नाढ्यं स्थंडिले पूजयेद्धरिं अग्नावपि समभ्यर्च्य
मंत्रान् संतर्प्य पूर्ववत् ९ प्रक्षाल्य पुंडरीकेन विलिप्यां तः स्रग्गंधिना उखामाज्येन संपूर्य गोक्षीरेण तु साधकः १० आलोक्य
वासुदेवेन ततः संकर्षणेन च तंडुलानाज्य संसृष्टान् क्षिपेत् क्षीरे सुसंस्कृते ११ प्रद्युम्नेन समालोड्य दर्व्या संघट्टयेच्छ

अग्निपु॰ नैः पञ्चमुत्तारयेत्पश्चादनिरुद्धेनदेशिकः १२ प्रस्थास्थालिप्यतत्कुर्याद्दृढं पुंड्रंतुभस्मना नारायणेनपार्श्वेषु च
रुमेवंसुसंस्कृतं १३ भागमेकंतुदेवायकलशायद्वितीयकं तृतीयेनतुभागेनप्रदद्यादाहुतित्रयं १४ शिष्यैःसहचतु
र्थंतुगुरुरद्याद्विशुद्धये नारायणेनसंमंत्र्यसप्तधाक्षीरवृक्षजं १५ दंतकाष्ठंभक्षयित्वात्यक्त्वाज्ञात्वोपपातकं ऐंद्रा
17 ग्न्योत्तरकेशानीमुखंपतितमुत्तमं १६ शुभंसिंहशतंहुत्वा आचम्याथप्रविश्यच पूजागारंनयेत्प्राज्ञःप्रार्च्यविष्णुंप्रदक्षि
णं १७ संसारार्णवमग्नानांपशूनांपाशमुक्तये त्वमेवशरणंदेवसदात्वंभक्तवत्सल १८ देवदेवानुजानीहिप्राकृतैः
पाशबंधनैः पाशितान्मोचयिष्यामित्वत्प्रसादात्पशूनिमान् १९ इतिविज्ञाप्यदेवेशंसंप्रविश्यपशूंस्ततः धारणा
वत् भिरुसंशोध्यपूर्वज्वलनादिना २० संस्कृत्यमूर्त्यासंयोज्यनेत्रेबध्वाप्रदर्शयेत् पुष्पपूर्णांजलिंतत्रक्षिपेत्तन्नामयोज-
येत् २१ अमंत्रमर्चनंतत्रपूर्ववत्कारयेत्क्रमात् यस्यांमूर्तौपतेत्पुष्पंतस्यतन्नामनिर्दिशेत् २२ शिखानुसंमितंसू
त्रंपादांगुष्ठांत्रिषड्गुणं कन्यासुकर्तितंरक्तंपुनस्त्रिगुणीकृतं २३ यस्यांसंलीयतेविश्वंयतोविश्वंप्रसूयते प्रकृतिंप्रक्रिया-
भेदैःसंस्थितांतत्रचिंतयेत् २४ तेनप्राकृतिकान्पाशान्ग्रथित्वातत्रसंख्यया कृत्वाशरावेतत्सूत्रंकुंडपार्श्वेनिधायतु
२५ ततस्तत्वानिसर्वाणिध्यात्वाशिष्यतनौन्यसेत् सृष्टिक्रमात्प्रकृत्यादिपृथिव्यंतानिदेशिकः २६ तत्रैषापंचधावा-
स्यादृशद्वादशधापिच ज्ञातव्यासर्वभेदेनग्रथितातत्वचिंतकैः २७ अंगैःपंचभिरध्यानंनिखिलंविकृतिक्रमात् तन्मात्रा
त्मनिसंहृत्यमायासूत्रेपशोस्ततो २८ प्रकृतिर्लिंगशक्तिश्चकर्ताबुद्धिस्तथामनः पंचतन्मात्रबुध्याख्यंकर्माख्यंभूतपंचकं
२९ ध्यायेच्चद्वादशात्मानंसूत्रेदेहेतथेच्छया हुत्वासंपातविधिनासृष्टेःसृष्टिक्रमेणतु ३० एकैकंशतहोमेनदत्वापू
र्णाहुतिंततः शरावेसंपुटीकृत्यकुंभेशायनिवेदयेत् ३१ अधिवास्ययथान्यायंभक्तंशिष्यंतुदीक्षयेत् करणींकर्तरीं
चापिरजांसिखटिकामपि ३२ अन्यदप्युपयोगिस्यात्सर्वंतद्वायुगोचरे संस्थाप्यमूलमंत्रेणपरामृश्याधिवासयेत् 17
३३ नमोभूतेभ्यश्चबलिःकुशेशेतेस्मरन्हरिं मंडपंभूषयित्वाथवितानघटगंडकैः ३४ मंडलेथयजेद्विष्णुंततःसं

तर्प्यपावकं आहूयदीक्षयेच्छिष्यान्बद्धपद्मासनास्थितान् ३५ संप्रोक्ष्यविष्णुहस्तेनमूर्धानंस्पृश्यवैक्रमात् प्रकृत्या
दिविकृत्यंतांसाधिभूताधिदैवतां ३६ सृष्टिमाध्याल्लिकींकृत्वाहृदितांसंहरेत्क्रमात् तन्मात्रभूतांसकलांजीवेनसम
तांगतां ३७ ततःसंप्रार्थ्यकुंभेशंसूत्रंसंस्कृत्यदेशिकः अग्नेःसमीपमागत्यपार्श्वेतंसंनिवेश्यतु ३८ मूलमंत्रेणसृष्टीशमाहु
तीनांशतेनतं उदासीनमथासाद्यपूर्णाहुत्याचदेशिकः ३९ शुक्लंरजःसमादायभूतेनवातमंत्रितैः सेताद्यहृदयंते
नहुंफट्कारान्तसंयुतैः ४० वियोगपदसंयुक्तैर्बीजैःपादादिभिःक्रमात् पृथिव्यादीनितत्वानिविश्लिष्यजुहुयात्ततः
४१ वन्हावखिलतत्वानामालयेव्याहृतेहरौ नीयमानंक्रमात्सर्वंतत्वाधानंस्मरेद्बुधः ४२ ताडनेनवियोज्यैवमादाया
पाद्यशाम्यतां प्रहृत्याहृत्यजुहुयाद्यथोक्तेजातवेदसि ४३ गर्भाधानंजातकर्मभोगंचैवलयंतथा हुत्वाष्टौतत्रतत्रैवत
त्शुद्धंतुमोक्षयेत् ४४ शुद्धंतत्संसमुद्धृत्यपूर्णाहुत्यातुदेशिकः संधयेद्विपरेतत्वेयावदव्याहृतंक्रमात् ४५ तत्प
रंज्ञानयोगेनविलाप्यपरमात्मनि विमुक्तबंधनंजीवंपरस्मिन्नव्ययेपदे ४६ निरतंपरमानंदेशुद्धेबुद्धेस्मरेद्बुधः दद्यात्पू
र्णाहुतिंश्चापिदेवंदीक्षासमाप्यते ४७ प्रयोगमंत्रान्वक्ष्यामियैर्दीक्षाहोमसंलयः ॐ यंभूतानिविशुद्धंहुंफट् अनेनता
डनंकुर्याद्वियोजनमिहद्वयं ॐ भूतान्यपानहंआदानंकृत्वाचानेनप्रकृत्यायोजनंशृणु ॐ भूतानिपुंश्चहोममंत्रंप्रवक्ष्या
श्र मिततःपूर्णाहुतेर्मनुं ॐ भूतानिसंहरस्वाहा ॐअंॐनमोभगवतेवासुदेवायअवौषट् पूर्णाहुत्यानंतरेतुतत्वेशि-
ष्यंतुसाधयेत् एवंतत्वानिसर्वाणिक्रमात्संशोधयेद्बुधः नमोंतेनस्वबीजेनताडनादिपुरःसरं ॐ रांकर्मेंद्रियाणिॐ
दंबुद्धींद्रियाणि यंबीजेनसमानंतुताडनादिप्रयोगकं ॐ स्तंगंतन्मात्रेवियुंक्ष्वहुंफट् ॐ संपाहिहां ॐ खंक्ष्व
प्रकृत्या ॐ हुंगंधतन्मात्रेसंहरस्वाहा ततःपूर्णाहुतिश्चैवमुत्तरेषुप्रयुज्यते ॐ रांरसतन्मात्रे ॐ तेंरूपतन्मात्रे ॐ
वंस्पर्शतन्मात्रे ॐ मंशब्दतन्मात्रे ॐ भंनमः ओंमूमौंअहंकारः ॐ नंबुद्धे ॐ प्रकृते एकमूर्तावयंप्रोक्तोदीक्षायो
गःसमागतः एवमेवप्रयोगस्तुनवव्यूहादिकेस्मृतः दग्ध्वापरस्मिन्संदध्यान्निर्वाणेप्रकृतिंनरः अविकारेसमादध्या

दीश्वरेप्रकृतिस्तत्र: शोधयित्वातु भूतानि कर्माक्षाणि विशोधयेत् बुध्यक्षाण्यथतन्मात्रम न्येज्ञानमहंकृतिं लिंगात्मानं
विशोध्यांतेप्रकृतिंशोधयेत्पुनः पुरुषंप्राकृतंशुद्धमीश्वरेधाम्निसंस्थितं स्वगोचरीकृताशेषभोगयुक्तांकृतात्परं
ध्यायेत्पूर्णाहुतिंदद्याद्दीक्षयित्वाधिकारिणं अंगेरशाध्यमंत्रस्यनीत्वातत्तुगणंसमं क्रमादेवंविशोध्यांतेसर्वसिद्धिसम
न्वितं ध्यायन्पूर्णाहुतिंदद्याद्दीक्षेयंसाधिकास्मृता द्रव्यस्यवानसंपतिरशक्तिर्वात्मनोयदि इष्ट्वापूर्वंयथादेवंसर्वोपकर
णान्वितः सद्योधिवासयेद्द्वादश्यांदीक्षयेद्देशिकोत्तमः भक्तोविनीतःशारीरैर्गुणैःसर्वैःसमन्वितः शिष्योनातिधनीयस्तु
स्थंडिलेभ्यर्च्यदीक्षयेत् अध्वानंनिखिलंदैवंभौतंचाधारमीकृतं सृष्टिक्रमेणशिष्यस्यदेहेध्यात्वातुदेशिकः अ
शस्त्रहुतिभिःपूर्वक्रमात्संतर्प्यसृष्टिमान् स्वमंत्रैर्वाकृदेवादीन्जननादीन्विसर्जयेत् होमेनशोधयेत्पश्चात्संहार
क्रमयोगतः यानिसूत्राणिबद्धानिमुक्ताकर्माणिदेशिकः शिष्यदेहात्समाहृत्यक्रमात्तत्त्वानिशोधयेत् अग्नौप्राकृ
तकेविष्णोर्लयंनीत्वाधिदैविके शुद्धंतत्त्वमशुद्धेनपूर्णाहुत्यातुसाधयेत् शिष्येतप्रकृतिमापन्नेदग्ध्वाप्राकृतिकान्
गुणान् मोचयेदधिकारेवानियुंज्याद्देशिकःशिशून् अथान्यांशक्तिदीक्षांवाकुर्यात्भावेस्थितोगुरुः भक्त्यासंप्रतिप
न्नानांयतीनांनिर्धनस्यच संपूज्यस्थंडिलेविष्णुंपार्श्वस्थंस्थाप्यपुत्रकं देवताभिमुखःशिष्यस्तिर्यगस्यस्वयंस्थितः
अध्वानंनिखिलंध्यात्वापर्वभिःस्वैर्विकल्पितं शिष्यदेहेतथादेवमाधिदैविकयार्चनं ध्यानयोगेनसंचित्यपूर्ववत्ताड
नादिना क्रमात्तत्त्वानिसर्वाणिशोधयेत्स्थंडिलेहरेः ताडनेनवियोज्याथगृहीत्वात्मनितत्पुनः देवेसंयोज्यसंशोध्यगृही
४ त्वातत्स्वभावतः आनीयशुद्धभावेनसंधयित्वाक्रमेणतु शोधयेत्ध्यानयोगेनसर्वसंत्यानमुद्रया शुद्धेषुसर्वत
त्त्वेषुप्रधानेचेश्वरेस्थिते दग्ध्वानिर्वापयेच्छिष्यान्पदेचैनान्नियोजयेत् निरयात्सिद्धिमार्गेवासाधकंदेशिकोत्तमः एव
मेवाधिकारस्थोगृहीकर्माण्यतंद्रितः आत्मानंशोधयंस्तिष्ठेद्यावद्रागक्षयोभवेत् क्षीणरागमथात्मानंज्ञात्वासंशुद्धकि
ल्बिषः आरोप्यपुत्रेशिष्येवाद्यधिकारंतुसंयमी दग्ध्वामायामयंपाशंप्रव्रज्यस्वात्मनिस्थितः शरीरपातमाकांक्षन्नासीता

MEMORIAL

व्यक्तलिंगवान्   नारदउवाच अभिषेकंप्रवक्ष्यामियथाचार्यस्तुपुत्रकः
सिद्धिभाक्साधकोयेनरोगीरोगाद्विमुच्यते १ राज्यंराजापतिंस्त्रीचप्राप्नुयान्मलनाशनं मूर्द्धिःकुंभान्सरत्नादयान्मध्य
पूर्वादितोन्यसेत् २ सहस्रावर्तितान्कुंभान्थवाशतवर्तितान् मंडपेमंडपेविष्णुंप्राच्यैशान्येचपीठके ३ निवेश्यशकलीकृत्य-
पुत्रकंसाधकादिकं अभिषकंसमभ्यर्च्यकुर्याद्गीतादिपूर्वकं ४ दद्याच्चयोगपीठादींस्त्वनुयाह्यास्त्वयानराः गुरुश्चसमयान्ब्रू
यात्गुरुःशिष्योथसर्वभाक् ५   नारदउवाच साधकःसाधयेन्मंत्रंदेवतायतनादि
के शुद्धभूमौगृहेप्राच्यमंडलेहरिमीश्वरं १ चतुरस्रीकृतेक्षेत्रेमंडलादीनिवैलिखेत् रसबाणाक्षिकोष्ठेषुसर्वतोभद्रमालिखे
त् २ षड्विंशत्कोष्ठकैःपद्मंपीठंपंक्त्याबहिर्भवेत् द्वाभ्यांतुवीथिकातस्मात्पयोद्वाराणिदिक्षुच ३ वर्तुलंभ्रामयित्वातुपद्मक्षे
त्रंपुरोदितं पद्मार्धंभ्रामयित्वातुभागंद्वादशमंबहिः ४ विभज्यभ्रामयेच्छेषंचतुःक्षेत्रंतुवर्तुलं प्रथमंकर्णिकाक्षेत्रंकेसराणांद्वि
तीयकं ५ तृतीयंदलसंधीनांदलाग्राणांचतुर्थकं प्रसार्यकोणसूत्राणितत्रपत्राष्टकंलिखेत् ६ दलसंध्यंतरालंतुमानंमध्येनि
धायतु दलाग्रंभ्रामयेत्तेनतदग्रंतदनंतरं ७ तदंतरालंतत्पार्श्वेकृत्वाबाह्यक्रमेणच केशरेतुलिखेद्द्वौद्वौदलमध्येततःपुनः ८
पद्मलक्ष्मेतत्सामान्यंतद्द्विषड्दलमुच्यते कर्णिकार्द्धेनमानेनप्राक्संस्थंभ्रामयेत्क्रमात् ९ तत्पार्श्वेभ्रमयोगेनकुंडल्यः
षड्भवंतिहि एवंद्वादशमत्स्याःस्युर्द्विषट्कदलकंचतैः १० पंचपत्रादिसिध्यर्थमत्स्यंकृत्वैवमब्जकं व्योमरेखाबहिःपी
ठंतत्रकोष्ठानिवार्चयेत् ११ त्रीणिकोणेषु ... पादार्धद्विर्द्विकान्यपुराणितु चतुर्दिक्षुविलिप्तानिपात्रकाणिभवंत्यतः १२ ततः
पंक्तिद्वयंदिक्षुवीथ्यर्थंतुविलेपयेत् द्वाराण्याशासुकुर्वीतचत्वारिचतसृष्वपि १३ द्वाराणांपार्श्वतःशोभाअष्टौकुर्याद्विचक्षणः
तत्पार्श्वउपशोभास्तुतावत्यःपरिकीर्तिताः १४ समीपउपशोभानांकोणास्तुपरिकीर्तिताः चतुर्दिक्षुततोद्वेद्वेचिंतयेन्मध्यको
ष्ठकैः १५ चत्वारिबाह्यतोमृज्यादेकैकंपार्श्वयोरपि शोभार्थंपार्श्वयोस्त्रीणित्रीणिलिंपेद्दलस्यतु १६ तद्वद्विपर्ययेकुर्यादु
पशोभांततःपरं कोणस्यांतर्बहिस्त्रीणिचिंतयेन्निर्विभेदतः १७ एवंषोडशकोष्ठंस्याद्देवमन्यत्तुमंडलं द्विषट्कभागेषड्विं

पुस्तकांतरे
निधायकेसराग्रेतुद
लसंधीस्तुलांछयेत्
पातयित्वाथसूत्राणि
तत्रयंत्राष्टकंलिखेत्

अग्निपु

शनूपरंपद्मरुक्तवीथिका १८ एकापंक्तिःपराभ्यां तु द्वारशोभादि पूर्ववत् द्वारशांगुलिभिः पद्ममेकहस्तेतु मंडले १९ द्वि
हस्तेह स्तमात्रंस्याद्वृध्याधारेण चान्तरे अपीठं चतुरस्त्रंस्याद्दिकरे चक्रपंकजं २० पद्मार्धनवभिः प्रोक्तं नाभिस्तत्त्रि-
सृभिः स्मृता अष्टाभिस्त्वारकान्कुर्यान्नेमिंतु चतुरंगुलैः २१ त्रिधा विभज्य च क्षेत्रमंतर्द्वाभ्यामथांकयेत् पंचांतस्त्वारासंध्य
१८ र्थंतेष्वास्फाल्य लिखेद्बुधान् २२ इंदीवरदलाकारमथवा मातुलुंगवत् पद्मपत्रायतं वापि लिखेदिच्छानुरूपतः २३ भ्रामयि
त्वा बहिर्नेमावरसंध्यंतरेस्थितः भ्रामयेदरमूलं तु संधिमध्ये व्यवस्थितः २४ अरमध्येस्थितो मध्यमराणां भ्रामयेत्समं ए
वंसिध्यंतराः सम्यक् मातुलिंगनिभाः समाः २५ विभज्य सप्तधा क्षेत्रं चतुर्दशकरं समं त्रिधा कृते शतं ह्यत्र पं॰ चत्वधिकानि तु ण्णा
२६ कोष्ठकानि चतुर्भिस्तैर्मध्ये भद्रं समालिखेत् परितो विसृजेद्वीथ्यै तथा दिक्षु समालिखेत् २७ कमलानि पुनर्वीथ्यै परि
तः परिमृज्य तु द्वे द्वे मध्यमकोष्ठे तु ग्रीवार्थं दिक्षु लेखयेत् २८ चत्वारि बाह्यतः पश्चात्त्रीणि त्रीणि तु लेखयेत् ग्रीवापार्श्वे बहिस्त्वेकः
शोभा सा परिकीर्तिता २९ विसृज्य बाह्यकोणेषु सप्तान त्रीणि मार्जयेत् मंडलं नवनालं स्यान्नवव्यूहं हरिं यजेत् ३० पंचविंशति
कं व्यूहमंडलं वैश्वरूपगं द्वात्रिंशद्धस्तकं क्षेत्रं तथा द्वाविंशता समं ३१ एवं कृते चतुर्विंशत्यर्कं तु सहस्रकं कोष्ठकानां समुद्दिष्टं
मध्ये षोडश कोष्ठकैः ३२ भद्रकं परिलेख्याथ पार्श्वे पंक्तिं विसृज्य तु ततः षोडशभिः कोष्ठैर्दिक्षु भद्राष्टकं लिखेत् ३३ ततो
पि पंक्तिं संसृज्य तद्वत्षोडशभद्रकं लिखित्वा परितः पंक्तिं विमृज्याथ प्रकल्पयेत् ३४ द्वारद्वादशकं दिक्षु त्रीणि त्रीणि यथाक
मं षड्भिः परिलुप्यांतर्मध्ये चत्वारि पार्श्वयोः ३५ चत्वार्यंते बहिर्द्वे तु शोभार्थं परिमृज्य तु उपद्वारप्रसिध्यर्थं त्रीण्यंतःपं
च बाह्यतः ३६ परिमृज्य तथा शोभां पूर्ववत्परिकल्पयेत् बहिः कोणेषु सप्तांत त्रीणि कोष्ठानि मार्जयेत् ३७ पंचविंशति
कव्यूहे परं ब्रह्म यजेत्कजे मध्ये पूर्वादितः पद्मे वासुदेवादितः क्रमात् ३८ वाराहं पूजयित्वा तु पूर्वपद्मे ततः क्रमात् व्यूहा
न्संपूजयेत्तावद्यावत्षड्विंशमो भवेत् ३९ यथोक्तं व्यूहमखिलमेकस्मिन्मंडले क्रमात् यष्टव्यामिति मंत्रेण प्रचे
ता मन्यते ध्वरं ४० सत्यरूढमूर्तिभेदेन विभक्तं मन्यतेच्युतं चत्वारिंशत्करं क्षेत्रं ह्युत्तरं विभजेत्क्रमात् ४१ एकैकं सप्तधाभू

यस्तथैकैकं द्विधा पुनः चतुःषष्ट्युत्तरं सप्तशतान्येकं सहस्रकं ४२ कोष्ठकानां समुद्दिष्टं मध्ये षोडशकोष्ठकैः पार्श्वे
वीथीं ततश्चाष्टभद्राण्यथ च वीथिका ४३ षोडशाब्जान्यथो वीथी चतुर्विंशति पंकजं वीथी पद्मानि द्वात्रिंशत् पंक्ति वी
थी कजान्यथ ४४ चत्वारिंशत्ततो वीथी शेषं पंक्तित्रयेण च द्वारशोभोपशोभास्तु दिक्षु मध्ये विलेख्य च ४५ द्विचतुःषड्
द्वारसिद्ध्यै च तुर्दिक्षु विलेखयेत् पंच त्रीण्येकं कं बाह्ये शोभोपद्वारसिद्धये ४६ योरंतः षड्चत्वारि मध्यतः द्वे द्वे लुंपेदेव द्वाराणांपार्श्वे
मेवषड्वंस्तु पशोभिकाः ४७ एकस्यां दिशि संख्याः स्युश्चतस्रः परिसंख्यया एकैकस्यां दिशि त्रीणि द्वाराण्यपि भवंत्यतः
४८ पंच पंच तु कोणे तु पंक्तौ पंक्तौ क्रमात्सृजेत् कोष्ठकानि भवेदेवं सत्येष्टं मंडलं शुभं ४९

नारद उवाच मध्ये पद्मे यजेद्ब्रह्म सांगं पूर्वेब्जनाभकं आग्नेयेब्जे च प्रकृतिं याम्येब्जे पुरुषं
यजेत् १ पुरुषाद्दक्षिणे वह्निं नैर्ऋते वारुणेनिलं आदित्यमैंदवे पद्मे ऋग्यजुश्चैकपद्मके २ इंद्रादींश्च द्वितीया-
यां पद्मे षोडशकं तथा सामाथर्वणमाकाशं वायुं तेजस्तथा जलं ३ पृथिवीं च मनश्चैव श्रोत्रं त्वक्च चक्षुरर्चयेत् रसनं
च तथा घ्राणं भूर्भुवश्चैव षोडशं ४ महर्जनः तपः सत्यं तथाग्निष्टोममेव च अत्यग्निष्टोमकं चोक्थं षोडशी वाजपेयकं
५ अतिरात्रं च संपूज्य तथाप्तोर्याममर्चयेत् मनो बुद्धिमहंकारं शब्दं स्पर्शं च रूपकं ६ रसं गंधं च पद्मेषु चतुर्विंशति
षु क्रमात् जीवं मनो धियं चाहं प्रकृतिं शब्दमात्रकं ७ वासुदेवादिमूर्तींश्च तथा चैव दशात्मकं मनः श्रोत्रं त्वचं प्राच्य
चक्षुश्च रसनं तथा ८ घ्राणं वाक्पाणिपादं च द्वात्रिंशद्वारिजेष्विमान् चतुर्थावरणे पूज्याः सांगाः सपरिवारकाः ९ पा
पूपस्थौ त्वसंपूज्य मासानां द्वादशाधिपान् पुरुषोत्तमादिषड्विंशान्बाह्यावरणके यजेत् १० चक्राब्जेषु संपूज्या मा
सानां पतयः क्रमात् अष्टौ प्रकृतयः षड्पंचवाय्यन्तवोपरे ११ रजःपातं ततः कुर्याद्विखिते मंडले शृणु कर्णिका
पीतवर्णा स्याद्रेखाः सर्वाः सिताः समाः १२ द्विहस्तेंगुष्ठमात्रास्युर्हस्ते चाहुसमाः सिताः पद्मं शुक्लेन संधीस्तु कृष्णेन
श्यामतो थवा १३ केसरा रक्तपीताः स्युः कोणारक्तेन पूरयेत् भूषयेद्योगपीठं तु यथेष्टं सार्ववर्णिकैः १४ लताविता

नपत्राद्ये वीथिकामुप .शोभयेत् पीतैद्वारेतु शुक्लेन शोभार क्तेन पीडितः १५ उपशोभाच नीलेन कोणशंखा श्चवै सि
तान् भद्रके पूरणं प्रोक्तमेवमन्येषु पूरणं १६ त्रिसितरक्तेन कृष्णेन च विभूषयेत् द्विकोणं रक्तपीताभ्यां नाभिं कृष्णेन चक्रके
१७ अरकान् पीतरक्ताभिः श्यामाने मिकुरक्ततः श्वेतश्यामारुणा कृष्णा पीता रक्ता स्क वाह्यतः १८ शालिपिंदिशकुं स्यात् श्वा
रक्तं कौसुंभकादिकं हरिद्रया च हारिद्रं कृष्णं स्याद् ग्धधान्यतः १९ शमीपत्रादिकैः श्यामं बीजानां लक्षजाप्यतः चतुर्लक्षे
तु मंत्राणां विधानां लक्षसाधनं २० आयुतं रुद्रविद्यानां स्तोत्राणां च सहस्रकं पूर्वमेवाथ लक्षेण मंत्रशुद्धिस्तथात्मनः पुस्तकांतरे
२१ तथापरेण लक्षेण मंत्रःक्षेत्रीकृतो भवेत् पूर्वसेवा समो होमो बीजानां संप्रकीर्तितः २२ पुरश्चर्या तु मंत्रेण मासिकं पूर्वसेवादशांशेन मंत्रादीनां प्रकीर्तितः
व्रतमाचरेत् भुवि न्यसेद्वृषे पादं न गृण्हीयात्प्रतिग्रहं २३ एवं द्वित्रिगुणेनैव मध्यमोत्तमसिद्धयः मंत्रध्यानं प्रवक्ष्यामि-
येन स्यात् मंत्रजं फलं २४ स्थूलं शब्दमयं रूपं विग्रहं बाह्यमिष्यते सूक्ष्मं ज्योतिर्मयं रूपं हार्दं चिंतामयं भवेत् २५ चिंतया चिंतयारहितं
रहितरूपं वास्कदेवस्य कीर्तितं इतरेषां स्मृतं रूपं हार्दं चिंतामयं सदा २६ स्थूलं वैरा जमाख्यातं सूक्ष्मं वै लिंगितं भवेत् यत्तु तत्परं परिकीर्तितं
चिंतयारहितं रूपमैश्वरं परिकीर्तितं २७ हृत्पुंडरीकनिलयं चैतन्यं ज्योतिरव्ययं बीजं जीवात्मकं ध्यायेत् कदंबकुसुमाकृतिं वराहसिंहशक्तीनां
२८ कुंभांतरगतो दीपो निरुद्धप्रसवो यथा संहतः केवलः स्तिष्ठेदेवं मंत्रेश्वरो हृदि २९ अनेकछिद्रे कुंभे तावन्मात्रा स्थूलरूपप्रधानकं॥
गभस्तयः प्रसरंति बहिस्तद्वन्नाडीभिर्जीवरश्मयः ३० अथावभासतो देवी मात्मीकृत्य तनुं स्थिता हृदयात् प्रास्थिता ना
ड्योदर्शनेंद्रियगोचराः ३१ येग्नीषोमात्मकेनासां नाड्यो नासातु संस्थिते सम्यग्मुद्रान्तयोगेन जित्वा देहसमीरणं ३२
जपध्यानरतो मंत्री मंत्रजं फलमश्नुते संशुद्धभूततन्मात्रः सकामो योगमभ्यसेत् ३३ अणिमा दिर्मनोनिविरक्तः प्र वा
विलंघ्य चिदात्मके भूतमात्रान्मुच्यते चेंद्रियग्रहात् ३४
अग्निरुवाच रक्षांस्वस्य परेषां च वक्ष्ये मार्जनाह्वयं यथा विमुच्यते दुःखैः सुखं च प्राप्नुयान्नरः १ ॐ नमः परमार्थाय पु
अरूपबहुरूपायव्यापिने परमात्मने रुषाय महात्मने निष्कल्मषाय शुद्धाय ध्यानयोग रताय च २ नमस्कृत्य प्रवक्ष्यामि यत्तात्सिध्यतु मे वचः वराहाय नृसिंहा

हाय वामनाय महात्मने ३ नमस्कृत्य प्रवक्ष्यामि यत्सिध्यतु मे वचः त्रिविक्रमाय रामाय वैकुंठाय नराय च ४ नमस्कृत्य
न प्रवक्ष्यामि यत्सिध्यतु मे वचः वराह नरसिंहेश वामनेश त्रिविक्रम ५ हयग्रीवेश सर्वेश हृषीकेश हराशुभं अपरा
जितं चक्राद्यैश्चतुर्भिः परमायुधैः ६ अखंडितानुभावैस्त्वं सर्वदुःखहरो भव हरामुकस्य दुरितं सर्वं च कुशलं कुरु
७ मृत्युबंधार्तिभयदं दुरितस्य च यत्फलं पराभिधानसहितैः प्रयुक्तं चाभिचारकं ८ गरस्पर्शमहारोगप्रयोगं जरया
जर ॐ नमो भगवते वासुदेवाय नमः कृष्णाय खड्गिने नमः पुष्करनेत्राय केशवायादिचक्रिणे नमः कमलकिं
जल्कपीतनिर्मलवाससे महाहवरिपुस्कंधघृष्टचक्राय चक्रिणे दंष्ट्रोद्धृतक्षितिभृते त्रयीमूर्तिमते नमः महा
यज्ञवराहाय शेषभोगांकशायिने तप्तहाटककेशांत ज्वलत्पावकलोचन वज्राधिकस्पर्श दिव्यसिंह नमोस्तु नख
ह ते कश्यपायातिह्रस्वाय ऋग्यजुःसामभूषिते तुभ्यं वामनरूपाय क्रमते गां नमो नमः वराहाशेषदुष्टानि सर्वपापफ
लानि वै मर्द मर्द महादंष्ट्र मर्द मर्द च तत्फलं नरसिंह करालास्य दंतप्रांतानलोज्ज्वल भंज भंज निनादेन दुष्टान्यस्या
ताभि तिनाशन ऋग्यजुःसामगर्भाभि र्वामनरूपधृक् प्रशमं सर्वदुःखानि नयत्वस्य जनार्दनः एकाहिकं द्व्याहिकं च तथा
सं त्रिदिवसं ज्वरं चातुर्थिकं तथात्युग्रं तथैव सततज्वरं दोषोत्थं सान्निपातोत्थं तथैवागंतुकं ज्वरं शमं नयाशु गोविंद
छिंधि छिंधास्य वेदनां नेत्रदुःखं शिरोदुःखं दुःखं चोदरसंभवं अनिश्वासमतिश्वासं परितापं सवेपथुं गुदघ्राणां
घ्रिरोगांश्च कुष्ठरोगांस्तथा क्षयं कामलादींस्तथा रोगान् प्रमेहांश्चातिदारुणान् भगंदरातिसारांश्च मुखरोगं सवर्ण
लि अश्मरीमूत्रकृच्छ्रांश्च रोगानन्यांश्च दारुणान् ये वातप्रभवा रोगा ये च पित्तसमुद्भवाः कफोद्भवाश्च ये केचित् ये च
न्ये सान्निपातिकाः आगंतुकाश्च ये रोगा लूताविस्फोटकादयः ते सर्वे प्रशमं यांतु वासुदेवापमार्जिताः विलयं यांतु
ते सर्वे विष्णोरुच्चारणेन च क्षयं गच्छंतु चाशेषास्ते चक्राभिहता हरेः अच्युतानंतगोविंद नामोच्चारणभीषितात् नश्यं
ति सकला रोगाः सत्यं सत्यं वदाम्यहं स्थावरं जंगमं वापि कृत्रिमं चापि यद्विषं दंतोद्भवं नखभवं माकाशप्रभवं विषं भूता

दिम्रभवंमञ्चविषमन्यसुदुःखदं शमंनयत्नुतत्सर्वकीर्तितोस्यजनार्दनः ग्रहान्प्रेतग्रहांश्चापितथावैडाकिनीग्रहान् वेता
लांश्चापिशाचांश्चगंधर्वान्यक्षराक्षसान् शकुनीपूतनाद्यांश्चतथावैनायकान्ग्रहान् मुखमंडितथाक्रूरांरेवतींरद्धरेवतीं
27 शद्धिकाख्यान्ग्रहांश्चोग्रांस्तथामातृग्रहानपि बालस्यविष्णोश्चरितंहंतुबालग्रहानिमान् रद्धाश्चयेग्रहाःकेचिद्येच
बालग्रहाःक्वचित् नरसिंहस्यतेदृष्ट्वादग्धायेचापियेयौवने सराकरालवदनोनरसिंहोमहाबलः ग्रहानशेषान्निःशेषा
न्करोतुजगतोहितः नरसिंहमहासिंहज्वालामालोज्वलानन ग्रहानशेषान्सर्वेशखादखादाग्निलोचन येरोगायेमहोत्पा
तायद्विषोयेमहाग्रहाः यानिचक्रूरभूतानिग्रहपीडाश्चदारुणाः शस्त्रक्षतेषुयेदोषाजालगर्दभकादयः तानिसर्वाणिस
र्वात्मापरमात्माजनार्दनः किंचिद्रूपंसमास्थायवासुदेवोस्यनाशय क्षिप्त्वासुदर्शनंचक्रंज्वालामालातिभीषणं सर्वदुष्टोपशम
नंकुरुदेववराच्युत सुदर्शनमहाज्वालछिन्धिछिन्धिमहारव सर्वदुष्टानिरक्षांसिक्षयंयांतुविभीषण प्राच्यांप्रतीच्यांच
दिशिदक्षिणोत्तरतस्तथा रक्षांकरोतुसर्वात्मानरसिंहःसुगर्जितैः दिविभुव्यंतरिक्षेचपृष्ठतःपार्श्वतोग्रतः रक्षांकरो
तुभगवान्बहुरूपीजनार्दनः यथाविष्णुर्जगत्सर्वंसदेवासुरमानुषं तेनसत्येनदुष्टानिशममस्यव्रजंतुवै यथाविष्णौस्मृ
तेसद्यःसंक्षयंयांतिपातकाः सत्येनतेनसकलंदुष्टमस्यप्रशाम्यतु परमात्मायथाविष्णुर्वेदांतेषुचगीयते तेनसत्ये
नसकलंदुष्टमस्यप्रशाम्यतु यथायज्ञेश्वरोविष्णुर्देवेष्वपिहिगीयते सत्येनतेनसफलंयन्मयोक्तंतथास्तुतत् शांति
रस्तुशिवंचास्तुदुष्टमस्यप्रशाम्यतु वासुदेवशरीरोत्थैः कुशैर्निर्नाशितंमया अपमार्जतिगोविंदोनरोनारायणस्तथा तथे
वसर्वदुःखानांप्रशमोवचनाद्धरेः अपमार्जनकंशस्तंसर्वरोगादिवारणं। अहंहरिःकुशाविष्णुर्हतारोगास्तवामम 27

अग्निरुवाच निर्वाणादिषुदीक्षासुचत्वारिंशत्तथाष्टच संस्कारान्
कारयेद्द्विजान्शृणुतान्यैःसुरोभवेत् १ गर्भाधानंतुयोन्यांवैततःपुंसवनंचरेत् सीमंतोन्नयनंचैवजातकर्मचनामच २
अन्नाशनंततःचूडाब्रह्मचर्यव्रतानिच चत्वारिवैष्णवेपार्थिवौनिकीश्चौतिकीतथा ३ गोदानंसात्तकात्वंचपाकय
ज्ञांश्चसप्तते अष्टकापार्वणंश्राद्धंश्रावण्यांश्रावणीतिच ४ चैत्रीचाश्वयुजीसप्तहविर्यज्ञांश्चतान्शृणु आधानंचाग्निहो
त्रंचदर्शोवैपौर्णमासकः ५ चातुर्मास्यंपशुबंधःसौत्रामणिरथापरं सोमसंस्थाःसप्तशृणुअग्निष्टोमःक्रतूत्तमः ६ अत्यग्नि
इ ष्टोमउक्थाश्चषोडशीवाजपेयकः अतिरात्रोप्तोर्यामश्चसहस्रेशाःसर्वामे ७ हिरण्याङ्घ्रिर्हिरण्याक्षोहिरण्यमित्रतः हिरण्यपा ३३
ह्रो णिर्हेमाक्षोहेमांगोहेमसूत्रकः ८ हिरण्यास्योहिरण्यांगोहेमजिह्वोहिरण्यवान् अश्वमेधोहिसर्वेशोगुणाश्चाष्टाथतान्शृणु
९ दयाचसर्वभूतेषुक्षांतिश्चैवतथार्जवं शौचंचैवमनायासोमंगलंचापरेगुणः १० अकार्पण्यंचास्पृहाचमूलेनजुहुयाच्छतं
सौरशाक्तयविष्णुवीशदीक्षास्वेतेसमाःस्मृताः ११ संस्कारैःसंस्कृतःश्चैतैर्भुक्तिमुक्तिमवाप्नुयात् सर्वरोगादिनिर्मुक्तोदेववद्व
र्ततेनरः १२ जप्याद्धोमात्पूजनाच्चध्यानाद्देवस्यचेष्टभाक्
अग्निरुवाच पवित्रारोपणंवक्ष्येवर्षपूजाफलंहरेः आषाढादौकार्तिकांतेप्रतिपद्धर्ततिथिः १ श्रियागौर्यागणेशस्यसरस्वत्यागु
हस्यच मार्तंडमातृदुर्गाणांनागर्षिहरिमन्मथैः २ शिवस्यब्रह्मणस्तद्वत्द्वितीयादितिथिःक्रमात् यस्यदेवस्ययोभक्तःपवित्रात
स्यसातिथिः ३ आरोहणेतुल्यविधिःपृथक्मंत्रादिकंयदि सौवर्णराजतंताम्रंनेत्रकार्पासिकादिकं ४ ब्राह्मण्याकर्त्तितं
सूत्रंतदलाभेतुसंस्कृतं त्रिगुणंत्रिगुणीकृत्यतेनकुर्यात्पवित्रकं ५ अष्टोत्तरशतादूर्ध्वंतदर्धंचोत्तमादिकं क्रियालोपविघा
तार्थंयत्त्वयाभिहितंप्रभो ६ मयातन्न्क्रियतेदेवयथायत्रपवित्रकं अविघ्नंतुभवेदत्रकुरुनाथजयाव्यय ७ प्रार्थ्यतन्मंड

लायादौ गायत्र्यावंधयेन्नरः ॐ ॐ नारायणाय विद्महे वासु देवाय धीमहि तन्नो विष्णुः प्रचोदयात् देवादिर
नुरूपतः जानूरूनाभिमानांतं प्रतिमासु पवित्रकं पादांता वनमालास्यादष्टोत्तरसहस्रशः मालांतु कल्पसादयं चा
द्विगुणा षोडशांगुलान् कर्णिकाकेसरं पत्रंमंत्राद्यं मंडलांतकं मंडलांगुलमात्रं कचक्रांकादौ पवित्रकं स्थंडिलेंगुलमा
नेन आत्मनस्सप्तविंशतिः आचार्याणांच सूत्राणि पितृमात्रादिपुस्तके नाभ्यंतं द्वादशे देयं थितथा गंधपवित्रके अंगुलान्
कन्यसादौ द्विर्मालाचाष्टोत्तरंशतं अथवार्कचतुर्विंशषड्विंशन्मालिका द्विजः अनामामध्यमांगुष्ठे मंदादौ मालिकार्थिभिः
कनिष्ठादौ द्वादशवायं यथपस्तुः पवित्रके रवेः कुंभहुताशादेः संभवे विष्णुवन्मतं पीठस्य पीठमानं स्यान्मेखलांतं च कुंडके य
थाशक्तिसूत्रग्रंथिः परिवारे थवैष्णवे सूत्राणि वाससदशसूत्रेण च विभक्तके रोचनागरुकर्पूरहरिद्राकुंकुमादिभिः रंज
येच्चंदनाद्यैर्वा स्नानसंध्यादिकृन्नरः एकादश्यां यागगृहे भगवंतं हरिं यजेत् समस्तपरिवाराय बालिं पीठे समर्चयेत्
क्षौं क्षेत्रपालाय द्वारांते द्वारोपरि तथा श्रियं धात्रे दक्षविधात्रे च गंगां च यमुनां तथा शंखपद्मनिधिं पूज्य मध्ये वास्तव
पसारणं सारंगायेति भूतानां भूतशुद्धिं स्थितश्चरेत् ॐ हूं हः फट् हूं गंधतन्मात्रं संहारामि नमः ॐ ह्रां हः फट् हुं रस
तन्मात्रं संहरामि नमः ॐ ह्रां हः फट् हं रूपतन्मात्रं संहरामि नमः ॐ ह्रां हं : सं स्पर्शतन्मात्रं संहारामि नमः ॐ ह्रां हः
फट् हूं शब्दतन्मात्रं संहारामि नमः पंचोद्घातैर्गंधतन्मात्रं स्वरूपं भूमिमंडलं चतुरस्रं च पीतं च कांचनं वज्रलांछितं इंद्रा
दि दैवतेषाद हृयुग्ममध्यगतं स्मरेत् शुद्धं च रसतन्मात्रं प्रविलाप्याथ संहरेत् रसमात्रं रूपमात्रे क्रमेणानेन पूज
कः ॐ ह्रौं हः फट् हुं रसतन्मात्रं संहारामि नमः ॐ ह्रीं हः फट् हुं रूपतन्मात्रं संहारामि नमः ॐ हं हः फट् स्पर्शतन्मात्रं सं
ह रामि नमः ॐ ह्रां हः फट् हुं शब्दतन्मात्रं संहारामि नमः जानुनाभिमध्यगतं श्वेतं वै [illegible] तं शुक्लवर्णं चार्द्धचं
द्रं ध्यायेद्वरुणदैवतं चतुर्भिश्च तदुद्घातैः शुद्धं तत्र समानृकं संहरेद्रूपतन्मात्रे रूपमात्रे च संहरेत् ॐ हं हः फ
ट् हं रूपतन्मात्रं संहारामि नमः ॐ हूं हः फट् हूं स्पर्शतन्मात्रं संहारामि नमः ॐ हूं हः फट् हूं शब्दतन्मात्रं संहारामि नमः

इति त्रिभिस्तदुद्घातैस्त्रिकोणं वह्निमंडलं नाभिकंठमध्यगतं रक्तं स्वस्तिलांछितं ध्यात्वानलाधिदैवं तच्छुद्धं स्पर्शे लयं नयेत्
ॐ ह्रौं हः फट् हूं स्पर्शतन्मात्रं संहरामि नमः ॐ ह्रौं हः हुं फट् शब्दतन्मात्रं संहरामि नमः कंठनासामध्यगतं वृत्तं वै वायु
मंडलं द्विरुद्घातैर्धूम्रवर्णं ध्यायेच्छुद्धं दुलांछितं स्पर्शमात्रं शब्दमात्रैः संहरेत् ध्यानयोगतः ॐ ह्रौं हः फट् हूं शब्दतन्मात्रं संह
रामि नमः एकोद्घातेन चाकाशं शुद्धं स्फटिकसन्निभं नासापुटशिखांतस्थमाकाशमुपसंहरेत् शोषणाद्यैर्देहशुद्धिं कुर्यादेवं
क्रमात्ततः शुष्कं कलेवरं ध्यायेत् पादाद्यं च शिखांतकं यंबीजेन रंबीजेन ज्वालामालासमायुतं देहं बमित्यनेनैव ब्रह्मरंध्रा
दिनिर्गतं बिंदुं ध्यात्वा चामृतस्य तेन भस्मकलेवरं संप्लावयेल्लमित्यस्माद् देहं संपाद्य दिव्यकं न्यासं कृत्वा करे देहे मानसं या
गमाचरेत् विष्णुं सांगं हृदि पद्मे मानसैः कुसुमादिभिः मूलमंत्रेण देवेशं प्रार्चयेद्भुविमुक्तिदं स्वागतं देवदेवेश सन्निधो भ
व केशव गृहाण मानसीं पूजां यथार्थपरिभावितां आधारशक्तिः कूर्मोथ पूज्योनंतो महीन तः मध्ये ग्न्यादौ च धर्माद्या अधर्मा
दिं द्रमुख्यगं सत्वादि पद्मे पद्मं च मायाविद्याख्यतत्वके कालतत्वं च सूर्यादिमंडलं पक्षिराजकः मध्ये तत्त्व वायव्यादिशांतासु
रुपंक्तिका गणः सरस्वती पूज्या नारदो नलकूबरः गुरुर्गुरोः पादुका च परो गुरुश्च पादुका पूर्वसिद्धापरसिद्धाः केशवेषु च शक्त
यः लक्ष्मी सरस्वती प्रीतिः कीर्तिः शांतिश्च शांतिकाः पुष्टिस्तुष्टिर्महेंद्राद्या मध्ये चावाहितो हरिः धृतिः श्रीरतिकांत्याद्या मूलेन
स्थापितेच्युतः ॐ अभिमुखो भवेति प्राञ्च्यां संनिहितो भव विन्यस्यार्घादिकं दत्वा गंधाद्यैर्मूलतो यजेत् ॐ भीषय भीषय हृत्
शिरस्त्रासय त्रैनमः मर्द मर्दय शिखाया अग्न्यादौ क्रमतोस्त्रकं रक्ष रक्ष प्रध्वंसय कवचायनमः हूं फट् अस्त्रायनमो मूलबीजे प्रध्वंसय
नचांगकं सर्वदक्षाप्य सौम्येषु मूर्त्यावरणमर्चयेत् वासुदेवः संकर्षणः प्रद्युम्नश्चानिरुद्धकः अग्न्यादौ श्रीधृतिरतिकांतयो
मूर्तयो हरेः शंखचक्रगदापद्म अग्न्यादौ पूर्वकादिकं शार्ङ्गं च मुसलं खड्गं वनमालां च तद्बहिः इंद्राद्याश्च तथानंतो नैर्ऋत्यां
वरुणं ततः ब्रह्मेंद्रे शानयोर्मध्ये अः स्त्रावरणकं बहिः ऐरावतस्ततश्छागो महिषोथ नगेश्वरः मृगः शशोथ वृषभः

कूर्मोहंसस्ततोबहिः पृश्निगर्भःकुमुदाद्याद्वारपालाद्वयंद्वयं पूर्वाद्युत्तरद्वारांतंहरिंनत्वाबाह्येबहिः विष्णुपार्षदंधनमोवलिंपी श्रो
ठेबलिंदद्देत् विपराययाविष्वक्सेनात्मनेईशानकेयजेत् देवस्यदाक्षिणेहस्तेरक्षासूत्रंचबंधयेत् संवत्सरेकृतार्चायाः
23 संपूर्णफलदायिने पवित्रारोहणायेदंकौतुकंधारयेन् नमः उपवासादिनियमंकुर्याद्वैदेवसंन्निधौ उपवासेननियतोदेवं
संतोषयाम्यहं कामक्रोधादयःसर्वेमामेतिष्ठंतुसर्वदा अद्यप्रभृतिदेवेशयावद्वैशेषिकंदिनं यजमानोह्यशक्तश्चेत्कु
र्यान्नक्तादिकंव्रती हुत्वाविसर्जयेत्स्तुत्वाश्रीकरंनित्यपूजनं ॐ ह्रींश्रींश्रीधरायत्रैलोक्यमोहनायनमः

अग्निरुवाच विशेदनेनमंत्रेणयागेस्थानंचभूषयेत् नमोब्रह्मण्यदेवायश्रीध
रायाव्ययात्मने ऋग्यजुःसामरूपायशब्ददेहायविष्णवे विलिख्यमंडलंसाधुंयागद्रव्यादिचाहरेत् प्रक्षालितकराघ्रिः
प्रो सविन्यस्यार्घ्यकरोनरः अर्घ्याद्भिरक्तशिरःस्यद्वारदेशादिकंनया आरभेद्वारयोगंचतोरणेशान्सप्रपूजयेत् अश्वत्थोदुं
बरवटप्लक्षाःपूर्वादिगानगाः ऋग्वेदंद्रिशोभनंप्राच्यांयजुर्यमस्वभद्रकं सामापश्चकधन्वाख्यंसामाथर्वस्कहोत्रकं तो
रणांतःपताकाश्चकुमुदाद्याघरद्वयं द्वारिद्वारिस्वनाम्नार्च्याः पूर्वेपूर्णश्चपुष्करः आनंदनंदनोदक्षेवीरसेनःसुषेणकः
संभवप्रभवौसौम्येद्वारपांश्चैवपूजयेत् अस्त्रजप्तसुपुष्पक्षेपाद्विघ्रानुत्सार्यसंविशेत् भूतशुद्धिंविधायाथविन्यस्यक
तमुद्रकः फट्कारांतंसिंहजप्तसर्षपाद्दिक्षुविन्यसेत् वासुदेवेनगोमूत्रंसंकर्षणेनगोमयं प्रद्युम्नेनपयस्तस्मात्दधिना
रायणात्घृतं एकाद्वित्र्यादिवाराणि घृताद्वैभागतोधिकं घृतपात्रेतदेकत्रपंचगव्यमुदाहृतं मंडपप्रोक्षणायैकंचापरंप्राशना
यच स्नानायदशकुंभेषु इंद्राद्यान्लोकपान्यजेत् पूजान्तांश्चावमेत्रोश्चस्थातव्यंचाज्ञयाहरेः यागद्रव्यादिसंरक्ष्यविकिरान्विकि 23
रेत्ततः मुलाष्टशतसंजप्तान्कुशकूर्चान्हरेच्चतान् ऐशान्यांदिशिनत्रस्थांस्थाप्यकुंभंचवर्द्धनीं कुंभेशांगंहारिंप्रार्च्यवर्द्धन्यामं
स्त्रमर्चयेत् प्रदक्षिणंयागगृहंवर्द्धन्याछिन्नधारया सिंचन्नयेत्ततःकुंभंपूजयेच्चस्थिरासने सपंचरत्नवस्त्राद्येकुंभेगंधादिभि
र्हरिं वर्द्धन्यांहेमगर्भायांयजेदस्त्रंचवामतः तत्समीपेवास्तुलक्ष्मीभूरिनायकमर्चयेत् पाद्यमर्घ्यमाचमनीयंपंचगव्यंचवि

अपरंकलशयोर्द्विष्णोःसंक्रांतादौतथैवच कुंभेकुंभानवस्थाप्यनवकोणेषुनिर्व्रणान्

क्षिपेत् पूर्वादिकलशेष्वादौपंचामृतजलाधिकं दधिक्षीरंमधुष्णोदंपाद्यंस्याच्चतुरंगकं पद्मश्यामाकदूर्वाश्चविष्णुपर्णीश्च
पाद्यकं तथाष्टांगाहर्माख्यातायवगंधफलाक्षतं कुशाःसिद्धार्थपुष्पाणितिलद्रव्याणिचार्हणं लवंगकंकोलयुक्तंदद्यादाच
मनीयकं स्नापयेन्मूलमंत्रेणदेवंपंचामृतैरपि शुद्धोदमध्यकुंभेनदेवमूर्ध्निविनिक्षिपेत् कलशान्निःसृतंतोयंदूर्वाग्रैःसंस्पृशे
न्नरः शुद्धोदकेनपाद्यंचअर्घमाचमनंददेत् परिमृज्यपटेनांगंसवस्त्रंमंडलंनयेत् तत्राप्यर्चाचरेद्धोमंकुंडादौप्राणसंयमी प्र
क्षाल्यहस्तौरेखांचतिस्रःपूर्वाग्रगामिनीः दक्षिणादुत्तरांतांचतिस्रश्चैवोत्तराग्रहाः अर्घोदकेनसंप्रोक्ष्ययोनिमुद्रांप्रदर्शयेत्
ध्यात्वाग्निरूपंचाग्निंतुयोन्यांकुंडेक्षिपेन्नरः पात्राण्यासादयेत्पश्चाद्दर्भस्रुक्स्रुवकादिभिः बाहुमात्राःपरिधयइध्मव्रश्च
नमेवच प्रणीताप्रोक्षणीपात्रमाज्यस्थालीघृतादिकं प्रस्थद्वयंतंडुलानांयुग्मयुग्ममधोमुखं प्रणिताप्रोक्षणीपात्रेन्यसे
त्प्राग्रेगंकुशं अद्भिःपूर्यप्रणीतां तु ध्यात्वादेवंप्रपूज्यच प्रणीतांस्थापयेदग्नेर्द्रव्याणांचैवमध्यतः प्रोक्षणीमद्भिः
संपूर्यप्राग्यदक्षेतुविन्यसेत् चरुंचश्रपयेदग्नौब्रह्माणंदक्षिणेन्यसेत् कुशानास्तीर्यपूर्वादौपरिधीन्स्थापयेत्ततः वैष्णवीक
रणंकुर्याद्गर्भाधानादिनाततः गर्भाधानंपुंसवनंसीमंतोन्नयनंजनिः नामादिसमावर्त्तनांतंजुहुयाद्दशचाहुतीः पूर्णाहुतिप्रति
च कर्मस्रुवास्रुक्सुयुक्तया कुंडमध्येऋतुमतींलक्ष्मींसंचिंत्यहोमयेत् कुंडलक्ष्मीःसमाख्याताप्रकृतिस्त्रिगुणात्मिका सायो
निःसर्वभूतानांविद्यामंत्रगणस्यच विमुक्तेःकारणंवह्निःपरमात्माचभाक्तिदः प्राच्यांशिरःसमाख्यातंबाहुकोणेव्यवस्थि
योनि तौ ईशानाग्नेयकोणेतुजंघेवायव्यनैर्ऋते उदरंकुंडमित्युक्तंयोनिर्विधीयते गुणत्रयंमेखलास्युः ध्यात्वैवंसमिधोदश पंचा ध्या
धिकांस्तुजुहुयात्प्रणवान्मुष्टिमुद्रया पुनराघारौजुहुयाद्वायव्यंतंततोग्नयात् ईशांतंमूलमंत्रेण आज्यभागौतु होमये
त् उत्तरेद्वादशांतेनदक्षिणेतेनमध्यतः व्याहृत्यापद्ममध्यस्थंध्यायेद्वन्हिंतुसंस्कृतं वैष्णवंसप्तजिह्वंचसूर्यकोटिसम
प्रभं चंद्रवक्त्रंचसूर्याक्षंजुहुयाच्छतमष्टच तदर्द्धंवाष्टमूलेन अंगानांचदशांशतः

अग्निपु॰

२४

अग्निरुवाच संपाताहुतिनासिच्य पवित्राण्यधिवासयेत् नृसिंहमंत्रजप्तानि गुप्तान्यस्त्रेण तानि तु वस्त्रसंवेष्टितान्येव पात्रस्थान्यभिमंत्रयेत् बिल्वाद्यद्भिः प्रोक्षितानि मंत्रणं चैकधा द्विधा कुंभपार्श्वे तु संस्थाप्य रक्षां विज्ञाप्य देशिकः दंतकाष्ठं चामलकं पूर्वे संकर्षणेन तु प्रद्युम्नेन भस्म तिलान् दक्षे गोमयमृत्तिकां वारुणे चानिरुद्धेन सौम्ये नारायणेन च दर्भोदकं चाग्निहृदा आग्नेयो कुंकुमरोचनं ऐशान्यां शिरसा धूपं शिखयाथ नैर्ऋतेऽप्यथ मूलपुष्पाणि दिव्यानि कवचेनाथ वायवे चंदनाद्यक्षतदधिदूर्वाश्च पुटिकास्थिताः गृहं त्रिसूत्रेणावेष्ट्य पुनः सिद्धार्थकान् क्षिपेत् दद्यात्प्रजाक्रमेणाथ स्वैः स्वैर्गंध पवित्रकं मंत्रैर्वै द्वारपादिभ्यो विष्णुकुंभे द्वयेन च विष्णुतेजोद्भवं रम्यं सर्वपातकनाशनं सर्वकामप्रदं देव तवांगे धारयाम्यहं आसने परिवारादौ गुरौ दद्यात्पवित्रकं गंधादिभिः समभ्यर्च्य गंधपुष्पाक्षतादिमत् विष्णुतेजो भवेत्पादौ मूलेन हरये र्पयेत् वह्निं स्थाप्य तवो दत्वा देवं संप्रार्थयेत्ततः क्षीरोदधि महानागशय्यावस्थितविग्रह प्रातस्त्वां पूजयिष्यामि संनिधौ तव केशव इंद्रादिभ्यस्ततो दत्वा विष्णुपार्षदके बलिं ततो देवाग्रतः कुंभं वासोयुगसमन्वितं रोचनाचंद्रकाश्मीरगंधाद्युदकसंयुतं गंधपुष्पादिना पूज्य मूलमंत्रेण पूजयेत् मंडपाद्बहिरागत्य विलिप्ते मंडलत्रये पंचगव्यं चरुं दंतकाष्ठं चैव क्रमात् भवेत् पुराणश्रवणं

ला स्तोत्रं पठेज्जागरणं निशि परमेश करान्भांच स्त्रीणां भोगभुजां तथा सद्योधिवासनं कुर्याद्विनागंधपवित्रकं

अग्निरुवाच प्रातः स्नादिकं कृत्वा द्वारपालान्प्रपूज्य च प्रविश्य गुप्ते देशे च समाकृष्याथ धारयेत् पूर्वाधिवासितद्रव्य वस्त्राभरण गंधकं निरस्य सर्वनिर्माल्यं देवं संस्नाप्य पूजयेत् पंचामृतैः कषायैश्च शुद्धगंधोदकैस्तथा पूर्वाधिवासितं दद्याद्वस्त्रं गंधपुष्पकं अग्नौ हुत्वा नित्यवच्च देवं संप्रार्थयेन्नमेत् समर्प्य कर्म देवाय पूजां नैमित्तिकीं चरेत् द्वारपालं विष्णुकुंभवर्द्धनीः प्रार्थयेद्धरिं अतो देवेति मंत्रेण मूलमंत्रेति कुंभके कृष्ण कृष्ण नमस्तुभ्यं गृण्हीष्वेदं पवित्रकं पवित्रीकरणार्थाय वर्षपूजाफलप्रदं पवित्रकं कुरुष्वाद्य यन्मया दुष्कृतं कृतं

शुद्धो भवाम्यहं देव त्वत्प्रसादात्सुरेश्वर पवित्रं च हृदायैस्तु आत्मानमभिषिच्य च विष्णुकुंभं च संप्रोक्ष्य व्रजेद्देव समीपतः पवित्रमात्मने दद्याद्रक्षाबंधं विसृज्य च गृहाण ब्रह्मसूत्रं च यन्मया कल्पितं प्रभो कर्मणां पूरणार्थाय यथा दोषो न मे भवेत् द्वारपालासनगुरुमुख्यानां च पवित्रकं कनिष्ठादिं च देवाय वनमालां च मूलतः ग॰दादिविष्वक्सेनांतैः पवित्राणि समर्पयेत् वह्निं हुत्वा बहिर्जैभ्यो विश्वादिभ्यः पवित्रकं प्राच्यां पूर्णाहुतिं दद्यात् प्रायश्चित्ताय मूलतः अष्टोत्तरशतं चापि पंचोपनिषदैस्ततः मणिविद्रुममालाभिर्मंदारकुसुमादिभिः इयं सांवत्सरी पूजा तवास्तु गरुडध्वज वनमालां यथा देव यथा देव कौस्तुभं सततं हृदि तद्वत्पवित्रतंतूंश्च पूजां वा हृदये वह कामतोऽकामतो वापि यत्कृतं नियमार्चने विधिना विघ्नलोपेन परिपूर्णं (१५

तदस्तु मे प्रार्थ्यैनं त्वाक्षमाप्याथ पवित्रं पुरके र्पयेत् दत्वा बलिं दक्षिणाभिर्वैष्णवं तोषयेद्गुरुं विप्रान्संपूज्य वस्त्राद्यैर्दिवं पक्षमेव वा पवित्रं स्नानकाले वा अवतार्य समर्पयेत् अनिवारितमन्नाद्यं दद्याद्भुक्तेऽथ च स्वयं विसर्जने ह्निसंपूज्य पवित्राणि विसर्जयेत् सांवत्सरीमिमां पूजां संपाद्य विधिवन्मम व्रज पवित्रकेदानीं विष्णुलोकं विसर्जितः मध्ये सोमेशयोः प्राच्यं विष्वक्सेनं हितस्य च पवित्राणि समभ्यर्च्यान्यत् ब्राह्मणाय समर्पयेत् यावंतस्तंतवस्तस्मिन् पवित्रे परिकल्पिताः तावद्युगसहस्राणि विष्णुलोके महीयते कुलानां शतमुद्धृत्य दशपूर्वान्दशापरान् विष्णुलोके तु संस्थाप्य स्वयं मुक्तिमवाप्नुयात्

अग्निरुवाच संक्षेपात्सर्वदेवानां पवित्रारोहणं शृणु पवित्रं पूर्वलक्षं स्यात् ख १

रसानलगं त्वपि जगद्योने समागच्छ परिवारगणैः सह निमंत्रयाम्यहं प्रातर्दद्यां तुभ्यं पवित्रकं जगत्सृजे नमस्तुभ्यं गृण्हीष्वेदं पवित्रकं पवित्रीकरणार्थाय वर्षपूजाफलप्रदं शिवदेव नमस्तुभ्यं गृण्हीष्वेदं पवित्रकं मणिविद्रुममालाभिर्मंदारकुसुमादिभिः इयं सांवत्सरी पूजा तवास्तु वेदवित्प्रसेते सांवत्सरीमिमां पूजां संपाद्य विधिवन्मम व्रज पवित्रकेदानीं स्वर्गलोकं विसर्जितः सूर्यदेव नमस्तुभ्यं गृण्हीष्वेदं पवित्रकं पवित्रीकरणार्थाय वर्षपूजाफलप्रदं शिवदेव नमस्तुभ्यं गृण्हीष्वेदं पवित्रकं पवित्रीकरणार्थाय वर्षपूजाफलप्रदं शक्तिदेवि नमस्तुभ्यं गृण्हीष्वेदं पवित्रकं पवित्रीकरणार्थाय वर्षपूजाफलप्रदं नारायणमयं सू

Dr. BHAU DAJI MEMORIAL

त्रमनिरुद्धमयंपरं धनधान्यादिचारोग्यप्रदंसंप्रददामिते कामदेवमयंसूत्रंसंकर्षणमयंवरं विद्यासंततिसौभाग्यप्रदंसं
प्रददामिते वासुदेवमयंसूत्रंधर्मकामार्थमोक्षदं संसारसागरोत्तारकारणंप्रददामिते विश्वरूपमयंसूत्रंशर्मदंपापनाशनं आ
तीतानागतकुलसमुद्धारंददामिते कनिष्ठादीनिचत्वारिमनुभिस्तुकमादेद
अग्निरुवाच वासुदेवाद्यालयस्यकृतौवक्ष्येफलादिकं चिकीर्षोर्देवधामादिसहस्रजनिपापनुत् मनसा
सप्तकर्तॄणांशतजन्माघनाशनी येचमोदंतिकृष्णस्यक्रियमाणंनरागृहं तेपिपापैर्विनिर्मुक्ताःप्रयांत्यच्युतलोकतां समतीतं
भविष्यंचकुलानामयुतंनरः विष्णुलोकंनयत्याशुकारयित्वाहरेर्गृहं वसंतिपितरोहृष्टाविष्णुलोकेह्यलंकृताः विमुक्ताजार
कैर्दुःखैःकर्तुःकृष्णस्यमंदिरं ब्रह्महत्यादिपापौघघातकंदेवतालयं फलंयद्दाप्यतेयज्ञैर्धामकृत्वातदाप्यते देवागारकृ तेस
र्वतीर्थस्नानफलंलभेत् देवाद्यर्थेहतानांचरणेयत्तत्फलादिकं शाठ्येनपांशुनावापिकृतंधामचनाकृतं एकायतनकृत्स्वर्गीअगा
रीब्रह्मलोकभाक् पंचागारीशंभुलोकमष्टागाराद्धरौस्थितः षोडशालयकारीतुभुक्तिमुक्तिमवाप्नुयात् कनिष्ठंमध्यमंश्रेष्ठंकारयि
त्वाहरेर्गृहं स्वर्गंचवैष्णवंलोकंमोक्षमाप्नोतिचक्रमात् श्रेष्ठमायतनंविष्णोःकृत्वायद्धनवान्भवेत् कनिष्ठेनैवतत्पुण्यंप्राप्नोत्यध
नवान्नरः समुत्पाद्यधनंकृत्वास्वल्पेनापिकृतालयं कारयित्वाहरेःपुण्यंप्राप्नोत्यभ्यधिकंवरान् लक्षेणाथसहस्रेणशतेनार्द्धेनवा
हरेः कारयन्भवनंयातियत्रास्तेगरुडध्वजः बाल्येतुक्रीडमानायेपांसुभिर्भवनंहरेः वासुदेवस्यकुर्वंतितेपितल्लोकगामिनः
तीर्थेचायतनेपुण्येसिद्धक्षेत्रेतथाश्रमे कर्तुरायतनंविष्णोर्यथोक्तात्त्रिगुणंफलं बंधूकपु ष्पविन्यासैःसुधापंकेनवैष्णवं
येविलिप्यंतिभवनंतेयांतिभगवत्पुरं पतितंपतमानंतुतथार्द्धपतितंनरः समुद्धृत्यहरेर्धामप्राप्नोतिद्विगुणंफलं पतितस्यतुयःक
र्तापतितस्यतुरक्षिता विष्णोरायतनस्येहसनरोविष्णुरूपधृक् इष्टकादिचयस्तिष्ठेद्यावदायतनेहरेः सकुलस्तावतत्कर्तावैविष्णु
लोकेमहीयते सएवपुण्यवान्पूज्यइहलोकेपरत्रच कृष्णस्यवासुदेवस्ययःकारयतिकेतनं प्रोक्तःसएवसुकृतीकुलंतेनैवच
पालितं विष्णुरुद्रार्कदेव्यादेर्गृहकर्तासकीर्तिभाक् किंतस्यवित्तनिचयैर्मूढस्यपरिरक्षिणः दुःखार्जितैर्यःकृष्णस्यनकारयतिके

तनं नोपभोग्यंधनंयस्यपितृविप्रदिवौकसां नोपभोगायबंधूनांव्यर्थस्तस्यधनागमः यथाध्रुवोनृणांमृत्युर्वित्तनाशस्तथाध्रुवः
मूढस्तत्रानुबध्नातिजीवितेथचलेधने यत्रवित्तंनदानायनोपभोगायदेहिनां नापिकीर्त्यैनधर्मार्थंतस्यस्वाम्येथकोगुणः तस्मा
द्वित्तंसमासाद्यदैवाद्वापौरुषादथ दद्यात्सम्यग्द्विजाग्रेभ्यःकीर्तनानिचकारयेत् दानेभ्यश्चाधिकंयस्मात्कीर्तनेभ्योवरंय
तः अतश्चकारयेद्धीमान्विष्ण्वादेर्मंदिरादिकं विनिवेश्यहरेर्धामभक्तिमद्भिर्नरोत्तमैः निवेशितंभवेत्कृत्स्नंत्रैलोक्यंसचरा
चरं भूतंभव्यंभविष्यंचस्थूलंसूक्ष्मंतथेत रं आब्रह्मस्तंबपर्यंतंसर्वंविष्णोःसमुद्भवं तस्यदेवातिदेवस्यसर्वगस्यम
हात्मनः निवेश्यभवनंविष्णोर्न्नभूयोभुविजायते यथाविष्णोर्धामकृतौफलंतद्वद्दिवौकसां शिवब्रह्मार्कविघ्नेशचंडीलक्ष्म्या
दिकात्मनां देवालयकृतेःपुण्यंप्रतिमाकरणेधिकं प्रतिमास्थापनेयागेफलस्यांतोनविद्यते मृन्मयाद्दारुजेपुण्यंदारुजादि
ष्टकाभवेत् इष्टकोत्थाच्छैलजेस्याद्धैम्यादेर्वाधिकंफलं सप्तजन्मकृतंपापंप्रारंभादेवनश्यति देवालयेनस्वर्गंस्यान्नरकंन
सगच्छति कुलानांशतमुद्धृत्यविष्णुलोकंनयेन्नरः यमोयमभटानाहदेवमंदिरकारिणः यमउवाच प्रतिमापूजादिकृतो
नानेयानरकंनराः देवालयाद्यकर्तारआनेयास्तेतुगोचराः विचरध्वंयथान्यायंनियोगोममपाल्यतां नाज्ञाभंगंकरि
ष्यंतिभवतांजंतवःक्वचित् केवलंयेजगत्तातमनंतंसमुपाश्रिताः भवद्भिःपरिहर्तव्यास्तेषांनात्रास्तिसंस्थितिः येचभागव
तालोकेतच्चित्तास्तत्परायणाः पूजयंतिसदाविष्णुंतेवस्त्याज्याःसुदूरतः यस्तिष्ठन्प्रशमन्गच्छन्नुत्तिष्ठन्स्खलितेक्षुते संकी
र्तयतिगोविंदंतेवैत्याज्याःसुदूरतः नित्यनैमित्तिकैर्देवंयेयजंतिजनार्दनं नावलोक्याभवद्भिस्तेतद्व्रतायांतितद्गतिं येपु
ष्पधूपवासोभिर्भूषणैश्चातिवल्लभैः अर्चयंतिनतेग्राह्यानराःकृष्णालयेगताः उपलेपनकर्तारःसंमार्जनपराश्चये कृ
ष्णालयेपरित्याज्यास्तेषांपुत्रास्तथाकुलं येनचायतनंविष्णोःकारितंतत्कुलोद्भवं पुंसांशतंनावलोक्यंभवद्भिर्दुष्टचेतसा
यस्तुदेवालयंविष्णोर्दारुशैलमयंतथा कारयन् मृन्मयंवापिसर्वपापैःप्रमुच्यते अहन्यहनियज्ञेनयजतोयन्महाफलं प्रा
प्नोतितत्फलंविष्णोर्यःकारयतिकेतनं कुलानांशतमागामिसमतीतंतथाशतं कारयन्भगवद्धामनयत्यच्युतलोकतां

सत्यलोकमयो विष्णुस्तस्य यः कुरुते गृहं नारयत्यक्षयाल्लोकान् स्वयान् प्रतिपद्यते इष्टकाचयविन्यासो यावत्यब्दानि तिष्ठ
ति तावद्वर्षसहस्राणि तत्कर्तुर्दिवि संस्थितिः प्रतिमाकृद्विष्णुलोकं स्थापको लीयते हरौ देवसद्मप्रतिकृतिप्रतिष्ठा ग्र
कृत गोचरे अग्निरुवाच यथोक्तमालयं स्ते थ प्रतिष्ठा दिकृतं हरेः हयशीर्षः प्रतिष्ठार्थं देवानां ब्रह्मणेब्रवीत्

स्थान
हयग्रीव उवाच विष्णवादीनां प्रतिष्ठादि वक्ष्ये ब्रह्मन् शृणुष्व मे प्रो
क्तानि पंचरात्राणि सप्तरात्राणि वै मया व्यस्तानि मुनिभिर्लोके पंचविंशतिसंख्यया हयशीर्षं तंत्रमाद्यं तंत्रं त्रैलोक्यमोहनं वै
भवं पौष्करं तंत्रं प्रह्लादं गार्ग्यगालवं नारदीयं च श्रीप्रश्नं शांडिल्यं चेश्वरं तथा सत्योक्तं शौनकं तंत्रं वासिष्ठं ज्ञानसागरं स्वाय
भुवं कापिलं च तार्क्ष्यं नारायणीयकं आत्रेयं नारसिंहाख्यं मानसाख्यं तथारुणं बौधायनं तथार्षं तु विश्वोक्तं तस्य सारतः प्रति
ष्ठां हि द्विजः कुर्यान्मध्यदेशादिसंभवः न कच्छदेशसंभूतः कावेरीकोंकणोद्भवः कामरूपकलिंगोत्थः कांचीकाश्मीरकोशलः
आकाशवायुतेजोंभोभूरेताः पंचरात्रयः अचैतन्यास्तमोद्रिक्ताः पंचरात्रिविवर्जितं ब्रह्माहं विष्णुरमल इति विद्यात्स देशि
कः सर्वलक्षणहीनोपि स गुरुस्तंत्रपारगः नगराभिमुखाः स्थाप्या देवा न च पराङ्मुखाः कुरुक्षेत्रे गयादौ च नदीनां तु स
मीपतः ब्रह्मा मध्ये तु नगरे पूर्वे शक्रस्य शोभनं अग्नावग्नेश्च मातॄणां भूतानां च यमस्य च दक्षिणे चंडिकायाश्च पितृदे
त्यादिकस्य च नैरृते मंदिरं कुर्याद्वरुणादेश्च वारुणे वायोर्नागस्य वायव्ये सौम्ये यक्षगुहस्य च चंडीशस्य महेशस्य ऐ
शे विष्णोश्च सर्वशः पूर्वदेवकुलं पीड्य प्रासादं स्वल्पकं तथा समं वाप्यधिकं वापि न कर्तव्यं विजानता उभयोर्द्विगु
णां सीमां त्यक्त्वा चोच्छ्रयसंमितां प्रासादं कारयेदन्यं नोभयं पीडयेद्बुधः भूमौ तु शोधितायां तु कुर्याद्भूमिपरिग्रहं प्रा
कारसीमापर्यंतं ततो भूतबलिं हरेत् मासं हरिद्राचूर्णं तु सलाजं दधिसक्तुभिः अष्टाक्षरेण संपूज्य पातयित्वाष्टदिक्षु च
राक्षसाश्च पिशाचाश्च येस्मिंस्तिष्ठंति भूतले सर्वे ते व्यपगच्छंतु स्थानं कुर्याम्यहं हरेः हलेन वाहयित्वा गां गोभिश्चैवावचीर
येत् परमाण्वष्टकं चैव रथरेणुः प्रकीर्तितः रथरेण्वष्टकं चैव त्रसरेणुः प्रकीर्त्यते तेरष्टभिस्तु वालाग्रं लिख्या तेरष्टभि

र्मता ताभिर्यूकाष्टभिः ख्याता ताश्चाष्टौ यवमध्यमः यवाष्टकैरंगुलं स्याच्चतुर्विंशांगुलः करः चतुरंगुलसंयुक्तः स्वहस्तः
पद्महस्तकः
भगवानुवाच पूर्वमासीन्महद्भूतं सर्व
भूतभयंकरं तद्देवैर्निहितं भूमौ स वास्तुपुरुषः स्मृतः चतुःषष्टिपदे क्षेत्रे ईशं कोणार्द्धसंस्थितं घृताक्षतैस्तर्पयेत्पर्जन्यं
पदगं ततः उत्पलादर्जयंतं च द्विपदस्थं पताकया महेंद्रं चैककोष्ठस्थं सर्वरत्नैः पदे रविं वितानेनार्द्धपदगं सत्यं पाददशंघृ
तैः व्योम कुंभीनमांसेन कोणार्द्धपदसंस्थितं स्रुवाचार्द्धपदे वह्निं पूषणं लाजयैकतः स्वर्णेन वितथं द्विस्तं मंथनेन गृहक्षतं मां
सौदनेन धर्मेशमेकैकस्मिन् स्थितं द्वयं गंधर्वं द्विपदं गंधैर्भृशं शाकुलजिह्वया एकस्थं धर्मसंस्थं च यथा नील पदैस्तथा पि
तॄन् कृशरयार्द्धस्थं दंतकाष्ठैः पदास्थितं द्वौवारिकं द्विसस्तं च सुग्रीवं पावके न तु पुष्पदंतं कुशैर्लंबैः पद्मैर्वरुणमेकतः अ
सुरं स्करयार्द्धस्थं पदे शायघृतांभसा यवैः पापं पदार्द्धस्थं रोगमध्ये च मंडकैः नागपुष्पैः पदे नागं मुख्यं भक्ष्यैर्द्विसंस्थितं मुद्गौद
नेन भल्लाटं पदे सोमं पदैस्तथा मधुना पायसेनापि भालूकेन ऋषिद्वये पदे दितिं लोपिकाभिरर्द्धे दितिमथापरं पूरिकाभिस्तत
श्चापमीशाधः पयसापदे ततोधश्चापवत्सं तु दध्ना चैके पदे स्थितं लड्डुकैश्च मरीचिं तु पूर्वकोष्ठचतुष्टये सवित्रे रक्तपुष्पा
णि ब्रह्मप्राक्कोणकोष्ठके तदधः कोष्ठके दद्यात् सावित्र्यै च कुशोदकं विवस्वते रुणं दद्याच्चंदनं च तुरंघ्रिषु रक्षोधः कोण
कोष्ठे तु इंद्रायार्घ्यं निशा न्वितं इंद्रजयाय तस्याधो घृतार्घ्यं कोणकोष्ठके चतुष्पदेषु दातव्यामिंद्राय गुडपायसं वायु
धः कोणदेशे तु रुद्राय पक्वमांसकं तदधः कोणकोष्ठे तु यक्षायार्द्धफलं तथा महीधराय मांसान्नं माषं च च तुरंघ्रिषु मध्ये च
[illegible] तुष्पदे स्थाप्या ब्रह्मणे तिलतंडुलाः चरकीं मांससर्पिर्भ्यां स्कंदं कृशरयासृजा रक्तपित्तैर्विदारीं च कंदर्प्यं च पलौदनैः
त पूर्णामलपित्ताभ्यां मांसासृग्भ्यां च जंभकं पित्तं सृगास्थिभिः पापीं लिपिच्छं स्रजासृजा ईशाद्यं रक्तमांसेन अभिवाताक्षते पि
र्येजेत् रक्षो मातृगणेभ्यश्च पिशाचादिभ्य एव च पितृभ्यः क्षेत्रपालेभ्यो बलिं दद्यात्प्रकामतः हुत्वा चैतान् संतर्प्य प्रासा
दादीन्कारयेत् ब्रह्मस्थाने हरिं लक्ष्मीं गणपश्चात् समर्चयेत् महीं नरंवा स्तुमयं [illegible] वर्द्धन्या सहितं घटं ब्रह्माणं मध्य

तः कुंभेब्रह्मादींश्चदिगीश्वरान् दद्यात्पूर्णाहुतिंपश्चात्स्वस्तिवाच्यप्रणम्यच प्रगृह्यकर्करींसम्यक्मंडलंतुप्रदक्षिणं सूत्र
मार्गेणहेब्रह्मंस्तोयधारांतुभ्रामयेत् पूर्ववत्तेनमार्गेणसप्तबीजानिवापयेत् प्रारंभंतेनमार्गेणतस्यखातस्यकारयेत्
 ततोगर्तखनेन्मध्येहस्तमात्रंप्रमाणतः चतुरंगुलकंचाधश्चोपलिप्यार्चयेच्चतत् ध्यात्वाचतुर्भुजंविष्णुमर्घ्यंदद्या
त्तुकुंभतः कर्कर्यापूरयेत्श्वभ्रंशुक्लपुष्पाणिचन्यसेत् दक्षिणावर्तकंश्रेष्ठंबीजैर्मृद्भिश्चपूरयेत् अ दानविनिध्याय र्घं
गोवस्त्रादीन्ददेत्तुद्विजः कालयैज्ञोस्थपतयेवैष्णवादिभ्य आर्चनं नतस्तुखानयेयत्नाज्जलांतंयावदेववु पुरुषावधिस्थि
तंशल्यंनप्रदेशोपदं भवेत् अस्थिशैलेभिघानेवैभित्तिर्वैगृहिणोसुखं यन्नामशब्दंशृणुयात्तुल्यंनदुद्भवं शा

भगवानुवाच पादप्रतिष्ठांवक्ष्यामिशिलाविन्यासलक्षणां अग्रतोमंडपःका

तु र्यः कुंडानाँचैतुष्टयं कुंभन्यासोष्टकान्यासोद्वारस्तंभोछ्रयंशुभं पादोनंपूरयेत्खातंतत्रवास्तुंयजेत्समे इष्टकाश्च
सुपक्वाः स्युर्द्वादशांगुलसंमिताः सविस्तारत्रिभागेनवैपुल्येनसमर्चिताः करप्रमाणाश्चेष्टस्याच्छिलास्वाल्लशिलामये
नवकुंभांस्ताम्रमयान्स्थापयेदिष्टकाघटान् अद्भिः पंचकषायेनसर्वौषधिजलेनच उदुत्तमंवरुणमितिकपानश्च
तथैवच वरुणस्येतिमंत्रेणहंसः शुचिषदित्यपि श्रीसूक्तेनतथाशीलं संस्थाप्यसंघटान् शय्यायांमंडपेशार्च्यमंडपेह
रिमर्चयेत् जुहुयाज्ज्वनयित्वाग्निंसभिधोद्वादशार्चतः आधारावाज्यभागौतुप्रणवेनैवकारयेत् अष्टाहुतीस्तथाष्टा
वैराज्यंव्याहृतिभिःक्रमात् लोकेशानामथयेवैसोमायचग्रहेष्युत पुरुषोत्तमायेतिच आहुतीर्जुहुयात्ततः मायाश्चिंतंततः
र्द पूर्णाहुतिंप्रोक्षिंघतांश्चिलान्वेदाद्येद्वादशांतेनकुंभेपुच पृथक्पृथक् प्राङ्मुखस्तुगुरुः कुर्यादष्टदिक्षुविलिप्यच मध्येचैकांशि
लांकुंभंन्यसेद्देवान्सुरान्क्रमात् पद्मंचैवमहापद्मंमकरंकच्छपंतथा कुमुदंचतथानंदंपद्मंशंखंचपद्मिनी कुंभान्नचालयेत्ते
पुन्यसेदष्टाष्टकाः क्रमात् इशानांतांश्चपूर्वादौविष्टकांप्रथमांन्यसेत् शक्तयोविमलाद्यास्तुइष्टकानांतुदेवताः न्यसनीयायथा
योगंमध्येन्यस्याखनुग्रहाः अव्यंगेवास्तुनेपूर्णेमुनेरंगिरसः सुते इष्टकेत्वंप्रयच्छेष्टंप्रतिष्ठांकारयाम्यहं मंत्रेणानेनवि
८ गंधतोयेनचतथाकुंभैस्तोयसुपूरितैः हिरण्यव्रीहिसंयुक्तैर्गंधचंदनचर्चितैः आपोहिष्ठे
तितिसृभिः शन्नोदेवीतिचाप्यथ तरत्समदीरितिच पावमानीभिरेवच

न्यस्यइष्टकांदेशिकोत्तमः गर्भाधानंततः कुर्यान्मध्यस्थानेसमाहितः कुंभोपरिष्टाद्देवेशं पद्मिनींन्यस्यदेवतां मृत्तिकाश्चै
वपुष्पाणिधातवोरत्नमेवच लोहानिद्क्षुतेचरुत्वं यजेद्देगर्भभाजने द्वादशांगुलविस्तारेचतुरंगुलकोच्छ्रये हैमा कारेता प
म्रमयेभाजनेपृथिवींजैयेत् एकांतेसर्वभूतेशे पर्वतासनमंडिते समुद्रपरिवारेत्वंदेविगर्भसमाश्रय नंदेनंदयवासिष्ठे
र सुभिः प्रजयासह जयेप्सीभवदायादे आजानांविजयावहे पूर्णेगिरिशदायादेपूर्णकामंकुरुष्व मां भद्रेकाश्यपदायादेकुरुभ री४
द्रांमतिंमम सर्वबीजसमायुक्तेसर्वरत्नौषधीवृते रुचिरेनंदेवासिष्ठेरम्यतामिह प्रजापतिसुतेदेविचतुरस्रेमही
यसि सुभगेसुप्रभेभद्रेगृहेकाश्यपिरम्यतां पूजितेपरमाचार्यैगंधमाल्यैरलंकृते भवभूतिकरेदेविगृहेभार्गविरम्य
सिध्विद॥त्रैलोक्यमोहनैर्मंत्रैःस्थाप्यत्रैलोक्यमोहनः॥५॥गदादक्षेशांतिकरोद्विभुजोवाचतुर्भुजः॥वामोर्ध्वेकारयेच्चक्रंपांच
जन्यमथोत्यधः॥६॥श्रीपुष्टिंसंयुतिंकुर्याद्दलेनसहतद्रूपा॥प्रासादेस्थापयेद्विष्णुंगृहेवामंडपेपिवा॥७॥वामनंचैववैकुंठह
यास्यमनिरुद्धकं॥स्थापयेज्जलशय्यास्थंमत्स्यादींश्चावतारकान्॥८॥संकर्षणंविश्वरूपंलिंगंवैरुद्रमूर्तिकं॥अर्धनारी

श्वरंतत्रहरिशंकरमातृकाः॥९॥भैरवंचतथासूर्यंग्रहांस्तद्वद्विनायकं॥गौरीमिंद्रादिकन्यायांचित्रजांचबलाबलात्॥१०॥
पुस्तकानांप्रतिष्ठांचवक्ष्येलिखनतद्विधिं॥स्वस्तिकेमंडलेभ्यर्च्यशरयंत्रासनस्थितं॥११॥लेख्यंचलिखितंपुस्तंगुर्विद्यां
चहरिंयजेत्॥यजमानोगुरुर्विद्यांहरिंलिपिकृतंनरं॥१२॥प्राङ्मुखःपद्मिनींध्यायेल्लिखित्वात्श्लोकपंचकं॥रौप्यस्थः
मस्याहैम्याचलेखन्यानागरासरं॥१३॥ब्राह्मणान्भोजयेच्छक्त्याशक्त्यादद्याच्चदक्षिणां॥गुरुंविद्यांहरिंप्राथ्यर्पुराणा
दिलिखेन्नरः॥१४॥पूर्ववन्मंडलाद्येचऐशान्यांभद्रपीठके॥दर्पणेपुस्तकंदत्वासेचयेत्पूर्ववत्घटैः॥१५॥नेत्रोन्मीलन
कंकृत्वाशय्यायांतुन्यसेन्नरः॥न्यसेत्तुपौरुषंसूक्तंवेदाद्यंतत्रपुस्तके॥१६॥कृत्वासजीविकरणंप्राथ्यर्कृत्वाच्चवस्त्रतः॥सं
प्राप्यदक्षिणाभिस्तुगुर्वादीन्भोजयेद्द्विजान्॥१७॥रथेनहस्तिनावापिभ्रामयेत्पुस्तकंनरैः॥गृहेदेवालयादौतुपुस्तकं
स्थाप्यपूजयेत्॥१८॥वस्त्रादिवेष्टितंपाठादावंतेसमर्चयेत्॥जगच्छांतिंवाचथार्यपुस्तकंवाचयेन्नरः॥१९॥अध्याय
मेकंकुंभाद्भिर्यजमानादिसेचयेत्॥द्विजायपुस्तकंदत्वाफलस्यांतोनविद्यते॥२०॥त्रीण्याहुरतिदानानिगावःपृथ्वीसर
स्वती॥विद्यादानफलंदत्वामस्यंतपत्रसंचयं॥२१॥यावत्तुपात्रसंख्यानमक्षराणांतथानघ॥तावद्वर्षसहस्राणिविष्णुलो
केमहीयते॥२२॥पंचरात्रंपुराणानिभारतानिददत्सुरिः॥कुलैकविंशमुत्थत्यपरेतत्वेतुनीयते॥२३॥ ॥इत्याग्नेयेमहापु
राणेदेवादिप्रतिष्ठा॥ ॥भगवानुवाच॥कूपवापितडागानांप्रतिष्ठांवच्मितांशृणु॥जलरूपेणहिहरिःसोमोवरुणउत्त
मः॥१॥अग्निसोममयंविश्वंविष्णुरापस्तुकारणं॥हैमंरत्नंरौप्यजंवावरुणंकारयेन्नरः॥२॥द्विभुजंहंसपृष्ठस्थंदक्षिणेना
भयप्रदं॥वामेननागपाशंतुनदीनागादिसंयुतं॥३॥यागमंडपमाप्येस्याद्वेदिकाकुंडमंडितं॥तोरणंवारुणंकुंभन्यसेच्चक
रकान्वितं॥४॥भद्रकेचार्धचंद्रेवास्वस्तिकेद्वारिकुंभकान्॥अग्न्याधानंवाप्यकुंडेकृत्वापूर्णांप्रदापयेत्॥५॥वरुणंस्थानपीठे
तुयेतेशानेतिसंस्पृशेत्॥घृतेनाभ्यंजयेत्सश्वान्मूलमंत्रेणदेशिकः॥६॥शंनोदेवीतिप्रक्षाल्यदत्थवत्याशिवोदकैः॥अ
धिवासयेदष्टकुंभान्समुद्रपूर्वकुंभके॥७॥गंगामग्नौवर्षतोयंदक्षेरक्षस्थलेरंकं॥नदीतोयंपश्चिमेतुवायव्येतुनदोदकं॥

॥उद्भिज्जंचोत्तरेस्थाप्यंऐशान्यांतीर्थसंभवं॥अलाभेतुनदीतोयंयाराजेतिमंत्रयेत्॥९॥देवंनिर्मार्ज्यनिर्मज्यमंद्रयेतिविच
क्षणः॥नेत्रेचोन्मीलयेच्चित्रंतच्चित्रंमधुरत्रयैः॥१०॥ज्योतिःसंपूरयेत्तस्म्यागुरवेगामथार्पयेत्॥समुद्रज्येष्ठेत्यभिषिंचेद्वरु
णंपूर्वकुंभतः॥११॥समुद्रंगच्छगांगेयात्सोमोधेन्वितिवर्षकात्॥देवीरापोनिर्झराद्भिर्नदाद्भिःपंचनद्यतः॥१२॥उद्भिदन्याश्चौ
द्भिज्जेनपावमान्याथतीर्थकैः॥आपोहिष्ठापंचगव्याद्धिरण्यवर्णेतिस्वर्णजात्॥१३॥आपोअस्मेतिवर्षोत्थैर्व्यात्दत्वाकूपसं
भवैः॥वरणंचतडागोत्थैर्वरुणाद्भिस्तुवक्ष्यतः॥१४॥आपोदेवीतिगिरिजैरेकाशीतिघटैस्ततः॥स्थापयेद्वरुणस्येतित्वंनो
वरुणचार्चकं॥१५॥व्यात्दत्वामधुपर्कंतुबृहस्पतेतिवस्त्रकं॥वरुणेतिपवित्रंतुप्रणवेनोत्तरीयकं॥१६॥यद्वारुणेनपुष्पादि
प्रदद्याद्वरुणायतु॥चामरंदर्पणंछत्रंव्यजनंवैजयंतिका॥१७॥मूलेनोत्तिष्ठेत्युत्थाप्यतांरात्रिमधिवासयेत्॥वरुणंवेदिसां
निध्यंयद्वारुण्येनपूजयेत्॥१८॥सजीवीकरणंमूलात्पुनर्गंधादिनायजेत्॥मंडलेपूर्ववत्प्रार्च्यकुंडेषुसमिधादिकं॥१९॥वे
दादिमंत्रैर्गंगाद्याश्चतस्रोधेनवोद्वहेत्॥दिक्त्वथोवैयवच्चरुंततःसंस्थाप्यहोमयेत्॥२०॥व्यात्दत्वावाथगायत्र्यामूलेनोमन्त्र
येत्तथा॥सूर्यायप्रजापतयेद्यौःस्वाहान्वांतरिक्षकः॥२१॥तस्यैपृथिव्यैदेहधत्यैइहस्वधतयेततः॥इहरत्यैचेहरमत्वामुग्रो
भीमश्चरौद्रकः॥२२॥विष्णुश्चवरुणोमातारायस्पोषोमहेंद्रकः॥अग्निर्यमोनैर्ऋतोथवरुणोवायुरेवच॥२३॥कुबेरईशो
नंतोथब्रह्माराजाजलेश्वरः॥तस्मैस्वाहेदंविष्णुश्चतद्विप्रासेतिहोमयेत्॥२४॥सोमोधेन्वितियद्दत्वाद्रव्यमेतिच्चहोमयेत्॥
आपोहिष्ठेतितिसृभिरिमारुद्रेतिहोमयेत्॥२५॥दद्यादिक्षुबलिंदद्याद्गंधपुष्पादिनार्चयेत्॥प्रतिमांतुसमुत्थाप्यमंडलेवि
न्यसेद्बुधः॥२६॥पूजयेद्गंधपुष्पाद्यैर्हैमपुष्पादिभिःक्रमात्॥जलाशयांस्तुदिग्भागेवितस्तिद्वयसंमितान्॥२७॥कृत्वाष्टौस्थं न
डिलान्रम्यान्सैकतांदेशिकोत्तमः॥वरुणस्येतिमंत्रेणआज्यमष्टशतंततः॥२८॥चरुंयवमयंहुत्वाशांतितोयंसमाहरेत्॥सेच
येन्मूर्ध्निदेवंतुसबीजकरणंचरेत्॥२९॥ध्यायेत्तुवरुणंयुक्तंगौर्यानदनदीगणैः॥ओंवरुणायनमोर्च्यततःसांनिध्यमाचरे
त्॥३०॥उत्थायनागपृष्ठाद्यैर्भ्रामयेत्तैःसमंगलैः॥आपोहिष्ठेतिच्चक्षिपेत्रिमध्वाक्तेघटेजले॥३१॥जलाशयेमध्यगतंस्फु

संविनिवेशयेत्॥स्नात्वाध्यायेच्चवरुणंस्तष्टिंब्रह्मांडसंज्ञिकं॥३२॥अग्निबीजेनसंदग्ध्वानन्दस्मप्लावयेनमः॥सर्वमोंमोम
यंलोकंध्यायेत्तत्रजलेश्वरं॥३३॥तोयमध्यस्थितंदेवंततोयूपंनिवेशयेत्॥चतुरस्त्रमथाष्टास्त्रंवर्तुलंवाप्रवर्तितं॥आरा
ध्यदेवतालिंगंदशहस्तंतुकूपके॥यूपंयज्ञियवृक्षोत्थंमूलेहेमीफलिंन्यसेत्॥३५॥वाप्यांप्रंचदशकरंपुष्करिण्यांतुविंश
शकं॥तडागेपंचविंशाख्यंजलमध्येनिवेशयेत्॥३६॥यागमंडपांगणेवायूपस्त्रस्येतिमंत्रतः॥स्थाप्यतद्वेष्टयेद्वस्त्रैर्यूपो
परिपताकिकां॥३७॥तदभ्यर्च्यचगंधाद्यैर्गजेंछांतिंसमाचरेत्॥दक्षिणांगुरवेदद्यान्भूगोहेमांबुपात्रकं॥३८॥द्विजेभ्यो
दक्षिणादेयाआगतान्भोजयेत्तथा॥आब्रह्मस्तंभपर्यंतायेकेचित्सलिलार्थिनः॥३९॥तेतृप्तिमुपगच्छंतुतडागस्थेनवारि
णा॥तोयमुत्सर्जयेवंपंचगव्यंविनिक्षिपेत्॥४०॥आपोहिष्ठेतितिसृभिःशांतितोयंद्विजैःकृतं॥तीर्थतोयंक्षिपेत्पुण्यंगोकुलंचा
र्पयेद्द्विजान्॥४१॥अनिवारितमन्नाद्यंसर्वजन्यंचकारयेत्॥अश्वमेधसहस्राणांसहस्रंयःसमाचरेत्॥४२॥एकाहंस्थापये
त्तोयंतत्पुण्यमयुतायुतं॥विमानेमोदतेस्वर्गेनरकंनसगच्छति॥४३॥गवादिपिबतेयस्मात्तस्मात्कर्तुर्नपातकं॥तोयदानात्स
र्वदानंफलंप्राप्यदिवंव्रजेत्॥४४॥ ॥आग्नेयेकूपवापीतडागादिप्रतिष्ठा॥ ॥भगवानुवाच॥सभादिस्थापनंवक्ष्येतथैते
षांप्रवर्तनं॥भूमौपरिक्षितायांचवास्तुयागंसमाचरेत्॥१॥स्वेच्छयातुसभांकृत्वास्वेच्छयास्थापयेत्सुरान्॥पूश्चतुष्पथग्रा
मादौनशून्येकारयेत्सभां॥२॥निर्मलःकुलमुत्थत्यकर्तास्वर्गेविमोदते॥अनेनविधिनाकुर्यात्सप्तभौमंहरेर्गृहं॥३॥तथारा
ज्ञांतथान्येषांपूर्वाद्याश्चध्वजादयः॥कोणजान्वर्जयित्वातुचतुःशालंतुवर्तयेत्॥४॥त्रिशालंवाद्विशालंवाएकशालमथा
पिवा॥व्ययाधिकंनकुर्वीतव्ययदोषकरंहितत्॥५॥अयाधिकेभवेत्पीडानस्मात्कुर्यात्समंद्वयं॥कररशिंसमस्तंतुकुर्याद्वसुगुणं
गुरुः॥६॥सप्तार्चिषाकृतेभागेगर्गविद्याविचक्षणः॥अष्टधाभजितेतस्मिन्यच्छेषंसव्ययोगतः॥७॥अथवाकरराशिंतुहन्यात्स
प्तार्चिषाबुधः॥वसुभिःसंकृतेभागेध्वजादिपरिकल्पयेत्॥८॥त्रिशालकत्रयंशस्तंउदक्पूर्वंविवर्जितं॥याम्यांपरगृहोपेतंद्वि
शालंलभ्यतेसदा॥९॥याम्यशालैकशालंतुप्रत्यकूशालमथापिवा॥एकशालद्वयंहस्तंदोषास्त्वन्येभयावहाः॥१०॥चतुःशालं

Dr. BHAU DAJI
MEMORIAL

सदाशस्तंसर्वदोषविवर्जितं॥एकभौमादिकुर्वीतभवनंसप्तभौमकं॥११॥द्वारवेधादिरहितंपुराणेनविवर्जितं॥देवगृहं
देवतायाःप्रतिष्ठाविधिनासदा॥१२॥संस्थाप्यमनुजानांचसमुदायोक्तकर्मणा॥प्रातःसर्वौषधीस्नानंकृत्वाशुचिरतंद्रितः
॥१३॥मधुरैस्तुद्विजान्भोज्यपूर्णकुंभादिशोभितं॥सतोरणंस्ववाच्यद्विजान्गोपृष्ठहस्तकः॥१४॥गृहीगृहंप्रविशेच्चदैवज्ञा
श्चार्च्यसंविशेत्॥गृहेपुष्टिकरंमंत्रंपठेच्चेमंसमाहितः॥१५॥ओंनंदेनंदयवासिष्ठेवसुभिःप्रजयासह॥जपेन्दार्गवदाया
देप्रजानांविजयावहे॥१६॥पूर्णेगिरसदायादेपूर्णकामंकुरुष्वमां॥भद्रेकाश्यपदायादेकुरुभद्रांमतिंमम॥१७॥सर्वबीजौ
षधीयुक्तेसर्वरत्नौषधैर्वृते॥रुचिरेनंदनेनंदेवासिष्ठेरम्यतामिह॥१८॥प्रजापतिसुतेदेविचतुरस्त्रेमहीयसि॥सुभगेसुव्र
तेदेविगृहेकाश्यपिरम्यतां॥१९॥पूजितेपरमाचार्यैर्गंधमाल्यैरलंकृते॥भवभूतिकरीदेविगृहेभार्गविरम्यतां॥२०॥अव्यक्ते
व्याकृतेपूर्णेमुनेरंगिरसःसुते॥इष्टकेत्वंप्रयच्छेष्टंप्रतिष्ठांकामयाम्यहं॥२१॥देशस्वामिपुरस्वामिगृहस्वामिपरिग्रहे॥म
नुष्यधनहस्त्यश्वपशुवृद्धिकरीभव॥२२॥ ॥इत्याग्नेयेमहापुराणेसभागृहस्थापनं॥ ॥भगवानुवाच॥समुदायप्रति
ष्ठांचवक्ष्येसावासुदेववत्॥आदित्यावसवोरुद्राःसाध्याविश्वेश्विनौतथा॥१॥ऋषयश्चतथासर्वेवक्ष्येतेषांविशेषकं॥
यस्यदेवस्ययन्नामतस्याद्यंगृह्यचाक्षरं॥२॥मात्राभिर्भेदयित्वातुदीर्घाण्यंगानिभेदयेत्॥प्रथमंकल्पयेद्बीजंसबिंदुप्रण
वान्वितं॥३॥सर्वेषांमूलमंत्रेणपूजनंस्थापनंतथा॥नियमंव्रतकृच्छ्राणांमठसंक्रमवेश्मनां॥४॥मासोपवासद्वादश्या
इत्यादिस्थापनंवदे॥शिलांपूर्णघटंकांस्यंसंभारंस्थापयेत्ततः॥५॥ब्रह्मकूर्चंसमादत्त्यश्रपेद्यवमयंचरुं॥क्षीरेणकपि
लायांस्तुत्वंविष्णोरितिसाधकः॥६॥प्रणवेनाभिघार्यैवद्रव्यासंघट्टयेत्ततः॥साधयित्वावतार्याथविष्णुमभ्यर्च्यहोमये
त्॥७॥व्याहृत्याचैवगायत्र्यातद्विप्रासेतिहोमयेत्॥विश्वतश्चक्षुर्वेदाद्यैर्भूरग्नयेतथैवच॥८॥सूर्यायप्रजापतयेअंतरि
क्षायहोमयेत्॥द्यौःस्वाहाब्रह्मणेस्वाहापृथिवीमहाराजकः॥९॥तस्मैसोमंचराजानंइंद्राद्यैर्होममाचरेत्॥एवंहुत्वाचरो
र्भागान्दद्याद्दिग्बलिमादरात्॥१०॥समिधोष्टशतंहुत्वापालाशाश्चाज्यहोमकं॥कुर्यात्पुरुषसूक्तेनइरावतीतिलाष्टकं॥

हुत्वातुब्रह्मविष्ण्वीशांदेवानामनुयायिनां॥ग्रहाणामाहुतीर्हुत्वालोकेशानामथोपुनः॥१२॥पर्वतानांनदीनांचसमुद्राणांत
थाहुतीः॥हुत्वाचव्याहृतीर्दद्यात्स्रुवपूर्णाहुतित्रयं॥१३॥वौषडंतेनेनमंत्रेणवैष्णवेनपितामह॥पंचगव्यंचरुंप्राश्यदत्वा॥
चाचार्यदक्षिणां॥१४॥तिलपात्रंहेमयुक्तंसवस्त्रंगामलंकृतां॥प्रीयतांभगवान्विष्णुरित्युत्सृजेद्व्रतंबुधः॥१५॥मासोपवा
सादेरन्यांप्रतिष्ठांवच्मिपूर्णतः॥यत्नेनतोष्यदेवेशंश्रपयेद्वैष्णवंचरुं॥१६॥तिलतंडुलनीवारैःश्यामाकैरथवायवैः॥आ
ज्येनाघार्यचोत्तार्यहोमयेन्मूर्तिमंत्रकैः॥१७॥विष्ण्वादीनांमासपानांतदंतेहोमयेत्पुनः॥ओंश्रीविष्णवेस्वाहा॥ओंविष्ण
वेनिभूययायस्वाहा॥१८॥विष्णवेशिपिविष्टायस्वाहा॥ओंपुरुषोत्तमायस्वाहा॥१९॥द्वादशाश्वत्थसमिधोहोमयेत्पुन
संप्लुताः॥विष्णोरराटमंत्रेणततोद्वादशचाहुतीः॥२०॥इदंविष्णोरिरावतीचरोर्द्वादशचाहुतीः॥हुत्वाचाज्याहुतीस्तद्वत्
द्विशासेतिहोमयेत्॥२१॥शेषहोमंततःकृत्वादद्यात्पूर्णाहुतित्रयं॥युंजतेत्यनुवाकार्यंजप्त्वाप्राशयेतवैचरुं॥२२॥प्रणवे
नस्रुवशब्दांतेकृत्वापात्रेतुपैप्पले॥ततोमासाधिपानांतुविप्रान्द्वादशभोजयेत्॥२३॥त्रयोदशोगुरुस्तत्रतेभ्योदद्यात्त्र
योदश॥कुंभान्स्वाद्वंबुसंयुक्तान्सच्छत्रोपानहान्वितान्॥२४॥स्रुवस्त्रहेममाल्याद्यान्व्रतपूर्त्यैत्रयोदश॥गावःप्रीतिंसमा
यांतुप्रचरंतुप्रहर्षिताः॥२५॥इतिगोपथमुत्सृज्ययूपंतत्रनिवेशयेत्॥दशहस्तंप्रपाराममठसंक्रमणादिषु॥२६॥गृ
हेचहोममेवंतुकृत्वासर्वंयथाविधि॥पूर्वोक्तेनविधानेनप्रविशेच्चगृहंगृही॥२७॥अनिवारितमन्नाद्यंसर्वेष्वेतेषुका
रयेत्॥द्विजेभ्योदक्षिणादेयायथाशक्त्याविचक्षणैः॥२८॥आरामंकारयेद्यस्तुनंदनेसुचिरंवसेत्॥मठप्रदानात्स्वर्लोकेशक्रलो
केवसेत्ततः॥२९॥प्रपादानाद्वारुणेनसंक्रमेणवसेद्दिवि॥इष्टकासेतुकारीचगोलोकेमार्गकृद्भवेत्॥३०॥नियमव्रतकृद्विष्णुः
कृच्छ्रकृत्सर्वपापहा॥गृहंदत्वावसेत्स्वर्गेयावदाभूतसंप्लवं॥३१॥समुदायप्रतिष्ठेष्टाशिवादीनांगृहात्मनां॥३२॥ ॥आग्ने
येमहापुराणेसमुदायप्रतिष्ठा॥ ॥भगवानुवाच॥जीर्णोद्धारविधिंवक्ष्येभूषितांस्नपयेद्गुरुः॥अचलांविन्यसेद्गेहेअतिजी
र्णांपरित्यजेत्॥१॥व्यंगांभग्नांचशैलाद्यांन्यसेदन्यांचपूर्ववत्॥संहारविधिनातत्रतत्वान्संहृत्यदेशिकः॥२॥सहस्रंनारसिंहेन

हुत्वातामुद्धरेद्गुरुः॥दारवींदाहयेद्वह्नौशिलाजांप्रक्षिपेज्जले॥३॥धातुजांरत्नजांवापिअगाधेवाजलेंबुधौ॥यानमारोप्यजी
र्णांश्चछाद्यवस्त्रादिनानयेत्॥४॥वादित्रैःप्रक्षिपेत्तोयेगुरवेदक्षिणांददेत्॥यत्प्रमाणाचयद्द्रव्यातन्मानांस्थापयेद्दिने॥५॥
कूपवापीतडागादेर्जीर्णोद्धारेमहाफलं॥६॥ ॥इत्याग्नेयेजीर्णोद्धारः॥ ॥भगवानुवाच॥वक्ष्येविधिंचोत्सवस्यस्थापिते
तुसुरेचयेत्॥तस्मिन्वर्षेचैकरात्रंत्रिरात्रंचाष्टरात्रकं॥उत्सवेनविनायस्मात्स्थापनंनिष्फलंभवेत्॥अयनेविषुवेचापिशय
नोपवनेगृहे॥२॥कारकस्यानुकूलेवायात्रांदेवस्यकारयेत्॥मंगलांकुररोपैस्तुगीतनृत्यादिवाद्यकैः॥३॥शरावघटिका
पालीस्त्वंकुरारोहणेहिताः॥यवान्शालीस्तिलान्मुद्गान्गोधूमान्सितसर्षपान्॥४॥कुलत्थमाषनिष्पावान्क्षालयित्वातु
वापयेत्॥पूर्वादौचबलिंदद्यात्भ्रमन्दीपैःपुरंनिशि॥५॥इंद्रादेःकुमुदादेश्चसर्वभूतेभ्यएवच॥अनुगच्छंतितेतत्रप्रतिरूपधराः
पुनः॥६॥पदेपदेश्वमेधस्यफलंनेषांनसंशयः॥आगत्यदेवतागारंदेवंविज्ञापयेद्गुरुः॥७॥तीर्थयात्रामयादेवश्वःकर्तव्यासु
रोत्तम॥तस्यारंभमनुज्ञातुमर्हसेदेवसर्वथा॥८॥देवमेवंतुविज्ञाप्यततःकर्मसमारभेत्॥प्ररोहघटिकाद्यातुवेदिकांभूषितां
व्रजेत्॥९॥चतुस्तंभांस्तुतन्मध्येस्वस्तिकेप्रतिमांन्यसेत्॥काम्यार्थालेख्यचित्रेषुस्थाप्यतत्राधिवासयेत्॥१०॥वैष्णवैःसह
कुर्वीतघृताभ्यंगंतुमूलतः॥घृतधाराभिषेकंवासकलंशार्वरींबुधः॥११॥दर्पणंदर्शयेन्नीराजंगीतवाद्यैश्चमंगलं॥वीजनंपूजनं
दीपंगंधपुष्पादिभिर्यजेत्॥१२॥हरिद्रामुक्तकाश्मीरश्रीकुंकुमचूर्णादिमूर्धनि॥प्रतिमायाश्चभक्तानांसर्वतीर्थफलाप्तये॥१३॥
स्थापयित्वासमभ्यर्च्ययात्राबिंबंरथेस्थितं॥नयेद्गुरुंनदीनादैश्छत्राद्यैराष्ट्रपालिकाः॥१४॥निम्नगायोजनादर्वाक्तत्रवेदींतुका
रयेत्॥वाहनादवतार्यैनांतस्यांवेद्यांनिवेशयेत्॥१५॥चरुंवैश्रपयेत्तत्रपायसंहोमयेत्ततः॥अब्लिंगैर्वैदिकैर्मंत्रैस्तीर्थानावाह
येत्ततः॥१६॥आपोहिष्ठोपनिषदैःपूजयेदर्घ्यमुख्यकैः॥पुनर्देवंसमादायतोयेकृत्वाघमर्षणं॥१७॥स्नायान्महाजनैर्विप्रैर्वैद्याः
मुत्तीर्यतंन्यसेत्॥पूजयित्वातदन्हाचप्रासादंतुनयेत्ततः॥१८॥पूजयेत्स्नापकंस्तंतुगुरुस्यात्भुक्तिमुक्तिकृत्॥१९॥आग्नेयेमहापु
राणेदेवयात्रोत्सवः॥१९॥ ॥अग्निरुवाच॥ब्रह्मन्शृणुप्रवक्ष्यामिस्नपनोत्सवविस्तरं॥प्रासादस्याग्रतःकुंभान्मंडलेमंडलं

न्यसेत्॥१॥कुर्याध्यानार्चनंहोमंहरेरादौचकर्मणि॥सहस्रंवाशतंवापिहोमयेत्पूर्णयासह॥२॥स्नानद्रव्याण्यथाष्टसकलशाश्चा
पिविन्यसेत्॥अधिवास्यसूत्रकंगन्धारयेन्मंडितोघयन्॥३॥चतुरस्रंपुरंकृत्वारुद्रैस्तंप्रविभावयेत्॥मध्येनतुचरुंस्थाप्यप
र्वपंक्तिंप्रमार्जयेत्॥४॥शालिचूर्णादिनापूर्यपूर्वादिनवकेषुच॥कुंभमुद्रांततोबध्वाघटंतत्रानयेद्बुधः॥५॥पुंडरीकाक्षमं
त्रेणदर्भास्तांस्तुविसर्जयेत्॥अद्भिःपूर्णंसर्वरत्नयुतंमध्येन्यसेद्घटं॥६॥यवव्रीहितिलांश्चैवनीवारान्श्यामकान्क्रमात्॥कु
लित्थमुद्गसिद्धार्थान्मुक्तान्यानष्टदिक्षुच॥७॥ऐंद्रेतुनवकेमध्येघृतपूर्णंघटंन्यसेत्॥गोशृंगनवगंगांबुगजेंद्रदर्शनेषुच॥८॥
तीर्थक्षेत्रखलेषष्ठेमृत्तिकास्युर्घटाष्टके॥याम्येतुनवकेमध्येतिलतैलघटंन्यसेत्॥९॥नारंगमथजंबीरंखर्जूरंमृत्तिकाक्र
मात्॥नारिकेलंन्यसेत्पूगंदाडिमंपनसंफलं॥१०॥नैरृतेनवकेमध्येक्षीरपूर्णंघटंन्यसेत्॥कुंकुमंनागपुष्पंचचंपकंमालतीं
क्रमात्॥११॥मल्लिकामथपुन्नागंकरवीरंमहोत्पलं॥पुष्पाणिचाप्येनरकेमध्येवैनारिकेलकं॥१२॥नादेयमथसामुद्रंसारसं
कौपमेवच॥वर्षजंहिमतोपंचनैरृतंगांगमेवच॥१३॥उदकान्यथवायव्येनवकेकदलीजलं॥सहदेवींकुमारींचसिंहिव्याघ्री
तथामृतां॥१४॥विष्णुपर्णींशतनिभांवचादिव्यौषधीन्यसेत्॥पूर्वदेशेसौम्यनवकेमध्येदधिघटंन्यसेत्॥१५॥पत्रमेलांत्वचा
कुष्टंबालकंचंदनद्वयं॥लतांकस्तूरिकांचैवकृष्णागरुमनुक्रमात्॥१६॥सिद्धद्रव्याणिपूर्वांशेशांतितोयमथैकतः॥चंद्रतारं
क्रमाच्छुक्लंगिरिसारंत्रपुंन्यसेत्॥१७॥घोषसारंतथाशीर्षंपूर्वदौरत्नमेवच॥घृतेनाभ्यज्यचोद्वर्त्यस्नपयेन्मूलमंत्रतः॥१८॥
गंधाद्यैःपूजयेद्वन्हौहुत्वापूर्णाहुतिंचरेत्॥बलिंचसर्वभूतेभ्योभोजयेद्दत्तदक्षिणं॥१९॥देवैश्चमुनिभिर्भूपैर्देवंसंस्थाप्यचेश्व
रः॥बभूवुस्थापयित्वेत्थंस्नपनोत्सवकंचरेत्॥२०॥अष्टोत्तरसहस्रेणघटानांसर्वभाग्भवेत्॥यज्ञावभृथस्नानेचपूर्णसंस्था
पनंकृतं॥२१॥गौरीलक्ष्मीविवाहादिचोत्सवंस्नानपूर्वकं॥२२॥ ॥आग्नेयेयज्ञावभृथस्नानं॥ ॥भगवानुवाच॥प्रतिष्ठांपादपा
नांचवक्ष्येहंभुक्तिमुक्तिदां॥सर्वौषध्योदकैर्विप्रान्पिष्टातकविभूषितान्॥१॥वृक्षान्माल्यैरलंकृत्यवासोभिरभिवेष्टयेत्॥सूच्या
सौवर्णयाकार्यंसर्वेषांकर्णवेधनं॥२॥हेमशीलायांजननवेद्यांतुफलसप्तकं॥अधिवासयेच्चप्रत्येकंघटान्बलिनिवेदनं॥३॥इंद्रादे

रधिवासेथहोमंकार्योवृहस्पतेः॥वृक्षमध्यादुत्सृजेद्गांअभिषेकंचमंत्रतः॥४॥ऋग्यजुःसाममंत्रैश्चवारुणैर्मंगलैरवैः॥वृक्षवेदिककुं
भैश्चस्नपनंद्विजपुंगवाः॥५॥तरूणांयजमानस्यकुर्युश्चयजमानकः॥भूषितोदक्षिणांदद्याद्गोभूभूषणवस्त्रकं॥६॥क्षीरेणभो
जनंदद्याद्यावद्दिनचतुष्टयं॥होमस्तिलाद्यैःकार्यस्तुपलाशसमिधैस्तथा॥७॥आचार्येद्विगुणंदद्यात्पूर्ववन्मंडपादिकं॥पाप
नाशःपरासिद्धिर्वृक्षारामप्रतिष्ठया॥८॥स्कंदायशोयथाप्राहप्रतिष्ठाद्यंतथाशृणु॥सूर्येशगणशक्त्यादेःपरिवारस्यवैहरेः॥
॥९॥ ॥आग्नेयेआरामप्रतिष्ठा॥ ॥ईश्वरउवाच॥गणपूजांप्रवक्ष्यामिनिर्विघ्नायाखिलार्थदां॥गणायस्वाहाहृदयमेकदं
ष्ट्रायवैशिरः॥१॥गजकर्णिनेचशिखागजवक्त्रायचवर्मच॥महोदरायस्तुदंडहस्तायाक्षितथास्त्रकं॥२॥गणोगुरुःपादुकाच
शक्त्यनंतौचधर्मकः॥मुख्यास्थिमंडलंचाधश्चोर्ध्वछदनमर्चयेत्॥३॥पद्मकर्णिकाबीजाश्चज्वालिनीनंदनार्चयेत्॥सूर्येशाः
कामरूपाचउदयाकामवर्तिनी॥४॥सत्याचविघ्ननाशाचआसनंगंधमृत्तिका॥वंशोयोरोचदहनंपूर्वोलंबंतथास्मृतं॥५॥लंबो
दरायविद्महेमहोदरायधीमहि॥तन्नोदंतिःप्रचोदयात्॥६॥गणपतिर्गणाधिपोगणेशोगणनायकः॥षण्मुखीडोवक्रतुंडएकदंष्ट्रोम शो
होदरः॥७॥गजवक्त्रोलंबकुक्षिर्विकटोविघ्ननाशनः॥धूम्रवर्णोमहेशाद्याःपूजागणपतेस्मृता॥८॥ ॥इत्याग्नेयेविनायकपूजा॥
ला ॥ईश्वरउवाच॥वक्ष्यामिस्कंदनित्याद्यंस्नानंपूजाप्रतिष्ठया॥खोसिनासमुत्थत्यमृदमष्टांगुलांततः॥१॥सर्वांत्सनासमुत्थत्यपु
नस्तेनैवपूरयेत्॥शिरसापयसस्तीरेनिधायस्त्रेणशोधयेत्॥२॥तृणादिशिखयोत्थत्यब्रह्मणाविभजेत्त्रिधा॥एकयानाभिपादांत
प्रक्षाल्यपुनरन्यथा॥३॥अस्त्राभिलब्धयालभ्यदीप्तयासर्वविग्रहं॥निरुध्याक्षाणिपाणिभ्यांप्राणान्संयम्यवारिणा॥४॥निमज्यास्ती
नहृद्यस्त्रंस्मरन्कालानलप्रभं॥मलस्नानंविधायेत्थंसमुत्थायजलांतरात्॥५॥अस्त्रसंध्यामुपास्याथविधिस्नानंसमाचरेत्॥
सारस्वतादितीर्थानांएकमंकुशमुद्रया॥६॥हृदात्दृष्यतथास्नाप्यपुनःसंहारमुद्रया॥शेषंमृन्द्भागमादायप्रविश्यनाभिवारि
णि॥७॥वामपाणितलेकुर्यान्मृद्भागत्रयमुदङ्मुखः॥अंगैर्दक्षिणमेकाद्यंपूर्वमंत्रेणसप्तधा॥८॥शिवेनदशधासौम्यंजयेन्मृदागत्र
यंक्रमात्॥सर्वदिक्षुक्षिपेत्पूर्वंहूंफट्पूर्वंशराणुना॥९॥कुर्याच्छिवेनसौम्येनशिवतीर्थंभुजक्रमात्॥सर्वांगमस्त्रजप्तेनमूर्धादिच

रणावधि॥१०॥दक्षिणेनसमालभ्यपठंनंगचतुष्टयं॥पिधायखानिसर्वाणिषण्मुखीकरणेनच॥११॥शिवंस्मरन्निमज्जेतहरिंग
गेतिवास्मरन्॥वौषडंतषडंगेनकेकुर्यादभिषेचनं॥१२॥कुंभपात्रेणरक्षार्थंपूर्वादौविक्षिपेज्जलं॥स्नात्वाराजोपचारेणस्रग्गंधा
मलकादिभिः॥१३॥स्नात्वाचोत्तीर्यतत्तीर्थंसंहारिण्योपसंहरेत्॥अथातोविधिशक्त्येनसंहितामंत्रितेनच॥१४॥निवृत्यादिविशु
द्धेनभस्मनास्नानमाचरेत्॥शिरस्कपादपर्यंतंह्रूंफडंतंशराणुना॥१५॥तेनकृत्वामलस्नानंविधिस्नानंसमाचरेत्॥ईशानतत्
पुरुषाघोरगुह्यकाजातसंबरैः॥१६॥क्रमेणोद्वर्तयेन्मूर्तिंवक्रकृद्गुह्यविग्रहान्॥संध्यात्रयेनिशीथेचवर्षापूर्वावसानयोः॥१७॥
कृत्वाभुक्त्वापयःपीत्वाकृत्वाचावश्यकादिकं॥स्त्रियंनपुंसकंशूद्रंबिडालशवमूषिकं॥१८॥स्नानमाग्नेयकंस्पृष्ट्वाशक्त्यंबुचुल
कंचरेत्॥सूर्यांशुवर्षसंपर्केप्राङ्मुखेनोर्ध्वबाहुना॥१९॥माहेंद्रस्नानमैशानकार्यंसप्तपदावधि॥गोसंगमध्यकेगोःयातुवुरोत्खा
तकरेणुभिः॥२०॥पावनंनवमंत्रेणस्नानंतत्कर्मणाथवा॥सद्योजातादिभिर्मंत्रैरंभोभिरभिषेचनं॥२१॥मंत्रस्नानंभवेदेवंवारु
णाग्नेययोरपि॥मनसामूलमंत्रेणप्राणायामपुरःसरं॥२२॥कुर्वीतमानसंस्नानंसर्वत्रविहितंचयत्॥वैष्णवादौतन्मंत्रैरेवंस्ना
नादिकारयेत्॥२३॥संध्याविधिंप्रवक्ष्यामिमंत्रैर्भिन्नैःसमंगुह॥संवीक्ष्यत्रिःपिबेदंबुब्रह्मतीर्थेनशंकरैः॥२४॥स्वधांतैरात्मत
त्वाद्यैस्ततःखानिस्पृशेन्मदा॥शकलीकरणंकृत्वाप्राणायामेनसंस्थितः॥२५॥त्रिःसमावर्तयेन्मंत्रीमनसाशिवसंहितं॥आ
चम्यन्यस्यसंध्यांचब्राह्मींप्रातस्मरेन्नरः॥२६॥हंसपद्मासनांरक्तांचतुर्वक्त्रांचतुर्भुजां॥प्रस्कंदमालिनींदक्षेवामेदंडकमंड
लुं॥२७॥तार्क्ष्यपद्मासनांध्यायेन्मध्यान्हेवैष्णवींशिर्तिं॥शंखचक्रधरावामेदक्षिणेसगदाभयं॥२८॥रौद्रींध्यायेद्वृषारूढां
त्रिनेत्रांशशिभूषितां॥त्रिशूलाक्षधरांदक्षेवामेसाभयशक्तिकां॥२९॥साक्षिण्याःकर्मणांसंध्याआत्मानंतत्वभानुगं॥चतु
र्थींज्ञानिनःसंध्यानिशिखादौविभाव्यते॥३०॥हृद्दिंदुब्रह्मरंध्रेषुअरूपातुपरेस्थिता॥शिवरोधःपरोयस्तुसासंध्यापरमो
च्यते॥३१॥पैत्रंमूलेप्रदेशिन्याःकनिष्ठायाःप्रजापतेः॥ब्राह्ममंगुष्ठमूलस्थंतीर्थंदैवंकराग्रतः॥३२॥सव्यपाणितलेवन्हेस्तीर्थं
सोमस्यवामतः॥ऋषीणांतुसमग्रेणअंगुलीपर्वसंधिषु॥३३॥ततःशिवात्मकैर्मंत्रैःकृत्वातीर्थंशिवात्मकं॥मार्जनंसंहितामं

त्रैस्तत्तोयेनसमाचरेत्॥३४॥वामपाणिपतत्तोययोजनंसव्यपाणिना॥उत्तमांगेक्रमान्मंत्रैर्मार्जनंसमुदाहृतं॥३५॥नीत्वातदु
पलासाग्रंदक्षपाणिपुटस्थितं॥बोधरूपंसितंतोयंवाममारुध्यस्तंभयेत्॥३६॥नत्सापंकज्जलाभासंपिंगयाविध्यशिष्टिना॥
क्षिपेद्वज्रशिलायांतुउत्तरेदघमर्षणं॥३७॥स्वाहांतशिवमंत्रेणकुशपुष्पाक्षतान्वितं॥शिवायार्घांजलिंदत्वागायत्रींशक्ति
तोजपेत्॥३८॥तर्पणंसंप्रवक्ष्यामिदेवतीर्थेनमंत्रकान्॥तर्पयेद्वौशिवायेतिस्वाहान्यान्स्वाहयास्वतान्॥३९॥ओंहृदयाय
ह्रींशिरसेन्हूंशिखायैन्हैंकवचाय॥अस्त्रायाष्टौदेवगणान्रुद्रादित्येभ्यएवच॥४०॥हांवसुभ्योरुद्रेभ्योविश्वेभ्यश्चैव
मरुन्द्यः॥गुरुभ्योहोमंगिरोभ्योंऋषिकंठोपरीत्यथ॥४१॥अत्रयेथवसिष्ठायनमश्चाथपुलस्तये॥क्रतवेभारद्वाजायवि
श्वामित्रायचैनमः॥४२॥प्रचेतसेमनुष्यांश्चसनकायवषट्तथा॥हांसनंदायवषट्सनातनायवैषट्॥४३॥सनत्कुमारा
यवषट्कपिलायतथावषट्॥पंचशिखायद्युभवेसंलग्नकरमूलतः॥४४॥सर्वेभ्यलेभ्योवौषट्भूतांदेवपितृनथ॥रक्षः
स्कंदोपवीतीचकुशामूलाग्रतस्तिलैः॥४५॥कव्यवालनलायाथसोमायचयमायच॥अर्यम्णेवाणिसोमायबर्हिषन्द्यःस्व
धायुतान्॥४६॥आज्यपायचसोमायविशेषस्वरवसितृन्॥हांईशानायपित्रेस्वधासदाधाप्रपितामहे॥४७॥शांतप्रपि
तामहायअथाविप्रेपितृंस्तथा॥पितृभ्यःपितामहेस्वधाप्रपितामहे॥४८॥हृत्यप्रमातामहेभ्योमातृभ्यश्चस्वाहातथा॥हांमा
तामहेभ्यस्वधाह्रांप्रमातामहेभ्यश्च॥४९॥हृत्यप्रमातामहेभ्यस्वधाज्ञातिभ्यःसर्वाचार्येभ्यएवच॥शांतिदिक्पतिसिद्धानांमा
तृणांसहरक्षसां॥५०॥ ॥इत्याग्नेयेमहापुराणेस्नानादिविधिः॥ ॥ईश्वरउ०॥वक्ष्येसूर्यार्चनंस्कंधकरांगन्यासपूर्वकं॥अ
हंतेजोमयःसूर्यइतिध्यात्वाघमर्चयेत्॥१॥पूरयेद्रक्तवर्णेनललाटाकृष्टबिंदुना॥तंसंपूज्यरवेरंगेकृत्वारक्षावगुंठनं॥२॥
त् संप्रोक्ष्यतज्जलैर्द्रव्यंपूर्वास्योभानुमर्चयेत्॥ओंअं[illegible]जादिसर्वत्रपूजनंदंडिपिंगलौ॥३॥द्वारिदक्षेवामपार्श्वेईशानेअंगणा
यच॥अग्नौगुरुंपीठमध्येप्रभूतंचासनंयजेत्॥४॥अग्न्यादौविमलासारमाराध्यंपरमंसुखं॥शीतरक्तपीतनीलवर्णासिंहानि
भान्यसेत्॥५॥पद्ममध्येरांदीप्तांरींसूक्ष्मांरंजयाक्रमात्॥रूंभद्रांरेविभूतिश्चविमलायैर्ममोघया॥६॥रौरौंविद्युताशक्तिःपू

वर्णाः सर्वतोमुखा॥रंमध्येअर्कासनंस्यात्सूर्यमूर्तिंषडक्षरं॥७॥ओंहंखंखखशोल्काय इतियजेदाबाह्यभास्करं॥ललाटाक्ष
ष्टमंजस्यांध्यात्वारक्तंन्यसेद्रविं॥८॥हांह्रींसःसूर्यायनमोमुद्रयावाहनादिकं॥विधायप्रीतयेबिंबमुद्रांगंधादिकंददेत्॥९
॥पद्ममुद्रांबिंबमुद्रांप्रदर्शयेत्ततोदीरितं॥ओंआंहृदयायनमःअर्कायशिरसेतथा॥१०॥भूर्भुवःस्वरेकालिनिशिखायै
नैर्ऋतेयजेत्॥हूंकवचायवायव्येभांनेत्रायेतिमध्यतः॥११॥वःअस्त्रायेतिपूर्वादौततोमुद्राःप्रदर्शयेत्॥धेनुमुद्राहृदादीनांगो
विषाणाच्चनेत्रयोः॥१२॥अस्त्रस्यत्रासनीयोज्याग्रहाणांचनमस्क्रिया॥सौंसोमंबुंबुधंबृंचजीवंभंभार्गवंयजेत्॥१३॥दलेपूर्वा
दिकेग्न्यादौअंभौमंशांशनैश्चरं॥रंराहुंकंकेतवेचगंधाद्यैश्चखखोल्किना॥१४॥मूलंजप्त्वार्घपात्रांबुदत्वासूर्यायसंस्कृतिः॥न
त्वापराङ्मुखंचार्घ्यंक्षमस्वेतिततोवदेत्॥१५॥शाराणुनाफडंतेनसमाहृत्याणुसंहृतिः॥हृत्सरोजेशिवसूर्येतिसंहारिण्योपसं
हृतं॥१६॥योजयेत्तेजश्चंडायरविर्निर्माल्यमर्पयेत्॥अभ्यर्च्यैवंजपाध्यानात्होमात्सर्वंरवेर्भवेत्॥१७॥ ॥आग्नेयेमहापुरा
णेसूर्यपूजा॥ ॥ईश्वरउवाच॥शिवपूजांप्रवक्ष्यामिआचम्यप्रणवार्घवान्॥द्वारमस्त्रांबुनाप्रोक्ष्यहोमादिद्वारपान्यजेत्॥१॥
गणंसरस्वतींलक्ष्मीमूर्ध्वोदुंबरकेयजेत्॥नंदिगंगेदक्षिशाखस्थितेवामगतेयजेत्॥२॥महाकालंचयमुनांदिव्यदृष्टिनि
पातितः॥उत्सार्यदिव्यान्विघ्नांश्चपुष्पक्षेपांतरिक्षगान्॥३॥दक्षपार्ष्णित्रिभिर्घातैर्भूमिष्ठान्यागमंदिरं॥देहलीलंघयेद्वामशा
खामाश्रित्यवैविशेत्॥४॥प्रविश्यदक्षपादेनविन्यस्यास्त्रमुदुंबरे॥ओंहांवास्त्वधिपतयेब्रह्मणेमध्यतोयजेत्॥५॥निरीक्ष
णादिभिःशस्त्रैःशुद्धानादायगंत्वकान्॥लब्धानुज्ञःशिवान्मौनीगंगादिकमनुव्रजेत्॥६॥पवित्रांगःप्रजप्तेनवस्त्रपूतेनवा
न् रिणा॥पूरयेदंबुधौतांस्तांगायत्र्याहृदयेनवा॥७॥गंधकाक्षतपुष्पादिसर्वद्रव्यसमुच्चयं॥संनिधाकृत्यपूजार्थंभूतशुद्ध
यादिकारयेत्॥८॥देवदक्षेततोन्यस्यसौम्यास्यश्चशरीरतः॥संहारमुद्रयादायमूर्ध्निमंत्रेणधारयेत्॥९॥भोग्यकर्मोपभोगा
र्थंपाणिकच्छपिकाक्षया॥हृदंबुजेनिजात्मानंद्वादशान्तपदेथवा॥१०॥शोधयेत्पंचभूतानिसंचिंत्यस्फुषिरंततौ॥चरणांगुष्ठयो
र्युग्मान्स्फुषिरांतर्बहिस्स्मरेत्॥११॥शक्तिंहृव्यापिनींपश्चाद्धूंकारेपावकप्रभे॥रंध्रमध्यस्थितेकृत्वाप्राणबोधंहिचिंतकः॥१२

निबोधयेद्रेचकांतेफडंतेनाथतेनच॥हृत्कंठतालुभ्रूमध्यब्रह्मरंध्रेविभिद्यच॥१३॥ग्रंथीन्निर्वर्ण्येहूंकारंमूर्ध्निविन्यस्यजीव
नं॥संपुटंहृदयेनाथपूरकाहृतचेततं॥१४॥हूंशिखोपरिविन्यस्यशुद्धिविन्त्यानुकंस्मरेत्॥कृत्वाथकुंभकंशंभौएकोद्घातेन
योजयेत्॥१५॥रेचकेबीजहत्याशिवेनीनोथशोधयेत्॥प्रतिलोमंस्वहेतौतुविलयंततंतनबिंदुकं॥१६॥लयंनीत्वामहीवातोजलवन्ही
परस्परं॥ह्रौंह्रौसाध्यौनथाकाशमविरोधेनतच्छृणु॥१७॥पार्थिवंमंडलंपीतंकठिनंवज्रलांछितं॥हौमित्यासीयबीजेनतन्निवृत्ति
कलामयं॥१८॥पादादारभ्यमूर्धांतंविचिंत्यचतुरस्रकं॥उद्घातंपंचकेनैवपायुधूतंविचिंतयेत्॥१९॥अर्धचंद्रंद्रवंसौम्यंशुभ्रमं
भोजलांछितं॥हूमित्यनेनबीजेनप्रतिष्ठारूपतांगतं॥२०॥संयुक्तंराममंत्रेणपुरुषांतसकारणं॥अर्धचतुर्भिरुद्घातैर्वन्हिभूतं
विशोधयेत्॥२१॥आग्नेयंमंडलंत्र्यस्रंरक्तंस्वस्तिकलांछितं॥हूमित्यनेनबीजेनविद्यारूपंविभावयेत्॥२२॥घोराणुत्रिभिरु
द्घातैर्जलभूतंविशोधयेत्॥षडस्रंमंडलंवायोर्बिंदुभिःषड्भिरंकितं॥२३॥कृष्णंह्रैमितिबीजेनजातंशांतिकलामयं॥संचिंत्योद्घा
तयुग्मेनपृथ्वीभूतंविशोधयेत्॥२४॥नभोविष्णुमयंवृत्तंबिंदुशक्तिविभूषितं॥व्योमाकारंस्फुटंचशुद्धस्फटिकनिर्मलं॥२५
हौंकारेणफडंतेनशांत्यतीतकलामयं॥ध्यात्वैकोद्घातयोगेनसविशुद्धंविभावयेत्॥२६॥आप्याययेत्ततःसर्वंमूलेनास्तवर्षि
णा॥आधाराख्यामनंतंचधर्मज्ञानादिपंकजं॥२७॥हृदासनमिदंध्यात्वामूर्तिमावाहयेत्ततः॥स्वच्छाशिवमयंतस्यामात्मानं
द्वादशांततः॥२८॥अथतांशक्तिमंत्रेणवौषडंतेनसर्वतः॥दिव्यामृतेनसंप्लाव्यकुर्वीतशकलीकृतं॥२९॥हृदयादिकरांतेषुक
निष्ठाद्यंगुलीषुच॥हृदादिमंत्रविन्यासःशकलीकरणंमतं॥३०॥अस्त्रेणरक्ष्यप्राकारंतनुत्रेणाथतद्बहिः॥शक्तिजालमधश्चो
र्ध्वंमहामुद्रांप्रदर्शयेत्॥३१॥आपादमस्तकंयावन्त्रावपुषैःशिवंहृदि॥पद्मेजयेत्पूरकेणआकृष्टामृतवद्घृतैः॥३२॥शवमंत्रै
र्नाभिकुंडेतर्पयेतशिवानलं॥ललाटेबिंदुरूपंचचिंतयेच्छुभविग्रहं॥३३॥एवंस्वर्णादिपात्राणांपात्रमस्त्रांबुशोभितं॥बिंदुप्रसृ
तपीयूषरूपतोयास्तनादिना॥३४॥हृदापूज्यषडंगेनपूजयित्वाभिमंत्रयेत्॥संरक्ष्यहेतिमंत्रेणकवचेनविलुंठयेत्॥३५॥र
चयित्वार्घमष्टांगंरोचयेत्धेनमुद्रया॥अभिषिंचेदथात्मानंमूर्ध्नितत्तोयबिंदुना॥३६॥तत्रस्थंयागसंभारंप्रोक्षयेदस्त्रवारिणा

अभिमंत्र्यत्दृदापिंडैस्तुत्राणेनवेष्टयेत्॥३७॥दर्शयित्वामृतांमुद्रांपुष्पंदत्वानिजासने॥विधायतिलकंमूर्भिपुष्पंमूलेनयोजयेत्
॥३८॥स्नानेदेवार्चनेहोमेभोजनेयागयोगयोः॥आवश्यकेजपेधीरःसदावाचंयमोभवेत्॥३९॥नादांताद्धारणान्मंत्रंशोधयित्वास्फ
संस्कृतां॥पूजामभ्यर्च्यगायत्र्यासामान्यर्घमुपाहरेत्॥४०॥ब्रह्मपंचकमावर्त्यमाल्यमादायलिंगिनः॥ऐशान्यांदिशिचंडायत्दृदये
ननिवेदयेत्॥४१॥प्रक्षाल्यपिंडिकालिंगेअस्त्रतोयेनतोत्दृदा॥अर्घपात्रांबुनासिंचेदितिलिंगविशोधनं॥४२॥आत्मद्रव्यमंत्रलिं
गशुद्धौसर्वान्स्फुरान्यजेत्॥वायव्येगणपतयेहांगुरुभ्योनैर्ऋते॥४३॥आधारशक्तिमंकुरनिभांकूर्मशिलास्थितां॥यजेद्ब्र
ह्मशिलारूढंशिवस्यानंतमानसं॥४४॥विचित्रकेशाविप्राख्यान्नन्योन्यंदृष्टदर्शिनः॥कृतत्रेतादिरूपेणशिवस्यासनपादुका
न्॥४५॥धर्मज्ञानंचवैराग्यमैश्वर्यंचाग्निदिङ्मुखात्॥कर्पूरकुंकुमस्वर्णकज्जलाभान्यजेत्क्रमात्॥४६॥पद्मंचकर्णिकामध्
ध्येपूर्वादौमध्यतोनव॥वरदाभयहस्ताश्चशक्तयोधृतचामराः॥४७॥वामाज्येष्ठाचरौद्रीचकालीकलविकारिणी॥पूज्याबलप्रमथ
नीकेशावायेनलोन्मनी॥४८॥क्षित्यादिशुद्धविद्यातुतत्वव्यापकमासनं॥न्यसेत्सिंहासनेदेवंशुक्लंपंचमुखंविभुं॥४९॥दशबाहुं
चखंडेंदुदधानंदक्षिणैःकरैः॥शक्त्यृष्टिशूलखट्वांगवरदंवामकैःकरैः॥५०॥डमरुंबीजपूरंचनीलाब्जंसूत्रमुत्पलं॥द्वात्रिंशल्लक्ष
णोपेतांशैवीमूर्तिंतुमध्यतः॥५१॥हांहांशिवमूर्तयेस्वप्रकाशांशिवंस्मरन्॥ब्रह्मादिकारणत्यागान्मंत्रंनीत्वाशिवास्पदं॥५२॥ततो
ललाटमध्यस्थंस्फुरत्तारापतिप्रभां॥षडंगेनसमाकीर्णंबिंदुरूपंपरंशिवं॥५३॥पुष्पांजलिगतंध्यात्वालक्ष्यमूर्तौनिवेशयेत्॥
ओंहांहौंशिवायनमआवाहन्यात्दृशाततः॥५४॥आवात्यस्थाप्यस्थापन्यासंनिधानांतिकंशिवं॥निरोधयेन्निष्ठुरयाकालकांस्य
फउंततः॥५५॥विप्रानुत्सार्यमुख्याथलिंगमुद्रांनमस्कृतिं॥तदावगुंठयेतश्चादावाहःसंमुखाततः॥५६॥निवेशनंस्थापनंस्या
त्सन्निधानंतवास्मिभोः॥आकर्मकांडपर्यंतंसंनिधिर्येपरिक्षयः॥५७॥अभक्तेश्चप्रकाशोयस्तत्स्यादवगुंठनं॥शकलीकर
णंकृत्वामंत्रैःसर्वैरयैकतां॥५८॥अंगानमंगिनासार्धंविदध्यादमृतीकृतं॥चिछक्तित्दृदयंशंभोःशिवऐश्वर्यमष्टधा॥५९॥शिखा
वशित्वंचाभेद्यंतेजःकवचमैश्वरं॥प्रतापोदुःसहश्चास्त्रमंतरापापहारकं॥६०॥नमःस्वधाचस्वाहाचवौषट्चेतियथाक्रमं॥त्दृसु

रःसरमुच्चार्यपाद्यादीनिनिवेदयेत्॥६१॥पाद्यंपादांबुजद्वंद्वेवक्रेस्वाचमनीयकं॥अर्घ्यंशिरसिदेवस्यदूर्वापुष्पाक्षतानिच॥६२
॥एवंसंस्कृत्यसंस्कारैर्दशभिःपरमेश्वरं॥यजेत्पंचोपचारेणविधिनाकुसुमादिभिः॥६३॥अभ्युक्ष्योद्वर्त्यनिर्मल्यराजिकाल
वणादिभिः॥अर्घोदबिंदुपुष्पाद्यैर्गंधकैःस्नापयेच्छनैः॥६४॥पयोदधिघृतक्षौद्रशर्करांद्यैरनुक्रमात्॥ईशादिमंत्रितैर्भस्यैर्मु
ख्यैस्तेषांविपर्ययः॥६५॥तोयधूपांतरैःसर्वैर्मूलेनस्नापयेच्छिवं॥विरूक्ष्ययवचूर्णेनयथेष्टंशीतलैर्जलैः॥६६॥स्वशक्त्यागंधतो
येनसंस्नाप्यशुचिवाससा॥निर्माज्यार्घ्यंप्रदद्याच्चनोपरिभ्रामयेत्करं॥६७॥नशून्यमस्तकंलिंगंपुष्पैःकुर्यात्ततोददेत्॥चंद
नाद्यैःसमालभ्यपुष्पैःप्रार्च्यशिवाणुना॥६८॥धूपभाजनमस्त्रेणप्रोक्ष्याभ्यर्च्यशिवाणुना॥अस्त्रेणपूजितांघंटांचादायगु
ग्गुलुंदरेत्॥६९॥दद्यादाचमनंपश्चात्सुधांतत्दृदयाणुना॥आरात्रिकंसमुच्चार्यतथैवाचामयेत्पुनः॥७०॥प्रणम्यादायदेवा
ज्ञांभोगांगानिप्रपूजयेत्॥त्दृदग्नौचंद्रभंचैवशोशिरश्चामीकरप्रभं॥७१॥शिखारक्तांचनैर्ऋत्येकृष्णंचवर्मचवायवे॥चतुर्वक्त्रंच
तुर्बाहुंदलस्थान्पूजयेदिमान्॥७२॥दंष्ट्राकरालमप्यस्त्रंपूर्वादौवज्रसन्निभं॥मूलंहौंशिवायनमः॥हांत्दृंहींशिरश्चहूंशिखा
हैंवर्मचास्त्रपरिवारमुतायच॥७३॥शिवादद्यात्साघंचआचामंचार्यमेवच॥गंधंपुष्पंधूपदीपंनैवेद्याचमनीयकं॥७४॥करोद्वर्तन
तांबूलंमुखवासंचदर्पणं॥शिवस्यारोप्यदेवस्यदूर्वाक्षतपवित्रकं॥७५॥मूलमष्टशतंजप्त्वात्दृदयेनाभिमंत्रितं॥चर्मणावेष्टितं
खड्गरक्षितंकुशपुष्पकैः॥७६॥अक्षतैर्मुद्रयायुक्तंशिवमुन्द्वसंज्ञया॥गुह्यातिगुह्यगुप्त्यर्थंगृहाणास्मत्कृतंजपं॥७७॥सि
द्धिर्भवतिमेयेनत्वत्प्रसादात्त्वयिस्थिते॥भोगीश्लोकंपठित्वातुदक्षहस्तेनशंभवे॥७८॥मूलाणुनार्घ्यतोयेनवरहस्तेनिवेद
येत्॥यत्किंचित्कुर्महेदेवसदासुकृतदुष्कृतं॥७९॥तन्मेशिवपदस्थस्यहूंक्षःक्षेपयशंकर॥शिवोदाताशिवोभोक्ताशिवः
सर्वमिदंजगत्॥८०॥शिवोजयतिसर्वत्रयःशिवःसोहमेवच॥श्लोकद्वयमधीत्यैवंजपंदेवायचार्पयेत्॥८१॥शिवांगानां
दशांशंचदत्वार्घंस्तुतिमाचरेत्॥प्रदक्षिणीकृत्यनमेच्चाष्टांगंचाष्टमूर्तये॥८२॥नत्वाध्यानादिभिश्चैवयजेच्चित्रेनलादिषु
॥८३॥ ॥इत्याग्नेयेशिवपूजा॥ ॥ईश्वरउवाच॥अर्घपात्रकरोयायादग्न्यागारंसुसंहृतः॥योगोपकरणंसर्वंद्रव्यंदक्षा

कल्पयेत्॥१॥उदङ्मुखः कुंडमीक्षेत्प्रोक्षणं ताडनं कुशैः॥विदध्यादस्त्रमंत्रेण धर्मेणाभ्युक्षणं मतं॥२॥खड्गेन खातमुद्धारं पूरणं
समतामपि॥कुर्वीत कर्मणा सेकं कुट्टनं तु शराणुना॥३॥संमार्जनं समालेपं कलारूपप्रकल्पनं॥त्रिसूत्रीपरिधानं च वर्मणा
भ्यर्चनं सदा॥४॥रेखात्रयमुदक्कुर्याद्दक्षिणाद्यां पूर्वामनामथः॥कुशेन च शिवास्त्रेण तद्वदासां विपर्ययः॥५॥वज्रीकरणमंत्रेण तद्वदा
दर्भैश्चतुष्पथं॥अथ पादांतमंत्रेण विन्यसेद्विष्टरं तदा॥६॥तदा वागीश्वरीं तत्र ईशमावाह्य पूजयेत्॥वह्निं सदाश्रयानीतं शरावस्थ
मात्रोपरि स्थितं॥७॥क्रव्यादांशं परित्यज्य वीक्षणादिविशोधितं॥औदर्यं चैंधनं भौतं एकीकृत्यानलत्रयं॥८॥ॐ हूं वह्निचै
तन्याय वह्निबीजेन विन्यसेत्॥संहितामंत्रितं वह्निं धेनुमुद्रामृतं ततः॥९॥रक्षितं हेतिमंत्रेण कवचेनावगुंठितं॥पूजितं त्रिः
परिभ्राम्य कुंडस्योर्ध्वं प्रदक्षिणं॥१०॥शिवबीजमिति ध्यात्वा वागीशीगर्भगोचरे॥वागीश्वरेण देवेन क्षिप्यमाणं विभावयेत्॥११॥
भूमिष्ठजानुको मंत्री तदात्मसंमुखं क्षिपेत्॥ततोंतस्थितबीजस्य नाभिदेशे समूहनं॥१२॥संभृतिं परिधानस्य शौचमाच
मनं तदा॥गर्भाग्नेः पूजनं कृत्वा तद्रक्षार्थं शराणुना॥१३॥बध्नीयाद्गर्भजं देव्याः कंकणं पाणिपल्लवे॥गर्भाधानाय संपूज्य स
द्योजातेन पातकं॥१४॥ततो तद्दयाय मंत्रेण जुहुयादाहुतित्रयं॥पुंसवनाय वामेन तृतीये मासि पूजयेत्॥१५॥आहुतित्रि
तयं दद्याच्छिरसांबुकणान्वितं॥सीमंतोन्नयनं षष्ठे मासि संपूज्य रूपिणा॥१६॥जुहुयादाहुतीस्तिस्रः शिखया शिखयैव
तु॥वक्रांगकल्पनां कुर्याद्वक्त्राद्युद्घाटनिष्कृतीः॥१७॥जातकर्म नृकर्मभ्यां दशमे मासि पूर्ववत्॥वह्निं संधुक्ष्य दर्भाद्यैः स्ना
नं गर्भमलापहं॥१८॥स्वर्णबंधनं देव्याः कृतं ध्यात्वा तदार्चयेत्॥सद्यः सूतकनाशाय प्रोक्षयेदस्त्रवारिणा॥१९॥कुंभं तु ब
हिरस्त्रेण ताडयेद्धर्मणोत्क्षिपेत्॥अस्त्रेणोत्तरपूर्वाग्न्यामेखलास्थं बहिः कुशात्॥२०॥आस्थाप्यस्थाप्यस्थापयन्ने तु सराय
रिधिविष्टरं॥वक्त्राणामस्त्रमंत्रेण ततो नालापनुत्तये॥२१॥समिधः पंच होतव्याः प्रांते मूले घृतप्लुताः॥ब्रह्माणं शंकरं विष्णु
मनंतं च तदार्चयेत्॥२२॥दूर्वाक्षतैश्च पर्यंतं परिधिस्थाननुक्रमात्॥इंद्राद्यीशानपर्यंतान्विष्टरस्थाननुक्रमात्॥२३॥अ
ग्नेरभिमुखीभूतान्निजदिक्षु तदार्चयेत्॥निवार्य विघ्नसंघातं बालकं पालयिष्यथ॥२४॥दीचीमाज्ञामिमां तेषां श्रावयेत्त

दनंतरं॥गृहीत्वा स्रुक्स्रुवावूर्ध्ववदनाधोमुखौ क्रमात्॥२५॥प्रताप्याग्नौ त्रिधा दर्भमूलमध्याग्रकैः स्पृशेत्॥कुशस्पृष्टप्रदेशे तु आत्म
विद्याशिवात्मकं॥२६॥क्रमात्तत्त्वत्रयं न्यस्य हां हीं वां बरैः क्रमात्॥स्रुचि शक्तिं स्रुवे शंभुं विन्यस्य तद्दयाणुना॥२७॥त्रिशूलीवेष्टितग्री
वौ पूजितौ कुसुमादिभिः॥कुशानामुपरिष्टात्तु स्थापयित्वा स्वदक्षिणे॥२८॥गव्यमाज्यं समादाय वीक्षणादिविशोधितं॥स्वकां ब्रह्म
मयीं मूर्तिं संचिंत्यादाय तद्धृतं॥२९॥कुंडस्योर्ध्वं तदावर्त्य भ्रामयित्वाग्निगोचरे॥पुनर्विष्णुमयीं ध्यात्वा घृतमीशानगोचरे॥३०॥
धृत्वाराय कुशाग्रेण स्वाहांतं शिरसाणुना॥जुहुयाद्विष्णवे विंदुं रुद्ररूपमनंतरं॥३१॥भावयन्निजमात्मानं नाभौ धृत्वा प्लवेत्ततः॥प्रा
देशमात्रदर्भाभ्यामंगुष्ठानामिकाग्रकैः॥३२॥धृताभ्यां संमुखावन्हेरस्त्रेणाप्लवमाचरेत्॥तद्वदात्मसंमुखं तद्वत्कुर्यात्संप्लवनं ततः॥३३
॥तद्वदालब्धदग्धदर्भाशास्त्रक्षेपात्पवित्रयेत्॥दीप्तेनापरदर्भेण नीवात्यानेन दीपयेत्॥३४॥अस्त्रमंत्रेण निर्दग्धं वन्हौ दर्भं पुनः क्षिपे
त्॥क्षिप्त्वाघृते कृतग्रंथि कुशं प्रादेशसंमितं॥३५॥पक्षद्वयमितादीनां त्रयं वात्ये विभावयेत्॥क्रमाद्भागत्रयादाज्यं स्रुवेणादाय-
होमयेत्॥३६॥स्वे स्वे सौ हा घृते भागं शेषमाज्यं क्षिपेत्क्रमात्॥ओंहां अग्नये स्वाहा॥ओंहां सोमाय स्वाहा॥ओंहां अग्नीषोमाभ्यां
स्वाहा॥उद्घाटनाय नेत्राणां अग्नेर्नेत्रत्रये मुखे॥३७॥स्रुवेण घृतपूर्णेन चतुर्थीमाहुतिं यजेत्॥ओंहां अग्नये स्विष्टकृते स्वाहा॥
॥३८॥अभिमंत्र्य षडंगेन बोधयेद्धेनुमुद्रया॥अवगुंठ्य तनुत्रेण रक्षेदाज्यं शराणुना॥३९॥तदाज्यबिंदुविक्षेपात्कुर्यादभ्युक्षणं शो
धनं॥वक्त्राभिघारसंधानं वक्त्रैकीकरणं तथा॥४०॥ओंहां सद्योजाताय नमः॥ओंहां वामदेवाय नमः॥ओंहां अघोराय नमः॥ओंहां
तत्पुरुषाय नमः॥ओंहां ईशानाय नमः॥इत्येकैकं घृताहुत्या कुर्यात्तु वक्त्राभिघारकं॥ओंहां सद्योजातवामदेवाभ्यां स्वाहा॥ॐ हां वामा
घोराभ्यां स्वाहा॥ॐ हां अघोरतत्पुरुषाभ्यां स्वाहा॥ओंहां तत्पुरुषेशानाभ्यां स्वाहा॥इति वक्त्रानुसारं मंत्रैरेभिः क्रमाच्चरेत्॥अग्नि
तो गतया वायुं निर्ऋतादिशिवांतया॥४१॥वक्त्राणामेकतां कुर्यात्स्रुवेण घृतधारया॥ॐ हां सद्योजातवामदेवाघोरतत्पुरुषेशाने
भ्यः स्वाहा॥४२॥इतीष्टवक्त्रे वक्त्राणामंतर्भावस्तदाकृतिः॥ईशानवन्हिमभ्यर्च्य दत्वास्त्रेणाहुतित्रयं॥४३॥कुर्यात्सर्वात्मनानामशिः
शान्निस्त्वहुताशन॥तदार्चितो विसृज्याग्नौ पितरौ विधिपूरणीं॥४४॥मूलेन वौषडंतेन दद्यात्पूर्णां यथाविधि॥ततोत्तदांबुजे सांगः

DR. BHAU DAJI MEMORIAL

सासनंभास्करंपरं॥४५॥यजेत्पूर्ववदाबाह्यप्रार्थ्याज्ञांतर्पयेच्छिवं॥यागाग्निशिवयोःकृत्वानाडीसंधानमात्मना॥४६॥शान्त्यामूला
णुनाहोमंकुर्यादंगैर्दशांगतः॥घृतस्यचार्षिकोहोमःक्षीरस्यमधुनस्तथा॥४७॥शक्तिमात्राहुतिर्दध्नःप्रसृतिःपायसस्यतु॥यथाव
त्सर्वभक्ष्याणांलाजानांमुष्टिसंमितं॥४८॥खंडत्रयंतुमूलानांफलानांस्वप्रमाणतः॥ग्रासार्धमात्रमन्नानांसूक्ष्माणिपंचहोमयेत्
॥४९॥इक्षोरापर्विकंमानंलतानामंगुलत्रयं॥पुष्पंपत्रंस्वमानेनसमिधांतुदशांगुलं॥५०॥चंद्रचंदनकाश्मीरकस्तूरीयक्षकर्दमान्॥कपाल
संमितानेतान्गुग्गुलंबदरास्थिवत्॥५१॥कंदानामष्टमंभागंजुहुयाद्विधिवत्परं॥होमंनिर्वर्तयेदेवंब्रह्मबीजपदैस्ततः॥५२॥घृतेनस्रु
चिपूर्णायांनिधायाधोमुखंस्रुवं॥स्रुगग्रेपुष्पमारोप्यपश्चाद्वामेनपाणिना॥५३॥पुनःसव्येनतौधृत्वाशंखसंनिभमुद्रया॥समुद्गतोर्ध्वः
कायश्चसमपादःसमुत्थितः॥५४॥नाभौतन्मूलमाधायस्रुगग्रव्यग्रलोचनः॥ब्रह्मादिकारणत्यागाद्विनिःसृत्यसुषुम्नया॥५५॥वाम
हस्तनांतमानीयतपोर्मूलमतंद्रितः॥मूलमंत्रमविस्पष्टंवौषडंतंसमुच्चरेत्॥५६॥तदग्नौजुहुयादाज्यंयवसंमितधारया॥आचामं
चंदनंदत्वातांबूलप्रभृतीनपि॥५७॥भक्त्यातन्भूतिमावंद्यविदध्यात्प्रणतिंपरं॥ततोवह्निंसमभ्यर्च्यफडंतास्त्रेणसंवरान्॥५८॥
संहारमुद्रयात्त्वंक्षमस्वेत्यभिधायच॥भास्करान्परिधींस्तांश्चपूरकेणतदाणुना॥५९॥श्लथयापरयात्मीयेस्थापयेद्धृदयांबुजे॥
सर्वपाकाग्रमादायकृत्वामंडलकद्वयं॥६०॥अंतर्बहिर्बलिंदद्यादाग्नेयांकुंडसंनिधौ॥ओंहांरुद्रेभ्यस्वाहापूर्वेमातृभ्योदक्षिणेतथा
॥६१॥वरुणेहांगणेभ्यश्चस्वाहांतेभ्यस्त्वयंबलिः॥उत्तरेहांचयक्षेभ्यईशानेहांगुहेभ्यच॥६२॥अग्नौहामस्करेभ्यश्चरक्षोभ्योनैर्ऋ
तेबलिः॥वायव्येहांचनागेभ्योनक्षत्रेभ्यश्चमध्यतः॥६३॥हांराशिभ्यस्वाहावन्हौविश्वेभ्योनैर्ऋतेतथा॥वायव्यांक्षेत्रपालायअंतर्ब
लिरुदाहृतः॥६४॥द्वितीयेमंडलेबाह्येइंद्रायाग्नेर्यमायच॥नैर्ऋतायजलेशायवायवेधनरक्षिणे॥६५॥ईशानायचपूर्वादौहीः
शानेब्रह्मणेनमः॥नैर्ऋतेविष्णवेस्वाहावायसादेर्बहिर्बलिः॥६६॥बलिद्वयगतान्मंत्रान्संहरेन्मुद्रयात्मनि॥६७॥ ॥इत्याग्नेयेम
हापुराणेअग्निकार्यं॥ ॥ईश्वरउवाच॥ततःशिवांतिकंगत्वापूजाहोमादिकंमम॥गृहाणभगवान्पुण्यफलमित्यभिधायच॥
॥१॥अर्घोदकेनदेवायमुद्रयोद्भवसंज्ञया॥हृद्बीजपूर्वमूलेनस्थिरचित्तोनिषेदयेत्॥२॥ततःपूर्ववदभ्यर्च्यस्तुत्वास्तोत्रैःप्र

णम्यच॥अर्घ्यंपरांमुखंदत्वाक्षमस्वेत्यभिधायच॥३॥नाराचमुद्रयास्त्रेणफडंतेनात्मसंचयं॥संहृत्यदिव्ययालिंगंमूर्तिं
मंत्रेणयोजयेत्॥४॥स्थंडिलेत्वर्चितेदेवेमंत्रसंहारमात्मनि॥नियोज्यविधिनोक्तेनविदध्याच्चंडपूजनं॥५॥ओंचंडेशानायन
मोमध्यतश्चंडमूर्तये॥ओंधूलिचंडेश्वरायहूंफट्स्वाहातमाह्वयेत्॥६॥चंडहृदयायहूंफट्चंडशिरसेतथा॥ओंचंडशि
खायैहूंफट्चंडातःकवचायच॥७॥चंडास्त्रायतथाहूंफट्चंडरुद्राग्निजंस्मरेत्॥शूलकंठेश्वरंकृष्णंसाक्षसूत्रक
मंडलुं॥८॥टंकाकारेर्धचंद्रेवाचतुर्वक्त्रंप्रपूजयेत्॥यथाशक्तिशक्तिजपंकुर्यादंगानांतुविशेषतःदशांशतः॥९॥गोभू
हिरण्यवस्त्रादिमणिहेमादिभूषणं॥विहायशेषनिर्माल्यंचंडेशायनिवेदयेत्॥१०॥लेह्यचोष्याद्यन्नवरंतांबूलंस्रग्वि
लेपनं॥निर्माल्यंभोजनंतुभ्यंप्रदत्तंतुशिवाज्ञया॥११॥सर्वमेतत्क्रियाकांडंमायाचंडतवाज्ञया॥न्यूनाधिकंकृतंहोमात्स
रिपूर्णंसदास्तुमे॥१२॥इतिविज्ञाप्यदेवेशंदत्वार्घंतस्यसंस्मरन्॥संहारमूर्तिमंत्रेणशनैःसंहारमुद्रया॥१३॥पूरका
न्वितमूलेनमंत्रानात्मनियोजयेत्॥निर्माल्यापनयात्स्थानंलिंपेद्गोमयवारिणा॥१४॥प्रोक्ष्यार्घादिविसृज्याथआचांतो
न्यत्समाचरेत्॥१५॥ ॥आग्नेयपुराणेचंडपूजा॥ ॥ईश्वरउवाच॥कपिलापूजनंवक्ष्येएभिर्मंत्रैर्यजेच्चगां॥ॐक
पिलेनंदेनमः॥ओंकपिलेभद्रिकेनमः॥१॥कपिलेसुशीलेनमः॥कपिलेसुरभिप्रभे॥ॐकपिलेसुमनसेभुक्तिमुक्तिप्र
देनमः॥२॥सौरभेयिजगन्मातर्देवानाममृतप्रदे॥गृहाणवरदेग्रासमीप्सितार्थंचदेहिमे॥३॥वंदितासिवसिष्ठेनविश्वा
मित्रेणधीमता॥कपिलेहरमेपापंयन्मयादुष्कृतंकृतं॥४॥गावोममाग्रतोनित्यंगावःपृष्ठतएवच॥गावोमेहृदयेचापिग
वांमध्येवसाम्यहं॥५॥दत्तंगृहाणमेग्रासंजप्त्वास्यांनिर्मलःशिवः॥प्राच्यंविद्यापुस्तकानिगुरुपादौनमेन्नरः॥६॥यजेत्स्ना
त्वातुमध्यान्हेअष्टप्रष्टिकयाशिवं॥पीठमूर्तिशिवांगानांपूजास्यादष्टपुष्पिका॥७॥मध्यान्हेभोजनागारेसुलिप्तेपाकमा
नयेत्॥ततोमृत्युंजयेनैववौषडंतेनसत्तथा॥८॥जप्तैःसदर्भशंखस्थैःसिंचेत्तंवारिबिंदुभिः॥सर्वपाकाग्रमुद्धृत्यशिवाय
विनिवेदयेत्॥९॥अथार्थंबुद्धिस्वाहोमेविधानायोपकल्पयेत्॥विशोध्यविधिनाचुल्लिंतद्वन्हिंपूरकाहूर्तिं॥१०॥हुत्वाना

भ्यग्निनाचैकंततोस्येकवायुना॥वह्निबीजंसमादायकादिवानमतिक्रमात्॥११॥शिवाग्निस्त्वमितिध्यात्वाचुल्लिकाग्नौनिवेदये
त्॥ओंहांअग्नयेनमोवैहांसोमायवैनमः॥१२॥सूर्यायबृहस्पतयेनमः॥सर्वेभ्यश्चैवदेवेभ्यःसर्वविश्वेभ्यएवच॥१३॥हामग्न
येस्विष्टकृतेपूर्वादावर्चयेदिमान्॥१३॥स्वाहांतामाहुतिंदत्वासमयित्वाविवर्जयेत्॥चुल्यादक्षिणबाहौचयजेत्धर्मायवैनः
मः॥१४॥वामबाहावधर्मायकंजिकादिकभांडके॥रसपरिवर्तमानायवरुणायजलाश्रये॥१५॥विघ्नराजगृहद्वारेपेषण्यां
स्कभगेनमः॥ओंरौद्रिकेगिरिकेनमश्चोलूखलेयजेत्॥१६॥बलिप्रियायायुधायनमस्तेमुसलेयजेत्॥संमार्जन्यांदेव
तोक्तेकामायशयनीयके॥१७॥मध्यस्तंभेचस्कंदायदत्वावास्तुबलिंततः॥भुंजीतपात्रेसौवर्णेपद्मिन्यादिदलादिके॥१८॥
आचार्यःसाधकंपुत्रासमयीमौनमास्थितः॥वटाश्वत्थार्कवातानिसर्ज्जभल्लातकांस्त्यजेत्॥१९॥आपोशानंस्फरेशायप्रा
णाद्यैःप्रणवान्वितैः॥स्वाहांतेनाहुतीःपंचदत्वादीप्योदरामलं॥२०॥नागःकूर्मोथकृकरोदेवदत्तोधनंजयः॥एतेभ्यउपवा
युभ्यःस्वाहापोशानवारिणा॥२१॥भक्तादिकंनिवेद्याथपिबेच्छेषोदकंनरः॥अमृतोपस्तरणमसीप्राणाहुतीस्ततोददेत्
॥२२॥प्राणायस्वाहापानायसमानायततस्तथा॥उदानायचव्यानायभुक्ताचुल्लकमाचरेत्॥२३॥अमृतापिधानमसीति
शरीरेन्नादरायच॥२४॥ ॥आग्नेयेमहापुराणेवास्तुदेवादिपूजा॥ ॥ईश्वरउवाच॥पवित्रारोहणंवक्ष्येक्रियार्चादिः
पुपूरणं॥नित्येतंनित्यमुद्दिष्टंनैमित्तिकमथापरं॥१॥आषाढादिचतुर्दश्यामथश्रावणभाद्रयोः॥सितासितासुकर्तव्यंच
तुर्दश्यष्टमीषुतत्॥२॥कुर्याद्वाकार्त्तिकींयावत्तिथौप्रतिपदादिके॥वह्निंब्रह्मादिकेभाम्यनागस्कंदार्कशूलिनां॥३॥
दुर्गायामंत्रगोविंदस्मरणंतुसुधाभुजां॥सौवर्णराजतंतांम्रंकृतादिषुयथाक्रमं॥४॥कलौकार्प्पासजंवापिपट्टपद्मादिः
सूत्रकं॥प्रणवश्चंद्रमावह्निर्ब्रह्मानागोगुहोहरिः॥५॥सर्वेशःसर्वदेवास्युःक्रमेणनवतंतुषु॥अष्टोत्तरशतात्सूर्वनदर्ध
चारुमासिकं॥६॥एकाशीत्यथवासूत्रैस्त्रिंशताप्यष्टयुक्तया॥पंचाशतावाकर्तव्यंतुल्यग्रंथांतरालकं॥७॥द्वादशांगु
लमानानिव्यासादष्टांगुलानिच॥लिंगविस्तारमानानिचतुरंगुलकानिव॥८॥तथैवपिंडिकास्पर्शचतुर्थसार्वदैव

तं॥गंगावतारकंकार्यंप्रजातेनसुधौतकं॥९॥ग्रंथिंकुर्याच्चवामेनअघोरेणाथशोधयेत्॥रंजयेत्पुरुषेणैवरक्तेचंद
नकुंकुमैः॥१०॥कस्तूरीरोचनाचंद्रैर्हरिद्रागैरिकादिभिः॥ग्रंथयोदशकर्तव्याअथवातंतुसेवया॥११॥अंतरंवायथा
शोभमेकद्विचतुरंगुलं॥प्रकृतिःपौरुषीवीराचतुर्थीत्वपराजिता॥१२॥जयान्याविजयाषष्ठीअजिताचसदाशिवा॥म
नोन्मनीसर्वमुखीग्रंथयोभ्यधिकाःशुभाः॥१३॥कार्याथाचंडवन्हार्कपवित्रंशिववस्तया॥एकैकंनिजमूर्तौवासमके
गुरवेगणे॥१४॥स्यादेकैकंतथाद्वाररदिक्पालकलशादिषु॥हस्तादिनवहस्तांतंलिंगानांस्यात्पवित्रकं॥१५॥अष्टाविं
शतितोवर्धदशभिर्दशभिःक्रमात्॥व्यंगुलाभ्यरातत्रक्रमादेकांगुलांतरः॥१६॥ग्रंथायोमासमध्येषांलिंगविस्तार
संमितं॥सप्तम्यांवाचतुर्दश्यांकृतकृत्यक्रियःशुचिः॥१७॥भूषयेत्पुष्पवस्त्राद्यैःसायाह्नेयागमंदिरं॥कृत्वानैमित्तिकीं
संध्यांविशेषेणचतर्पणं॥१८॥परिगृहीतेभूभागेसूत्रितंसूर्यमर्चयेत्॥आचम्यसकलीकृत्यप्रणवार्घकरोगुरुः॥१९॥
द्वाराण्यस्त्राणिसंप्रोक्ष्यपूर्वादिक्रमतोर्चयेत्॥हांशांतिकलाद्वारायतथाविद्याकलात्मने॥२०॥निवृत्तिकलाद्वाराय
प्रतिष्ठास्यकलात्मने॥तच्छाखयोःप्रतिहारंद्वौद्वौद्वाराधिपौयजेत्॥२१॥नंदिनेमहाकालायभृंगिणेथगणायच॥वृ
षभायचस्कंदायदेव्यैचंडायचक्रमात्॥२२॥नित्यंचद्वारपालादीन्प्रविश्यद्वारपश्चिमे॥इष्ट्वावास्तुंभूतशुद्धिंविशे
षार्घकरःशिवः॥२३॥प्रोक्षणार्घंविधायाथयज्ञसंस्कारकृन्नरः॥मंत्रयेद्दर्भदूर्वाद्यैःपुष्पाद्यैश्चत्वदादिभिः॥२४॥
शिवहस्तंविधायेत्थंस्वशिरस्यधिरोपयेत्॥शिवोहमादिसर्वज्ञोममयज्ञप्रधानता॥२५॥अत्यर्थंभावयेद्देवं
ज्ञानखड्गकरोगुरुः॥नैर्ऋतीदिशिमासाद्यप्रक्षिपेदुदगाननः॥२६॥अर्घ्यंतुपंचगव्यंचसमंतान्मखमंडपे॥चतुष्पथांतः
संस्कारैर्वीक्षणाद्यैःसुसंस्कृतैः॥२७॥विक्षिप्यविकिरांस्तत्रकुशकूर्चोपसंहरेत्॥तानीशदिशिवर्धन्यामासनायोपकल्प
येत्॥२८॥नैर्ऋतेवास्तुगीर्वाणाद्वारेलक्ष्मीप्रपूजयेत्॥पश्चिमाभिमुखंकुंभंसर्वधान्योपरिस्थितं॥२९॥प्रणवेनवृषारूढं
सिंहस्थांवर्धनींततः॥कुंभेसांगंशिवंदेवंवर्धन्यामस्त्रमर्चयेत्॥३०॥दिक्षुशक्रादिदिक्पालान्विष्णुब्रह्मावशानकान्॥

वर्धनीसर्वमादायघटपृष्ठानुगामिनीं॥३१॥शिवाज्ञांश्रावयेन्मंत्रीपूर्वादीशानगोचरं॥अविच्छिन्नपयोधारांमूलमंत्रमुदी
रयेत्॥३२॥समंतान्भ्रामयेदेनांरक्षार्थंशस्त्ररूपिणीं॥पूर्वंकलशमारोप्यशस्त्रालंभस्यवामतः॥३३॥समग्रासनकेकुंभे
यजेद्देवंस्थिरासने॥वर्धन्यांप्रणवस्थायामायुधंतदनुद्वयोः॥३४॥भगलिंगसमायोगंविदध्याल्लिंगमुद्रया॥कुंभेनि
वेद्यबोधासिंमूलमंत्रजपंतथा॥३५॥तद्दशांशेनवर्धन्यांरक्षांविज्ञापयेदपि॥गणेशंवायवेभ्यर्च्यहरंपंचामृतादिभिः
॥३६॥स्नापयेत्पूर्ववत्साऽर्च्यकुंडेचशिवपावकं॥विधिवच्चरुकंकृत्वासंपातहुतिशोधकं॥३७॥देवाग्न्यात्मविभेदेनतः
व्याप्तंविभजेत्रिधा॥दत्वाभागौशिवाग्निभ्यांसरक्षेद्भागमात्मनि॥३८॥नरेणधर्मणादेयंपूर्वतोदंतधावनं॥तस्माद्घोरः
शिखाभ्यांवादक्षिणेपश्चिमेमृदुं॥३९॥सद्योजातेनचत्वदाचोत्तरेवामलीकृतं॥जलंवामेनशिरसाईशेगंधान्वितंजलं
॥४०॥पंचगव्यंपलाशादिपुटकंवैसमंततः॥ऐशान्यांकुसुमंदद्यादाग्नेय्यांदिशिरोचनां॥४१॥अगरुंनिर्ऋताशयांवाय
व्यांचतुःसमं॥होमद्रव्याणिसर्वाणिसद्योजातेकुशैःसह॥४२॥दंडाक्षसूत्रकौपीनभिक्षापात्राणिरूपिणे॥कज्जलंकुंकु
मंतैलंशलाकांकेशशोधनीं॥४३॥तांबूलंदर्पणंदद्यादुत्तरेरोचनामपि॥आसनंपादुकेपात्रंयोगपट्टादिपात्रकं॥४४॥
ऐशान्यामीशमंत्रेणदद्यादीशानतुष्टये॥पूर्वस्यांचरुकंसाज्यंदद्याद्दंधादिकंनरे॥४५॥पवित्राणिसमादायप्रोक्षितां
त्र न्यर्घवारिणा॥संहितामंत्रपूजानिनीत्वापावकसंनिधिं॥४६॥कृष्णाजिनादिनाछाद्यस्मरन्संवत्सरात्मकं॥साक्षिणंस
र्वकृत्यानांगोप्तारंशिवमव्ययं॥४७॥स्वेतिहेतिप्रयोगेनमंत्रंसंहितयापुनः॥शोधयेच्चपवित्राणिवाराणामेकविंशतिं
॥४८॥रहादिवेष्टयेत्सूत्रैर्गंधाख्यंरवयेदर्देत्॥पूजितायसमाचम्यकृतन्यासःकृतार्घकः॥४९॥नंदादिभ्योथगंधाख्यं
वास्तोश्चायप्रविश्यच॥शस्त्रेभ्योलोकपालेभ्यःस्वनाम्नाशिवकुंभके॥५०॥वर्धन्यैविघ्नराजायगुरवेत्यात्मनेयजेत्॥
अथसर्वौषधीलिप्तंधूपितंपुष्पदूर्ववत्॥५१॥आमंत्रणपवित्रंतत्स्थितायांजलिमध्यगं॥ओंसमस्तविधिछिद्रपूरणेचवि
धिंप्रति॥५२॥प्रभवान्मंत्रयामित्वांत्वदिच्छावाप्तिकारक॥तत्सिद्धिमनुजानीहियजतश्चिरदचितस्ते॥५३॥सर्वथासर्वदा

शंभोनमस्तेस्तुप्रसीदमे॥आमंत्रितोसिदेवेशसहदेव्यागणेश्वरैः॥५४॥मंत्रेशैर्लोकपालैश्चसहितःपरिचारकैः॥नि
निमंत्रयाम्यहंतुभ्यंप्रभातेतुपवित्रकं॥५५॥नियमंचकरिष्यामिपरमेशतवाज्ञया॥इत्येवंदेवमामंत्र्यरेचकेनामृतीकृतं
॥५६॥शिवांतंमूलमुच्चार्यतच्छिवायनिवेदयेत्॥जपंस्तोत्रंप्रणामंचकृत्वाशंभुंसमापयेत्॥५७॥हुत्वाचरोस्तृतीयांशं
तद्दीनशिवाग्नये॥दिग्वासिभ्योदिगीशेभ्योभूतमातृगणेभ्यओं॥५८॥रुद्रेभ्यःक्षेत्रपादिभ्योनमःस्वाहाबलिस्त्वयं॥ः
दिउनागादिश्चपूर्वादौक्षेत्रायचाग्नयेबलिः॥५९॥समाचम्यविधिछिद्रपूरकंहोममाचरेत्॥पूर्णांदद्यात्ततिहोमंचकृत्वा
रुंधीतपातकं॥६०॥ततओमग्नयेस्वाहास्वाहासोमायचैववहि॥ओमग्नीषोमाभ्यांस्वाहाग्नयेस्विष्टकृतेतथा॥६१॥इत्या
हुतीचतुष्कंतुदत्वाकुर्यात्तुयोजनां॥वन्हिकुंडार्चितंदेवंमंडलाभ्यर्चितेशिवे॥६२॥नाडीसंधानरूपेणविधिनायोजयेत्ततः॥
वंशादिपात्रेविन्यस्यअस्त्रंचत्वदयेततः॥६३॥अधिरोप्यपवित्राणिकलाभिर्वाथमंत्रयेत्॥षडंगब्रह्ममूलैर्वात्वित्थर्मास्त्रं
चयोजयेत्॥६४॥विधायसूत्रैःसंवेष्ट्यपूजयित्वांगशंबरैः॥रक्षार्थंजगदीशायभक्तिनंम्रःसमर्पयेत्॥६५॥पूजितेपुष्प
धूपाद्यैर्दत्वासिद्धांतपुस्तके॥गुरोःपार्श्वांतिकंगत्वाभक्त्यादद्यात्पवित्रकं॥६६॥निर्गत्यबहिराचम्यगोमयेमंडलत्रये॥पं
चगव्यंचरुंदंतधावनंचक्रमाद्यजेत्॥६७॥स्वाचांतोमंत्रसन्नद्धःकृतसंगीतजागरः॥स्वपेदंतःस्मरन्शंभुमुमुक्षुर्दर्भसं
स्तरे॥६८॥अनेनैवप्रकारेणमुमुक्षुरपिसंविशेत्॥केवलंभस्मशय्यायांसोपवासःसमाहितः॥६९॥ ॥आग्नेयेपवित्रा
धिवासनविधिः॥ ॥ईश्वरउवाच॥अथप्रातःसमुत्थायकृतस्नानःसमाहितः॥कृतसंध्यार्चनोमंत्रीप्रविश्यमखमंडलं
॥१॥समादायपवित्राणिअविसर्जितदैवतः॥ऐशान्यांभोजनेशुध्येस्थापयेत्कृतमंडले॥२॥ततोविसर्ज्यदेवेशंनिर्माल्यमः
पनीयच॥पूर्ववन्भूतलेशुध्येकृत्वाह्निकमखद्वयं॥३॥आदित्यद्वारदिक्पालकुंभेशानौशिवेनले॥नैमित्तिकींसविस्तारां
कुर्यात्पूजांविशेषतः॥४॥मंत्राणांतर्पणंप्रायश्चित्तहोमंशराणुना॥अष्टोत्तरशतंहुत्वादद्यात्पूर्णाहुतिंशरैः॥५॥पवित्रंः
भानवेदत्वासमाचम्यददीतच॥द्वारपालादिदिक्पालकुंभवर्धनिकादिषु॥६॥संनिधानेततःशंभोरुपविश्यमुखासने॥

पवित्रमात्मनेदद्याद्गणायगुरुवन्हये॥७॥ओंकालात्मनादेवयदृष्टंमामकेविधौ॥कृतंक्लिष्टंसमुद्दिष्टंकृतंगुप्तंचमत्कृ
तं॥सर्वात्मनास्कृताशंभो॥८॥तदस्तक्लिष्टमक्लिष्टंकृतंपुष्टमसत्कृतं॥सर्वात्मनासुताशंभोपवित्रेणत्वदिच्छया॥९॥
ओंपूरयरमखव्रतंनियमेश्वरायस्वाहा॥आत्मतत्वेप्रकृत्यंतेपालितेपद्मयोनिना॥१०॥मूलंलयांतमुच्चार्यपवित्रे
णार्चयेच्छिवं॥विद्यातत्वेचविद्यांतांविष्णुकारणमालिने॥११॥ईश्वरांतंसमुच्चार्यपवित्रमधिरोपयेत्॥शिवानांशि
वतत्वेचरुद्रकारणपालिने॥१२॥शिवांतंमंत्रमुच्चार्यतस्मैदेयंपवित्रकं॥सर्वकारणपालेषुशिवमुच्चार्यस्कृव्रत॥१३॥मू
लंलयांतमुच्चार्यपूवित्रेणार्चयेच्छिवं॥विद्यातत्वेचविद्यांतांविष्णुकारणमालिने॥दद्याद्गंगावतारकं॥आत्मविद्याशिवैःप्रो
क्तंमुमुक्षूणांपवित्रकं॥१४॥विनिर्दिष्टंबुभुक्षूणांशिवविद्यादिभिःक्रमात्॥स्वाहांतंवानमोंतंवामत्रमेषामुदीरयेत्॥१५॥
ओंहांआत्मतत्वाधिपतयेशिवायस्वाहा॥ओंहांशिवतत्वाधिपतयेशिवायस्वाहा॥१६॥ओंहांबलतत्वाधिपतयेशिवाय
स्वाहा॥दत्वागंगावतारंतुप्रार्थयेत्कृतांजलिः॥१७॥त्वंगतिःसर्वभूतानांसंस्थितिस्त्वंचराचरे॥अंतःसारेणभूतानांद्रष्टा
त्वंपरमेश्वर॥१८॥कर्मणामनसावाचात्वत्तोनान्यगतिर्मम॥मंत्रहीनंक्रियाहीनंद्रव्यहीनंचयत्कृतं॥१९॥जपहोमार्चनैर्हीं
नंकृतंनित्यंमयातव॥अकृतंवाक्यहीनंचतत्पूरयमहेश्वर॥२०॥स्कृपूतस्त्वंपरेशानपवित्रंपापनाशनं॥त्वयापवित्रितं
सर्वंजगत्स्थावरजंगमं॥२१॥खंडितंयन्मयादेवव्रतंवैकल्ययोगतः॥एकीभवतुतत्सर्वंतवाज्ञासूत्रगुंफितं॥२२॥जपंनिवे
द्यदेवस्यभक्त्यास्तोत्रंविधायच॥नत्वातुगुरुणादिष्टंगृण्हीयान्नियमंनरः॥२३॥चतुर्मासंत्रिरात्रंवाअहमेकाहमेवच॥
प्रणम्यक्षमयित्वेशंगत्वाकुंडांतिकंव्रती॥२४॥पावकस्येशिवेप्येवंपवित्राणांचतुष्टयं॥समारोप्यसमभ्यर्च्यपुष्पधूपाक्षतादि
भिः॥२५॥अंतर्बलिंपवित्रंचरुद्रादिभ्योनिवेदयेत्॥प्रविश्यांतःशिवंस्कृत्वासप्रणामंक्षमापयेत्॥२६॥प्रायश्चित्तंकृतेहो
मंकृत्वाहुत्वाचपायसं॥शनैःपूर्णाहुतिंदत्वावन्हिस्थंविसृजेच्छिवं॥२७॥होमंव्याहृतिभिःकृत्वारुंध्यान्निष्ठुरयानलं॥अ
ग्न्यादिभ्यस्ततोदद्यादाहुतीनांचतुष्टयं॥२८॥दिक्पतिभ्यस्ततोदत्वासपवित्रंबहिर्बलिं॥सिध्दांतपुस्तकेदद्यात्सप्रणामंप

वित्रकं॥२९॥ओंहांभूस्वाहा॥ॐहांभुवस्वाहा॥ॐहांस्वस्वाहा॥ॐहांभूर्भुवस्वस्वाहा॥होमंव्याहृतिभिःकृत्वादत्वाहुतिचतु
ष्टयं॥ॐहांअग्नयेस्वाहा॥ॐहांसोमायस्वाहा॥ॐहांअग्नीषोमाभ्यांस्वाहा॥ॐहांअग्नयेस्विष्टकृतेस्वाहेति गुरुंशिवमिवा
भ्यर्च्यवस्त्रभूषादिविस्तरैः॥समग्रंसफलंतस्यक्रियाकांडादिवार्षिकं॥३०॥यस्यतुष्टोगुरुःसम्यगित्याहपरमेश्वरः॥इत्थंगु
रोःसमारोप्यतद्दालंबिपवित्रकं॥३१॥द्विजादीन्भोजयित्वातुभक्त्यावस्त्रादिकंददेत्॥दानेनानेनदेवेशःप्रीयतांमेसदाशिवः
॥३२॥भक्त्यास्नानादिकंप्रातःकृत्वाशंभोःसमाहरेत्॥पवित्राण्यष्टपुष्पैस्तंपूजयित्वाविसर्जयेत्॥३३॥नित्यंनैमित्तिकंकृ
त्वाविस्तरेणयथापुरा॥पवित्राणिसमारोप्यप्रणम्याग्नौशिवंयजेत्॥३४॥प्रायश्चित्तंततोस्त्रेणहुत्वापूर्णाहुतिंयजेत्॥भु
क्तिकामःशिवायाथकुर्यात्कर्मसमर्पणं॥३५॥त्वत्प्रसादेनकर्मेदंममास्तुफलसाधकं॥मुक्तिकामस्तुकर्मेदंमास्तुमेनाथबंध
कं॥३६॥वन्हिस्थंनाडियोगेनशिवंसंयोजयेच्छिवे॥हृदिन्यस्याणुसंघातंपावकंचविसर्जयेत्॥३७॥समाचम्यप्रविश्यांतःकुंभानु
गतसंबरान्॥शिवंसंयोज्यसापेक्ष्यंक्षमस्वेतिविसर्जयेत्॥३८॥विसृज्यलोकपालादीनादायेशात्पवित्रकं॥सतिचंडेश्वरेपूजांकृ
त्वादत्वापवित्रकं॥३९॥तन्निर्माल्यादिकंतस्मैसपवित्रंसमर्पयेत्॥अथवास्थंडिलेचंडंविधिनापूर्ववद्यजेत्॥४०॥यत्किंचिद्वा
र्षिकंकर्मकृतंन्यूनाधिकंमया॥तदस्तुपरिपूर्णंमेचंडनाथतवाज्ञया॥४१॥इतिविज्ञाप्यदेवेशंनत्वास्तुत्वाविसर्जयेत्॥त्यक्त
निर्माल्यकःशुध्दःस्नापयित्वाशिवंयजेत्॥४२॥पंचयोजनसंस्थोपिपवित्रंगुरुसंनिधौ॥४३॥ ॥इत्याग्नेयेमहापुराणेपवित्रा
रोहणं॥ ॥ईश्वरउवाच॥वक्ष्येदमनकारोहविधिंपूर्ववदाचरेत्॥हरकोपात्पुराजातोभैरवोदमिताःसुराः॥१॥तेनाथशापतोवि
टपोभवेतित्रिपुरारिणा॥प्रसंनेनेरितंदेवंपूजयिष्यंतियेनराः॥२॥परिपूर्णफलंतेषामन्यथानेभविष्यति॥सप्तम्यांवाचतुर्दश्यां
दमनंसंहिताणुभिः॥३॥संपूज्यबोधयेद्वृक्षंभववाक्येनमंत्रवित्॥हरप्रसादसंभूतत्वमत्रसंनिधीभव॥४॥शिवकार्यंसमु
द्दिश्यनेतव्योसिशिवाज्ञया॥गृहेप्यामंत्रणंकुर्यात्सायांन्हेचाधिवासनं॥५॥यथाविधिसमभ्यर्च्यसूर्यशंकरपावकान्॥देवस्य
पश्चिमेमूलंदद्यात्तस्यफलंयुतं॥६॥वामेनशिरसावाथनालंधात्रीतथोत्तरे॥दक्षिणेभस्मपत्रंचप्राच्यांपुष्पंचभावलं॥७॥

पुटिकास्त्रंफलमूलमथैशान्यांयजेच्छिवं॥पंचांगमंजलीकृत्वाआमंत्र्यशिरसिन्यसेत्॥८॥आमंत्रितोसिदेवेशप्रातःकालेमया
प्रभो॥कर्तव्यंतपसोलाभंपूर्णंसर्वंतवाज्ञया॥९॥मूलेनशेषंपात्रस्थंपिधायपवित्रवत्॥प्रातःस्नात्वाजगन्नाथमनुपुष्पादिसर्जये
त्॥१०॥नित्यंनैमित्तिकंकृत्वादमनैःपूजयेत्ततः॥शेषमंजलिमादायआत्मनिधाशिवाणुभिः॥११॥मूलाद्यैरीश्वरांतैश्चचतुर्थ्यां
जलिनाततः॥ओंहौंमखेश्वरायमखंपूरयपूरयशूलपाणयेनमः॥१२॥शिवंवह्निंचसंपूज्यगुरुंप्राच्याथशोधयेत्॥भगवन्नति
रिक्तंवाहीनंवायन्मयाकृतं॥१३॥सर्वंतदस्तुपूर्णंयच्चदामनकंमम॥सकलंचैत्रमासोत्थंफलंप्राप्यदिवंव्रजेत्॥१४॥ ॥इत्या
ग्नेयेमहापुराणेदमनकविधिः॥ ॥ईश्वरउवाच॥वक्ष्यामिभोगमोक्षार्थंदीक्षांपापक्षयंकरीं॥मलमायादिपाशानांविश्लेषःक्रि
यतेयया॥१॥ज्ञानंचजन्यतेशिष्येसादीक्षाभुक्तिमुक्तिदा॥विज्ञानकलनामैकोद्वितीयःप्रलयाकलः॥२॥तृतीयःसकलःशास्त्रे
नुग्राह्यस्त्रिविधोमतः॥तत्राद्योमलमात्रेणमुक्तोन्योमलकर्मभिः॥३॥कलादिभूमिपर्यंतस्तत्वैस्तुसकलोयुतः॥निराधारा
थसाधारादीक्षापिद्विविधामता॥४॥निराधाराद्वयोस्तेषांसाधारासकलस्यतु॥आधारनिरपेक्षेणक्रियतेशंभुचर्यया॥५॥
तीव्रशक्तिनिपातेननिराधारेतिसास्मृता॥आचार्यतीव्रमास्थायमायातीव्रादिभेदया॥६॥शक्त्यायांकुरुतेशंभुःसासाधिक
रणोच्यते॥इयंचतुर्विधाप्रोक्तासबीजाबीजवर्जिता॥७॥साधिकारानधिकारायथातदभिधीयते॥समयाचारसंयुक्तासः
बीजाजायतेनृणां॥८॥निर्बीजत्वेसमर्थानांसमयाचारवर्जिता॥नित्येनैमित्तिकेकाम्येयतःस्यादधिकारिता॥९॥साधिकारा
भवेद्दीक्षासाधकाचार्ययोरतः॥निर्बीजादीक्षितानांतुयथासदविपुत्रयोः॥१०॥नित्यमात्राधिकारत्वाद्दीक्षानिरधिकारिका
॥द्विविधेयंद्विरूपाहिप्रत्येकंमुपजायते॥११॥एकाक्रियावतीतत्रकुंडमंडलपूर्विका॥मनोव्यापारमात्रेणयासाज्ञानवतीमता॥
॥१२॥इत्थंलब्धाधिकारेणदीक्षाचार्येणसाध्यते॥स्कंददीक्षांगुरुःकुर्यात्कृत्वानित्यक्रियाद्वयः॥१३॥प्रणवार्घकरांभोजकृत
द्वाराधिपार्चनः॥विघ्नानुत्सार्यदेहल्यांन्यस्यास्त्रंस्वात्मनेस्थितः॥१४॥कुर्वीतभूतसंशुद्धिंमंत्रयोगंयथोदितं॥तिलतंडुलसि
द्धार्थकुशदूर्वाक्षतोदकं॥१५॥सयवक्षीरनीरंचविशेषार्घममिंततः॥तदमुनाद्रव्यशुद्धिंमंत्रयोगंयथादितं॥१६॥तिलकंस्वा

सनात्मनोः॥१६॥पूजनंमंत्रशुद्धिंचपंचगव्यंचपूर्ववत्॥लाजचंदनसिद्धार्थभस्मदूर्वाक्षतंकुशान्॥१७॥विकिरान्शुद्धला
जांस्तान्मधुशानस्त्रमंत्रितान्॥शस्त्रांबुप्रोक्षितानेतान्कवचेनावगुंठितान्॥१८॥नानाप्रहरणाकारान्विघ्नौघविनिवारकान्॥
दर्भाणांतालमानेनकृताषट्त्रिंशतादलैः॥१९॥सप्तजप्तंशिवास्त्रेणवेणींबोधासिमुत्तमं॥शिवमात्मनिविन्यस्यस्वस्थाधारम
भीप्सितं॥२०॥निष्कलंचशिवंन्यस्यशिवोहमितिभावयेत्॥उष्णीषंशिरसिन्यस्यअलंकुर्यात्स्वदेहकं॥२१॥गंधमंडलकंस्वी
येविदध्याद्दक्षिणेकरे॥विधिनात्रार्चयेदीशामिष्टंस्याच्छिवमस्तके॥२२॥विन्यस्यशिवमंत्रेणभास्वरंनिजमस्तके॥शिवादभि
न्नमात्मानंकर्तारंभावयेद्यथा॥२३॥मंडलेकर्मणांसाक्षीकलशेयज्ञरक्षकः॥होमाधिकरणंवन्हौशिष्येपाशविमोचकः॥२४॥
स्वात्मन्यनुग्रहीतेतिषडाधारोयईश्वरः॥सोहमेवेतिकुर्वीतभावंस्थिरतरंपुनः॥२५॥ज्ञानखड्गकरस्थित्वानैर्ऋत्यभिमुखोनरः
सार्घांबुपंचगव्याभ्यांप्रोक्षयेद्यागमंडपं॥२६॥चतुष्पथांतसंस्कारैःसंकुर्याद्दीक्षपादिभिः॥विक्षिप्यविकारांस्तत्रकुशकूर्चोपसंह
रेत्॥२७॥तानीशिदिशिवर्धन्यामासनायोपकल्पयेत्॥नैर्ऋतेवास्तुगीर्वाणाद्वारेलक्ष्मींप्रपूजयेत्॥२८॥आज्येरत्नैःपूरयंतीः
तदामंडपरूपिणीं॥सांबुवस्त्रेसरत्नेचधान्यस्थेपश्चिमानने॥२९॥ऐशेकुंभेयजेच्छंभुंशक्तिंकुंभस्यदक्षिणे॥पश्चिमस्थां
तुसिंहस्थांवर्धनींखड्गरूपिणीं॥३०॥दिक्षुशक्रादिदिक्पालाविष्णुतान्प्रणवासनान्॥वाहनायुधसंयुक्तान्तदाभ्यर्च्यस्वः
नामभिः॥३१॥प्रथमंतांसमादायकुंभस्याग्राभिगामिनीं॥अविच्छिन्नपयोधारांभ्रामयित्वाप्रदक्षिणं॥३२॥शिवाज्ञांलोकपा
लानांश्रावयेन्मूलमुच्चरन्॥संरक्षतयथायागंकुंभंधृत्वाथतांधरेत्॥३३॥ततस्थिरासनेकुंभेसांगंसंपूज्यशंकरं॥विन्यः
स्यशोध्यमध्वानंवर्धन्यामस्त्रमर्चयेत्॥३४॥ओंहःअस्त्रासनायहूंफट्॥ओंअस्त्रमूर्तयेनमः॥ॐश्रींगूंहूंफट्पाशुपता
स्त्रायनमः॥ॐओंहृदयायहूंफट्नमः॥श्रींशिरसेफट्नमः॥ॐयंशिखायैहूंफट्नमः॥ओंसूंकवचायहूंफट्नमः॥ओंअ
स्त्रायहूंफट्नमः॥चतुर्वक्त्रंसदंष्ट्रंचस्मरेदस्त्रंसशक्तिकं॥समुद्गरत्रिशूलासिसूर्यकोटिसमप्रभं॥३५॥भगलिंगसमायोगं
विदध्याल्लिंगमुद्रया॥अंगुष्ठेनस्पृशेत्कुंभंतदाउस्यास्त्रवर्धनीं॥३६॥भुक्तयेमुक्तयेत्वादौमुष्टिनावर्धनींस्पृशेत्॥कुंभस्यमुख

रक्षार्थंज्ञानखड्गं समर्पयेत्॥३७॥शस्त्रंचमूलमंत्रस्थरंतंकुंभेनिवेशयेत्॥तद्दशांशेनवर्धन्यांरक्षांविज्ञापयेन्नतः॥३८॥
यथेदंकृतयत्नेनभगवन्मखमंदिरं॥रक्षणीयंजगन्नाथसर्वाध्वरधरत्वया॥३९॥प्रणवस्थंचतुर्बाहुंवायव्येगणमर्चयेत्
॥स्थंडिलेशिवमभ्यर्च्यसार्धःकुंडंव्रजेन्नरः॥४०॥निविष्टोमंत्रतत्स्यर्थमर्घगंधघृतादिकं॥वामेसव्येतुविन्यस्यसमिद्दर्भति
लादिकं॥४१॥कुंडवन्हिस्रुगाज्यादिप्राग्वत्संस्कृत्यभावयेत्॥मुख्यतामूर्ध्ववक्त्रस्यतद्दिवन्हौशिवंयजेत्॥४२॥स्वमूर्तौशिव
कुंभेचस्थंडिलेत्वग्निशिष्ययोः॥सृष्टिन्यासेनविन्यस्यशोध्याध्वानंयथाविधि॥४३॥कुंडमानंमुखंध्यात्वात्दद्याहुतिभिरीप्सितं
॥बीजानिसप्तजिह्वानामग्नेर्होमायभण्यते॥४४॥विरेफावतिमोरंगौरेफषष्ठस्वरान्वितौ॥इंदुबिंदुशिखामुक्तौजिह्वाबीजाय
नुक्रमात् ४५ हिरण्याकनकारक्ता कृष्णातदनुसुप्रभा॥ अतिरक्ताबहुरूपारुद्रेंद्राग्न्याप्यादिङ्मुखाः ४६ क्षीरादि
मधुरैर्होमंकुर्याच्छांतिकपौष्टिके॥ अभिचारेतुपण्याकसक्तुकंचुककांजिकैः॥४७॥लवणैराजिकातक्रकटुतैलैश्चकट
नागंधतोयेनफडंतास्त्रेणवारिणा॥देशिकोमूर्तिपैःसार्धंकृत्वाकारणशोधनं॥४७॥धर्मजस्तेनसंछाद्यपीतवर्णेनवाससा॥
संपूज्यसितपुष्पैश्चनयेदुत्तरवेदिकां॥४८॥तत्रदत्तासनायांचशय्यायांसंनिवेश्यच॥कुंकुमालिप्तसूत्रेणविभज्यगुरुराले
खेत्॥४९॥शलाकयासुवर्णस्यअक्षिणीशस्त्रकर्मणा॥अंजयेल्लक्ष्मकृत्यश्चशास्त्रदृष्टेनकर्मणा॥५०॥कृतकर्माचशास्त्रे
णलक्ष्मशिल्पीसमुत्क्षिपेत्॥अंशादर्धोथपादार्धादर्धयाअर्धतोयवा॥५१॥सर्वकामप्रसिध्यर्थंक्रमंलक्ष्मावतारणं॥लिंग
दीर्घविकारांशेत्रिभक्तेभागवर्णनात्॥५२॥विस्तारोलक्ष्मदेहस्यभवेल्लिंगकसर्वतः॥यवस्यनवभक्तस्यभागैरष्टभिरात्ह

ताः॥५३॥हास्तिकेलक्ष्मरेखाचगांभीर्याद्विस्तरादपि॥एवमष्टांशवृध्यातुलिंगेसार्धकलादिकं॥५४॥भवेदष्टयवाष्टथ्वीगंभीरा
रातवहास्तिके॥शांभवेषुचलिंगेषुपादवृध्येषुसर्वतः॥५५॥लक्ष्मदेहस्यविष्कंभोभवेद्वैयववर्धनात्॥गंभीरत्वपृथुत्वाभ्यां
रेखापित्र्यंशरक्षितः॥५६॥सर्वेषुचभवेत्सूक्ष्मंलिंगमस्तकमस्तकं॥लक्ष्मक्षेत्रेष्टधाभक्तेमूर्ध्निभागद्वयेशुभे॥५७॥ष
ड्भागपरिवर्तेनभुक्ताभागद्वयंत्वधः॥रेखात्रयेणसंबध्यंकारयेत्पृष्ठदेशगं॥५८॥रत्नजेलक्षणोत्धारोयवोहेमसमुद्भवे॥स्वरूपल
क्षणंतेषांप्ररत्नेषुनिर्मला॥५९॥नयनोन्मीलनंव्यक्तेसंनिधायचलक्ष्मतत्॥लक्षणोत्धाररेखांचयत्नेनमधुनातथा॥६०॥मंत्संजये
नसंपूज्यशिल्पिदोषनिवृत्तये॥अर्चयेच्चततोलिंगंस्नापयित्वामृदादिभिः॥६१॥शिल्पिनंतोषयित्वातुदद्याद्गांगुरवेततः॥लिंगधू
पादिभिःप्रार्च्यगायेयुर्भर्तृगास्त्रियः॥६२॥सव्येनचापसव्येनसूत्रेणाथकुशेनवा॥स्पृष्ट्वाचरोचनांदत्वाकुर्यान्निर्मंछनादिकं॥
॥६३॥गुडलवणधान्याकधान्येनविसर्जेच्चताः॥गुरुमूर्तिधरैःसार्धंत्दशावप्रणवेनवा॥६४॥मृत्स्नागोमयगोमूत्रंभस्मभिःस
लिलांतरं॥स्नापयेत्संचगव्येनपंचामृतपुरःसरं॥६५॥विरूक्षणंकषायैश्चसर्वौषधिजलेनवा॥शुभ्रेपुष्पफलस्वर्णरत्नशृंगस
[illegible]दकैः॥६६॥तथाधारासहस्रेणदिव्यौषधिजलेनच॥तीर्थोदकेनगांगेनचंदनेनचवारिणा॥६७॥क्षीरार्णवादिभिःकुंभैःशिवः
कुंभजलेनच॥विरूक्षणंविलेपंचस्रग्गंधैश्चंदनादिभिः॥६८॥संपूज्यब्रह्मभिःपुष्पैर्वर्मणारक्तचीवरैः॥रक्तरूपेणनीराज्यर
क्षातिलकपूर्वकं॥६९॥गीताद्यैर्जलदुग्धैश्चकुशाद्यैरर्थसूचितैः॥द्रव्यैस्तत्वादिभिस्तत्वेष्टमर्चयेत्सुरुषाणुना॥७०॥समाचम्यत्ह
दादेयंब्रूयादुत्तीयतांप्रभो॥देवब्रह्मरथेनैवक्षिप्तद्रव्याणितन्नयेत्॥७१॥मंडपेपश्चिमद्वारशय्यायांविनिवेशयेत्॥शक्त्यादिमूर्ति
पर्यंतेविन्यसेदासनेशुभे॥७२॥पश्चिमेपिंडिकांन्यस्यन्यसेद्ब्रह्मशिलांतदा॥शास्त्रमस्त्रंतथालब्ध्वं[illegible]निद्राकुंभंध्रुवासनं॥
॥७३॥प्रकल्प्यशिवकोणेचतत्वाधंत्दयेनतु॥उत्थाप्योक्तासनेलिंगंशिरसापूर्वमस्तकं॥७४॥समारोप्यन्यसेत्तस्मिद्दष्ट्वाधर्मादिवंदनं
॥दद्यात्पूर्वंचसंपूज्यतथावासांसिवर्मणा॥७५॥गृहाणकृतिनैवेद्यंत्दादद्यात्स्वशक्तितः॥घृतक्षौद्रयुतंपात्रंअभ्यंगायपदांतिके॥७६॥
देशिकश्चस्थितस्तत्रषट्त्रिंशत्तत्वसंचयं॥शक्त्यादिभूमिपर्यंतंसतत्वाधिपसंयुतं॥७७॥विन्यस्यपुष्पमालाभिःस्त्रिखंडंपरिकल्पयेत्
॥मायापदेशशक्तांतंतुर्यांशंशवर्तुलं॥७८॥तत्रात्मतत्वविद्याख्यंशिवंसृष्टिक्रमेणतु॥एकशःप्रतिभागेषुब्रह्मविष्णुहराधिपान्॥

॥विन्यस्यमूर्त्तिमूर्त्तीशान्पूर्वादिक्रमतोयथा॥क्ष्मावह्नियजमानार्कजलवायुनिशाकरान्॥८०॥आकाशमूर्त्तिरूपांस्तान्न्यसेत्तदधिना
यकान्॥शर्वंपशुपतिंचोग्रंरुद्रंभवमथेश्वरं॥८१॥महादेवंचरुद्रंचमंत्रास्तद्वाचकाइमे॥लरसषचयशाश्चहकपश्चत्रिमात्रिकः॥८२॥
प्रणवोत्तरयाणुर्वामूलमंत्रोथवाक्वचित्॥पंचकुंडात्मकेयोगेमूर्त्तीःपंचाथवान्यसेत्॥८३॥पृथिवींजलतेजांसिवायुमाकाशमेवच॥क्र
मात्तदधिपान्पंचब्रह्माणंधरणीधरं॥८४॥रुद्रमीशंसदाख्यंचसृष्टिन्यायेनमंत्रवित्॥मुमुक्षोर्वानिवृत्त्याद्याअजाताद्यास्तदीश्वराः॥
॥८५॥त्रितत्वंवाथसर्वत्रन्यसेव्याप्तासकारणं॥शुद्धेचात्मनिविद्येशाअशुद्धेलोकनायकाः॥८६॥इष्टोष्टमूर्त्तिपाश्चैवभोगिनोमंत्रना
यकाः॥पंचविंशत्तथैवाष्टौपंचत्रीणियथाक्रमं॥८७॥एषांतत्वंतदीशानामिंद्रादीनांततोयथा॥ॐहांशक्तितत्वायइत्यादि॥ॐहांशक्ति
तत्वाधिपायनमइत्यादि॥८८॥ॐहांक्ष्मामूर्त्तयेनमः॥ॐहांक्ष्मामूर्त्त्यधिपायशिवायनमः॥इत्यादि॥ॐहांपृथिवीमूर्त्तयेनमः॥८९॥ॐ
हांपृथिवीमूर्त्त्यधिपायब्रह्मणेनमः॥ॐहांशिवतत्वाधिपायरुद्रायनमइत्यादि॥९०॥नाभिकंधात्समुच्चार्यघंटानादविसर्पणं॥ब्रह्मादि
कारणत्यागात्द्वादशांतसमाश्रितं॥९१॥मंत्रंचमनसामित्रंप्राप्तानंदरसोपमं॥द्वादशांतात्समानीयनिष्कलंव्यापकंशिवं॥९२॥अष्ट
त्रिंशत्कलोपेतंसहस्रकिरणोज्ज्वलं॥सर्वशक्तिमयंसांगंध्यात्वालिंगेनिवेशयेत्॥९३॥जीवन्यासोभवेदेवंलिंगेसर्वार्थसाधकः॥पिं
डिकादिषुभून्यासःप्रोच्यतेसांप्रतंयथा॥९४॥पिंडिकांचकृतस्नानांविलिप्तांचंदनादिभिः॥शुवस्त्रैश्चसमाछाद्यरंध्रेचभग
लक्षणे॥९५॥पंचरत्नादिसंयुक्तांलिंगस्योत्तरतस्थितां॥लिंगवत्कृतविन्यासांविधिवत्संप्रपूजयेत्॥९६॥कृतस्नानादिकांतत्र
लिंगमूलेशिलांन्यसेत्॥कृतस्नानादिसंस्कारंशक्त्यांतंवृषभंतथा॥९७॥प्रणवपूर्वंहूंपूर्वंहांमध्यादन्यतमेनच॥क्रियाशक्तियुतांपिं
डीशिलामाधाररूपिणं॥९८॥भस्मदर्भतिलैःकुर्यात्प्राकारत्रितयंततः॥रक्षायैलोकपालांश्चसायुधान्योजयेद्बहिः॥९९॥ॐहूंहं
क्रियाशक्तयेनमः॥ॐहंहांहः महागौरिरुद्रदयितेस्वाहेतिच॥१००॥पिंडिकायांॐहांआधारशक्तयेनमः॥ॐहांवृषभायनमः
॥धारिकादीप्तिमत्युग्राज्योत्स्नाचैताबलोत्कटा॥१॥तथाधात्रीविधात्रीचन्यसेद्वापंचनायकाः॥वामाज्येष्ठाक्रियाज्ञानीरोधास्ति
स्रोष्टवान्यसेत्॥२॥क्रियाज्ञानीतथेछाचपूर्ववच्छांतिमूर्त्तिषु॥तमीमोहाक्षमीनिष्ठामृत्युमायाभवज्वराः॥३॥पंचवाथमहामो
हाघोराराात्रिभयाज्वरा॥निस्त्रोपिवाक्रियाज्ञानीतथाबोधापिनाधिकाः॥४॥आत्मादित्रिषुतत्वेषुतीव्रमूर्त्तिषुविन्यसेत्॥अत्रा

पिपिंडिकाब्रह्मशिलादिषुयथाविधि॥५॥गौर्यादिसंवरैरेवपूर्ववत्सर्वमाचरेत्॥एवंविधायविन्यासंगत्वाकुंडांतिकंततः॥६॥
कुंडमध्येमहेशानंमेखलास्थमहेश्वरं॥क्रियाशक्तितथान्यास्तनादमोष्ठेचविन्यसेत्॥७॥घटंस्थंडिलवन्हीशैनाडीसंधानकंततः॥
पद्मतंतुसमांशक्तिंमुद्घातेनसमुद्यतां॥८॥विशांतिद्रूप्यमार्गेणनिःसरंतींसमुद्गतां॥पुनश्चद्रूप्यमार्गेणविशंतींस्वस्यचिंतयेत्॥
॥९॥एवंसर्वत्रसंधेयंमूर्त्तिपैश्चपरस्परं॥संपूज्यधारिकांशक्तिंकुंडेसंतर्प्यचक्रमात्॥१०॥तत्वतत्वेश्वरान्मूर्त्तिमूर्त्तिपाश्चघ्यतादि
भिः॥संपूज्यतर्पयित्वातुसंनिधौसंहिताणुभिः॥११॥शतंसहस्रमर्धंवापूर्णयासहहोमयेत्॥तत्वतत्वेश्वरान्मूर्त्तिमूर्त्तीशांश्चकरे‌॥
स्वकान्॥१२॥तथासांनिध्येजुहुयु———र्मुर्त्तिपाअपि॥ततोब्रह्मभिरंगैश्चद्रव्यकालानुरोधतः॥१३॥संतर्प्यशांतिकुंभांभःप्रोक्षिते
कुशमूलतः॥लिंगमूलंचसंस्पृश्यजपेयुर्होमसंख्यया॥१४॥संनिधानंत्वदाकुर्युर्वर्मणाचावगुंठनं॥एवंसंशोध्यब्रह्मादिविः
ध्वंतादिविशुद्धये॥१५॥विधायपूर्ववत्सर्वंहोमसंख्याजपादिकं॥कुशमध्याग्रयोगेनलिंगमध्यायकंस्पृशेत्॥१६॥यथायथा
चसंधानंतदिदानीमिहोच्यते॥ॐहांहांॐॐशांॐभूभूंवात्यमूर्त्तयेनमः॥१७॥ॐहांवांॐॐॐवांॐभूभूंवांवह्निमूर्त्तयेनमः॥
एवंचयजमानादिमूर्त्तिभिरभिसंधयेत्॥१८॥पंचमूर्त्त्यात्मकेप्येवंसंधानंतद्दयादिभिः॥मूलेनस्वीयबीजैर्वाज्ञेयंतत्वत्रयात्मके॥१९॥
शिलापिंडावृषेप्येवंवर्णछिन्नंस्कंसंवरैः॥भागाभागविशुध्यर्थंहोमंकुर्याच्छतादिकं॥२०॥न्यूनादिदोषमोषायशिवेनाष्टाधिकंश
तं॥हुत्वाथयत्कृतंकर्मशिवश्रोत्रेनिवेदयेत्॥२१॥एतत्समन्वितंकर्मत्वछक्तौचमयाप्रभो॥ॐनमोभगवतेरुद्रायरुद्रनमोस्तुते॥
विधिपूर्णमपूर्णंवास्वशक्त्यापूर्यगत्यतां॥ॐह्रींशांकरिपूरयस्वाहाइतिपिंडिकायां॥२३॥अथलिंगेन्यसेज्ज्ञानीक्रियाख्यंपीठवि
ग्रहे॥आधाररूपिणींशक्तिंन्यसेद्ब्रह्मशिलोपरि॥२४॥निबध्यसप्तरात्रंवापंचरात्रंत्रिरात्रकं॥एकरात्रमथोवापियद्वासद्योधिवासनं
॥२५॥विधिनाधिवासनंयागःकृतोपितफलप्रदः॥शुमंत्रैःप्रत्यहंदेयमाहुतीनांशतंशतं॥२६॥शिव[illegible]भादिपूजांचदिग्बलिंचनिवेद
येत्॥गुर्वादिसहितोवासौरात्रौनियमपूर्वकः॥२७॥अधिवासःसवसनेरधेर्भावेद्यईरितः॥१२८॥ ॥इत्याग्नेयेअधिवासनविधिः॥
॥९७॥ ॥ईश्वरउवाच॥प्रातर्नित्यविधिंकृत्वाद्वारपालप्रपूजनं॥प्रविश्यप्राग्विधानेनदेहशुद्ध्यादिमाचरेत्॥१॥दिक्पतींश्चसमभ्य
र्च्यशिवकुंभंचवर्धनीं॥अष्टमुष्टिकयालिंगवह्निंसंतर्प्यचक्रमात्॥२॥शिवाज्ञातस्ततोगछेत्प्रासादंशास्त्रमुच्चरन्॥तद्गताञ्च्हि

नेद्विभान्नूंफडंतन्नाशणुना॥३॥तन्मध्येस्थापयेल्लिंगंवेधदोषविशंकया॥तस्मान्मध्यंपरित्यज्ययवार्धेनयवेनवा॥४॥किंचिदीशानमा
श्रित्यशिलामध्येनिवेशयेत्॥मूलेनतामनंतारव्यांसर्वाधारस्वरूपिणीं॥५॥सर्वगांस्थिरयोगेनविन्यसेदचलांशिलां॥अथवानेन
मंत्रेणशिवस्यासनरूपिणीं॥६॥ॐनमोव्यापिनिभगवतिस्थिरेचलेध्रुवे॥ह्रींलंह्रींस्वाहा॥लयाशिवाज्ञयाशक्तेस्थातव्यमिहसं
ततं॥७॥इत्युक्त्वाचसमभ्यर्च्यनिरुंध्याच्छोभमुद्रया॥वज्रादीनिचरत्नानितथोशीरादिकौषधीः॥८॥लोहान्हेमादिकांस्तांतान्हरि
तालादिकांस्तथा॥धान्यप्रभृतिसस्यांश्चपूर्वमुक्तानतुक्रमात्॥९॥प्रभारागत्वदेहत्ववीर्यशक्तिमयानिमान्॥भावयन्नेकचित्तः
स्तलोकपालेशसंवरैः॥१०॥पूर्वादिषुचगर्तेषुन्यसेदेकैकशःक्रमात्॥हेमजंतारजंकूर्मंवृषंवाद्वारसंमुखं॥११॥सरित्तटमदायु
क्तंपर्वताग्रमदाथवा॥प्रक्षिपेन्मध्यगर्तानांपद्मामेरुस्ववर्णजं॥१२॥मधूकाक्षतसंयुक्तंअंजनेनसमन्वितं॥पृथिवीराजतीयद्वाप
द्माहेमसमुद्भवा॥१३॥सर्वबीजस्ववर्णाभ्यांसमायुक्तंविनिक्षिपेत्॥स्वर्णजंराजतंवापिसर्वलोहसमुद्भवं॥१४॥स्ववर्णकुशवायु
क्तंपद्मवालंततोन्यसेत्॥देवदेवस्यशक्त्यादेर्मूर्तिपर्यंतमासनं॥१५॥प्रकल्प्यपायसेनाथलिप्त्वागुग्गुलुनाथवा॥स्वभ्रमाच्छाद्यव
स्त्रेणतंतुत्रेणास्त्ररक्षितं॥१६॥दिक्पतिभ्योबलिंदत्वासमाचांतोथदेशिकः॥शिवेनवाशिलाश्वभ्रसंगदोषनिवृत्तये॥१७॥शास्त्रे
णवाशतंसम्यग्जुहुयात्पूर्णयासह॥एकैकाहुतिदानेनसंतर्प्यवास्तुदेवताः॥१८॥समुत्थाप्यतदादेवंआसनंमंगलादिभिः॥
गुरुर्देवाग्रतोगच्छेन्मूर्तिपैश्चदिशिस्थितैः॥१९॥चतुर्भिःसहकर्ताचदेवयानस्यपृष्ठतः॥प्रासादादिपरिभ्रम्यभद्राख्यद्वारसंमु
खं॥२०॥लिंगंसंस्थाप्यदत्वार्घ्यंप्रासादंसंनिवेशयेत्॥द्वारेणद्वारबंधेनद्वारदेशेनतद्विना॥२१॥द्वारबंधोशिखाशून्येनदलेनाथ
तद्भृते॥वर्जयन्द्वारसंस्पर्शंद्वारेणैवमहेश्वरं॥२२॥देवगृहसमारंभेकोणेनापिप्रवेशयेत्॥अयमेवविधिर्ज्ञेयोव्यक्तलिंगेपिस
र्वतः॥२३॥गृहेप्रवेशनंद्वारेलोकैरपिसमीरितं॥अपद्वारप्रवेशेनविदुर्गोत्रक्षयंगृहं॥२४॥अथपीठेचसंस्थाप्यलिंगंद्वारस्यसं
मुखं॥तूर्यमंगलनिर्घोषैर्दूर्वासनसमन्वितं॥२५॥समुत्तिष्ठत्वदेत्युक्त्वामहापाशुपतंपठेत्॥अपनीयपटंश्वभ्राद्देशिकोमूर्ति
पैःसह॥२६॥मंत्रंसंधारयित्वातुविलिप्तंकुंकुमादिभिः॥शक्तिंशक्तिमतोरैक्यंध्यात्वाचैतत्तुरक्षितं॥२७॥लयांतमूलमुच्चार्यस्य
श्वाश्वभ्रेनिवेशयेत्॥अंशंनब्रह्मभागस्ययद्वात्र्यंशद्वयेनच॥२८॥अर्धेनवाष्टमांशेनसर्वस्याथप्रवेशनं॥पिधायसीसकंवा

भिर्दीर्घाभिःस्वसमाहितः॥२९॥अथवालुकयापूर्णंब्रूयात्स्थिरीभवेतिच॥ततोलिंगेस्थिरीभूतेध्यात्वासकलरूपिणं॥मूलमुच्चा
र्यशक्त्यंतंस्पृष्ट्वाचनिष्कलंन्यसेत्॥स्थाप्यमानंयदालिंगंयांयांदिशमथाश्रयेत्॥३१॥तत्तद्दिगीशमंत्रेणपूर्णांतंदक्षिणान्वितं॥से
व्यस्थानेचवक्रेचचलितेस्फुटितेपिवा॥३२॥जुहुयान्मूलमंत्रेणबहुरूपेणवाशतं॥किंचान्येष्वपिदोषेषुशिवशांतिंसमाश्रयेत्॥
॥३३॥उक्तन्यासविधिंलिंगेकुर्यादेवंनदोषभाक्॥पीठबंधमतःकृत्वालक्षणस्यांशलक्षणं॥३४॥गौरींमंत्रंलयंनीत्वास्पृष्ट्वापिं
डींचविन्यसेत्॥संपूर्यपार्श्वसंधिंचवालुकावज्रलेपनं॥३५॥ततोमूर्तिधरैःसार्धंगुरुःशांतिघटोर्ध्वतः॥संस्थाप्यकलशैरन्यैस्त
द्वत्संचामृतादिभिः॥३६॥विलिप्यचंदनाद्यैश्चसंपूज्यजगदीश्वरं॥उमामहेशमंत्राभ्यांतौस्पृशेल्लिंगमुद्रया॥३७॥ततस्त्रितत्ववि
न्यासंपउर्यादिपुरःसरं॥कृत्वामूर्तिंतदीशानामंगानांब्रह्मणामथ॥३८॥ज्ञानलिंगेक्रियापीठेविन्यस्यस्नपयेत्ततः॥गंधैर्विलिप्य
संधूप्यव्यापित्वेनाशिवेन्यसेत्॥३९॥स्रक्धूपदीपनैवेद्यैर्हृदयेनपलानिच॥विनिवेद्ययथाशक्तिसमाचम्यमहेश्वरं॥४०॥द
त्वार्घंचजपंकृत्वानिवेद्यवरदेकरे॥चंद्रार्कतारकंयावन्मंत्रेणशैवमूर्तिपैः॥४१॥स्वेच्छयैवत्वयानाथस्थातव्यमिहमंदिरे॥प्र
णम्यैवंवहिर्गत्वात्वदाप्रवेनवा॥४२॥संस्थाप्यवृषभंपश्चात्पूर्ववद्बलिमाचरेत्॥न्यूनादिदोषमोषायततोमृत्युजिताशतं
॥४३॥शिवेनसशिवोहुत्वाशांत्यर्थंपायसेनच॥ज्ञानाज्ञानकृतंयच्चतत्पूरयमहाविभो॥४४॥हिरण्यपशुभूम्यादिगीतवाद्यादि
हेतवे॥त्र्यंबकेशायतन्दद्यात्शक्त्यासर्वंनिवेदयेत्॥४५॥दानंमहोदयंपश्चात्कुर्याद्दिनचतुष्टयं॥त्रिसंध्यंत्रिदिनंमंत्रहोमयेन्मू
र्तिपैःसह॥४६॥चतुर्थेहनिपूर्णांचचरुकंबहुरूपिणा॥निवेद्यसर्वकुंडेषुसंपाताहुतिशोधितं॥४७॥दिनचतुष्टयंयावन्ननिर्माल्यं
तदूर्ध्वतः॥निर्माल्यापनयंकृत्वास्नापयित्वातुपूजयेत्॥४८॥पूजासामान्यलिंगेषुकार्यासाधारणाणुभिः॥विहायलिंगचैतन्यं
कुर्यात्स्थाणुविसर्जनं॥४९॥असाधारणलिंगेषुक्षमस्वेतिविसर्जनं॥आवाहनमभिव्यक्तिर्विसर्गःशक्तिरूपता॥५०॥प्रतिष्ठांते
क्वचित्प्रोक्तंस्थिराद्याहुतिसप्तकं॥स्थिरस्त्वयाप्रमेयश्चानादिबोधस्तथैवच॥५१॥नित्योथसर्वगश्चैवनविनाशीतसएवच॥एतेगुः
णामहेशस्यसंनिधानायकीर्तिताः॥५२॥ॐनमःशिवायस्थिरोभवेत्याहुतीनांक्रमः॥एवमेतच्चविधायशिवकुंभवत्॥५३॥कुंभ
द्वयंचतन्मध्यादेकंकुंभांभसांभवं॥संस्नाप्यतद्द्वितीयंचकर्तकस्तायधारयेत्॥५४॥दत्वाबलिंसमाचम्यबहिर्गच्छेच्छिवाज्ञया

जगतीबाह्यतश्चंडमैशान्यांदिशिमंदिरे॥५५॥धामगर्भप्रमाणेनचकृपीठेकल्पितासने॥पूर्ववन्न्यासहोमादिविधायध्यानपूर्वकं
॥५६॥संस्थाप्यध्यानवत्तत्रब्रह्मांगैःपूजयेत्ततः॥अंगानिपूर्वमुक्तानिब्रह्माणिलणुनायथा॥५७॥ॐवांसद्योजातायहूंफट्नमः॥
ॐविंनामदेवायहुंफट्नमः॥ॐवुंअघोरायहुंफट्नमः॥५८॥एवंओंवेंतत्पुरुषायवोंमीशानायचहुंफट्॥जपंनिवेद्यसंतर्प्य
विज्ञाप्यनतिपूर्वकं॥५९॥देवःसांनिहितोयावत्तावत्वंसंनिधौभव॥न्यूनाधिकंचयत्किंचित्कृतमज्ञानतोमया॥६०॥त्वत्प्रसादे
नचंडेशतत्सर्वंपरिपूरय॥बाणलिंगेबाणरोहेसिद्धलिंगेस्वयंभुवि॥६१॥प्रतिमासुचसर्वासुनचंडोधिकृतोभवेत्॥अद्वैत
भावयुक्तेस्थंडिलेशविधावपि॥६२॥अभ्यर्च्यचंडंसकृतंयजमानंहिभार्यया॥पूर्ववत्स्थापितकुंभेनस्नापयेत्स्नापकस्वयं॥
॥६३॥स्नापकंयजमानोपिसंपूज्यचमहेशवत्॥वित्तशाठ्यविनादद्यान्भूहिरण्यादिदक्षिणां॥६४॥मूर्तिपान्विधिवत्पश्चाज्ज्ञा
पकान्ब्राह्मणांस्तथा॥दैवज्ञंशिल्पिनंप्रार्च्यदीनानाथादिभोजयेत्॥६५॥यदत्रसंमुखीभावेखेदितोभगवन्मया॥क्षमस्वनाथत
त्सर्वंकरुणांबुनिधेमम॥६६॥इतिविज्ञप्तिमुत्काथयजमानायसद्गुरुः॥प्रतिष्ठापुंण्यसन्दोहंस्फुरत्तारकसंप्रभं॥६७॥कुशपु
ष्पाक्षतोपेतंस्वकरेणसमर्पयेत्॥ततःशक्रपतंजप्त्वाप्रणम्यपरमेश्वरं॥६८॥ततोपिबलिभिर्भूतान्त्संनिधायनिबोधयेत्॥
स्थातव्यंभवतातावद्यावत्संनिहितोहरः॥६९॥गुरुर्निर्माणिसंयुक्तंगृण्हीयाद्यागमंडपं॥सर्वोपकरणंशिल्पीतथास्नपनमंडपं॥७०॥
अन्येदेवायदास्थाप्यामंत्रैरागमसंभवैः॥आदिवर्णस्यभेदाद्वास्वतलव्याप्तिभाविता॥७१॥साध्यप्रमुखदेवाश्चसरिदोषधयस्तथा
॥क्षेत्रपाःकिन्नराद्याश्चपृथिवीतलमाश्रिताः॥७२॥स्थानंसरस्वतीलक्ष्मीनदीनामंभसिक्वचित्॥भुवनाधिपतीनांचस्थानंत्रय
व्यवस्थितिः॥७३॥अंडवृत्तिप्रधानांनंत्रितलंब्रह्मणःपरं॥तन्मात्रादिप्रधानांतंपदमेतत्त्रिकंहरेः॥७४॥नायेशगणमातृणांयक्ष
राक्षरजन्मनां॥अंडंताःकृत्यविद्यांतपदंगणपतिस्तथा॥७५॥मायासदेशशान्त्यंतंशिवाशिवोगुरोर्विषां॥पदमीश्वरपर्यंतंव्य
क्तार्चासुचकीर्तितं॥७६॥कूर्माद्यंकीर्तितंयच्चयच्चरत्नादिपंचकं॥प्रक्षिपेत्पीठसत्तायांपंचब्रह्मशिलांविना॥७७॥षड्भिर्वि
भाजितेरूर्ध्वंत्यक्त्वाभागंचपृष्ठतः॥स्थापनंपंचमांशेनयदिवावसुभाजिते॥७८॥स्नपनंसप्तमेभागेप्रतिमासुकृत्वावहं॥धा
रणाभिर्विशुद्धिस्यात्स्थापनेलेपचित्रयोः॥७९॥स्नानादिमानसंतत्रशिलारत्नादिवेशनं॥नेत्रोद्धारनसूत्रेषुमानसादिप्रक

ल्पनं॥८०॥पूजानिरंबुभिःपुष्पैर्यथाचित्रंनदुष्यति॥विधिस्तुचललिंगेषुसंप्रत्येवनिगद्यते॥८१॥पंचभिर्वात्रिभिर्वापिपृथुक्षीणवि
भाजिते॥भागत्रयेणभागांशोभवेन्द्राग्द्वयेनवा॥८२॥कृपीठेस्थापितेतद्वल्लिंगेषुतत्वभेदतः॥सृष्टिमंत्रेणसंस्कारेविधिवत्स्फटि
कादिषु॥८३॥किंचब्रह्मशिलारत्नप्रभृतेश्चानिवेदनं॥योजनंपिंडिकायाश्चमनसापरिकल्पयेत्॥८४॥स्वयंभूबाणलिंगा
दौसंस्कृतौनियमोनहि॥स्नापनंसंहितामंत्रैर्न्यासंहोमंचकारयेत्॥८५॥नदीसमुद्ररोहाणांस्थापनंपूर्ववन्मतं॥ऐहिकंम
न्मयंलिंगंपिष्टिकादिचतत्क्षणात्॥८६॥कृत्वासंपूजयेत्कुर्यात्दीक्षाणादिविधानतः॥समादायततोमंत्रानात्मानंसंनिधाय
च॥८७॥तज्जलंप्रक्षिपेल्लिंगंवत्सरात्कामदंभवेत्॥विष्ण्वादिस्थापनंचैवपृथक्मंत्रैःसमाचरेत्॥८८॥ ॥इत्याग्नेयपु
राणेशिवप्रतिष्ठा॥९८॥ ॥ईश्वरउवाच॥वक्ष्येगौरीप्रतिष्ठांचपूजयासहितांशृणु॥मंडपाद्यंपुरोयच्चसंस्थाप्यचाधि
रोपयेत्॥१॥शय्यायांतांविन्यस्यमंत्रान्मूर्त्यादिकान्गुह॥आत्मविद्याशिवांतंचकुर्यादीशोनिवेशनं॥२॥शक्तिंपराप
न्यस्यहुत्वाजत्याचपूर्ववत्॥संधायचतथापिंडींक्रियाशक्तिस्वरूपिणीं॥३॥सदेशव्यापिकांध्यात्वान्यस्तरत्नादिकांतथा॥एवंसं
स्थाप्यतांपश्चाद्देवींतस्यांनियोजयेत्॥४॥परशक्तिस्वरूपांतांस्थाणुनाशक्तियोगतः॥ततोन्यसेत्क्रियाशक्तिंपीठेज्ञानंचविग्र
हे॥५॥ततोपिव्यापिनींशक्तिंसमावाह्यनियोजयेत्॥अमुकेशिवनाम्नींचसमालभ्यप्रपूजयेत्॥६॥आधारशक्त्येनमःस्कं
दायचतथानमः॥ॐहुंनारायणायनमः॥ॐएश्वकायनमः॥७॥ॐअंअंधच्छधनायनमः॥ॐपद्मासनायनमोथसंपू
ज्याःकेशवांस्तथा॥८॥ॐहंकर्णिकायैनमः॥ॐसंपुष्करास्त्रैइहार्चयेत्॥ॐहांपुष्टयेॐनालायनमः॥ॐधर्मायनमः॥ॐ
ज्ञानायवैनमः॥ॐवैराग्यायनमः॥हूंवाचे॥हूंवाचेन्हंचरागाश्येन्हंज्वालायैततोनमः॥१०॥ॐहौंशमायैननमः॥हंज्येष्ठा
यैततोनमः॥ॐहौंरौनवशक्तश्चगौचगौर्यासनायच॥११॥गौंगौरीमूर्तयेनमोगौर्यामूलमूलमथोच्यते॥ॐह्रींसःमहागौरी
रुद्रदमपितस्वाहागौर्यैनमः॥१२॥गांह्रींगौशिवांगूंस्याच्छिखायैकवचायच॥गौनेत्रायचगौसहस्राय॥१३॥ॐगींविज्ञानशक्त
ये॥ॐभ्रूक्रियाशक्त्येनमः॥पूर्वादौशक्रादिकान्ॐसंसुभगायैनमः॥१४॥ह्रींबीजालतानमः॥ॐह्रींकामिन्येनमः॥ॐ
हूंस्यात्कामशालिनी॥१५॥मंत्रैर्गौरींप्रतिष्ठाप्यप्रार्च्यजत्वाथसर्वभाक्॥१६॥ ॥इत्याग्नेयेगौरीप्रतिष्ठापूजा॥९९॥ ॥

ईश्वरउवाच॥वक्ष्येसूर्यप्रतिष्ठांचपूर्ववन्मंडपादिकं॥स्नानादिकंचसंपाद्यपूर्वोक्तविधिनाततः॥१॥विद्याद्यासनशय्यायांसांगं
विन्यस्यभास्करं॥त्रितत्त्वंविन्यसेत्तत्रसस्फुरंखादिपंचकं॥२॥शक्त्यादिपूर्ववत्कृत्वापिंडीसंशोध्यपूर्ववत्॥सदेशपादपर्यंतंविन्य
स्यतत्त्वपंचकं॥३॥शक्त्यांचसर्वतोमुख्यांसंस्थाप्यविधिवत्ततः॥स्थाणुनाविधिवत्सूर्यंशक्त्यंतंस्थापयेद्गुरुः॥४॥स्वाम्यंतमथवादि
त्यंयदातन्नामधारयेत्॥सूर्यमंत्रास्तुपूर्वोक्ताइष्टव्यास्थापनेपिच॥५॥ ॥इत्याग्नेयेसूर्यप्रतिष्ठा॥१००॥ ॥ईश्वरउवाच॥द्वा
राश्रितप्रतिष्ठायांवक्ष्यामिविधिमप्यथ॥द्वारांगानिकषायाद्यैः संस्कृत्यशयनेन्यसेत्॥१॥मूलमध्याग्रभागेषुत्रयमात्मादिसेश्व
रं॥विन्यस्यसंनिवेश्याथयुतलाजत्यान्नरूपतः॥२॥द्वारादथोयजेद्वास्तुंतत्रैवानंतमंत्रतः॥चंडादिपंचकंन्यस्यशांतिहोमंवि
धायच॥३॥यवसिद्धार्थकाक्रांताकृष्णसितिलसहातिलाः॥गोमूत्रसर्षपरागेंद्रमोहिनीलक्ष्मणामृता॥४॥रोचनामस्तुरादूर्वाश्रा
सादाधश्चपांसुकली॥कृतोदुंबरेबध्वारक्षार्थंप्रणवेनतु॥५॥द्वारमुत्तरतःकिंचिदाश्रितंसन्निवेशयेत्॥आत्मतत्त्वमधोन्य
स्यविद्यातत्त्वंचशाखयोः॥६॥शिवमाकाशदेशेचव्यापकंसर्वपुंगले॥ततोमहेशनार्थंचविन्यसेन्मूलमंत्रतः॥७॥द्वाराश्रितांश्च
तत्त्वादीन्कृतयुक्तैःस्वनामभिः॥जुहुयाच्छतमर्धंवाद्विगुणंशक्तियोथवा॥८॥न्यूनादिदोषमोषार्थंहेतिभ्योजुहुयाच्छतं॥दिग्वली
न्पूर्ववद्दत्वाप्रदद्याद्दक्षिणादिकं॥९॥ ॥इत्याग्नेयेद्वारप्रतिष्ठा॥१०१॥ ॥ईश्वरउवाच॥प्रासादस्थापनंवक्ष्येतच्चैतन्यंस्फुयोगतः॥
शुकनासासमाप्तौचपूर्ववद्यागमध्यतः॥१॥आधारशक्तितःपद्मेविन्यसेत्प्रणवेनच॥स्वर्णाद्येकतमोद्भूतंपंचगव्येनसंयुतं॥२॥म
मधुक्षीरयुतंकुंभंन्यस्तरत्नादिपंचकं॥सवस्त्रंगंधलिप्तंचगंधवत्पुष्पधूपितं॥३॥चूतादिपल्लवानांचकृतास्यविन्यसेत्॥पूरके
णसमादायसकलीकृत्यविग्रहः॥४॥सर्वात्मभिन्नमात्मानंस्थाणुनास्वांतमारुतः॥आज्ञयारोधयेच्छंभोरेचकेनततोगुरुः॥५॥द्वा
दशांतात्समादायस्फुरद्वह्निकणोपमं॥निक्षिपेत्कुंभगर्भेचन्यस्ततंत्रातिवाहिकं॥६॥विग्रहंतद्गुणानांचबोधकंचकलादिकं॥
क्षांतंवाग्वेश्वरंतत्तुशांतंतत्रनिवेशयेत्॥७॥दशनाडीदशप्राणानिंद्रियाणित्रयोदश॥तदधिपांश्चसंयोज्यप्रणवाद्यैःस्वनामभिः
॥८॥स्वकार्यकरणत्वेनमायाकाशानियामिकाः॥वेद्येशान्प्रेरकान्शंभुव्यापिनंचस्फुसंवरैः॥९॥अंगानिचविनिक्षिप्यनिरुध्या
द्बोधमुद्रया॥स्फुवर्णाद्युन्नवंयद्वापुरुषंपुरुषानुगं॥१०॥पंचगव्यकषायाद्यैःपूर्ववत्संस्कृतंततः॥शय्यायांकुंभमारोप्यध्यात्वारुः

द्रमुमापतिं॥११॥तस्मिंश्चशिवमंत्रेणव्यापकत्वेनविन्यसेत्॥संनिधानायहोमंचप्रोक्षणंस्पर्शनंजपं॥१२॥सांनिध्यबोधनंसर्वंभागत्रय
विभागतः॥विधायैवप्रकृत्संतेकुंभेतन्निनिवेशयेत्॥१३॥ ॥इत्याग्नेयेप्रासादप्रतिष्ठा॥१०२॥ ॥ईश्वरउवाच॥चलकेध्वजदंडेच
ध्वजेदेवकुलेतथा॥[illegible]षायपथोद्दिष्टानथास्कंदवदामिते॥१॥कभागार्धप्रवेशाद्वायद्वासर्वार्धवेशनात्॥ऐष्टकेदारुजःशूलःशै
लजेधाम्निशैलजः॥२॥वैष्णवादौचचक्राद्यःकुंभस्यान्मूर्तिमानतः॥सचत्रिशूलयुक्तस्तुअग्रचूलादिभेदतः॥३॥ईशशूलसमा
ख्यातोमूर्ध्निलिंगसमन्वितः॥बीजपूरकयुक्तोवासर्वशास्त्रेषुतद्विधः॥४॥चित्रोध्वजश्चसंयातोयथाजंयार्धतोभवेत्॥भवेद्वादंड
मानस्तुयदिवानद्यत्तुछया॥५॥महाध्वजःसमाख्यातोयस्तुपीठस्यवेष्टकः॥शक्रैर्ग्रहैर्रसैर्वापिहस्तैर्दंडस्तुसंमितः॥६॥उत्तमा
दिक्रमेणैवविज्ञेयःशुचिभिस्ततः॥वंशजःसालजादिर्वासदंडःसर्वकामदः॥७॥अयमारोप्यमाणस्तुभंगमायातिवायदि॥रा
ज्ञोनिष्टंविजानीयाद्यजमानस्यवातथा॥८॥मंत्रेणबहुरूपेणपूर्ववच्छांतिमाचरेत्॥द्वारपालादिपूजांचमंत्राणांतर्पणंतथा॥९॥
विधायचूलकंदंडंस्नापयेदस्त्रमंत्रतः॥अनेनैवोक्तमंत्रेणध्वजंसंप्रोक्ष्यदेशिकः॥१०॥मृत्कषायादिभिःस्नानंप्रासादंकारयेत्ततः
॥विलिप्यचसमाछाद्यशय्यायांन्यस्यपूर्ववत्॥११॥चूलकेलिंगवन्न्यासोनचाज्ञानंचसक्रिया॥विषाणाचतुर्थीचनकुंडस्यकल्प
ना॥१२॥दंडेतथार्थतत्त्वंचविद्यातत्त्वंद्वितीयकं॥सद्योजातानिचक्राणिशिवतत्त्वंपुनर्ध्वजे॥१३॥निष्कलंचशिवंतत्रन्यस्यांगानि
प्रपूजयेत्॥चूलकेचततोमंत्रीसांनिध्येसंहिताणुभिः॥१४॥होमयेत्प्रतिभागंचध्वजेतेस्तुफडंतकैः॥अन्यथापिकृतंयत्रध्वज
संस्करणंक्वचित्॥१५॥अस्त्रयागंविधायैवंतत्सर्वमुपदर्शितं॥प्रासादेकारितस्थानेस्रग्वस्त्रादिविभूषिते॥१६॥जंघावेदीतद
र्धेतुत्रितत्त्वादिनिवेश्यच॥होमादिकंविधायाथशिवंसंपूज्यपूर्ववत्॥१७॥सर्वतत्त्वमयंध्यात्वाशिवंचव्यापकंन्यसेत्॥अनंतंका
लरुद्रंचविभाव्यचपरांबुने॥१८॥कूश्मांडहाटकौपीठेपातालंनरकैःसह॥भुवनैर्लोकपालैश्चशतरुद्रादिभिर्वृतं॥१९॥कूश्मांड
कमिदंध्यात्वाजंपायांचविभावयेत्॥वारितेजोनिलव्योमपंचाष्टकसमन्वितं॥२०॥सर्वावरणसंज्ञंस्वबुध्धियोन्यष्टकान्वितं॥यो
ष्टकसमायुक्तंनाशावधिगुणत्रयं॥२१॥दृष्टस्यंपुरुषंसिंहंवामंचपरिभावयेत्॥मंजरीवेदिकायांचविद्यादिकंचतुष्टयं॥२२॥
कंठेमायांसरुद्रांचविद्याश्चामलसारके॥कलाशदेश्वरंबिंदुंविद्येश्वरसमन्वितं॥२३॥जटाजूटंचतंविद्याच्चूलंचंद्रार्धरूपकं

शक्तित्रयंचतत्रैवदंडेनादंविभाव्यच॥२४॥ध्वजंचकुंडलींशक्तिंमितिधाम्निविभावयेत्॥जगत्यामथसंधायलिंगपिंडिकयाथवा॥२५
समुत्थाय स्कमंत्रैश्चविन्यसेछक्तिपंचके॥न्यस्तरत्नादिकेतत्रस्वाधारेविनिवेशयेत्॥२६॥यजमानोध्वजेलग्नोबंधुमित्रादिभिःस
ह॥वामेप्रदक्षिणीकृत्यलभतेफलमीहितं॥२७॥गुरुंपाशुपतंध्यायन्छरमंत्राधिपैर्युतं॥अधिपान्शास्त्रयुक्तांश्चरक्षणायनि
बोधयेत्॥[illegible]॥ऊनादिदोषशांत्यर्थंहुत्वादत्वाचदिग्बलीन्॥गुरवेदक्षिणांदद्याद्यजमानोदिवंव्रजेत्॥२९॥प्रतिमालिंगवेदीनां
यावंतःपरमाणवः॥तावद्युगसहस्राणिकर्तुर्भोगभुजःफलं॥३०॥ ॥इत्याग्नेयेध्वजारोहणादिविधिः॥१०३॥ ॥ईश्वरउवा
च॥जीर्णादीनांचलिंगानामुद्धारंविधिनावदे॥लक्ष्योज्झितंचभग्नंचस्थूलंवज्रहतंतथा॥१॥संपुटंस्फुटितंव्यंगंलिंगमित्येव
मादिकं॥इत्यादिदुष्टलिंगानांत्याज्यापिंडीतथावृषः॥२॥चालितंचलितंनिम्नमसमर्थंविषमस्थितं॥दिङ्मूढंपातितंलिंगंमध्यः
स्थंपतितंतथा॥३॥एवंविधंचसंस्थाप्यनिर्व्रणंचभवेद्यदि॥नादेयेनप्रवाहेणतदपाक्रियतेयदि॥४॥ततोन्यत्राणिसंस्थाप्यंवि
धिदृष्टेनकर्मणा॥सुस्थितंचस्थितंवापिशिवलिंगंनचालयेत्॥५॥शतेनस्थापनंकुर्यात्सहस्रेणतुचालनं॥पूजादिभिश्चसं
युक्तंजीर्णाद्यमपिसुस्थितं॥६॥याम्येमंडपमीशेचप्रत्यग्द्वारैकतोरणं॥विधायद्वारपूजादिस्थंडिलेशप्रपूजनं॥७॥दिग्बलिं
चबहिर्गत्वासमाचम्यस्वयंगुरुः॥ब्राह्मणान्भोजयित्वाचशंभुंविज्ञापयेत्ततः॥८॥दुष्टलिंगमिदंशंभोशांतिरुद्धरणस्यचेत्
॥रुचिस्तवास्तिविधिनाअधितिष्ठचमाशिव॥९॥एवंविज्ञाप्यदेवेशंशांतिहोमंसमाचरेत्॥मध्वाज्यक्षीरदूर्वादिमूलेनाष्टाधि
कंशतं॥१०॥ततोलिंगंचसंस्थाप्यपूजयेत्स्थंडिलंतथा॥ॐव्यापकेश्वरायेतितत्वेनात्मंतवादिनं॥११॥ॐव्यापकेश्वरायहृदयायनमः
॥ॐव्यापकेश्वरायशिरसेस्वाहा॥इत्यभ्यंगमंत्राः॥१२॥ततस्तत्राश्रितंमंत्रंश्रावयेदस्त्रमंत्रतः॥मन्त्रःकोपीहयःकश्चिल्लिंगमाश्रि
त्यतिष्ठति॥१३॥लिंगंत्यक्त्वाशिवाज्ञापियत्रेष्टंतत्रगच्छतु॥विद्याविद्येश्वरैर्युक्तःशंभुरत्रभविष्यति॥१४॥सहस्रप्रतिभागेचततः
पाशुपताणुना॥हुत्वाशांत्यंबुनाप्रोक्ष्यस्पृष्ट्वाकुशैर्जपेत्ततः॥१५॥दत्वार्घ्यंचविलोमेनतत्वतत्वाधिपांस्ततः॥मूर्तिमूर्तीश्वरालिं
गेपिंडिकासंस्थितान्गुरुः॥१६॥विसृज्यस्वर्णपाशेनवृषस्कंधस्थयातया॥रज्वाबध्वातयानीत्वाशिवमंत्रंगृणन्जनैः॥१७॥
तज्जलेनिक्षिपेन्मंत्रीपुष्ट्यर्थंजुहुयाछतं॥तृप्तयेदिक्पतीनांचवास्तुशुध्यैशतंशतं॥१८॥रक्षांविधायतस्मान्निमहत्याशुप

ताणुनः॥लिंगमन्यत्ततस्तत्रविधिवत्स्थापयेद्गुरुः॥१९॥असुरैर्मुनिभिर्देवैस्तत्वविद्भिःप्रतिष्ठितं॥जीर्णंवाप्यथवाभग्नंविधिनापिन
चालयेत्॥२०॥एषएवविधिःकार्योजीर्णधामसमुद्धृतौ॥खड्गेमंत्रागतंन्यस्यकारयेन्मंदिरांतरं॥२१॥संकोचेमरणंप्रोक्तंविस्तरे
तुधनक्षयः॥तद्द्रव्यंश्रेष्ठद्रव्यंवातत्कार्यंतत्प्रमाणकं॥२२॥ ॥इत्याग्नेयेजीर्णोद्धारः॥१०४॥ ॥ईश्वरउवाच॥वक्ष्येप्रासादमा
नस्यलक्षणंतेशिखिध्वज॥चतुर्भागीकृतेक्षेत्रेभित्तेर्भागानविस्तरात्॥१॥पंचभागीकृतेचापिमध्यभागेतुपिंडिका॥सुषिरं
भागविस्तीर्णंभित्तयोभागविस्तरात्॥२॥भागौद्वौमध्यमेगर्भेज्येष्ठभागद्वयेनतु॥त्रिभिस्तुकन्यसोगर्भःशेषभित्तिरितिक्वचि
त्॥३॥षोढाभक्तेथवाक्षेत्रेभित्तिभागैकविस्तरात्॥गर्भोभागेनविस्तीर्णोभागद्वयेनपिंडिका॥४॥विस्ताराद्द्विगुणोवापिसपा
दद्विगुणोपिवा॥अर्धार्धंद्विगुणोवापित्रिगुणःक्वचिदुच्छ्रयः॥५॥जगतीविस्तरार्धेनत्रिभागेनक्वचित्क्वचित्॥नेमिःपादेनवि
स्तीर्णाप्रासादस्यसमंततः॥६॥परिधिस्त्र्यंशकोमध्येरथकांस्तत्रकारयेत्॥चामुंडाभैरवंतेषुनाट्येशंचनिवेशयेत्॥७॥
प्रासादार्धेनदेवानामष्टौवाचतुरोपिवा॥प्रदक्षिणांबहिःकुर्यात्प्रासादादिषुवानरः॥८॥आदित्याःपूर्वरास्थाप्याःस्कंदोग्नि
र्वायुगोचरो॥एवंयमादयोन्यस्याःस्वस्यांस्वस्यांदिशिस्थिताः॥९॥चतुर्थांशिखरंकृत्वाशुकनासाद्विभागिका॥तृतीयेवेदिकात्वग्रेसकंः
ठोमस्तसारकः॥१०॥विराजःपुष्पकश्चान्योकैलासोमणिकस्तथा॥त्रिविष्टपश्चपंचैवमेरुमूर्धनिसंस्थिताः॥११॥चतुरस्रस्तुतत्राः
द्योद्वितीयोपितदायतः॥वृत्तोवृत्तायतश्चान्योअष्टास्रश्चापिपंचमः॥१२॥एकैकोनवधाभेदैश्चत्वारिंशच्चपंचच॥प्रासादाःप्रथः
मोमेरुद्वितीयोमंदरस्तथा॥१३॥विमानंचतथाभद्रःसर्वतोभद्रएवच॥चरुकोनंदनोनंदिर्वर्धमानस्तथापरः॥१४॥श्रीवत्सश्चे
तिवैराजान्ववायेचसमुत्थिताः॥वलभीगृहराजश्चशालागृहंचमंदिरं॥१५॥विशालंचयशोब्रह्ममंदिरंभुवनंतथा॥प्रभवःशिः
बिकावेश्मनवैतेपुष्पकोद्भवाः॥१६॥वलयोदुंदुभिःपद्मोमहापद्मकएवच॥सकुलोबाल्यवच्छीशःशंखगास्यःकलशस्तथा॥१७॥
खवृक्षश्चतथाप्येतेहत्राःकैलाससंभवाः॥गजोथवृषभोहंसोगुरुवान्लक्षनायकः॥१८॥भूषणोभूधरश्चान्यःश्रीजयःपृथिवीजः
रः॥वृत्तायतास्समुद्भूताःनवैतेमालकाह्वयात्॥१९॥वज्रंचक्रंतथाचान्यत्स्वस्तिकंवज्रहस्तकं॥चक्रस्वस्तिकखड्गंचगदाश्रीकंठ
एवच॥२०॥विजयोनामतश्चैतेत्रिविष्टपसमुद्भवाः॥नगराणामिमाःसंज्ञालटादीनामिमास्तथा॥२१॥ग्रीवार्धेनोन्नतंचूलंपृथुलः

Dr. BHAU DAJI MEMORIAL

स्वत्रिभागतः॥दशधावेदिकांकृत्वापंचभिस्कंधविस्तरः॥२२॥त्रिभिःकंठंतुकर्तव्यंचतुर्भिस्कतदंडकं॥दिक्षुद्वाराणिकार्याणिनवि
दिक्षुकदाचन॥२३॥पिंडिकाकोणविस्तीर्णामध्यमांतात्तुदार्हन॥क्वचिसंचमभागेनमहतीगर्भपादतः॥२४॥उछ्रायोद्विगुणस्तेषामन्य
थावानिगद्यते॥षष्ठ्याधिकासमारभ्यअंगुलानांशतादिह॥२५॥उत्तमान्यपिचत्वारिद्वाराणिदशहानितः॥त्रीण्येवमध्यमानिस्युःत्री
ण्येवकल्यशान्यथः॥२६॥उछ्रायार्धेनविस्तारोत्युछ्रयोत्यधिकस्त्रिधा॥चतुर्भिरष्टभिर्वापिदशभिर्वांगुलैःशुभः॥२७॥उछ्रात्सारवि
स्तीर्णाःशारवास्तद्वदुदुंबरौ॥विस्ताराधेनबाहुल्यंसर्वेषामेवकीर्तितं॥२८॥त्रिपंचसप्तनवभिःशारवाभिर्द्वारमिष्टदं॥अधःशारवाच
तुर्थांशेप्रतीहारौनिवेशयेत्॥२९॥मिथुनैःपादवर्णाभिःशारवशेषविभूषयेत्॥स्तंभविस्थेभृत्यतास्याद्दसविस्थेतुभूतिवा॥३०॥कूप
विस्थेभयंद्वारेस्वभ्रविस्थेधनक्षयः॥प्रासादेग्रहशालादिमार्गविधेश्वबंधनं॥३१॥सभावेधेनदारिद्र्यंचुछ्रीवेधेनिराकृतिः॥उलूखलेन
दारिद्र्यंशिलावेधेन्यमूत्रता॥३२॥छायाविस्थेनदारिद्र्यंवधदोषनजायत॥छेदादुत्सारनाद्वापितथाप्राकाररक्षणात्॥३३॥सीमाया
द्विगुणत्यागाद्वेधदोषोनजायते॥३४॥ ॥इत्याग्नेयेसामान्यप्रासादलक्षणं॥१०५॥ ॥नगरग्रामदुर्गादौग्रहप्रासादवृद्धये॥एकाशी
तिपदैर्वास्तुंपूजयेत्सिद्धयेध्रुवं॥१॥प्रागस्यदशधानाडयस्तासांनामानिचब्रुवे॥शांतायशोवतीकांताविशालाप्राणवाहिनी॥२॥स
तीवसुमतीनंदासुभद्राथमनोरमा॥उत्तरास्यादशान्याश्च एकाशीत्यंघ्रिकारिका॥३॥हरिणीसुप्रभालक्ष्मीर्विभूतिर्विमलाश्रया॥
जयाज्वालाविशोकाचस्मृतास्ताःसूत्रपाततः॥४॥ईशाद्यष्टाष्टकंदिक्षुयजेदीशंधनंजयं॥शक्रंमर्कंतथासत्यंभृशंव्योमचपूर्वतः
॥५॥हव्यवाहंचपूषाणंवितथंभौममेवच॥कृतांतमथगंधर्वंमशंमर्गंचदक्षिणे॥६॥पितरंद्वारपालंचसुग्रीवंपुष्पदंतकं॥वरुणं
दैत्यशेषौचयक्ष्माणंपश्चिमेसदा॥७॥रोगाहिमुख्यभल्लाटसोमसूर्यादितिर्दितिः॥नवांतःपदगोब्रह्मापूज्योर्धेचषडंघ्रिगाः॥८॥ब्र
ह्मपांतरकोष्ठेस्यमायारव्यंतुपदद्वये॥तदधश्चपतत्सांरव्यंकेंद्रांतरेतुषट्पद॥९॥मरीचिकाग्निमध्येतुसविताद्विपदस्थितः॥सावि
त्रीतदधोर्धांशेविवस्वान्षट्पदेत्वधः॥१०॥पितब्रह्मांतरेविष्णुमिंद्रंत्वधोजयं॥वरुणब्रह्मणोर्मध्येमित्रारव्यंषट्पदेयजेत्॥११॥रोग
ब्रह्मांतरेनित्यंविष्णुंचरुद्रदासकं॥तदधोर्धांघ्रिगंयक्ष्मंषट्सौम्येत्वधराधरं॥१२॥चरकींस्कंधविदारीक्षकट्पूतनांक्रमात्॥जमुं
पापिलिपिंछंचयजेदीशादिबाह्यतः॥१३॥एकाशीतिपदंवेश्ममंडपश्चदशांघ्रिकः॥पूर्ववद्देवताःपूज्याब्रह्मांतःशोडशांशके॥१४॥

मरीचिश्चविवस्वांश्चमित्रःपृथ्वीधरस्तथा॥दशकोष्ठस्थिता[illegible]दिक्षुत्वन्येचेशादिकोणगाः॥१५॥देवैसमाताहरोरवद्गीमगारव्यो
पितरौतथा॥पापयक्ष्मानिलौदेवाःसर्वेसार्धांघ्रिकेस्थिताः॥१६॥यत्नाद्याकःप्रवक्ष्यामिसंक्षेपेणक्रमाद्गुह॥सदि[illegible]शलकरैर्दैर्घ्यात्
शताष्टाविंशतिविस्तरात्॥१७॥शिवाश्रयःशिवारव्यस्यरुद्रहीनःसदोभयोः॥रुद्रद्विगुणिनाहाःपृथुष्णोामिर्विनात्रिभिः॥स्याद्गुणद्वि
गुणंदैर्ध्यात्तिथिभिश्चैवविस्तरात्॥सावित्रःसालयःकुट्याअन्येषांपृथकूत्रिंशतः॥१९॥कुट्यपिष्टपजंघोच्चात्कुड्यंतुत्रिगुणोछ्रयं
॥कुड्यसूत्रसमापृथ्वीवीथिभेदादनेकधा॥२०॥भद्रतुल्यंचवीथीभिर्द्वारवीथीविनाग्रतः॥श्रीजयंपृष्ठतोहीनंभद्रोयंपार्श्वयोर्विना
॥२१॥गर्भपृथुसमावीथीतदर्धार्धेनवाक्वचित्॥वीथ्यर्धेनोपवीथ्याद्यमेकद्वित्रिपुरान्वितं॥२२॥सामान्यान्यग्रहंवक्ष्येसर्वेषांसर्वकामदं
॥एकद्वित्रिचतुःशालमष्टशालंयथाक्रमं॥२३॥एकंयाम्येचसौम्यास्यंद्वेचेसश्चात्पुरोमुखं॥चतुःशालंतुसंमुखायपरिंद्रंदुमुक्तयोः
॥२४॥सिद्धार्थंचमभ्युपासेचंद्रेंद्राप्पमसूर्यकौ॥प्राकूसौम्यस्थेचदंडारव्यंप्रारव्याम्योवातसंज्ञकं॥२५॥आदौमूलेचदंडारव्यंत्रिशूलं
तद्वनत्यिकृत्॥पूर्वशालोविहीनंस्यात्सुक्षेत्रंवृद्धिदायकं॥२६॥याम्येहीनेभवेच्छंदीत्रिशूलरत्नकृत्सरं॥पक्षघ्नंजलहीनोकःसुतघ्नंब
हुशत्रुकृत्॥२७॥इंद्रादिक्रमतोवक्ष्मिध्वजाद्यष्टौगृहाण्यहं॥प्रक्षालानुस्त्रगवोसमग्नौभस्मस्यमस्तये॥२८॥याम्येरसक्रियाशय्या
धनुःशस्त्राणिरक्षसि॥धनभक्त्यंवुपेशारव्येसम्यगंथौचमारुते॥२९॥सौम्येधनपशूकुर्यादीशेदीर्घवरालयं॥स्वामिहस्तमितंवेश्म
विस्तरायामपिंडकं॥३०॥त्रिगुणंहस्तसंयुक्तंकृत्वास्वांशौर्दत्ततथा॥तच्छेषोयंस्थितस्तेनचायसांतंध्वजादिकं॥३१॥त्रयःपक्षाग्निवे
देषुरसर्पिवसुतोभवेत्॥सर्वनाशकरंवेश्ममध्येचांतेचसंस्थितं॥३२॥तस्माच्चनवमेभागेशुभकृन्निलयोमतः॥तन्मध्येमंडपःशस्तः
समोवाद्विगुणायतः॥३३॥प्रागाप्येन्द्रेंदुयाम्येवाहट्टएवगृहावली॥एकैकभुवनारव्यानिदिश्यष्टाष्टकसंरव्यया॥३४॥ईशाद्यदिनिकां
तानिफलान्येषांयथाक्रमं॥भयंनारीचलत्वंचजयोवृद्धिःप्रतापकः॥३५॥धर्मःकलिश्चनैस्व्यंचप्राग्द्वारेष्वष्टसुध्रुवं॥दाहोमुखंसु
त्दन्नाशोधननाशोमतिर्धनं॥३६॥शिल्पित्वंतनयस्याच्चयाम्यद्वारफलाष्टकं॥आयुःप्रव्रज्यासस्यानिधनशांत्यर्थसंक्षयाः॥३७॥शो
षंभोगंचापत्यंचजलद्वारफलानिचा॥रोगोवदार्तिर्मुख्यत्वंचाल्पायुःकृशतामतिः॥३८॥मानश्चद्वारतःपूर्वेउत्तरस्यांदिशिक्रमात्॥३९
॥ ॥इत्याग्नेयेगृहादिवास्तु॥१०६॥ईश्वरउवाच॥नगरादिकवास्तुंचवक्ष्येराज्यादिवृद्धये॥योजनंयोजनार्धंवातदर्थंस्थानमाश्र

येत्॥१॥अभ्यर्च्यवास्तुंनगरप्राकाराद्यंतुकारयेत्॥ईशादित्रिंशत्पदकेपूर्वद्वारंचसूर्यके॥२॥गंधर्वाभ्यांदक्षिणंस्याद्वारुणेपश्चिमं
तथा॥सौम्यंद्वारंसौम्यपदेकार्याहट्टास्तुविस्तराः॥३॥येनेभादिसुखंगच्छेत्कुर्याद्वारंतुषट्करं॥छिन्नकर्णंविभिन्नंचचंद्रार्धाभंतं
पुरंनहि॥४॥वज्रंसूचीमुखंनेष्टंसकृद्द्वित्रिसमागमं॥चापाभवज्रनागाभंपुरारंभेहिशांतिकृत्॥५॥प्रार्च्यविष्णुहरार्कादीन्नत्वा
दद्याद्बलिबलीन्॥आग्नेयेस्वर्णकर्मार्ख्यान्पुरस्यविनिवेशयेत्॥६॥दक्षिणेनृत्यवृत्तीनांवेश्यास्त्रीणांगृहाणिच॥नटानांचाक्रिका
दीनांकैवर्तादेश्चनैरृते॥७॥रथानामायुधानांचकृपणानांचवारुणे॥शौंडिकाःकर्माधिकृतांवायव्येपरिकर्मिणः॥८॥ब्राह्मणायतः
यःसिद्धाःपुण्यवंतश्चचोत्तरे॥फलाद्यविक्रयिणश्चईशानेचवणिग्जनाः॥९॥पूर्वतश्चबलाध्यक्षाआग्नेयेविविधंबलं॥स्थरानां
देशिनांदक्षेकुंउरानैरृतेन्यसेत्॥१०॥पश्चिमेचमहामात्यान्कोशपालांश्चकारकान्॥उत्तरेदंउनाथांश्चनायकद्विजसद्गणान्॥
॥११॥पूर्वतःक्षत्रियान्दक्षेवैश्यान्शूद्रांश्चपश्चिमे॥दिक्षुवैद्यान्वाजिनश्चबलानिचचतुर्दिशं॥१२॥पूर्वेणचलिंग्यादीन्श्मशाना
दीनिदक्षिणे॥पश्चिमेगोधनाद्यंचकृषिकर्तॄंस्तथोत्तरे॥१३॥न्यसेन्म्लेच्छांश्चकोणेषुग्रामादिषुतथास्थितिं॥श्रियंवैश्रवणंद्वारिपूर्वे
तांपश्यतांश्रियं॥१४॥देवादीनांपश्चिमतःपूर्वास्यानिगृहाणिहि॥पूर्वतःपश्चिमास्यानिदक्षिणेचोत्तरेणच॥१५॥नाकेशविष्णवा
दिधामानिरक्षार्थंनगरस्यच॥निर्दैवतंतुनगरंग्रामदुर्गगृहादिकं॥१६॥भज्यतेतत्पिशाचाद्यैरोगाद्यैःपरिभूयते॥नगरादिसदैवंहिज
यदंभुक्तिमुक्तिदं॥१७॥पूर्वायांश्रीगृहंप्रोक्तमाग्नेय्यांवैमहानसं॥शयनंदक्षिणस्यांतुनैरृत्यामायुधाश्रयं॥१८॥भोजनंपश्चिमायांतु
वायव्यांधान्यसंग्रहं॥उत्तरेद्रव्यसंस्थानमैशान्यांदेवतागृहं॥१९॥चतुःशालंत्रिशालंवाद्विशालंचैकशालकं॥चतुःशालगृहाणां
तुशालालिंदकभेदतः॥२०॥शतद्वयंतुजायंतेपंचाशत्संचतेष्वपि॥त्रिशालानितुचत्वारिद्विशालानितुपंचधा॥२१॥एकशालानिच
त्वारिएकलिंदानिवेश्मनः॥अष्टाविंशदलिंदानिगृहाणिनगराणिच॥२२॥चतुर्भिःसप्तभिश्चैवपंचपंचाशदेवतु॥षडलिंदानि
विंशैवअष्टभिर्विंशएवहि॥२३॥अष्टालिंदेभवेदेवंनगरादौगृहाणिहि॥२४॥ ॥इत्याग्नेयेमहापुराणेनगरादिवास्तु॥१०७॥अ
ग्निरुवाच॥वक्ष्येभुवनकोशंचपृथ्वीद्वीपादिलक्षणं॥आग्नीध्रश्चापिबाहुश्चवपुष्मान्द्युतिमांस्तथा॥१॥मेधामेधातिथिर्भव्यःसवनः
सत्रएवच॥ज्योतिष्मान्दशमस्तेषांसत्यनामासुतोभवत्॥२॥प्रियव्रतसुताःख्याताःसप्तद्वीपान्ददौपिता॥जंबूद्वीपमथाग्निध्रेषु

संमेधातिथयेददौ॥३॥वपुष्मतेशाल्मलंचज्योतिष्मतेकुशाह्वयं॥क्रौंचद्वीपंद्युतिमतेशाकंभव्यायदत्तवान्॥४॥पुष्करंसवनायादादाः
ग्नीध्रोदात्सुतेत्सुत॥जंबूद्वीपपितालक्षंनाभेर्दत्तंहिमाह्वयं॥५॥हेमकूटंकिंपुरुषेहरिवर्षायनैषधं॥इलावृतेमेरुमध्यंरम्येनीलाच
लाश्रितं॥६॥हिरण्वतेश्वेतवर्षंकुरुस्तुकुरवेददौ॥भद्राश्वायचभद्राश्वंकेतुमालायपश्चिमं॥७॥मरोःप्रियव्रतःपुत्रानभिषिच्यय
योवनं॥शालग्रामेतपस्तप्त्वाययौविष्णोर्लयंनृपः॥८॥यानिकिंपुरुषाद्यानिअष्टवर्षाणिसत्तम॥तेषांस्वाभाविकीसिद्धिःसुखः
प्रायात्ययत्नतः॥९॥जरामृत्युभयंनास्तिधर्माधर्मौयुगादिकं॥नाधर्ममध्यमंतुल्यामाध्यशातनाभितः॥१०॥ऋषभोमेरुदेव्यांच
ऋषभाद्भरतोभवत्॥ऋषभोदत्तश्रीःपुत्रेशालग्रामेहरिंगतः॥११॥भरताद्भारतंवर्षंभरतात्सुमतिस्त्वभूत्॥भरतोदत्तलक्ष्मी
कःशालग्रामेहरिंगतः॥१२॥सयोगीयोगप्रस्तावेवक्ष्येतच्चरितंपुनः॥सुमतेस्तेजसस्तस्मादिंद्रद्युम्नोव्यजायत॥१३॥परमेष्ठीतत
स्तस्मात्प्रतीहारस्तदन्वयः॥प्रतीहारात्प्रतीहर्ताप्रतिहर्तुर्भुवस्ततः॥१४॥उद्गीतोथचप्रस्तावोविभुःप्रस्तावतःसुतः॥पृथुश्चैवततो
नक्तोनक्तस्यापिगयःसुतः॥१५॥नरोगयस्यतनयःतत्पुत्रोभूद्विराट्ततः॥तस्यपुत्रोमहावीर्योधीमांस्तस्मादजायत॥१६॥महांतस्त
सुतश्चाभून्मन्युस्तस्यचात्मजः॥त्वष्टात्वष्टुश्चविरजारजस्तस्याप्यभूत्सुतः॥१७॥सत्यजिद्रजसस्तस्यजज्ञेपुत्रशतंमुने॥विश्व
ज्योतिप्रधानास्तेभारतंतैर्विवर्धितं॥१८॥कृतत्रेतादिसर्गेणस्वर्गःस्वायंभुवस्मनः॥१९॥ ॥इत्याग्नेयेस्वायंभुवःसर्गः॥१०८॥ ॥
अग्निरुवाच॥जंबूप्लक्षाह्वयौद्वीपौशाल्मलिश्चापरोमहान्॥कुशःक्रौंचस्तथाशाकंपुष्करश्चेतिसप्तमः॥१॥एतेद्वीपाःसमुद्रैस्तु
सप्तसप्तभिरावृताः॥लवणेक्षुसुरासर्पिर्दधिदुग्धजलैःसमं॥२॥जंबूद्वीपोद्वीपमध्येतन्मध्येतन्मध्येमेरुरुच्छ्रितः॥चतुरशीतिसा
हस्रोभूमिष्ठषोडशाद्रिराट्॥३॥द्वात्रिंशन्मूर्ध्निविस्तारात्षोडशाधःसहस्रवान्॥भूपद्मस्यास्यशैलोसौकर्णिकाकारसंस्थितः॥४॥हिम
वान्हेमकूटश्चनिषधश्चास्यदक्षिणे॥नीलःश्वेतश्चशृंगीचउत्तरेवर्ष[illegible]पर्वताः॥५॥लक्षप्रमाणौद्वौमध्येदशहीनास्तथापरे॥सहस्र
द्वितयोच्छ्रायास्तावद्विस्तारिणश्चते॥६॥भारतंप्रथमंवर्षंततःकिंपुरुषंस्मृतं॥हरिवर्षंतथैवान्यन्मेरुदक्षिणतोद्विज॥७॥रम्यकंचो
त्तरेवर्षंतथैवान्यद्धिरण्मयं॥उत्तराःकुरवश्चैवयथावैभारतंतथा॥८॥नवसहस्रमेकैकमेतेषांमुनिसत्तमं॥इलावृत्तंचतन्मध्येसौ
वर्णोमेरुरुच्छ्रितः॥९॥मेरोश्चतुर्दिशंतत्रनवसाहस्रविस्तृतं॥इलावृतंमहाभागश्चत्वारश्चात्रपर्वताः॥१०॥विष्कंभारचितामेरोर्योजः

नायुतविस्तृताः॥ पूर्वेणमंदरोनामदक्षिणेगंधमादनः॥११॥ विपुलःपश्चिमेपार्श्वेसुपार्श्वश्चोत्तरेस्मृतः॥ कदंबस्तेषुजंबूश्चपिप्पलोवट
एवच॥१२॥ एकादशशतायामाःपादपागिरिकेतवः॥ जंबूद्वीपेतिसंज्ञास्यात्फलंजंबाःगजोपमं॥१३॥ जंबूनदीरसेनास्यास्तेनजांबूनदंप
रं॥ भद्राश्वंपूर्वतोमेरोःकेतुमालंतुपश्चिमे॥१४॥ वनंचैत्ररथंपूर्वेगंधमादनं॥ [illegible] वैभ्राजंपश्चिमेसौम्येनंदनंचसरांस्यथ॥१५॥ दक्षिणे
अरुणोदंमहाभद्रंशीतोदंमानसंतथा॥ शीतांभश्चक्रमुंजाद्याःपूर्वतःकेसराचलाः॥१६॥ दक्षिणेत्रिकूटाद्याःशिवासमुखाजले
॥शंखकूटादयःसौम्येमेरौचब्रह्मणःपुरी॥१७॥ चतुर्दशसहस्राणियोजनानांचदिक्षुच॥ इंद्रादिलोकपालानांसमंताद्ब्रह्मणःपुरः॥
॥१८॥ विष्णुपादात्प्लावयित्वाचंद्रंस्वर्गात्पततस्यपि॥ पूर्वेणशीताभद्राश्वशैलाच्छैलाद्गतार्णवं॥१९॥ तथैवालकनंदापिदक्षिणेनैवभारतं
॥प्रयातिसागरंकृत्वासप्तभेदाथपश्चिमं॥२०॥ आब्धिंस्कुचक्षुःसौम्याब्धिंभद्रोत्तरकुरूनपि॥ अनीलनिषधायामौमाल्यवद्गंधमाद
नौ॥२१॥ तयोर्मध्यगतोमेरुःकर्णिकाकारसंस्थितः॥ भारताःकेतुमालाश्चभद्राश्वाःकुरवस्तथा॥२२॥ पत्राणिलोकपद्मस्यमर्यादालो
कबाह्यतः॥ जठरोदेवकूटश्चमर्यादापर्वतावुभौ॥२३॥ तौदक्षिणोत्तरायामावानीलनिषधायतौ॥ गंधमादनकैलासौपूर्वपश्चायता
वुभौ॥२४॥ अशीतियोजनायामावर्णवान्मध्यसंस्थितौ॥ जठराद्याश्चमर्यादाशैलामेरोश्चतुर्दिशं॥२५॥ केसरादिषुयाश्रेण्यस्तासुसंतिपु
राणिहि॥ लक्ष्मीविष्ण्वग्निसूर्यादिदेवानांमुनिसत्तम॥२६॥ भौमानांस्वर्गधर्माणांनपापास्तत्रयांतिच॥ भद्राश्वेस्तिहयग्रीवावराहः
केतुमालके॥२७॥ भारतेकूर्मरूपीचमत्स्यरूपःकुरुष्वपि॥ विश्वरूपेणसर्वत्रपूज्यतेभगवान्हरिः॥२८॥ भूषुकिंपुरुषाद्यासुक्षुद्
शोकादिकंचन॥ चतुर्विंशतिसाहस्रंप्रजाजीवंत्यनामयाः॥२९॥ कृतादिकल्पनानास्तिभौमांन्यंभांसिनांबुदाः॥ सर्वेष्वेतेषुसर्वेषुस
प्तसप्तकुलाचलाः॥३०॥ नद्यश्चशतशस्तेभ्यस्तीर्थभूताःप्रजज्ञिरे॥ भारतेयानितीर्थानितानितीर्थानिवच्मिते॥३१॥ ॥इत्याग्नेये
महापुराणेभुवनकोशः॥१०९॥ ॥अग्निरुवाच॥ माहात्म्यंसर्वतीर्थानांवक्ष्येयद्भुक्तिमुक्तिदं॥ यस्यहस्तौचपादौचमनश्चैवसु
संयतं॥१॥ विद्यातपश्चकीर्तिश्चसतीर्थफलमश्नुते॥ प्रतिग्रहादुपावृत्तोलब्धाहारोजितेंद्रियः॥२॥ निष्पापीतीर्थयात्रीतुसर्वयज्ञः
फलंलभेत्॥ अनुपोष्यत्रिरात्राणितीर्थान्यनभिगम्यच॥३॥ अदत्वाकांचनंगाश्चदरिद्रोनामजायते॥ तीर्थाभिगमनेतत्स्याद्यज्ञेना
प्यतेफलं॥४॥ पुष्करंपरमंतीर्थंसांनिध्यंहित्रिसंध्यकं॥ दशकोटिसहस्राणितीर्थानिविप्रपुष्करे॥५॥ ब्रह्मासहसवैरास्तेमुनयःस

र्वमिच्छवः॥ देवाःप्राप्ताःसिद्धिमत्रस्नाताःपितृसुरार्चिताः॥६॥ अश्वमेधफलंप्राप्यब्रह्मलोकंप्रयांतिते॥ कार्तिक्यामन्नदानाच्चनिर्म
लाब्रह्मलोकभाक्॥७॥ पुष्करंदुष्करंगंतुंपुष्करेदुष्करंतपः॥ दुष्करंपुष्करेदानंवस्तुंचैवसुदुष्करं॥८॥ तत्रवासाज्जपाच्छ्राद्धात्कु
लानांशतमुद्धरेत्॥ जंबूमार्गंचतत्रैवतीर्थंतंडुलिकाश्रमं॥९॥ कण्वाश्रमंकोटितीर्थंनर्मदाचार्बुदंपरं॥ तीर्थंचर्मण्वतीसिंधुःसोमना
थःप्रभासकं॥१०॥ सरस्वत्याब्धिस्वर्गश्चसागरंतीर्थमुत्तमं॥ पिंडारकंद्वारकाचगोमतीसर्वसिद्धिदा॥११॥ भूमितीर्थंब्रह्मतुंगंतीर्थं
पंचनदंपरं॥ भीमतीर्थंगिरींद्रश्चदेविकापापनाशिनी॥१२॥ तीर्थंविनशनंपुण्यंनागोद्भेदमघार्दनं॥ तीर्थंकुमारकोटिश्चसर्वदानि
वितानिच॥१३॥ कुरुक्षेत्रंगमिष्यामिकुरुक्षेत्रेवसाम्यहं॥ यएवंसततंब्रूयात्सोमलःप्राप्नुयाद्दिवं॥१४॥ तत्रविष्ण्वादयोदेवास्तत्र
वासात्परिंव्रजेत्॥ सरस्वत्यांसन्निहित्यांस्नानकृद्ब्रह्मलोकगः॥१५॥ पांसवोपिकुरुक्षेत्रेतेयांतिपरमांगतिं॥ धर्मतीर्थंसुवर्णाख्यं
गंगाद्वारमनुत्तमं॥१६॥ तीर्थंकनखलंपुण्यंभद्रकर्णह्रदंतथा॥ गंगासरस्वतीसंगंब्रह्मावर्तमघार्दनं॥१७॥ भृगुतुंगंचकुब्जाम्रं
गंगोत्तेनमघांतकं॥ वाराणसीवरंतीर्थंमविमुक्तमनुत्तमं॥१८॥ कपालमोचनंतीर्थंतीर्थराजंप्रयागकं॥ गोमतीगंगयोःसंगंगंगा
सर्वत्रनाकदा॥१९॥ तीर्थराजगृहंपुण्यंशालग्राममघांतकं॥ वटेशंवामनंतीर्थंकालिकासंगमुत्तमं॥२०॥ लोहित्यंकरतोयाख्यंशोणं
चाथर्षभंपरं॥ श्रीपर्वतंकोल्लगिरिःसंह्याद्रिर्मलयोगिरिः॥२१॥ गोदाकृष्णातुंगभद्राकावेरीवरदानदी॥ तापीपयोष्णीरेवाचदंडका
रण्यमुत्तमं॥२२॥ कालंजरंमुंजवटंतीर्थंसूर्पारकंपरं॥ मंदाकिनीचित्रकूटंशृंगवेरपुरंपरं॥२३॥ अवंतीपरमंतीर्थमयोध्यापा
पनाशिनी॥ नैमिषंपरमंतीर्थंभुक्तिमुक्तिप्रदायकं॥२४॥ ॥इत्याग्नेयेतीर्थयात्रामाहात्म्यं॥११०॥ ॥अग्निरुवाच॥ गंगामाहात्म्य
माख्यास्येसेव्यासाभुक्तिमुक्तिदा॥ येषांमध्येयातिगंगातेदेशाःपावनावराः॥१॥ गतिर्गंगातुभूतानांगतिमन्वेषतांसदा॥ गंगातार
यतेचोभौवंशौनित्यंहिसेविता॥२॥ चांद्रायणसहस्राच्चगंगांभःपानमुत्तमं॥ गंगांमासंतुसंसेव्यसर्वयज्ञफलंलभेत्॥३॥ सकला
घहरीदेवीस्वर्गलोकप्रदायिनी॥ यावदस्थिचगंगायांतावत्स्वर्गेसतिष्ठति॥४॥ अंधादयस्तुतांसेव्यदेवैर्गच्छंतितुल्यतां॥ गंगाती
र्थसमुद्भूतमृत्धारीसोघहार्कवत्॥५॥ दर्शनात्स्पर्शनात्पानात्तथागंगेतिकीर्तनात्॥ पुनातिपूर्वपुरुषान्शतशोथसहस्रशः॥
॥६॥ ॥इत्याग्नेयेमहापुराणेगंगामाहात्म्यं॥१११॥ ॥अग्निरुवाच॥ वक्ष्येप्रयागमाहात्म्यंभुक्तिमुक्तिप्रदंपरं॥

प्रयागेब्रह्मविष्ण्वाद्यादेवामुनिवरास्थिताः॥१॥सरितःसागराःसिद्धागंधर्वाप्सरसस्तथा॥तत्रत्रीण्यग्निकुंडानितेषांमध्ये
तुजान्हवी॥२॥वेगेनसमतिक्रांतासर्वतीर्थपुरस्कृता॥तपनस्यसुतातत्रत्रिषुलोकेषुविश्रुता॥३॥गंगायमुनयोर्मध्यंपृथि
व्याजघनंस्मृतं॥प्रयागंजघनस्यांतंतूपस्थमृषयोविदुः॥४॥प्रयागंसप्रतिष्ठानंकंबलाश्वतरावुभौ॥तीर्थंभोगवतीचैववे
दीप्रोक्ताप्रजापतेः॥५॥तत्रवेदाश्चयज्ञाश्चमूर्तिमंतःप्रयागके॥श्रवणादस्यतीर्थस्यनामसंकीर्तनादपि॥६॥मृत्तिकालंभ
नाद्वापिसर्वपापैःप्रमुच्यते॥प्रयागेसंगमेदानंश्राद्धजप्यादिचाक्षयं॥७॥नवेदवचनाद्विप्रनलोकवचनादपि॥मतिरुत्क्र
मणीयातेप्रयागमरणंप्रति॥८॥दशकोटिसहस्राणिषष्टिकोट्यस्तथापराः॥तेषांसांनिध्यमत्रैवप्रयागंपरमंततः॥९॥
वासुकेर्भोगवत्यत्रहंसप्रपतनंपरं॥गवांकोटिप्रदानाद्यत्त्र्यहंस्नानस्यतत्फलं॥१०॥प्रयागेमाघमासेतुएवमाहुर्मनीषि
णः॥सर्वत्रसुलभागंगात्रिषुस्थानेषुदुर्लभा॥११॥गंगाद्वारेप्रयागेचगंगासागरसंगमे॥अत्रदानाद्दिवंयातिराजेंद्रोजाय
तेध्रुवं॥१२॥वटमूलेसंगमादौमृतोविष्णुपुरींव्रजेत्॥उर्वशीपुलिनंरम्यंतीर्थंसंध्यावटंतथा॥१३॥कोटितीर्थंचाश्वमेधंगं
गायमुनमुत्तमं॥मानर्सरजसाहीनंतीर्थंवानरकंपरं॥१४॥ ॥इत्याग्नेयेमहापुराणेप्रयागमाहात्म्यं॥११२॥छ॥
॥ ॥अग्निरुवाच॥वाराणसीपरंतीर्थंगौर्यैप्राहमहेश्वरः॥भुक्तिमुक्तिप्रदंपुण्यंवसतांगृणतांहरिं॥१॥रुद्र
उवाच॥गौरिक्षेत्रंनमुक्तंवैअविमुक्तंततःस्मृतं॥जप्तंदत्तंहुतंतप्तमविमुक्तेकिलाक्षयं॥२॥अश्मनाचरणौहत्वाव
सेत्काशींनहित्यजेत्॥हरिश्चंद्रपरंगुह्यंगुह्यमाम्रातकेश्वरं॥३॥जप्येश्वरंपरं गुह्यंगुह्यंश्रीपर्वतंतथा॥महाबलं
परंगुह्यंभूमिश्चंडेश्वरंतथा॥४॥केदारंपरमंगुह्यमष्टौसत्यविमुक्तके॥गुह्यानांपरमंगुह्यमविमुक्तंपरंमम॥५॥द्वि
योजनंतुपूर्वस्यांयोजनार्धंतदन्यथा॥वरणाचनदीचासीतयोर्मध्येवाराणसी॥६॥अत्रस्नानंजपोहोमोमरणंदेवपूज
नं॥श्राद्धंदानादिवासश्चयद्यत्स्याद्भुक्तिमुक्तिदं॥७॥ ॥छ॥ ॥इत्याग्नेयेमहापुराणेवाराणसीमाहात्म्यं॥छ॥
॥११३॥ ॥छ॥ ॥अग्निरुवाच॥ ॥नर्मदादिकमाहात्म्यंवक्ष्येहंनर्मदापरा॥सद्यःपुनातिगांगेयंद

र्शनाद्वारिनार्मदं॥१॥विस्तराद्योजनशतंयोजनद्वयमायता॥षष्टिस्तीर्थसहस्राणिषष्टिकोट्यस्तथापराः॥२॥सर्वतस्यसमं
तात्तुतिष्ठंत्यमरकंटके॥कावेरीसंगमंपुण्यंश्रीपर्वतमतःशृणु॥३॥गौरीश्रीरूपिणीतेपेतपस्तामब्रवीद्धरः॥अवा
प्स्यसित्वमध्यात्मंनाम्नाश्रीपर्वतस्तव॥४॥समंताद्योजनशतंमहापुण्यंभविष्यति॥अत्रदानंतपोजप्यंश्राद्धंसर्वमथा
क्षयं॥५॥मरणंशिवलोकायसर्वदंतीर्थमुत्तमं॥हरोत्रक्रीडतेदेव्याहिरण्यकशिपुस्तथा॥६॥तपस्तप्त्वाबलीचाभून्मुन
यःसिद्धिमाप्नुयात्॥ ॥अग्नेयेमहापुराणेश्रीपर्वतादिमाहात्म्यं॥ ॥अग्निरुवाच॥गयामाहात्म्यमाख्यास्येगयातीर्थो
त्तमोत्तमं॥गयासुरस्तपस्तेपेतत्तपस्तापिभिःसुरैः॥१॥उक्तःक्षीराब्धिगोविष्णुःपालयास्मान्गयासुरात्॥तथेत्युक्त्वाह
रिर्दैत्यंवरंब्रूहीतिचाब्रवीत्॥२॥दैत्योब्रवीद्धरिंदेहोहंभवेयंसर्वतीर्थतः॥तथेत्युक्त्वाततोविष्णुर्दैत्यंदृष्ट्वानतोहरिं॥३॥
गताःशून्यामहीस्वर्गोदेवब्रह्मादयःसुराः॥गताऊचुर्हरिंदेवंशून्याभूस्त्रीदिवंहरे॥४॥दैत्यस्यदर्शनाद्देवब्रह्माणंचाब्रवी
द्धरिः॥यागार्थंदैत्यदेहंत्वंप्रार्थयत्रिदशैःसह॥५॥तच्छ्रुत्वासशरोब्रह्मागयासुरमथाब्रवीत्॥अतिथिःप्रार्थयामित्वां
देहंयागायपावनं॥६॥गयासुरस्तथेत्युक्त्वापतत्तस्यशिरस्त्वथ॥गयांचकारचलितेदेहेपूर्णाहुतिंविभुः॥७॥पुनर्ब्र
ह्माब्रवीद्विष्णुंपूर्णाःकालेऽसुरोज्वलत्॥विष्णुर्धर्ममथाहूयप्राहदेवमयींशिलां॥८॥धारयस्वसुरैःसर्वैस्तस्यार्थपरि
संततेः॥गदाधरोमदीयाथमूर्तिःस्थास्यतिसासुरे॥९॥धर्मःशिलांदेवमयींतच्छ्रुत्वाधारयेत्परां॥याधर्माधर्मसु
तांचजानाधर्मव्रतास्कृता॥मरीचिब्रह्मणःपुत्रस्तामुवाहतपान्वितां॥यथाहरिःश्रियारेमेगौर्याशंभुस्तथास्तया॥११॥
कुशपुष्पाद्यरण्याच्चआनीयातिश्रमान्वितः॥भुक्त्वाधर्मव्रताप्राहपादसंवाहनंकुरु॥१२॥विश्रांतस्यमुनेःपादौतथे
त्युक्त्वाप्रियाकरोत्॥एतस्मिन्नंतरेब्रह्मामुनौसुप्तेतथागतः॥धर्मव्रताचिंतयच्चकिंब्रह्माणंसमर्च्चयेत्॥
पादसंवाहनंकुर्वेब्रह्मापूज्योगुरोर्गुरुः॥१४॥विचिंत्यपूजयामासब्रह्माणंचार्हणादिभिः॥मरीचिस्तामपश्य
त्शापंशापाक्तिव्यतिक्रमात्॥१५॥शिलाभविष्यसिक्रोधाधर्मव्रताब्रवीच्चतं॥पादाभ्यंगपरित्यज्यत्वद्गुरुःपू
जितोमया॥अदोषाहंयतस्त्वांहिशापंप्राप्स्यसिशंकरात्॥धर१६॥धर्मव्रतापृथक्शापंधारयित्वाग्निमध्य
गात्॥१७॥उपश्चचारवर्षाणांसहस्राण्ययुतानिच॥ततोविष्ण्वादयोदेवावरंब्रूहीतिचाब्रवीत्॥१८॥धर्म
व्रताब्रवीद्देवान्शापंनिवर्तयंतुमे॥देवाऊचुः॥दत्तोमरीचिनाशापोभविष्यतिनचान्यथा॥१९॥शिलापवि
त्रादेवांघ्रिलक्षितात्वंभविष्यसि॥देवव्रतादेवशिलासर्वदेवादिरूपिणी॥२०॥सर्वदेवमयीपुण्यानिश्चलाया

स्करस्यहि।।देवब्रतोवाच।।यदितुष्टास्तुमेसर्वेमयिनिष्टंतुसर्वदा।।२१।।ब्रह्माविष्णुश्चरुद्राद्यागौरीलक्ष्मीमुखाः
स्कराः।।अग्निरुवाच।।देवब्रतावचः श्रुत्वानथेत्युक्त्वादिवंगतः।।२२।।साधर्मेणाकरस्यास्यधृतादेवमयीशि
ला।।सशिलश्चलितादैत्यःस्थिरारुद्रादयस्ततः।।२३।।सदेवश्चलितोदैत्यस्ततोदेवैःप्रसादितः।।क्षीराब्धिगो
हरिःप्रादात्स्कमूर्तिंश्रीगदाधरं।।२४।।गच्छंतुक्तास्वयंयास्येमूर्त्याविदेवगम्यया।।स्थितोगदाधरोदेवोव्यक्ता
व्यक्तोभयात्मकः।।२५।।निश्चलार्थंस्वयंदेवस्थितआदिगदाधरः।।गयोनामास्करोदैत्यःसहतोविष्णुनापु
७७ रा।।२६।।तदर्थानिर्मिताचाद्यागदयाविश्वकर्मणा।।आद्ययागदयाहेतिर्मुखाराक्षसाहताः।।२७।।गदा
धरेणविधिवत्तस्मादादिगदाधरः।।देवमय्यांशिलायांचस्थितेचादिगदाधरे।।२८।।गदास्करेनिश्चलेचब्रह्माप्रणो
इतिंददौ।।गयास्करोब्रवीद्देवान्किमर्थंवंचितोह्यहं।।विष्णोर्वचनमात्रेणकिन्नस्यांनिश्चलोह्यहं।।२९।।आक्रांतोयद्यहंदेवादातु
मर्हथमेवरं।।देवाऊचुः।।तीर्थस्यकरणेयत्त्वमस्माभिर्निश्चलीकृतः।।३०।।विष्णोःशंभोर्ब्रह्मणश्चक्षेत्रंनवभविष्यति।।प्रसिद्धं
सर्वतीर्थेभ्यःपित्रादेर्ब्रह्मलोकदं।।३१।।इत्युक्त्वास्थितादेवादेवास्तीर्थादयःस्थिताः।।यागंकृत्वाददौब्रह्माऋत्विग्भ्योदक्षिणांत
दा।।३२।।पंचक्रोशंगयाक्षेत्रंपंचाशत्पंचचार्पयत्।।ग्रामान्स्वर्णगिरीन्कृत्वानदीर्दुग्धमधुस्रवाः।।३३।।सरोवराणिदध्याज्यै
र्बहून्यन्नादिपर्वतान्।।कामधेनुंकल्पतरुंस्वर्णरूप्यगृहाणिच।।३४।।नयाचेयतुविप्रेंद्राअल्पानुक्त्वाददौप्रभुः।।धर्म
यागेप्रलोभात्तुप्रतिगृह्यधनादिकं।।३५।।स्थितायदागयायांतेशप्तास्तेब्रह्मणातदा।।विद्याविवर्जितायूयंतृष्णायुक्ता
भविष्यथ।।३६।।दुग्धादिवर्जितानद्यःशैलाःपाषाणरूपिणः।।ब्रह्माणंब्राह्मणाश्चोचुर्भ्रष्टंशापेनचाखिलं।।३७।।
जीवनायप्रसादंनःकुरुविप्रांश्चसोब्रवीत्।।तीर्थोपजीविकायूयमाचंद्रार्कंभविष्यथ।।३८।।येयुष्मान्पूजयिष्यंति
गयायामागतानराः।।हव्यकव्यैर्धनैःश्राद्धैस्तेषांकुशलशान्तंव्रजेत्।।३९।।नरकात्स्वर्गलोकायस्वर्गलोकात्सरांग
तिं।।गयोपिचाकरोद्यागंबह्वन्नंबहुदक्षिणं।।४०।।गयापुरीतेननाम्नापांडवाईजिरेहरिं।। ।।अग्निपुरा
णेगयामाहात्म्ये।। ।।अग्निरुवाच।।उद्यतश्चेद्गयांगंतुंश्राद्धंकृत्वाविधानतः।।विधायकर्पटीवेशंग्रामस्यापि
प्रदक्षिणं।।१।।गत्वाप्रतिदिनंगच्छेत्संयतश्चाप्रतिग्रही।।गृहाच्चलितमात्रस्यगयायागमनंप्रति।।२।।स्वर्गारोह
णसोपानंपितृणांतुपदेपदे।।ब्रह्मज्ञानेनकिंकार्यंगोग्रहेमरणेनकिं।।३।।किंकुरुक्षेत्रवासेनयदापुत्रोगयांव्रजेत्।।
गयाप्राप्तंसुतंदृष्ट्वापितृणामुत्सवोभवेत्।।४।।पद्भ्यामपिजलंस्पृष्ट्वाअस्मभ्यंकिंनदास्यति।।ब्रह्मज्ञानंगया

श्राद्धंगोग्रहेमरणंतथा।।५।।वासःपुंसांकुरुक्षेत्रेमुक्तिरेषाचतुर्विधा।।कांक्षंतिपितरःपुत्रंनरकाद्भयभीरवः।।६।।
गयांयास्यतियःपुत्रःसनस्त्राताभविष्यति।।मुंडनंचोपवासंचसर्वतीर्थेष्वयंविधिः।।७।।नकालादिगयातीर्थेदद्यात्
पिंडांश्चनित्यशः।।पक्षत्रयनिवासीचपुनात्यासप्तमंकुलं।।८।।अष्टकासुचवृद्धौचगयायांमृतवासरे।।अत्रमातुः
पृथक्श्राद्धमन्यत्रपतिनासह।।९।।पित्रादिनवदैवत्यंतथाद्वादशदैवतं।।प्रथमेदिवसेस्नायात्तीर्थेत्युत्तरमानसे।।
।।१०।।उत्तरेमानसेपुण्यआयुरारोग्यवृद्धये।।सर्वाघौघविघातायस्नानंकुर्वेतिमुक्तये।।११।।संतर्प्यदेवपित्रादीन्श्रा
द्धकृत्पिंडदोभवेत्।।दिव्यान्तरिक्षभौमस्थान्देवान्संतर्पयाम्यहं।।१२।।दिव्यांतरिक्षभौमादिपितृमात्रादितर्पये
त्।।पितापितामहश्चैवतथैवप्रपितामहः।।१३।।मातामातामहीचैवतथैवप्रपितामही।।मातामहःप्रमातामहो
वृद्धःप्रमातृकामहः।।१४।।तेभ्योन्येभ्यइमान्पिंडान्नुद्धारायदाम्यहं।।ॐनमःसूर्यदेवायसोमभौमज्ञरूपिणे
।।१५।।जीवशुक्रशनैश्चारिराहुकेतुस्वरूपिणे।।उत्तरमानसेस्नात्वाउद्धरेत्सकुलंकुलं।।१६।।सूर्यंनत्वाव्रजेन्मौनीनरो
दक्षिणमानसं।।दक्षिणेमानसेस्नानंकरोमिपितृतृप्तये।।१७।।गयायामागतःस्वर्गंयांतुमेपितरोखिलाः।।श्राद्धं
पिंडंततःकृत्वासूर्यंनत्वावदेदिदं।।१८।।ॐनमोभानवेभर्त्रेभवायभवमेविभो।।भुक्तिमुक्तिःप्रदःसर्वपितृणां
भवभावतः।।१९।।कव्यवाहोनलःसोमोयमश्चवार्य्यमातृथा।।अग्निष्वात्ताबर्हिषदआज्यपाःपितृदेवताः।।२०।।
आगच्छतुमहाभागायुष्माभिरक्षितास्त्विह।।मदीयाःपितरोयेचमातृमातामहादयः।।२१।।तेषांपिंडप्रदाताहमा
गतोस्मिगयामिमां।।उदीच्यांमुंडपृष्ठस्यदेवर्षिगणपूजितं।।२२।।नाम्नाकनखलंतीर्थंत्रिषुलोकेषुविश्रुतं।।सिद्धा
नांप्रीतिजननैःपापानांचभयंकरैः।।२३।।लोलिहानैर्महाभागैर्नागैरक्ष्यतेचैवनित्यशः।।तत्रस्नात्वादिवंयांतिक्रीडं
तेभुविमानगाः।।२४।।फल्गुतीर्थेततोगच्छेन्महानद्यांस्थिरंपरं।।नगाज्जनार्दनात्कूपाद्वटाच्चोत्तरमानसात्।।२५।।
एतद्गयाशिरःप्रोक्तंफल्गुतीर्थंतदुच्यते।।मुंडपृष्ठनगाद्याश्चसारात्सारमथांतरं।।२६।।यस्मिन्फलतिश्रीगौर्वा
कामधेनुर्जलंमही।।दृष्टिरस्मादिकंयस्मात्फल्गुतीर्थंनफल्गुवत्।।२७।।फल्गुतीर्थेनरःस्नात्वादृष्ट्वादेवंगदाधरं
।।एकेनकिंनपर्याप्तंनृणांसुकृतकारिणां।।२८।।पृथिव्यांयानितीर्थानिआसमुद्रात्सरांसिच।।फल्गुतीर्थंगमिष्यं
तिवारमेकंदिनेदिने।।२९।।फल्गुतीर्थेतीर्थराजेकरोमिस्नानमादृतः।।पितृणांब्रह्मलोकाप्त्यैआत्मनोभुक्तिमुक्तये
।।३०।।स्नात्वाश्राद्धीपिंडदोथनमेद्देवंपितामहं।।कलौमाहेश्वरालोकाअतोदेवोगदाधरः।।३१।।पितामहोलिं

गरूपीतन्नौमामिमहेश्वरं॥गदाधरबलंकाममनिरुद्धंनरायणं॥३२॥ब्रह्माविष्णुनृसिंहाख्यंवराहादिनमाम्यहं॥ततोग
दाधरंदृष्ट्वाकुलानांशतमुद्धरेत्॥३३॥धर्मारण्यंद्वितीयेह्निमतंगस्याश्रमेवरे॥मतंगवाप्यांसंस्नात्वाश्राद्धदःपिंडदोभवेत्
॥३४॥मतंगेशंस्वसिद्धेशंनत्वाचेदमुदीरयेत्॥प्रमाणदेवताःसंतुलोकपालाश्चसाक्षिणः॥३५॥मयागत्यमतंगेस्मिन्पितृ
णांनिष्कृतिःकृता॥स्नानतर्पणश्राद्धादिब्रह्मतीर्थेथकूपके॥३६॥तत्कूपयोगतोमध्येश्राद्धंकुशलतोधनौ॥महाबोधि
तरुंनत्वाधर्मवान्स्वर्गलोकभाक्॥३७॥तृतीयेब्रह्मसरसिस्नानंकुर्याद्यतव्रतः॥स्नानंब्रह्मसरस्तीर्थेकरोमिब्रह्मभूतये
॥३८॥पितॄणांब्रह्मलोकायब्रह्मर्षिगणसेविते॥तर्पणश्राद्धकृत्पिंडंप्रदद्यात्प्रसेचनं॥३९॥कुर्याच्चवाजपेयार्थीब्रह्मयू
पप्रदक्षिणं॥एकोमुनिःकुंभकुशाग्रहस्तआम्रस्यमूलेसलिलंददाति॥आम्राश्चसिक्ताःपितरश्चतृप्ताएकाक्रियाद्व्यर्थकरी
प्रसिद्धा॥४०॥ब्रह्माणंचनमस्कृत्यकुलानांशतमुद्धरेत्॥फल्गुतीर्थेचतुर्थेह्निस्नात्वादेवादितर्पणं॥४१॥कृत्वाश्राद्धंस
पिंडंचगयाशिरसिकारयेत्॥पंचक्रोशंगयाक्षेत्रंक्रोशमेकंगयाशिरः॥४२॥तत्रपिंडप्रदानेनकुलानांशतमुद्धरेत्॥मुं
डपृष्ठपदंन्यस्तंमहादेवेनधीमता॥४३॥मुंडपृष्ठेगिरिःसाक्षाद्गयाशिरउदाहृतः॥साक्षाद्गयाशिरस्तत्रफल्गुतीर्थाश्रमं
कृतं॥४४॥अमृतंतत्रवहतिपितॄणांदत्तमक्षयं॥स्नात्वादशाश्वमेधेतुदृष्ट्वादेवंपितामहं॥४५॥रुद्रपादंनरःस्पृष्ट्वा
नेहभूयोभिजायते॥शमीपत्रप्रमाणेनपिंडंदत्वागयाशिरे॥४६॥नरकस्थादिवंयांतिस्वर्गस्थामोक्षमाप्नुयुः॥पायसेनाथपिंडेन
सक्तुनाचरुणातथा॥४७॥पिंडदानंतंडुलैश्चगोधूमैस्तिलमिश्रितैः॥पिंडंदत्वारुद्रपदेकुलानांशतमुद्धरेत्॥४८॥तथा
विष्णुपदेश्राद्धपिंडदोह्यृणमुक्तिकृत्॥पित्रादीनांशतकुलंस्वात्मनातारयेन्नरः॥४९॥तथाब्रह्मपदेश्राद्धीब्रह्मलोकंनये
त्पितॄन्॥दक्षिणाग्निपदेतद्वद्गार्हपत्यपदेतथा॥५०॥पदेवाहवनीयस्यश्राद्धीयज्ञफलंलभेत्॥आवसथ्यस्यचेंद्र
स्यसूर्यस्यचगणस्यच॥५१॥अगस्त्यकार्तिकेयस्यश्राद्धीतारयतेकुलं॥आदित्यस्यरथंनत्वाकर्णादित्यंनमेन्नरः
॥५२॥कनकेशपदान्यत्रगयाकेदारकंन्यसेत्॥ ॥सर्वपापविनिर्मुक्तःपितॄन्ब्रह्मपुरंनयेत्॥५३॥विशालो
पिगयाशीर्षेपिंडदोभूत्सपुत्रवान्॥विशालायांविशालोभूद्राजपुत्रोब्रवीद्द्विजान्॥५४॥कथंपुत्रादयःस्युर्मेद्विजा
ऊचुर्विशालकं॥गयायांपिंडदानेनतवसर्वंभविष्यति॥५५॥विशालोपिगयाशीर्षेपिंडदानददौनृपः॥दृष्ट्वाकाशे
सितंरक्तंपुरुषांश्चापृष्टवान्॥५६॥केयूयंतेषुचैवैकःसितःप्राहविशालकं॥अहंसितस्तेजनकइंद्रलोकंगतःशुभात्॥५७॥

ममरक्तःपितापुत्रकृष्णश्चैवपितामहः॥अवीचिनरकंप्राप्तात्वयामुक्ताःकृतावयं॥५८॥पिंडदानाद्ब्रह्मलोकंव्रजामइतितेग
ताः॥विशालःप्राप्तपुत्रादीन्राज्यंकृत्वाहरिंययौ॥५९॥प्रेतराजःसमुक्तोथवणिजंचेदमब्रवीत्॥प्रेतैःसर्वैःसहार्त्तःसन्
स्वकृतंभुज्यतेफलं॥६०॥श्रवणद्वादशीयोगेकुंभःसान्नःसोदकः॥दत्तःपुरासमध्याह्नेजीवनायोपतिष्ठति॥६१॥धनंगृ
हीत्वामेगच्छगयायांपिंडदोभव॥वणिग्धनंगृहीत्वातुगयायांपिंडदोभवत्॥६२॥प्रेतराजःसहप्रेतैर्मुक्तोनीतोहरेःपुरं॥
गयाशीर्षेपिंडदानादात्मानंस्वपितॄंस्तथा॥६३॥पितृवंशेमृतायेचमातृवंशेतथैवच॥गुरुश्वशुरबंधूनांयेचान्येबांधवामृ
ताः॥६४॥येमेकुलेलुप्तपिंडाःपुत्रदाराविवर्जिताः॥क्रियालोपगतायेचजात्यंधाःपंगवस्तथा॥६५॥विरूपाआमगर्भा
येज्ञाताज्ञाताकुलेमम॥तेषांपिंडोमयादत्तोअक्षय्यमुपतिष्ठतां॥६६॥येकेचित्प्रेतरूपेणतिष्ठंतिपितरोमम॥तेसर्वेतृप्ति
मायांतुपिंडदानेनसर्वदा॥६७॥पिंडोदेयस्तुसर्वेभ्यःसर्वैश्चकुलतारकैः॥आत्मनस्तुतथादेयोअक्षयंलोकमिच्छता॥६८॥
पंचमेह्निगदालोलेस्नायान्मंत्रेणबुद्धिमान्॥गदाप्रक्षालनेतीर्थेगदालोलेतिपावने॥६९॥स्नानंकरोमिसंसाररुगदशांत्यैज
नार्दन॥नमोक्षयवटायैवअक्षयस्वर्गदायिने॥७०॥पित्रादीनामक्षयायसर्वपापक्षयायच॥श्राद्धंवटतटेकुर्याद्ब्राह्मणानां
चभोजनं॥७१॥एकस्मिन्भोजितेविप्रेकोटिर्भवतिभोजिता॥किंपुनर्बहुभिर्भुक्तैःपितॄणांदत्तमक्षयं॥७२॥गयायामन्नदा
तायपितरस्तेनपुत्रिणः॥वटेवटेश्वरंनत्वापूजयेत्प्रपितामहं॥७३॥अक्षय्याल्लभतेलोकान्कुलानांशतमुद्धरेत्॥क्रमतोक्र
मतोवापिगयायात्रामहाफला॥७३॥इत्याग्नेयेपुमहापुराणेगयामाहात्म्यं॥ ॥अग्निरुवाच॥गायत्र्यैचमहानद्यांस्नातः
संध्यांसमाचरेत्॥गायत्र्याग्रतःप्रातःश्राद्धपिंडमथाक्षयं॥१॥मध्याह्नेचोद्यतिस्नात्वागीतवाद्यैर्ह्यणस्यच॥सावित्रींपुरतःसं
ध्यांपिंडदानंचतत्पदे॥२॥अगस्त्यस्यपदेकुर्याद्योनिद्वारंप्रविशेच्च॥निर्गतोनपुनर्योनिंप्रविशेन्मुच्यतेभवात्॥३॥बलिःका
कशिलायांचकुमारंचनमेन्नरः॥स्वर्गद्वार्यांकिसोमकुंडेवायुतीर्थेथपिंडदः॥४॥भवेदाकाशगंगायांकपिलायांचपिंडदः॥क
पिलेशंशिवंनत्वारुक्मिकुंडेचपिंडदः॥५॥कोटितीर्थेचकोटीशंनत्वामोघपदेनरः॥गदालोलेचानरकेगोप्रचारेचपिंडदः
॥६॥नत्वागावींवैतरण्यामेकविंशकुलोद्धृतिः॥श्राद्धपिंडप्रदातास्यात्क्रौंचपादेचपिंडदः॥७॥तृतीयायांविशालायांनिश्चि
रायांश्चपिंडदः॥ऋणमोक्षेपापमोक्षेभस्मकुंडेथभस्मना॥८॥स्नानकृन्मुच्यतेपापान्नमेद्देवंजनार्दनं॥एषपिंडोमयादत्तस्तवह
स्तेजनार्दन॥९॥परलोकगतेमह्यमक्षय्यमुपतिष्ठतां॥गयायांपितृरूपेणस्वयमेवजनार्दनः॥१०॥तंदृष्ट्वापुंडरीकाक्षंमुच्यते

Dr BHAU DAJI MEMORIAL

वैऋणत्रयात् ॥ मार्कंडेयेश्वरं दृष्ट्वा नत्वा गृध्रेश्वरं नरः ॥ ११ ॥ मूलक्षेत्रे महेशस्य धारायां पिंडदो भवेत् ॥ गृध्रकूटे गृध्रवटे धौतपादे च पिं
डदः ॥ १२ ॥ पुष्करिण्यां कर्दमाले रामतीर्थे च पिंडदः ॥ प्रभासेशं नमेत्प्रेतशिलायां पिंडदो भवेत् ॥ १३ ॥ दिव्यांतरिक्षभूमिष्ठाः पितरो
बांधवादयः ॥ प्रेतादिरूपा मुक्ताः स्युः पिंडैर्दत्तैर्मया खिलाः ॥ १४ ॥ स्थानत्रये प्रेतशिला गयाशिरसि पावना ॥ प्रभासे प्रेतकुंडे च
पिंडदस्तारयेत्कुलं ॥ १५ ॥ वशिष्ठेशं नमस्कृत्य तदग्रे पिंडदो भवेत् ॥ गयानाभौ सुषुम्नायां महाकोष्ठ्यां च पिंडदः ॥ १६ ॥ गदाधराग्रतो
मुंडपृष्ठे देव्याश्च सन्निधौ ॥ मुंडपृष्ठं नमेत्पादौ क्षेत्रपालादिसंयुतं ॥ १७ ॥ पूजयित्वा भयं न स्याद्विषरोगादिनाशनं ॥ ब्रह्माणं च नम
स्कृत्य ब्रह्मलोकं नयेत्कुलं ॥ १८ ॥ सुभद्रां बलभद्रं च प्रपूज्य पुरुषोत्तमं ॥ सर्वकामसमायुक्तः कुलमुद्धृत्य नाकभाक् ॥ १९ ॥ माधवं पू
जयित्वा च देवो वैमानिको भवेत् ॥ महालक्ष्मीं प्रार्च्य गौरीं मंगलां च सरस्वतीं ॥ २० ॥ पितॄनुद्धृत्य स्वर्गस्थो भुक्तभोगोत्र शास्त्रधीः ॥
द्वादशादित्यमभ्यर्च्य वह्निमेवतमेंद्रकं ॥ रोगादिमुक्तः स्वर्गी स्याच्छ्रीकपर्दिविनायकं ॥ प्रपूज्य कार्तिकेयं च निर्विघ्नः सिद्धिमाप्नु
यात् ॥ २२ ॥ सोमनाथं च कालेशं केदारं प्रपितामहं ॥ सिद्धेश्वरं च रुद्रेशं रामेशं ब्रह्मकेश्वरं ॥ २३ ॥ अष्टलिंगानि गुह्यानि पूजयि
त्वाथ सर्वभाक् ॥ नारायणं वराहं च नारसिंहं नमेच्छ्रिये ॥ २४ ॥ ब्रह्मविष्णुमहेशाख्यं त्रिपुरघ्नमशेषदं ॥ सीतारामं च गरुडं वामनं
संप्रपूज्य च ॥ २५ ॥ सर्वकामानवाप्नोति ब्रह्मलोकं नयेत्पितॄन् ॥ सदेवैः सार्धं संप्रपूज्य देवमादिगदाधरं ॥ २६ ॥ ऋणत्रय
विनिर्मुक्तस्तारयेत्सकुलं कुलं ॥ देवरूपा शिला पुण्या तस्माद्देवमयी शिला ॥ २७ ॥ गयायां नहि तत्स्थानं यत्र तीर्थं न
विद्यते ॥ यन्नाम्ना पातयेत्पिंडं तं नयेद्ब्रह्म शाश्वतं ॥ २८ ॥ फल्ग्वीशं फल्गुचंडीं च प्रणम्यांगारकेश्वरं ॥ मतंगस्य पदे श्राद्धी भ
रताश्रमके भवेत् ॥ २९ ॥ हंसतीर्थे कोटितीर्थे यत्र पांडुशिलां नदः ॥ तत्र स्यादग्निधारायां मधुस्रवसि पिंडदः ॥ ३० ॥
इंद्रेशं किलिकलेशं नमेद्वृद्धिविनायकं ॥ पिंडदो धेनुकारण्ये पदे धेनोर्नमेच्च गां ॥ ३१ ॥ सर्वान्पितॄंस्तारयेच्च सरस्वत्यां च पिंडदः ॥
संध्यामुपास्य सायाह्ने नमेद्देवीं सरस्वतीं ॥ ३२ ॥ त्रिसंध्यकृद्भवेद्विप्रो वेदवेदांगपारगः ॥ गयां प्रदक्षिणीकृत्य गयावि
प्रान्प्रपूज्य च ॥ ३३ ॥ अन्नदानादिकं सर्वं कृतं तत्राक्षयं भवेत् ॥ स्तुत्वा संप्रार्थयेद्देवमादिदेवं गदाधरं ॥ ३४ ॥ ग
दाधरं गयावासं पित्रादीनां गतिप्रदं ॥ धर्मार्थकाममोक्षार्थं योगदं प्रणमाम्यहं ॥ ३५ ॥ देहेंद्रियमनोबुद्धिप्राणा
हंकारवर्जितं ॥ नित्यशुद्धं बुद्धियुक्तं सत्यं ब्रह्म नमाम्यहं ॥ ३६ ॥ आनंदमद्वयं देवं देवदानववंदितं ॥ देवदेवीवृंदयु
तं सर्वदा प्रणमाम्यहं ॥ ३७ ॥ कलिकल्मषकालार्तिदमनं वनमालिनं ॥ पालिताखिललोकेशं कुलोद्धरणमानसं ॥ ३८ ॥

व्यक्ताव्यक्तविभक्तात्माविभक्तात्मानमात्मनि ॥ स्थितं स्थिरतरं सारं वंदे घोराघमर्दनं ॥ ३९ ॥ आगतोस्मि गयां देव पि
तृकार्ये गदाधर ॥ त्वं मे साक्षी भवाद्येह अनृणोहमृणत्रयात् ॥ ४० ॥ साक्षिणः संतु मे देवा ब्रह्मेशानादयस्तथा ॥ मया गयां
समासाद्य पितॄणां निष्कृतिः कृता ॥ ४१ ॥ गयामाहात्म्यपठनाच्छ्राद्धादौ ब्रह्मलोकभाक् ॥ पितॄणामक्षयं श्राद्धं मक्ष
यं ब्रह्मलोकदं ॥ ४२ ॥ ॥ इत्याग्नेये महापुराणे गयामाहात्म्यं ॥ ॥ अग्निरुवाच ॥ कात्यायनो मुनीनाह यथा श्राद्धं
तथा वदे ॥ गयादौ श्राद्धं कुर्वीत संक्रांत्यादौ विशेषतः ॥ १ ॥ काले वापरपक्षे च चतुर्थ्यां ऊर्ध्वमेव वा ॥ संपाद्य च पदर्क्षे च पू
र्वेद्युश्च निमंत्रयेत् ॥ २ ॥ यतीन्गृहस्थसाधून्वा स्नातकाञ्छ्रोत्रियान्द्विजान् ॥ अनवद्यान्कर्मनिष्ठाञ्छिष्यानाचा
रसंयुतान् ॥ ३ ॥ वर्जयेच्छ्वित्रिकुष्ठ्यादीन्न गृह्णीयान्निमंत्रितान् ॥ स्नातानाशुचीं तथा दांतान्प्राङ्मुखान्दैवक
र्मणि ॥ ४ ॥ उपवेशयेत्त्रीन्पित्र्ये एकैकमुभयत्र वा ॥ एवं मातामहादेश्च शाकैरपि च कारयेत् ॥ ५ ॥ तदह्नि ब्रह्मचारी स्या
दकोपोत्वरितो मृदुः ॥ सत्योप्रमत्तोनध्वन्यो अस्वाध्यायश्च वाग्यतः ॥ ६ ॥ सर्वांश्च पंक्तिमूर्धन्यान्पृच्छेत्प्रश्ने तथासने ॥ दर्भा
नास्तीर्य द्विगुणान्पित्र्ये देवादिकं चरेत् ॥ ७ ॥ विश्वान्देवानावाहयिष्ये पृच्छेदावाहयेति च ॥ विश्वेदेवास आगत्य विकीर्या
थ यवाञ्जपेत् ॥ ८ ॥ विश्वेदेवाः शृणुतेमं पितॄनावाहयिष्यतः ॥ पृच्छेदावाहयेत्युक्ते उशंतस्त्वा समाह्वयेत् ॥ ९ ॥ तिलान्
विकीर्याथ जपेदाह त्वित्यादि पात्रके ॥ सपवित्रे निषिंचेद्धं शन्नोदेवीति तत्र च ॥ १० ॥ यवोसीति यवान्दत्वा पित्र्ये सर्वत्र
वै तिलान् ॥ तिलोसि सोमदेवत्यो गोसवे देवनिर्मितः ॥ ११ ॥ प्रत्नमद्भिः स्वधा पितॄँल्लोकान्प्रीणयाहि नः स्वधेति ॥ श्रीश्च
तेति दद्यात्पुष्पं पात्रे हैमे थ राजके ॥ १२ ॥ औदुंबरे वा खड्गे वा पूर्णपात्रे प्रदक्षिणं ॥ देवानामपसव्यं तु पितॄणां सव्यमाचरेत्
॥ १३ ॥ एकैकस्मै केकेनसा पवित्रकरेषु च ॥ या दिव्या आपः पयसा संबभूवुर्या अंतरिक्षा उत पार्थिवीर्या हिरण्यवर्णा या
ज्ञियास्ता न आपः शिवाः स्योनाः सुहवा भवंतु ॥ विश्वेदेवास एषोर्घः स्वाहा च पितरेषते ॥ स्वधेमं पितामहादेः संस्रवान्प्रथमे
चरेत् ॥ १४ ॥ पितृभ्यः स्थानमसीत्युक्त्वा न्यसेदशंकरोस्य धः ॥ अत्र गंधपुष्पधूपदीपाच्छादनदानकं ॥ १५ ॥ घृताक्तमन्नमुद्धृ
त्य पृच्छेत्सग्नौ करिष्यतः ॥ कुरुष्वेत्यभ्यनुज्ञातो जुहुयात्साग्निकोऽनले ॥ १६ ॥ अनग्निकः पितृहस्ते सपवित्रे तु मंत्रतः
॥ अग्नये कव्यवाहनाय स्वधेति प्रथमाहुतिः ॥ १७ ॥ सोमाय पितृमते स्वधा नम इत्यपरे ॥ हुतशेषं चान्नपात्रे दत्वा पा
त्रं समालभेत् ॥ १८ ॥ पृथिवीते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा ॥ १९ ॥ जपेदिदं विष्णुरित्य

र्थं द्विजांगुष्टं निवेशयत् ॥ अपहतेति च तिलान् विकीर्याग्नं प्रसर्पयेत् ॥ २० ॥ जुषध्वमिति चोक्त्वाथ गायत्र्यादि ततो जपेत् ॥ देव
ताभ्य पितृभ्यश्च महायोगीभ्य एव च ॥ २१ ॥ नमस्स्वाहायै स्वधायै नित्यमेव नमो नमः ॥ तृप्तान् ज्ञात्वाथ विकिरेद्दर्भे दद्यात् सकृ
त्सकृत् ॥ २२ ॥ गायत्रीं पूर्ववज्जप्त्वा मधुमध्विति वै जपेत् ॥ तृप्ताः स्थ इति स पृच्छेत् तृप्ताः स्म इति वै वदेत् ॥ २३ ॥ शेषमन्नमनु
ज्ञाप्य सर्वमन्नमथैकतः ॥ उधृत्योच्छिष्टपार्श्वे तु कृत्वा चैवावनेजनं ॥ २४ ॥ दद्यात्कुशेषु त्रीन् पिंडानाचांतेषु परे जगुः ॥ आ
चांतेषु उदकं पुष्पाण्यक्षतानि प्रदापयेत् ॥ २५ ॥ अक्षय्योदकमेवाथ आशिषः प्रार्थयेन्नरः ॥ अघोराः पितरः संतु गोत्रं नो वर्द्धतां
सदा ॥ २६ ॥ दातारो नोभिवर्द्धंतां वेदाः संततिरेव च ॥ श्रद्धा च नो मा व्यगमद्बहुदेयं च नोस्त्विति ॥ २७ ॥ अन्नं च नो बहु भवेदतिथींश्च
लभेमहि ॥ याचितारश्च नः संतु मा याचिष्म कंचन ॥ २८ ॥ स्वधावाचनीयान् कुशानास्तीर्य पवित्रकान् ॥ स्वधां वाच
च्य	यिष्ये पृच्छेदनुज्ञातश्च वाच्यतां ॥ २९ ॥ पितृभ्यः पितामहेभ्यः प्रपितामहेभ्य स्वके ॥ स्वधोच्यतामस्तु स्वधा तस्य चानंतरेषु च
॥ ३० ॥ आपो निषिंचेदुत्तानं पात्रं कृत्वाथ दक्षिणां ॥ यथाशक्ति प्रदद्याच्च दैवे पित्र्येथ वाचयेत् ॥ ३१ ॥ विश्वेदेवाः प्रीयतां च वा
जे वाजे विसर्जयेत् ॥ आमा वाजस्यानुव्रज्य कृत्वा विप्रान् प्रदक्षिणां ॥ ३२ ॥ गृहे विशेदमावास्यां मासि मासि च वत्तथा ॥ ए
कोद्दिष्टं प्रवक्ष्यामि श्राद्धं पूर्ववदाचरेत् ॥ ३३ ॥ एकं पवित्रमेकार्घ एकपिंडं प्रदापयेत् ॥ नावाहनाग्नौ करणं विश्वेदेवा
न्वात्र ह ॥ ३४ ॥ तृप्तिप्रश्ने स्वदितमिति वदेत् स्वदितं द्विजः ॥ उपतिष्ठतामित्यक्षय्ये विसर्गे चाभिरम्यतां ॥ ३५ ॥ अ
भिरताः स्म इत्यपरे शेषं पूर्ववदाचरेत् ॥ सपिंडीकरणं वक्ष्ये आचांते मध्यतो पिवा ॥ ३६ ॥ पितृणां त्रीणि पात्राणि एकं
प्रेतस्य पात्रकं ॥ सपवित्राणि चत्वारि तिलपुष्पयुतानि च ॥ ३७ ॥ गंधोदकेन युक्तानि पूरइत्वाभिषिंचिति ॥ प्रेतपात्रं पि
तृपात्रे समानाइति द्वे जयात् ॥ ३८ ॥ पूर्ववत्पिंडदानानि प्रेतानां पितृतां भवेत् ॥ तृप्तप्रश्ने स्वस्ति संपन्नं संपन्नं वदेद्द्वि
जः ॥ ३९ ॥ जपेत् पितृमंत्रवर्ज्जं पूर्वाह्णे तत्प्रदक्षिणं ॥ उपचारास्त्रजुकुशास्तिलार्थाश्च यवैरिह ॥ ४० ॥ तृप्तप्रश्ने स्वस्ति संप
न्नं स्वसंपन्नं वदेद्द्विजः ॥ दध्यक्षतबदरैवाय पिंडान् नांदिमुखान् पितॄन् ॥ ४१ ॥ आवाहयिष्ये पिपृच्छेच्च प्रीयंतामिति चाक्ष
ये ॥ नांदिमुखाश्च पितरो वाचयिष्येथ पृच्छति ॥ ४२ ॥ नांदीमुखान् पितृगणान् प्रीयतामित्यथो वदेत् ॥ नांदिमुखा
श्च पितरस्तत्पितामहः ॥ ४३ ॥ मातामहप्रमातामहावृद्धप्रमातृकामहाः ॥ स्वधाकारं न युंजीत युग्मान् विप्रांश्च
भोजयेत् ॥ ४४ ॥ तृप्तिं वक्ष्ये पितॄणां च ग्राम्यैरोमधिभिस्तथा ॥ मासतृप्तिस्तथारण्यैः कंदमूलफलादिभिः ॥ ४५ ॥

मत्स्यैर्मासद्वयं मार्गैस्त्रयं वैशागलेन च ॥ चतुरो रौरवेणाथ पंच षट् स्थागलेन च ॥ ४६ ॥ कूर्मेण सप्त चाष्टौ च वराहेण नवैव
तु ॥ मेषमांसेन दश च माहिषैः पार्षतैः शिवैः ॥ ४७ ॥ संवत्सरं तु गव्येन पयसा पायसेन वा ॥ वार्ध्रीणसस्य मांसेन तृ
प्तिर्द्वादशवार्षिकी ॥ ४८ ॥ खड्गमांसं कालशाकं लोहितच्छागको मधु ॥ महाशल्काश्च वर्षास्तु माघश्चात्यमथाक्ष
यं ॥ ४९ ॥ मंत्राध्यायाग्निहोत्री च शाखाध्यायी षडंगवित् ॥ त्रिनाचिकेतस्त्रिमधुर्धर्मद्रोणस्य पाठकः ॥ ५० ॥ त्रिसुप
र्णी ज्येष्ठसामज्ञानी स्युः पंक्तिपावनाः ॥ काम्यानां कल्पमाख्यास्ये प्रतिपत्सु धनं बहु ॥ ५१ ॥ स्त्रियः परा द्वितीयायां
चतुर्थ्यां धर्मकामदः ॥ पंचम्यां पुत्रकामस्तु षष्ठ्यां च श्रैष्ठ्यभाग्यपि ॥ ५२ ॥ कृषिभागी च सप्तम्यामष्टम्यामर्थलाभ
कः ॥ नवम्यां चैकशफपतिर्दशम्यां गोगणो भवेत् ॥ ५३ ॥ एकादश्यां परीवारो द्वादश्यां धनधान्यकं ॥ ज्ञातिश्रैष्ठ्यं त्रयो
दश्यां चतुर्दश्यां च शास्त्रतः ॥ ५४ ॥ मृतानां श्राद्धं सर्वाभिममावास्यां समीरितं ॥ सप्तव्याधा दशारण्ये मृगाः कालं
जने गिरौ ॥ ५५ ॥ चक्रवाकाः सरद्वीपे हंसाः सरसि मानसे ॥ तेपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः ॥ ५६ ॥ प्रस्थि
ता दूरमध्वानं यूयं तेभ्योवसीदतः ॥ श्राद्धादौ पठिते श्राद्धं पूर्णं स्याद्ब्रह्मलोकदं ॥ ५७ श्राद्धं कुर्याच्च पुत्रादिः पितुर्जी
वति तेपितुः ॥ तस्मिन्तत्पितुः कुर्याज्जीवति प्रपितामहे ॥ ५८ ॥ पितुः पितामहस्याथ परस्य प्रपितामहान् ॥ एवं मात्रा
दिकस्यापि तथा मातामहादिके ॥ ५९ ॥ श्राद्धकल्पं पठेत् यस्तु स लभेत् श्राद्धकृत्फलं ॥ तीर्थे युगादौ मन्वादौ श्राद्धं दत्त
मथाक्षयं ॥ ६० ॥ अश्वयुक्कृष्णनवमी द्वादशी कार्त्तिकी तथा ॥ तृतीया चैव माघस्य तथा भाद्रपदस्य च ॥ ६१ ॥ फाल्गु
नस्याप्यमावास्या पुष्यस्यैकादशी तथा ॥ आषाढस्यापि दशमी माघमासस्य सप्तमी ॥ ६२ ॥ श्रावणे चाष्टमी कृष्णा त
थाषोडशपौर्णिमा ॥ कार्त्तिकी फाल्गुनी तद्वत् ज्येष्ठे पंचदशी शिता ॥ ६३ ॥ स्वायंभुवाद्या मनवस्तेषामाद्याः कि
लाः क्षयाः ॥ गया प्रयाग गंगा च कुरुक्षेत्रं च नर्मदा ॥ ६४ ॥ श्रीपर्वतः प्रभासश्च शालग्रामो वाराणसी ॥ गोदावरी
तेषु श्राद्धं श्रीपुरुषोत्तमादिषु ॥ ६५ ॥ ॥ इत्याग्नेयपुराणे श्राद्धकल्पः ॥ अग्निप्र॥ उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव द
क्षिणे ॥ वर्षं तद्भारतं नाम नवसाहस्रविस्तृतं ॥ १ ॥ कर्मभूमिरियं स्वर्गमपवर्गं च गच्छतां ॥ महेंद्रो मलयः सह्यः
शुक्तिमान् हेमपर्वतः ॥ २ ॥ विंध्यश्च पारिपात्रश्च सप्तात्र कुलपर्वताः ॥ इंद्रद्वीपः कसेरुश्च ताम्रवर्णो गभस्तिमान् ॥ ३ ॥

मर्यादाशैलमेगो धश्चंद्रो नारददुंदुभी ॥सोमकः स्कमनाः शैलो वैभ्राजस्तजनाः शुभाः ॥४॥ नद्यः प्रधानाः सप्तात्र प्लक्ष
छिकांतिकेषुच ॥ नागद्वीपस्थसौम्योगांधर्वरूपथवारुणः ॥ अयंतु नवमस्तेषांद्वीपः सागरसंवृतः ॥४॥ योजनानांस
हस्राणि द्वीपोयंदक्षिणोत्तरात् ॥ नवभेदाभारतस्य मध्यभेदेथ पूर्वतः ॥५॥ किरातायवनाश्चापि ब्राह्मणाद्याश्चम
ध्यतः ॥ वेदस्मृतिमुखा नद्यः पारिपात्रोद्भवास्तथा ॥६॥ विंध्याश्च नर्मदाद्यास्युः सह्यात्तापीपयोष्णिका ॥ गोदावरी
भीमरथी कृष्णा वेण्यादिकास्तथा ॥७॥ मलयात्कृतमाला द्यास्त्रियामाद्यामहेंद्रजाः ॥ कुमाराद्याः शुक्तिमतो हि
माद्रेश्चंद्रभागकाः ॥ पश्चिमे कुरुपांचालमध्यदेशादयः स्थिताः ॥८॥ ॥इत्याग्नेये महापुराणे जंबूद्वीपव० ॥ ॥
अग्निरुवाच ॥ लक्षयोजनविस्तारं जंबूद्वीपं समावृतं ॥ लक्षयोजनमानेन क्षारोदेन समंततः ॥१॥ संवेष्ट्य क्षारमुदधिं
प्लक्षद्वीपस्तथा स्थितः ॥ सप्त मेधातिथेः पुत्राः प्लक्षद्वीपेश्वरास्तथा ॥२॥ स्याच्छांतभयशिशिरः स्करवोदय इतः परः ॥
आनंदश्च शिवः क्षेमो ध्रुवस्तन्नाम वर्षकं ॥३॥ मर्यादाशैलमेगोंधश्चंद्रो नारददुंदुभी ॥ सोमकः स्कमनाः शैलो वैभ्रा
जस्तजनाः शुभाः ॥४॥ नद्यः प्रधानाः सप्तात्र प्लक्षाच्छिकांतिकेषुच ॥ जीवनं पंचसाहस्रं धर्मो वर्णाश्रमात्मकः ॥५
अर्यकाः कुरवश्चैव विविंशो भाविनः स्थिते ॥ विप्राद्यास्तैश्च सोमो वै द्विलक्षश्चैव प्लक्षकः ॥६॥ तेक्षुरसोदवस्तेन वृतो
द्विगुणशाल्मलः ॥ वपुष्मतः सप्तपुत्राः शाल्मलेयास्तथाभवन् ॥७॥ श्वेतोथ हरितश्चैव जीमूतो लोहितः क्रमात् ॥ वैद्यु
तो मानसश्चैव स्कप्रभो नाम वर्षकः ॥८॥ द्विगुणो द्विगुणेनैव स्करोदेन समावृतः ॥ कुमुदश्चानलश्चैव तृतीयस्तु बलाहकः
॥९॥ द्रोणः कंकोथ महिषः कुकुद्मान् सप्त निम्नगाः ॥ कपिलाश्चारुणाः पीनाः कृष्णास्युः ब्राह्मणादयः ॥१०॥ वायुरू
पं यजंतस्म स्करोदेनायमावृतः ॥ ज्योतिष्मतः कुशोस्या[?]रुद्भिदो वेणुमान्सुतः ॥११॥ श्वैरथो लंबरो द्वैर्यः कपिलः स
व्यभाकरः ॥ विप्राद्याद्दमिमुख्यास्तु ब्रह्मरूपं जयंति ते ॥१२॥ कुशामा हेमशैलश्च द्युतिमान् पुष्पवांस्तथा ॥ कुशे
शयो हरिः शैला वर्षार्थमंतरानलः ॥१३॥ वेष्टितोयं घृतोदेन क्रौंचद्वीपेन सोप्यथ ॥ क्रौंचे चेश्वराद्युतिमतः पुत्रास्त
न्नामवर्षकाः ॥१४॥ कुशलो मनुन्नटाश्चोष्णः पीवरोप्यंधकारकः ॥ मुनिश्च दुंदुभिः सप्त सप्त शैलाश्च निम्नगाः

॥१५॥ क्रौंचश्च वामनश्चैव तृतीयश्चांधकारकः ॥ देवावृत्पुंडरीकश्च दुंदुभिर्द्विगुणो मिथः ॥१६॥ द्वीपाद्वीपेषु ये शैला
यथा द्वीपेनि तेन तथा ॥ पुष्कराः पुष्कला धान्याः स्तिष्याधिप्रादयो हरिं ॥१७॥ यजंति क्रौंचद्वीपस्तु दधिमंडोदकावृतः
॥ संवृतः शाकद्वीपेन भव्या च्छाकेश्वरास्सुताः ॥१८॥ जलदश्च कुमारश्च सुकुमारो मणीचकः ॥ कुसुमोत्तरः स
मोदाकि द्रुमस्तन्नामवर्षकाः ॥१९॥ उदयाख्यो जलधरो रैवतः श्यामकोद्रकौ ॥ आम्बिकेयस्तथा रम्यः केशरी सप्त नि
म्नगाः ॥२०॥ मगामगधमानस्यामंदगाश्च द्विजादयः ॥ यजंति सूर्यरूपं तु शाकः क्षीराब्धिनावृतः ॥२१॥ पुष्करेणा
वृतः सोपि द्वौ पुत्रौ सवनस्य च ॥ महावीतो धातकीश्च वर्षे द्वे नाम चिह्निते ॥२२॥ एको द्रिर्मानसाख्योत्र मध्यतो वल
याकृतिः ॥ योजनानां सहस्राणि विस्तरोच्छ्रयतः समः ॥२३॥ जीवनं दशसाहस्रं सुरै ब्रह्मात्र पूज्यते ॥ स्वादूदकेन
दधिना वेष्टितो द्वीपमानतः ॥२४॥ ऊनातिरिक्तता चापां समुद्रेषु न जायते ॥ उदयास्तमनेष्विंदोः पक्षयोः शुक्लकृष्ण
योः ॥२५॥ दशोत्तराणि पंचैव अंगुलानां शतानि वै ॥ अपां वृद्धिक्षयौ दृष्टौ सामुद्रीणां महामुने ॥२६॥ स्वादूदका
त्तु त्रिगुणा भूर्हैमी जंतुवर्जिता ॥ लोकालोकस्ततः शैलो योजनायुतविस्तृतः ॥२७॥ लोकालोकस्तु तमसावृतो
थांडकटाहतः ॥ भूमिः सांडकटाहेन पंचाशत्कोटिविस्तरा ॥२८॥ ॥इत्याग्नेये महापुराणे द्वीपादिवर्णनं ॥
अग्निरुवाच ॥ विस्तारस्तस्मतो भूमेः सहस्राणि च सप्ततिः ॥०॥ उच्छ्रायो दशसाहस्रं पातालं चैवमेककं ॥१॥
अतलं वितलं चैव नितलं च गभस्तिमत् ॥ महाख्यं सुतलं चाग्र्यं पातालं चापि सप्तमं ॥२॥ कृष्णपीतारुणाः शुक्लश
र्कराशैलकांचनाः ॥ भूमयस्तेषु रम्येषु संति दैत्यादयः सुखं ॥३॥ पातालानामधश्चास्ते शेषो विष्णुश्च तामसः ॥
गुणानंत्यात्स चानंतः शिरसा धारयेन्महीं ॥४॥ भुवोधो नरका नैके न पतेत्तत्र वैष्णवाः ॥ रविणाभासिता पृ
थ्वी यावत्तावन्नभो मतं ॥ भूमेर्योजनलक्षं तु वसिष्ठ रविमंडलं ॥ रवेर्लक्षेण चंद्रस्य लक्षान्नाक्षत्रमिंदुतः ॥६॥
द्विलक्षो भाद्बुधश्चास्ते बुधात्शुक्रो द्विलक्षतः ॥ द्विलक्षेण कुजः शुक्रात्भौमाद्द्विलक्षतो गुरुः ॥७॥ गुरोः
द्विलक्षतः शौरिर्लक्षात्सप्तऋषयः शनेः ॥ लक्षाद्ध्रुवो ऋषिभ्यस्तु त्रैलोक्यं चोच्छ्रयेण च ॥८॥ ध्रुवात्कोट्या मह
र्लोको यत्र ते कल्पवासिनः ॥ जनो द्विकोटिकस्मात्याश्रासन् सनकादयः ॥९॥ जनात्तपश्चाष्टकोट्यावैरा

नायत्रदेवताः॥षण्णवत्यातुकोटीनांतपसःसत्यलोकतः॥१०॥अपुनर्मारकायत्रब्रह्मलोकेहिसस्मृतः॥पादग
म्यस्तुभूर्लोकोभुवःसूर्यांतरःस्मृतः॥११॥स्वर्गलोकोध्रुवांतस्तुनियुतानिचतुर्दश॥एतदंडकटाहेनवृतोब्र
ह्माडविस्तरः॥१२॥वारिवह्न्यनिलाकाशैस्ततोभूतादिनाबहिः॥वृतंदशगुणेरंडभूतादिर्महतातथा॥१३॥दशो
त्तराण्यशेषाणिएकैकस्मान्महामुने॥महांतंचसमावृत्यप्रधानंसमवस्थितं॥१४॥अनंतस्यनतस्यांतःसंख्या
नंनापिविद्यते॥हेतुभूतमशेषस्यप्रकृतिःसापरामुने॥१५॥असंख्यातानिचांडानितत्रजातानिचेदृशां॥दारु
ण्यग्निर्यथातैलंतिलेतद्वत्पुमानिति॥१६॥प्रधानेचस्थितोव्यापीचेतनात्मात्मवेदनः॥प्रधानंचपुमांश्चैवसर्वभूता
त्मभूतया॥१७॥विष्णुशक्त्यामहाप्राज्ञवृतौसंश्रयधर्मिणौ॥तयोःसैवपृथग्भावेकारणंसंश्रयस्यच॥१८॥
क्षोभकारणभूतश्चसर्गकालेमहामुने॥यथाशैत्यंजलेवातोबिभर्तिकणिकागतं॥१९॥जगच्छक्तिस्तथाविष्णोः
प्रधानप्रतिपादकं॥विष्णुशक्तिंसमासाद्यदेवाद्याःसंभवंतिहि॥२०॥सचविष्णुःस्वयंब्रह्मयतःसर्वमिदंजग
त्॥योजनानिसहस्राणिभास्करस्यरथोनव॥२१॥ईशादंडस्तथैवास्यद्विगुणोमुनिसत्तम॥सार्धकोटिस्त
थासप्तनियुतान्यधिकानिवै॥२२॥योजनानांतुतस्याक्षस्तत्रचक्रंप्रतिष्ठितं॥त्रिनाभिमतिपंचारषण्नेमिथ्य
क्षयात्मकं॥२३॥संवत्सरमयेकृत्स्नेकालचक्रंप्रतिष्ठितं॥चत्वारिंशत्सहस्राणिद्वितीयाक्षोविवस्वतः॥२४॥पं
चान्यानितुसार्धानिस्यंदनस्यमहामते॥अक्षप्रमाणमुभयोःप्रमाणंतद्युगार्धयोः॥२५॥ह्रस्वाक्षस्तद्युगार्धंच
ध्रुवाधारंरथस्यवै॥हयाश्चसप्तछंदांसिगायत्र्यादीनिसुव्रतः॥२६॥उदयास्तमनंज्ञेयंदर्शनादर्शनंरवेः॥यावन्मा
त्रप्रदेशेतुवसिष्ठावस्थितोध्रुवः॥२७॥स्वयमायातिनाशुक्तभूमेराभूतसंप्लवे॥उर्ध्वोत्तरऋषिभ्यस्तुध्रुवोयत्रव्य
वस्थितः॥२८॥एतद्विष्णुपदंदिव्यंतृतीयंव्योम्निभास्वरं॥निर्धूतदोषपंकानांयतीनांस्थानमुत्तमं॥२९॥त
तोगंगाप्रभवतिस्मरणात्पापनाशनी॥दिविरूपंहरेर्ज्ञेयंशिशुमाराकृतिप्रभो॥३०॥स्थितःपुच्छेध्रुवस्तत्र
भ्रमन्भ्रामयतिग्रहान्॥सरथोधिष्ठितोदेवैरादित्यैऋषिभीरवेः॥३१॥गंधर्वैरप्सरोभिश्चग्रामणीसर्पराक्ष
सैः॥हिमोष्णवारिवर्षाणांकारणंभगवान्रविः॥३२॥ऋग्वेदादिमयोविष्णुःसशुभाशुभकारणं॥रथस्त्रि
चक्रःसोमस्यकुंदाभास्तत्रवाजिनः॥३३॥वामदक्षिणतोयुक्तादशतेनचरत्यसौ॥त्रयःत्रिंशत्सहस्राणित्रयःत्रिंश
च्छतानिच॥३४॥त्रयस्त्रिंशत्तथादेवाःपिबंतिक्षणदाकरं॥एकांकलांचपितरएकामारश्मिसंस्थिताः॥३५॥वाय्वग्नि
द्रव्यसंभूतोरथश्चंद्रसुतस्यच॥अष्टाभिस्तुरगैर्युक्तोबुधस्तेनचरत्यपि॥३६॥शुक्रस्यापिरथोष्टाश्वोभौमस्यापिरथस्त
था॥बृहस्पतेरथोष्टाश्वःशनेरष्टाश्वकोरथः॥३७॥स्वर्भानोश्चरथोष्टाश्वःकेतोश्चाष्टाश्वकोरथः॥एतद्धिवैष्णवंका
यस्ततोविप्रवसुंधरा॥३८॥पद्माकारसमुद्भूतापर्वताद्यादिसंयुता॥ज्योतिर्भुवननद्यद्रिसमुद्रवनकंहरिः॥३९॥यदस्ति
नास्तितद्विष्णुर्विष्णुज्ञानविजृंभितं॥भवेज्ज्ञानमृतेकिंचिज्ज्ञानंविष्णुःपरंपदं॥४०॥तत्कुर्यात्स्वेनविष्णुःस्यात्तत्सत्यंज्ञा
नमनंतकं॥पठेद्भुवनकोशंहियःसोवाप्तकृतात्मभाक्॥४१॥ज्योतिःशास्त्रादिविद्याश्चशुभाशुभधियांहरिः॥४२॥
इत्याग्नेयेमहापुराणेभुवनकोशः॥ ॥अग्निरुवाच॥ज्योतिःशास्त्रंप्रवक्ष्यामिशुभाशुभविवेकदं॥चातुर्लक्षस्य
सारंयत्तत्ज्ञात्वासर्वविद्भवेत्॥१॥षट्कोष्टकेविवाहोनचद्विद्वादशेस्त्रियाः॥नत्रिकोणेह्यथप्रीतिःशेषेचस
मसप्तके॥२॥द्विर्द्वादशेत्रिकोणेचमैत्रीक्षेत्रपयोर्यदि॥भवेदेकाधिपत्यंचतारावस्त्रीनिरथोपिवा॥३॥अथापिकार्यः
संयोगोनतुषट्काष्टकेपुनः॥जीवभंगोचास्तिमितेम्रियतेचपुमान्स्त्रियाः॥४॥गुरुक्षेत्रगतेसूर्येसूर्यक्षेत्रगतेगुरौ
विवाहंनप्रशंसंतिकन्यावैधव्यकृद्भवेत्॥५॥अतिचारेत्रिपक्षंस्यात्वक्रेमासचतुष्टयं॥प्रनोद्वाहोनकुर्वीतगुरु
वक्रातिचारयोः॥चैत्रेपौषेतुरिक्तासुहरौसुप्तेकुजेरवौ॥चंद्रक्षयेचाशुभंस्यात्संध्याकालःशुभावहः॥७॥रोहि
णीचोत्तरामूलंस्वातीहस्तोथरेवति॥मूलेतिमिथुनेशस्तोविवाहःपरिकीर्तितः॥८॥विवाहेकर्णवेधेचव्रतेपुं
सवनेतथा॥प्राशनेचाद्यचूडायांविद्धर्क्षंचविवर्जयेत्॥९॥श्रावणेमूलपुष्येचसूर्यमंगलजीवके॥कुंभेसिंहेचमि
थुनेकर्मपुंसवनंस्मृतं॥१०॥हस्तेमूलेमृगेपौष्णबुधशुक्रेचनिकृतिः॥अर्केंदुजीवभृगुजेमूलेतांबूलभक्षणं॥११॥
अन्नस्यप्राशनंशुक्रेजीवेमृगेचमीनके॥हस्तादिपंचकेपुष्येकृत्तिकादित्रयंतथा॥१२॥अश्विन्यामथरेवत्यांनवान्नफलभक्षणं
॥पुष्यंहस्तंतथाज्येष्ठांरोहिणींश्रवणाश्विनौ॥१३॥स्वातिसौम्यंचभैषज्यंकुर्यादन्यत्रवर्जयेत्॥पूर्वात्रयंमघायाम्यंपावनंश्रवण
त्रयं॥१४॥भौमादित्यशनैर्वारःस्नानव्यंरोगमुक्तितः॥पार्थिवंचाष्टह्रींकारमध्येनामदिक्षुच॥१५॥ह्रीपुटंपार्थिवंदिक्षुविदिक्षु

ह्रीं लिखेद्दुमनं॥गोरोचनाकुंकुमेन भुजे वस्त्र गणेवृतं॥१६॥शत्रवो वशमायांति मंत्रेणानेन निश्चितं॥ॐ ह्रीं संपुटं नामश्री
ह्रीं यत्राष्टाकक्रमात्॥१७॥गोरोचनाकुंकुमेन भूर्ज्येथ सभगाध्यते॥गोमध्यावागमः पुत्रि हरिद्रायारसेनच॥१८॥शिलापट्टे रीसं
भयतिभूमावधेस्क सीकृतं॥१॥ॐ भूंसः संपुष्टाभाम ॐ भूंसः पुत्राष्टकैक्रमात्॥१९॥गोरोचनाकुंकुमेन भूर्जे मूरुक निवारणे
॥४॥एकं पंचनवप्रीत्यै द्विषड्दशायेगकाः॥२०॥त्रिसप्तैकादशे लाभे वेदाष्टद्वादशे विधुः॥तन्भर्द्दनं च सहजः स्कहत्कतरिपु
स्तथा॥२१॥धनं निधनधर्मो च कर्मायव्ययकं क्रमात्॥स्फुटं मेषादिलग्नेषु नयतारावलं वदे॥२२॥जन्मसंपद्विपत्क्षेमप्र
त्यविःसाधकं क्रमात्॥नैधनं मित्रपरमं मित्रतारं बलं विदुः॥२३॥वारेज्ञगुरुशुक्राणां सूर्याचंद्रमसोस्तथा॥माघादिमास
षट्केतु क्षौरमाद्यं प्रशस्यते॥२४॥कर्णवेधो बुधे जीवे पुष्ये श्रवणचित्रयोः॥पंचमे द्वे चाध्ययनं षष्ठीं प्रतिपदं त्यजेत्॥
२५॥रिक्तां पंचदशीं भौमं प्राच्यं याणीं हरिं श्रियं॥माघादिमासषट्केतु मेखलाबंधनं शुभं॥२६॥चूडाकरणकार्यं च
श्रवणादौ न शस्यते॥अस्तं जाते गुरौ शुक्रे क्षीणे च शशलांछने॥२७॥उपनीतस्य विप्रस्य मस्तक ज्ञात्वं विनिर्दिशेत्॥सौ
रस्ये शुभयोरेव समावर्तनमिष्यते॥२८॥शुभक्षेत्रविलग्नेषु शुभस्थे क्षीनेषु च॥अश्विनीमघचित्रास्वातीयाम्यौत
रासु च॥२९॥पुनर्वसौ तथा पुष्ये धनुर्वेदः प्रशस्यते॥भरण्यार्द्रामघाश्लेषा वह्निभाग्यर्क्षयोस्तथा॥३०॥जिजीविषु
र्न कुर्वीत यस्त्रप्रावरणं नरः॥गुरौ शुक्रे बुधे वस्त्रं विवाहादौ न भारिके॥३१॥रेवत्यश्विधनिष्ठासु हस्तादिषु च पंचसु
॥शंखविक्रमरत्नानां परिधानं प्रशस्यते॥३२॥याम्यसर्प्यधनिष्ठासु त्रिषु पूर्वासु यानने॥क्रीतं हानिकरं द्रव्यं विक्री
तं लाभकृद्भवेत्॥३३॥अश्विनी स्वाति चित्रासु रेवत्यां वारुणे हरौ॥क्रीतं लाभकरं द्रव्यं विक्रीतं हानिकृद्भवेत्॥३४॥
भरणी त्रीणि पूर्वाणि आर्द्राश्लेषा नघानिलाः॥वह्निज्येष्ठा विशाखासु स्वामिनो नोपतिष्ठति॥३५॥द्रव्यं दत्तं प्रयुक्तं वा यत्र निक्षि
प्यते धनं॥उत्तरा श्रवणे शाक्रे कुर्याद्राजाभिषेचनं॥३६॥चैत्रं ज्येष्ठं तथा भाद्रमाश्विनं पौषमेव च॥माघं चैव परित्यज्य शेषमासे
गृहं शुभं॥३७॥अश्विनी रोहिणी मूल उत्तरात्रयमैंद्रवं॥स्वाती हस्तानुराधा च गृहारंभे प्रशस्यते॥३८॥आदित्यभौमवर्जं तु
वापीप्रासादके तथा॥सिंहराशीगते जीवे गुर्वादित्ये मलिम्लुचे॥३९॥बाले वृद्धेस्तगे शुक्रे गृहकर्म विवर्जयेत्॥अग्निदाहो
भयं रोगो राजपीडा धनक्षितिः॥४०॥संग्रहे तृणकाष्ठानां कृते श्रवणपंचके॥गृहे प्रवेशनं कुर्याद्धनिष्ठोत्तरवारुणे॥४२॥

नौकाया घटने द्वित्रिपंचसप्तत्रयोदशी॥नृपदर्शे धनिष्ठासु हस्तपौष्णाश्विनीषु च॥४२॥पूर्वात्रयं धनिष्ठार्द्रा वह्नि
सौम्य विशाखयोः॥अश्लेषा चाश्विनी चैव यात्रा सिद्धिश्चतुष्पदे॥४३॥त्रिपूत्तरासु रोहिण्यां सिनीवाली चतुर्द
शी॥श्रवणा चैव हस्ता च चित्रा चैवाष्टमी तथा॥४४॥गोपुयात्रां न कुर्वीत प्रवेशं नैव कारयेत्॥अनिलोत्तररोहिण्यां
मृगमूलपुनर्वसौ॥४५॥पुष्यश्रवणहस्तेषु कृषिकर्म समाचरेत्॥पुनर्वसूत्तरास्वाती भाग्यमूलं द्विवारुणे॥४६॥गु
रोः शुक्रस्य वारे वा वारे च सोमभास्वतोः॥वृषलग्ने च कर्तव्यं कन्यायां मिथुने तथा॥४७॥द्विपंचदशमी सप्त तृतीया
च त्रयोदशी॥रेवती रोहिणी द्वाभि हस्त मैत्रोत्तरेषु च॥४८॥मैत्रं वर्जं बीजानि वापयेत्संप्रदर्श्यपि॥रेवती हस्त मूलेषु
श्रवणे भागमैत्रयोः॥४९॥पितृदैवत तथा सौम्ये धान्यच्छेदं प्रगोद्ये॥हस्तचित्रादिभिः श्वातौ रेवत्यां श्रवणत्रये॥५०॥
स्थिरलग्ने गुरौ वारे अथ भार्गवसौम्ययोः॥याम्यादितिमघाज्येष्ठास्तूत्तरेषु प्रवेशयेत्॥५१॥ॐ धनदाय सर्वधनेशा
य देहि मे धनं स्वाहा॥ॐ नवे हर्षे शलादे विलोकसं वर्द्धिनि कामरूपिणि देहि मे धनं स्वाहा॥५२॥यत्रस्थे लिखितं
धान्यं राशिस्थं धान्यवर्द्धनं त्रिपूर्वासु विशाखायां धनिष्ठा वारुणे पि च॥५३॥एतेषु षट्सु वितेयं धान्यनिष्क्र
मणं बुधैः॥देवताराम वाप्यादि प्रतिष्ठोदङ्मुखे रवौ॥५४॥मिथुनस्थे रवौ दर्शाद्यादित्यात् द्वादशी तिथिः॥यदा
तत्रैव कर्तव्यं शयनं चक्रपाणिनः॥५५॥सिंह तौलिगते चार्के दर्शाद्य द्वादशीद्वयं॥आद्या विंद्रस मुत्थानं प्रबोधश्च
हरेः क्रमात्॥५६॥तथा कन्यागते भानौ दुर्गोत्थानं तथाष्टमी॥त्रिपादेषु च ऋक्षेषु यदा भद्रा तिथिर्भवेत्॥५७॥
भौमादित्यशनेवारा विज्ञेयं तत्त्रिपुष्करं॥सर्वकर्म पुण्यपादे या विशुसि श्वं द्वतारयोः॥५८॥जन्माश्रितस्त्रिषष्ठश्च
सप्तमो दशमस्तथा॥एकादशः शशी येषां तेषामेव शुभं वदेत्॥५९॥शुक्लपक्षे द्वितीयश्च पंचमो नवमः शुभः॥मि
त्रातिमित्रसाधकसंपत्क्षेमादितारकः॥६०॥जन्मनाम त्रस्त्र प्राप्नोति विपदा धनसंभयं॥प्रत्यरौ मरणं विंद्यान्नि
धने जातिपंचता॥६१॥कृष्णाष्टमीदिनादूर्ध्वं यावच्छुक्लाष्टमीदिनं॥तावत्कालं शशी क्षीणः पूर्णस्तत्रोपरिस्मृतः
॥६२॥वृषे च मिथुने भानौ जीवे चंद्रे द्वदेवते॥पौर्णमासी गुरुवारे महाजेष्टि प्रकीर्तिता॥६३॥ऐंद्रे गुरुः शशी चै
व प्राजापत्ये रविस्तथा॥पूर्णमा ज्येष्ठमासस्य महाज्येष्ठी प्रकीर्तिता॥६४॥स्वास्यंतरेयं प्रतिष्ठे शाक्रस्याश्वापये

अग्निपु०
~~८४~~
८८

ध्वजं ॥हर्या दिपोरच्चाश्विन्यांसस्तत्ताहांनेविसर्जयेत ॥ ६५॥ सर्वेहेमसमंदानंसर्वे ब्रह्मसमाद्विजाः ॥सर्वेगंगासमंतोयंग
हुग्रस्ते दिवाकरे ॥ ६६॥ ध्वांक्षीभीमहोदरीघोरामेदामंदाकिनी इला ॥राक्षसीचक्रमोणा कीर्त्तसंक्रांतिर्नामभिः स्मृता ॥६७॥ बा
लवेकोलवेनागेनैतिलेकरणेयदि ॥उत्तिष्टंस्तक्रमभ्यर्कस्तदालोकः सुखीभवेत् ॥ ६८॥ गरेवरेवणिग्विष्टौ किंस्तुघ्नेशकुनौ
बुजेत् ॥ रौद्रेरोषेणलोकोयं पीड्यतेसपरासमः ॥ ६९॥ चतुष्पान्नविष्टिवणिजेशायितः संक्रमे रविः ॥ दुर्भिक्षंराक्षसंग्रा
मोदंपत्योः संशयोभवेत् ॥ ७०॥ आधारेजन्मनक्षत्रेव्याधौक्लेशाधिकंनयेत् ॥ कृत्तिकायांनवदिनंत्रिरात्रंरोहिणीषुच ॥
॥७१॥ मृगशिरः पंचरात्रंआर्द्रास्रुप्राणनाशनं ॥ पुनर्वसौचपुष्येचसप्तरात्रं विधीयते ॥ ७२॥ नवरात्रंतथाश्लेषास्म
शानांतंमघास्रुच ॥ द्वौमासौपूर्वफाल्गुन्यांउत्तरास्रुद्विपंचकं ॥ ७३॥ हस्तेतुदृश्यतेचित्रामर्धमासंतुपीडनं ॥ मासद्वयं
तथास्वातौविशाखाविंशतिर्दिनं ॥ ७४॥ मैत्रेचैवदशाहानि ज्येष्टास्वेवार्धमासकं ॥ मूलेनजायतेमोक्षः पूर्वाषाढा
द्विपंचकं ॥ ७५॥ उत्तराद्दिनविंशत्याद्वौमासौश्रवणेनच ॥ धनिष्टार्धमासं चवारुणेचदशाहकं ॥ ७६॥ नवभाद्रपदेमो
क्षउत्तरास्रुत्रिपंचकं ॥ रेवतीदशरात्रेचअहोरात्रतथाश्विनी ॥ ७७॥ भरण्यांप्राणहानिःस्यात्तगायत्रीहोमतःशुभं ॥ पंच
धान्यंतिलाज्यायैर्धेनुदानेद्विजेशयः ॥ ७८॥ दशास्सूर्यस्यचाष्टाब्दाइंद्राःपंचदशैवतु ॥ अष्टौवर्षाणिभौमस्यदशसप्तदशा
बुधे ॥ ७९॥ दशाब्दानिदशापंगोनविंशद्गुरोर्दशा ॥ राहोर्द्वादशवर्षाणिभार्गवस्यैकाविंशतिः ॥ ॥ इत्याग्नेये
महापुराणेज्योतिःशास्त्रसाराः ॥ ॥ अग्निरुवाच ॥ कालः समागणोद्दिष्टेयगणितंकालवृद्धये ॥ कालःसमाग
णोर्कमासश्चैवाहिभिर्युत ॥ १॥ द्विघ्नोद्विष्टःसवेदःस्यात्पंचांगाप्तयुतोगुणः ॥ त्रिष्टोमध्यौवसुगणःपुनर्वेद
गणश्चसः ॥ २॥ अष्टरंध्राभिहीनस्यादधःसैकरसास्यकेः ॥ मध्योहीनःषष्टिकृतलब्धयुक्तस्तथोपरि ॥ ३॥ न्यू
नःसप्तकृतेवीरस्तदधस्तिथिनाडयः ॥ सगणोद्विगुणश्चोर्द्धं त्रिभिन्नोगणःपुनः ॥ ४॥ अधःस्वरामसंयुक्तो
रसाकाष्टिफलैर्युतः ॥ अष्टाविंशाच्छषपिंडतिथिनाधाअधस्थितः ॥ ५॥ गणस्तिस्त्रिरुत्तोर्ध्वाद्वाभ्यांचगणये
त्पुनः ॥ मध्येरुद्रगणःकार्योस्त्यधःसैकोनराभिभिः ॥ ६॥ लब्धहीनोभवेन्मध्योद्वाविंशतिविवर्जिताः ॥ ष
ष्टिशेषाक्षणंज्ञेयंलब्धमूर्ध्वविनिक्षिपेत ॥ ७॥ सप्तविंशतिशेषस्तुध्रुवोनक्षत्रयोगताः ॥ मासिमासिक्षिपे

द्वारंद्वात्रिंशत्तघटिकास्तिथौ ॥ द्विपिंडेद्वेचनक्षत्रेनाद्यएकादशक्षणे ॥ वारस्थानेतिथिंदद्यात्सप्तभिर्भागमाहरेत् ॥ ९॥ शेषवा
राश्चसूर्याद्याघटिकास्रुचपातयेत् ॥ पिंडकेषुतिथिंदद्यात्वारेद्वैचचतुर्दश ॥ १०॥ धनंघृणंधनमृणंक्रमाज्ज्ञेयंचतुर्दश ॥ प्र
थमेत्रयोदशेपंचद्वितीयद्वादशेदश ॥ ११॥ पंचदस्यतृतीयेचतयोरेकादशेस्मृताः ॥ चतुर्थेदशमेचैवभवेद्देकोनविंशतिः ॥ १२॥
पंचमेनवमेचैवद्वात्रिंशतिरुदाहृताः ॥ षष्टाष्टमेनखंडास्युश्चतुर्विंशतिरेवच ॥ १३॥ सप्तमेपंचविंशःस्यात्तखंडशःपिंडिका
द्भवेत् ॥ कर्कटादौहरेद्राशिसुत्तरदत्तयःक्रमात् ॥ १४॥ तुलादौप्रातिलोम्येनत्रयोवदरसःक्रमात् ॥ मकरादौदीयतेचरस
वेदत्रयःक्रमात् ॥ १५॥ मेषादौप्रतिलोमेनत्रयोवदरसक्रमात् ॥ मेषतःस्वयुगामैत्रंमेषादौविकलाधनं ॥ १६॥ कर्कटैप्राति
लोम्यंस्यादृणमेतत्तुलादिके ॥ चतुर्गुणातिथिर्ज्ञेयाविकलाश्चेद्रसवेदा ॥ १७॥ हन्याक्षिभागतागाभिपिंडसंख्याफलांत
रैः ॥ षष्ट्यातंप्रथमेच्चार्यहानौदेयंधनेधनं ॥ १८॥ द्वितीयेचरिनवर्गेवैपरित्यमितिस्थितिः ॥ तिथिद्विगुणताकार्याषड्
भागपरिवर्जिता ॥ १९॥ रविपरीतातिथिनाडिसमायुता ॥ ऋणेशुद्धेचनाड्यःस्युऋणंशुद्ध्यनतोयदा ॥ २०॥ स्युषष्टिकंप्रदेयं
तंषष्ट्याधिकंतंचैत्त्यजेत् ॥ नक्षत्रंतिथिमिश्रंस्याच्चतुर्भिर्गुणितानितिथिः ॥ २१॥ तिथिस्त्रिभागसंयुक्ताऋणेनचतथान्विता
तिथिवद्द्रुटिताकार्यातच्छेदायोगशोधनं ॥ २२॥ रविचंद्रौसमौकृत्वायोगाभवतिनिश्चलाः ॥ एकोनातिथिद्विगुणितासप्त
भिन्नाकृतिद्विधा ॥ २३॥ तिथिश्चद्विगुणैकोनाकृद्रागैःकरणंनिशि ॥ कृष्णचतुर्दश्यंतेशकुनिःपर्वणीहचतुष्पदं ॥ २४॥
प्रथमेतिथ्यंतेद्वेद्विकिंस्तुघ्नंप्रतिपन्मुखे ॥ २५॥ इतिअग्निपुराणे ॥ ॥ अग्निरुवाच ॥ वक्ष्येजयशुभात्यर्थंसारंयुक्तं
जयार्णवे ॥ अइउएओ ओं स्वराःस्युर्नंदादिकातिथिः ॥ १॥ एकादिहांतोभौमरविज्ञसोमौहरिभार्गवौ ॥ शनिर्दक्षिणना
भ्यांस्युर्भौमार्कगयनोपरे ॥ २॥ स्वंतुवःस्वरसैर्गुण्यःरुद्रैर्भागंसमाहरेत् ॥ जयदोनरसाहतंतुतत्कृत्वापूर्वभागनभा

Dr BHAU DAJI MEMORIAL

जयेत्॥३॥ वन्हिभिश्चाहतंकृत्वारूपंतत्रैवनिक्षिपेत्॥स्यंदनंधनधापफलानिस्प्राणस्यंदनंहितिपुनः॥४॥अनेनैवतुमानेनउदयं
तिदिनेदिने॥स्फुरणेत्रिभिरुच्छ्वासउच्छ्वासैस्तपलंस्मृतं॥५॥षष्टिभिश्चपलैर्लिप्ताषष्टिस्त्वहन्निशंप्र पंचमाद्वीदिये चालकुमारइव
वस्थकाः॥६॥मृत्युयेनोदयस्तेनचास्तमेकादशांशकैः॥कुलागमेभवेद्भंगःसमस्तपंचमोपिवा॥७॥स्वरोदयचक्रं॥ ॥शनिचक्रेचा
र्धमासंग्रहाणामुदयःक्रमात्॥ विभागैःपंचदशभिःशनिभागस्तमस्तकः॥८॥शनिचक्रं॥ ॥दशकोटिसहस्राणिअर्बुदान्यबुदं
हरेत्॥त्रयोदशचलक्षाणिप्रमाणंकूर्मरूपिणः॥९॥मध्यादौकृत्तिकास्यंतःतद्दशांतःशनिस्थितो॥ ॥कूर्मचक्रं॥ ॥राहुच
क्रेचसप्तोर्ध्वंअधःसप्तचसंलिखेत्॥१०॥वाय्वग्न्योश्चैवनैऋत्येपौर्णिमाग्नेयभागतः॥आमावास्यांवायवेचराहुर्वैतिथिरूपकः॥११॥
दकारंदक्षभागेतुहकारंवायवेलिखेत्॥प्रतिपदाद्योकारादीन्सकारंनैऋतेपुनः॥१२॥राहोर्मुखेतुभंगस्यादितिराहुरुदाहृतः॥वि
ष्टिरग्नौपौर्णमास्यांकाराणींद्रेतृतीयकं॥१३॥घोरायास्यंतिसप्तम्यांदशमीरौद्रसौम्यशा॥चतुर्दशांतुवायव्येचतुर्थीवरुणाश्रये॥
॥१४॥शुक्लाष्टम्यांदक्षिणेचएकादश्यांभृशंत्यजेत्॥रौद्रश्चैवतथास्वेतोमैत्रःसारस्वतस्तथा॥१५॥सावित्रोविरोचनश्चजयदेवोभि
जित्तथा॥रावणोविजयश्चैवनंदीवरुणएवच॥१६॥यमसौम्योभवश्चांतेदशपंचमुहूर्तकाः॥रौद्रेरौद्राणिकुर्वीतश्वेतेस्नानादि
कंचरेत्॥१७॥मैत्रेकन्याविवाहादिशुभंसारस्वतेचरेत्॥सावित्रेस्थापनाद्यंचविरोचनेनृपक्रिया॥१८॥जयदेवंजयंकुर्या
द्रावणेजीवकर्मच॥विजयेकृषवाणिज्यंपटबंधंचनंदिनि॥१९॥वारुणेचतडागानिनाशकर्मयमेचरेत्॥सौम्येसौम्या
दिकुर्वीतभवेलग्नमहर्दिवा॥२०॥योगानाम्नाविरुद्धास्तुयोगानाम्नेयशोभना॥राहुरिंद्रात्समीरंचवायोर्दक्षंयमाच्छिवं॥
॥२१॥शिवादाप्यंजलाद्वन्हिमग्नेसौम्यंततोस्नपं॥ततश्चसंक्रमंहंतिचतस्रोघटिकभ्रमन्॥२२॥ ॥इतिराहुचक्रं॥ ॥
चंडींद्राणीवाराहीचसृशानीगिरिकर्णिका॥बलाचातिबलाक्षारिमल्लिकाजातियूथिका॥२३॥यथालाभंधारयेत्ताःश्वेता

स्वेतार्कैस्तशतावरी॥गुडुचीयागुरीदिव्याओषध्योधारिताजयेत्॥२४॥ॐनमोभगवतेभैरवायखड्गपरशुहस्ताय॥ॐह्रूंविघ्नना
शायॐहुंफट्॥२५॥अनेनैवतुमंत्रेणशिखाबंधादिकृज्जयेत्॥तिलकंचांजनंचैवधूपंलेपनमेवच॥२६॥स्नानपानानितैला
नियोगधूलिमतःशृणु॥सुभगामनःशिलातालंलाक्षारससमन्वितं॥२७॥तरुणीक्षीरसंयुक्तोललाटेतिलकोवशे॥विष्णुक्रांताचस
पीक्षीसहदेवीचरोचना॥२८॥अजादुग्धेनसंपिष्टतिलकोवश्यकारकः॥प्रियंकुंकुमंकुष्टमोहनीभगरंघृतं॥२९॥तिलकोवश्यकृ
द्द्रोचनारक्तचंदनं॥निशामनःशिलातालंप्रियंगुःसर्षपास्तथा॥मोहनीहरिक्रांतासहदेवीशिखास्तथा॥मातुलिंगरसैःपुष्पंपि
ष्टंललाटेतिलकोवशे॥३१॥सेन्द्राःसुरावशंयांतिकिंपुनःक्षुद्रमानुषाः॥मंजिष्टाचंदनंरक्तंकंदुनंदाविलासिनी॥३२॥पुन
र्नवासमायुक्तंलोपोयंभास्करोवशे॥चंदनंनागपुष्पंचमंजिष्टंतगरंवचा॥३३॥लोध्रंप्रियंगुरजनीसारतैलंवशंकरं॥
इत्याग्नेयेमहापुराणेनानायोगः२४॥ ॥अग्निरुवाच॥ज्योतिःशास्त्रादिसारंचवक्ष्येयुद्धजयार्णवं॥वेलामंत्रौ
षधाद्यंचयथोमामीश्वरोब्रवीत्॥१॥देव्युवाच॥देवैर्जितादानवाश्चयेनोपायेनतद्वद॥शुभाशुभविवेकाद्यंज्ञानंसु
दुर्जयंतुवै॥२॥ईश्वरुवाच॥मूलदेवेच्छयाजाताशक्तिःपंचाशदक्षरा॥चराचरंततोजातंयामाराध्याखिलार्थवित्
॥३॥मंत्रपीठंप्रवक्ष्यामिपंचमंत्रसमुद्भवं॥तेमंत्राःसर्वमंत्राणांजीवितेमरणेस्थिताः॥४॥ऋग्यजुःसामाथर्वसुवेदमंत्राः
क्रमेणते॥सद्योजातादयोमंत्राब्रह्माविष्णुश्चरुद्रकः॥५॥ईशःसप्तशिखाःदेवाःशब्दाद्याःपंचकस्वराः॥अइउ
एओऐंकलाश्चमूलंब्रह्मेतिप्रकीर्तितं॥६॥काष्टमध्येयथावन्हिरप्रवृत्तोनदृश्यते॥विद्यमानातथादेहेशिवशक्ति
र्नदृश्यते॥७॥आदौशक्तिःसमुत्पन्नाओंकारस्वरभूषिता॥ततोबिंदुर्महादेवीएकारेणव्यवस्थितः॥८॥जातो

नादऊकारस्कनदनेहृदिसंस्थितः ॥अर्धचंद्रइकारस्तुमोक्षमार्गस्यरोधकः ॥अकारोव्यक्तउमन्नोभोगमोक्षपदप्रदः ॥अकारेरे
श्चरेभूमिर्निवृतिश्चकलास्मृता ॥१०॥गंधोवीवजः प्राणाख्यइडाशक्तिः स्थिरास्मृता ॥इकारश्चप्रतिष्ठाख्योरसोपानश्चपिंग
ला ॥११॥क्रूराशक्तिर्बीजः स्यात्तर्थबीजतोग्निरूपवान् ॥विद्यासमानानागांधारीशक्तिश्चदहनीस्मृता ॥१२॥रोशांतिर्वायुपस्प
र्शोयश्चोदानश्चलाक्रिया ॥ॐकारः शांतिनीत्यतीताख्यारवंशब्दयूथपालिनः ॥१३॥पंचवर्गाः स्वराः ज्ञाताः कुजोज्ञगुरुभार्ग
वाः ॥शनिः क्रमादकाराद्याः ककाराद्यास्तथाः स्थिताः ॥१४॥एतन्मूलमतः सर्वंज्ञायतेसचराचरं ॥विद्यापीठंप्रवक्ष्यामि
प्रणवः शिवईरितः ॥१५॥जमाश्रासः स्वयंशक्तिर्वामाज्येष्टाचरोद्यपि ॥ब्रह्माविष्णुः क्रमाद्रुद्रोगुणाः स्वर्गादयस्त्रयः ॥
॥१६॥रत्नादिन्नयंचैवस्थूलसूक्ष्मः परोपमः ॥चिंतयेच्छ्नवर्णेतसुंचमानंपरामृतं ॥१७॥ प्लाव्यमानंयथात्मानंचिंतये
त्तंदिवानिशं ॥अजरत्वंभवेद्देविशिवत्वमुपगच्छति ॥१८॥अंगुष्टादोन्यसेदंगानेत्रमथ्येयदेहके ॥मस्तकंजयंततः प्राच्ये
चरणादौविजयोभवेत् ॥१९॥श्रन्योत्रिवालयः शब्दः स्पर्शोतिर्यगातंस्पृशेत् ॥रूपस्योर्ध्वगतिः प्रोक्ताजलस्याधः समा
श्रिता ॥२०॥सर्वस्थानविनिर्मुक्तिगंधोमध्येचमूलकं ॥नाभिमूलेस्थितंकंदंशिवरूपंतुमंडितं ॥२१॥शक्तिर्ब्रह्मनसो
मोकीहरिस्तत्रव्ययस्थितः ॥दशवायुसमोपेतंपंचतन्मात्रमंडितं ॥२२॥कालानलसमाकारंस्फुरंतंशिवमास्तकं ॥
तंजीवंजीवलोकस्यस्थावरस्यचरस्यच ॥२३॥तस्मिन्नष्टेमृतंमन्येमंत्रपीठेनिलात्मकः ॥२४॥ ॥इत्याग्नेययुद्ध
जयार्णव ॥ ॥१२५॥ ईश्वरउवाच ॥ॐह्रींकर्णपाटेनयेदैरूपेदंश्रेहुंफट्अंहः ॥असत्सरुत्छकत्हुंफट
नमः ॥१॥पठ्यमानोह्ययंमंत्रः क्रुध्यसंरक्तलोचनः ॥मारणेपातनेवापिमोहनोच्चाटनेभवेत् ॥२॥कर्णमोटीम
हाविद्यासर्ववर्णेषुरक्षिका ॥पंचोदयंप्रवक्ष्यामिस्वरोदयसमाश्रितं ॥३॥नाभिहृद्यंतरंयायत्तावच्चरितिमा

रुतः ॥उच्चारयेद्यथादौतुकर्णाक्षीणिप्रभेदयेत् ॥करोतिसाधकः क्रुद्धोजपहोमपरायणः ॥हृदयात्वायुकंकंठंज्वरदाहा
दिमारणे ॥५॥कंठोद्भवोरसोवायुः शांतिकंपौष्टिकंवशं ॥दिव्यंस्तंभंसमाकर्षगंधोनाशांतिकोद्भवः ॥६॥गंधंनीलंमनः
कृत्वास्तंभयेन्नात्रसंशयः ॥स्तंभनंकीलनाद्यंचकरोत्येवहिसाधकः ॥७॥चंडाघंटाकरालीचसुमुखीदुर्मुखीतथा ॥रेव
तीप्रथमाघोरावायुचक्रेस्थितानयेत् ॥८॥उच्चाटकारिकादेव्यः स्थितास्तेजसिसंस्थिताः ॥सौम्याचभाषिणीदेवीजया
चविजयातथा ॥९॥अजितावापराजितामहाकोटीचरौद्रया ॥शुष्ककायाप्राणहरारसचक्रेस्थिताइमाः ॥१०॥वि
रूपाक्षीपरादिव्यास्तथाचाकाशमातरः ॥संहारीजातहारीचदंष्ट्रानिशुष्करेवती ॥११॥पिपीलिकापुष्पहारामहा
योपुष्टिवर्धनाः ॥भद्रकालीसुभद्राचभद्रभीमासुभद्रिका ॥१२॥स्थिराचनिष्ठुरादेव्यानिष्कंयोगादिनीस्तथा ॥द्वा
त्रिंशन्मातरश्चक्रेअष्टाष्टक्रमशः स्थिताः ॥१३॥एकत्वरविश्चंद्रएकश्चैकासशक्तिका ॥भूतभेदेनतीर्थानियथा
तोयंमहीतले ॥१४॥प्राणएकोमंडलेश्चभिद्यतेभूतपंजरे ॥वामदक्षिणयोगेनदशधाराप्रवर्तते ॥१५॥बिंदुमुंड
विचित्रंचतत्ववस्त्रेणवेष्टितं ॥ब्रह्मांडेनकपालेनपिबेतपरमामृतं ॥१६॥पंचवर्गीबलायुद्धेजयोभवतितच्छृणु ॥अ
आकचटतपाः शआद्योवर्गईरितः ॥१७॥इईखछठथफरांषोवर्गश्चद्वितीयकः ॥उऊगजडदबलाः सोवर्गश्चतुर्थकः
तृतीयकः ॥१८॥एऐघझढधभवाह्नोमवर्गश्चतुर्थकः ॥अओअंअः ङञणनमोवर्गः पंचमोभवेत् ॥१९॥वर्गा
श्चाभ्युदयेनृणांचत्वारिंशत्यंचच ॥बालः कुमारोयुवास्यात्वृद्धोमृत्युश्चनामतः ॥२०॥आत्मपीडाशोषकः स्या
द्वर्गासीनश्चबालकः ॥वृत्तिकाप्रतिपद्भौमसुखबालोभद्रः स्मृतः ॥२१॥षष्टिभौममघापीडाआर्द्राचैकादशीकुजः ॥
मृत्युर्मघाद्वितीयाज्ञोलाभेचार्द्राचसप्तमी ॥२२॥बुधोहरिर्भरणीज्ञः श्रवणंकालईदृशः ॥जीवोलाभायचभवे
त्तृतीयापूर्वफल्गुनी ॥२३॥जीवोमृषीधनिष्ठार्त्ताजीवोश्लेषात्रयोदशी ॥मृत्यो शुक्रचतुर्थीस्यात्पूर्वाभद्रश्रि

ये ॥२४॥ पूर्वाषाढा च नवमी शुक्रः पीडाकरो भवेत् ॥ भरणी भूतजा शुक्रो यमदंडो हहानिकृत् ॥२५॥ कृत्तिका पंचमी मंदो ला
भाय तिथिरीरिता ॥ अश्लेषा दशमी मंदो योगः पीडाकरो भवेत् ॥२६॥ मघा शनिः पूर्णिमा च योगा मृत्युकरास्मृताः ॥ तिथि
योगः पूर्वोत्तराग्निनैरृत्यदक्षिणानिलचंद्रगाः ॥२७॥ ब्रह्माद्याः स्युस्त्रिहाष्टायः स्युः प्रतिपन्नवमीमुखाः ॥ राशिभिः सहि
ताद्दृष्टा ग्रहाद्याः सिद्धयेस्मृताः ॥२८॥ मेषाद्याश्चतुरः कुंभाजयः पूर्णोन्यथामृतिः ॥ पूर्णादिरिक्ततिपूर्णा चक्रमादेयं प्र
दापयेत् ॥२९॥ रणे सूर्ये फलं नास्ति सोमे भंगः प्रशाम्यति ॥ कुजेन कलहं विद्याद् बुधः कामाय वै गुरुः ॥३०॥ जयाय मनसे शु
क्रो मंदो भंगो रणे भवेत् ॥ देयानि पिंगला चक्रे सूर्यगानि च तानि हि ॥३१॥ मुखे नेत्रे ललाटे च शिवहस्तोरुपादके ॥ पा
देमृतिस्त्रिऋक्षस्या त्रीणि पक्षेत्मनाशनं ॥३२॥ मुखस्थे च भवेत्पीडा शिरस्थे कार्यनाशनं ॥ कुक्षिस्थिते फलं स्याच्चतुश्च
क्रं वदाम्यहं ॥३३॥ इंद्राग्नेनैरृतं गच्छेन्नैरृतात्सोममेव च ॥ सोमात्पुताशनं वन्हेराप्यामाप्याच्छिवालयं ॥३४॥ रुद्राद्य
मं यमाद्वायुं वायोश्चंद्रं व्रजेत्पुनः ॥ भुंक्ते च तस्यो नाड्यः स्तु राहुपृष्टे जयो रणे ॥३५॥ अग्रतो मृत्युमाप्नोति तिथिवाहुंय
हामिते ॥ आग्नेयादिशि वांतं च पूर्णिमासादितः प्रिये ॥३६॥ पूर्वेह्याष्टमीं यावत्तु वाह्ये पृष्टे जयो भवेत् ॥ ऐशान्याग्नेयनैरृत्य
वायव्ये फणिवाहुकः ॥३७॥ मेषाद्या दिशि पूर्वादौ यत्रादिस्योगतो मृतिः ॥ तृतीया कृष्णपक्षे तु सप्तमी दशमी तथा ॥३८॥ च
तुर्दशी तथा शुक्ले चतुर्थ्येकादशी तिथिः ॥ पंचदशी रिष्टयस्तु पौर्णिमाग्नेयवायवे ॥३९॥ अकचटपेतेयशाः वर्गाः सूर्या
द्योग्रहाः ॥ गृध्रो वृकश्येनकाश्च पिंगलः श्येनकः क्रमात् ॥४०॥ सारसश्च मयूरश्च गोधत्सः पक्षिणः स्मृताः ॥ आदौ सा
ध्यो हुतो मंत्र उच्चाटपल्लवस्मृताः ॥४१॥ वश्ये ज्वरे तथा कर्षे प्रयोगः सिद्धिकारकः ॥ शांतौ प्रीतौ नोनमस्कारो वौषट् पुष्टौ वशा
दिषु ॥४२॥ हुंमृत्यो प्रीतिसंधाने विद्वेषोच्चाटने च फट् ॥ वषट् कृते च दिष्ट्यादौ मंत्राणां जातयश्च षट् ॥४३॥ औषधीः

संप्रवक्ष्यामि महारक्षाविधायिनि ॥ महाकाला तथा चंडी वाराही चेश्वरी तथा ॥४४॥ सुदर्शनी तथेंद्राणि देहस्था रक्षयंति
तं ॥ बला चातिबला भीरुर्मुसली सहदेव्यपि ॥४५॥ जाती च मल्लीका यूथी गारुडी भृंगराजकः ॥ चक्ररूपा महौषध्यो धा
रिता विजयादिदाः ॥४६॥ ग्रहणे च महादेवी उद्धृताः शुभदायिकाः ॥ महातु कुंजरं कृत्वा सर्वलक्षणलक्षितं ॥४७॥ तस्य
पादतले कृत्वा स्तंभयेच्छत्रुमात्मनः ॥ नगाग्रे चैकवृक्षे च वक्राहकं प्रदेशके ॥४८॥ वल्मीके मृदमादृत्य मातरो योजयेत्ततः
॥ ओं नमो महाभैरवाय विकृतदंष्ट्रोग्ररूपाय पिंगलाक्षाय त्रिशूलखट्वांगधराय वौषट् ॥५०॥ पूजयेत्कर्दमं देवी स्तंभयेच्छत्रु
जालकं ॥ अग्निकार्यं प्रवक्ष्यामि रणादौ जयवर्धनं ॥५१॥ स्मशाने निशि काष्टाग्नौ नग्नो मुक्तशिखो नरः ॥ दक्षिणास्य
स्तु जुहुयान्नृमांसं रुधिरं विषं ॥५२॥ तुषास्थिखडमिश्रं तु शत्रुनाम्ना शताष्टकं ॥ ॐ नमो भगवति कौमारी लल लल भ
रु लेलेली यत्र यंदा देवि अमुकं मारय त्वसहसा नमोस्तु ते भगवति रिस्यैस्वाहा ॥ अनया विद्यया होमादे धत्वं जायते रिपोः
॥५४॥ ॐ वज्रकाय वज्रतुंड कपिलपिंड करालवदन ऊर्ध्वकेश महाबल रक्तमुख तजिह्व महारौद्रदंष्ट्रोत्कट कहकरा
लिनि महादृढप्रकार लंकेश्वरसेतुबंधशैलप्रवाह गगनचर राह्येहि भगवन् महाबलपराक्रम भैरवो ज्ञापयति ॥५६॥ ए
ह्येहि महारौद्र दीर्घलांगुलेनामुकं वेष्टय वेष्टय जंभय जंभय खन खन वे वे हुं फट् अष्टत्रिंशच्छतं देवि हन्मान्सर्वकामकृत् ॥ प
रेतु हनुमत्संदर्शनाशमायां निशाचरः ॥५८॥ इत्याग्नेये महापुराणे नानाचक्राणि ॥१२६॥ ईश्वर उवाच ॥ वक्षा
म्यक्षात्मकं पिंडं शुभाशुभविवृत्तये ॥ यस्मिन्नक्षे स्तहादौ त्रीणि मूर्धनि ॥१॥ एकं मुखे द्वयं नेत्रे हस्तपादे चतुष्टयं
॥ हृदि पंच स्कंते जानौ द्यासु कराद्दिविचिंतयेत् ॥२॥ शिरे स्थिते भवेद्राज्यं पंडितो वक्त्रयोगतः ॥ वेत्रयोः कांतिसौ
भाग्यं हृदये द्रव्यसंग्रही ॥३॥ हस्ते धृतं तस्करस्त्वं गतास्करध्वगः पदोः ॥ कुंभाष्टके भानि लिख्य सूर्यकुंभस्तु रिक्तकः
॥४॥ अशुभः पूर्णकुंभः स्याच्छस्तः पूर्वादिसंस्थितः ॥ फलिराहुं प्रवक्ष्यामि जयाजयविवेकदं ॥५॥ अष्टाविंशत्त्रि

सेदिद्वान्पुनर्भोज्यं स्त्रिभिस्त्रिभिः ॥ अथऋक्षाणिचत्वारिरेखास्त्रेचैयदापयेत् ॥ ६ ॥ यस्मिन्ऋक्षेस्थितोराहुस्तदूक्षात्फलम्
धेनि ॥ तदादिविन्यसेद्धानिसंविज्ञातक्रमेणतु ॥ ७ ॥ वक्रेसप्तगतेऋक्षेम्रियतेसर्वआहवे ॥ स्कंधेभंगंविजानीयात्सप्तमे
षुचमध्यतः ॥ ८ ॥ उदरस्थेनप्रजाचजयंचैवात्मनस्तथा ॥ कटिदेशेस्थितेयोधःआहवेहरतेपरान् ॥ ९ ॥ पुच्छस्थितेनकी
र्तिःस्याद्राहुदृष्टेचतेमृतिः ॥ पुनरन्यत्प्रवक्ष्यामिरविराहुबलंतव ॥ १० ॥ रविःशुक्रोबुधश्चैवसोमःसौरिर्गुरुस्तथा ॥ लो
हितःसैंहकश्चैवएतेयामार्धभागिनः ॥ ११ ॥ सौरिंरविंचराहुंचकृत्वायत्नेनपृष्ठतः ॥ स्तंजयेत्सैन्यसंघातंघ्नन्मध्वा
नमाहवं ॥ १२ ॥ रोहिणीचोत्तरास्तिस्रोमृगःपंचस्थिराणिहि ॥ अश्विनीरेवतीरेवतीस्वातीधनिष्ठाशततारका ॥ १३ ॥
क्षिप्राणिपंचभान्येवयात्रार्थीचैवयोजयेत् ॥ अनुराधाहस्तमूलमृगःपुष्यंपुनर्वसुः ॥ १४ ॥ सर्वकार्येषुचैतानि
जेष्ठाचित्राविशाखया ॥ पूर्वास्तिस्रोग्निभरणीमघार्द्राश्लेषदारुणा ॥ १५ ॥ स्थावरेषुस्थिरंह्यृक्षंयात्रायांक्षिप्रमुत्त
मं ॥ सौभाग्यार्थेमृदून्येवउग्रेउग्रंतुकारयेत् ॥ १६ ॥ दारुणेदारुणंकुर्याद्वृक्ष्येचाधोमुखादिकं ॥ कृत्तिकाभरण्या
श्लेषाविशाखापितृनैर्ऋतं ॥ १७ ॥ पूर्वात्रयमधोवक्त्रंकर्मचाधोमुखंचरेत् ॥ एषुकूपतडागादिविद्याकर्मभिषक्
क्रिया ॥ १८ ॥ स्थापनंनौकाकूपादिविधानंखननंतथा ॥ रेवतीचाश्विनीचित्राहस्तःस्वातीपुनर्वसुः ॥ १९ ॥ अनुराधा
मृगोज्येष्ठानववैपार्श्वतोमुखाः ॥ एषुराज्याभिषेकंचपट्टबंधगजाश्वयोः ॥ २० ॥ आरामगृहप्रासादप्राकारक्षेत्रतो
रणं ॥ ध्वजचिन्हपताकाश्चसर्वाण्येतानिकारयेत् ॥ २१ ॥ द्वादशीसूर्यदग्धातुचंद्रेणैकादशीतथा ॥ भौमेनदशमी
दग्धातृतीयावैबुधेनच ॥ २२ ॥ षष्ठीचगुरुणादग्धाद्वितीयाभृगुणातथा ॥ सप्तमीसूर्यपुत्रेणत्रिपुष्करमथोनदे
॥ २३ ॥ द्वितीयाद्वादशीचैवसप्तमीवैतृतीयका ॥ गुरुर्भौमस्तथासौरिःषडेतेत्रिपुष्कराः ॥ २४ ॥ विशाखाकृत्ति

काचैवउत्तरेद्वेपुनर्वसुः ॥ पूर्वाभाद्रपदाचैवषडेतेत्रिपुष्कराः ॥ २५ ॥ लाभोहानिर्जयोवृद्धिःपुत्रजन्मतथैवच ॥ नष्टंभ्रष्टंविनष्टं
वातत्सर्वंत्रिगुणंभवेत् ॥ २६ ॥ अश्विनीभरणीचैवअश्लेषापुष्यमेवच ॥ स्वातीचैवविशाखाचश्रवणःसप्तमंपुनः ॥ २७ ॥ ए
तानिदृढचक्षूंषिपश्यंतिचदिशोदश ॥ यात्रादूरगतस्यापिआगमःपुण्यगोचरे ॥ २८ ॥ आर्द्रारेवतीचित्राकेकराणिपुन
र्वसुः ॥ केकरेषुचऋक्षेषुनिर्गतस्यागमोभवेत् ॥ २९ ॥ कृत्तिकारोहिणीसौम्यंफल्गुनीचमघातथा ॥ मूलंज्येष्ठानुरा
धाचधनिष्ठाशततारका ॥ ३० ॥ पूर्वाद्रपदाचैवचिपिटानिचतानिहि ॥ अध्वानंव्रजमानस्यपुनश्चैवागमोभवेत् ॥ ३१ ॥
हस्तउत्तरभाद्राचआर्द्राषाढातथैवच ॥ नष्टार्थाश्चैवदृश्यंतेसंग्रामेनैवविद्यते ॥ ३२ ॥ पुनर्वक्ष्यामिगंडांतंमृगमध्येयथा
स्थितं ॥ रेवत्यंतेचतुष्कंतुअश्विन्यादिचतुष्टयं ॥ ३३ ॥ उभयोर्यामिमात्रंतुवर्जयेत्तत्प्रयत्नतः ॥ आश्लेषांतेमघादौतु
घटिकानांचतुष्टयं ॥ ३४ ॥ द्वितीयागंडमाख्यातंतृतीयंभैरवंतथा ॥ ज्येष्ठातुमूलयोर्मध्येउग्ररूपंतुयामकं ॥ ३५ ॥ नकु
र्याच्छुभकर्माणियदिच्छेदात्मजीवितं ॥ दारकेजातकालेचम्रियेतेपितृमातरौ ॥ ३६ ॥ ॥ इत्याग्नेयेमहापुराणे
नक्षत्रनिर्णयः ॥ १२७ ॥ ॥ ईश्वरउवाच ॥ विष्कंभेघटिकास्तिस्रःशूलेपंचविवर्जयेत् ॥ षट्षट्गंडातिगंडेननवव्याघात
वज्रयोः ॥ १ ॥ परिघेचव्यतीपातेउभयोरपितद्दिने ॥ वैधृतेतद्दिनेचैवयात्रायुद्धादिकंत्यजेत् ॥ २ ॥ ग्रहैःशुभाशुभंवक्ष्ये
देविमेषादिराशितः ॥ चंद्रशुक्रौचजन्मस्थौवर्धितौशुभदायकौ ॥ ३ ॥ द्वितीयोमंगलोऽर्कश्चसौरिश्चैवतुसैंहिकः ॥
द्रव्यनाशमलाभंचआहवेभंगमादिशेत् ॥ ४ ॥ सोमोबुधोभृगुर्जीवोद्वितीयस्थाःशुभाग्रहाः ॥ तृतीयस्थोयदाभा
नुःशनिर्भौमोभृगुस्तथा ॥ ५ ॥ बुधश्चैवेंदुराहूचसर्वेतेफलदायकाः ॥ बुधशुक्रौचतुर्थौतुशेषाश्चैवभयाग्रहाः ॥ ६ ॥

पंचमस्थोयदाजीवः शुक्रः सौम्यश्च चंद्रमाः ॥ हंतेचेमित्रंलाभंषष्ठेस्थानेशुभोरविः ॥७॥ चंद्रः सौरिर्मंगलश्च ग्रहादे
विस्वराशितः ॥ बुधश्च शुभदः षष्ठेत्यजेत्षष्ठंगुरुंभृगुं ॥८॥ सप्तमोर्कः शनिर्भौमोराहुर्हान्यैस्करवायच ॥ जीवोभृगुश्च
सोमश्च शुक्रोचाष्टमेशुभो ॥९॥ शोषायदास्तथाहान्यैज्ञभृगूनवमेशुभो ॥ पौर्शोग्रहास्तुलाभायदशमेभृगुभास्करौ
॥१०॥ शनिर्भौमिश्चराहुश्च चंद्रःसौम्यः शुभावहः ॥ शुभाश्चैकादशेसर्वेवर्जयेद्द्वादशंगुरुं ॥११॥ बुधशुक्रौ द्वादशेष्टौ
शेषान्द्वादशमांस्त्यजेत् ॥ अहोरात्रेद्वादशस्युःराशयस्तान्वदाम्यहं ॥१२॥ मीनोमेषोथमिथुनंच तस्त्रोमाडयो
वृषः ॥ षट्कर्कसिंहकन्याच तुलापंचचवृश्चिकः ॥१३॥ धनुर्नक्रोघटश्चैवसप्तगोराशिराघकः ॥ चरस्थिर
द्विभावमेषाद्यास्युर्यथाक्रमात् ॥१४॥ कुलीरोमकरश्चैवतुलामेषादयश्चरः ॥ चरकार्यंजयंकामंगमाचरे
चशुभाशुभं ॥१५॥ स्थिरोवृषोहरिःकुंभोवृश्चिकःस्थिरकार्यके ॥ शीघ्रंगमागमौनस्तारोगार्तोनैवमुच्यते ॥१६॥ मिथुनः क
न्यकामीनोधनुश्चद्विस्वभावकाः ॥ द्विस्वभावाःशुभाश्चैतेसर्वकार्येषुनित्यशः ॥१७॥ यात्रावाणिज्यसंग्रामविवाहेराजदर्श
ने ॥ वृधिंजयंतथालाभंयुद्धेजयेमवाप्नुयात् ॥१८॥ अश्विनीविंशताराश्च तुरगस्याकृतिर्यथा ॥ यद्यत्रकुरुतेवृष्टि
रेकरात्रंप्रवर्षति ॥१९॥ यमभेतुयदावृष्टिःपक्षमेकंतुवर्षति ॥२०॥ ॥इत्याग्नेयेयुद्धजयार्णवेनानावचनानि॥
॥१२८॥ ईश्वरउवाच ॥ कोटचक्रंप्रवक्ष्यामिचतुरस्रंपुरंलिखेत् ॥ चतुरस्रपुनर्मध्येतन्मध्येचतुरस्रकं ॥१॥ ना
डीत्रितयचिन्हानिध्वंमेषाद्याःपूर्वदिङ्मुखाः ॥ कृत्तिकापूर्वभागेतुआश्लेषाग्नेयगोचरे ॥२॥ भरणीदक्षिणे

स्यांविशाखानैरृतेन्यसेत् ॥ अनुराधापश्चिमेचश्रवणंवायगोचरे ॥३॥ धनिष्ठाचोत्तरेन्यस्यैशान्यांरेवतींतथा ॥ बा
ह्यानाड्यांस्थितान्येवंऋक्षाणिचप्रयत्नतः ॥४॥ रोहिणीपुष्यफल्गुन्यःस्वातीजेष्ठाक्रमेणतु ॥ अभिजिच्छततारास्तुअ
श्विनीमध्यनाडिका ॥५॥ कोटमध्येतुयानाडिकथयामिप्रयत्नतः ॥ मृगश्चाभ्यंतरेपूर्वेतस्याग्नेयपुनर्वसुः ॥६॥ उत्त
राफल्गुनीयाम्येचित्रांनैरृतिसंस्थिता ॥ मूलंतुपश्चिमेन्यस्यउत्तराषाढवायवे ॥७॥ पूर्वाद्दपदासौम्येरेवतीईशगोचरे ॥
कोटस्याभ्यंतरेनाडीस्फुक्ताष्टकसमन्विता ॥८॥ आर्द्राहस्ततथाषाढचतुष्कंचोत्तरांतिकं ॥ मध्येस्तंभचतुष्कंतुतद्या
त्कोटस्यकोटरे ॥९॥ एवंदुर्गस्यविन्यासंबाह्यादाल दिशाधिपान् ॥ आगंतुकोयदायोधात्रस्थानस्यात्फलान्वितः
॥१०॥ कोटमध्येग्रहासौम्यायदाऋक्षान्वितःपुनः ॥ जयंमध्यस्थितानातुभंगमागामिनंविदुः ॥११॥ प्रवेश
तेप्रवेष्टव्यंनिर्गमेनचनिर्गमेत् ॥ भृगुःसौम्यस्तथाभौमऋक्षांतंसंकुलंयदा ॥१२॥ तदाभंगंविजानीयाजयमागंतु
कस्यच ॥ प्रवेशऋक्षेचतुष्केतुसंग्रामंचारभेद्यदा ॥१३॥ तदासिध्यतितत्तंगंनकुर्यात्तत्रविस्मयं ॥१४॥ इत्याग्नेयेमहा
पुराणेकोटचक्रं ॥१२९॥ ईश्वरुवाच ॥ अर्धमानंप्रवक्ष्यामिउल्कापातोथभूश्चला ॥ निर्घातोग्रहणंवेशो दिशांदाहो
भवेद्यदा ॥१॥ लक्षयेन्मासिमास्येवंयद्येतेस्युश्चचैत्रके ॥ अलंकारादिसंग्रह्यषभिमासैश्चतुर्गुणं ॥२॥ वैशाखेचाष्टमे
मासीषड्गुणंसर्वसंग्रहेत् ॥ जेष्टेमासीतथाषाढेयवगोधूमधान्यकैः ॥३॥ श्रावणेघृततैलाद्यैराश्विनेवस्त्रधान्यकैः ॥
कार्तिकेधान्यकैःक्रीतैर्नमासिस्यान्मार्गशीर्षके ॥ पुष्येकुंकुमगंधाद्यैर्लाभोधान्यैश्चमाघके ॥ गंधाद्यैफाल्गुनक्रीतैर
र्घकांडमुदाहृतं ॥५॥ ॥इत्याग्नेअर्घकांड॥ ॥ईश्वरुवाच ॥ मंडलानिप्रवक्ष्यामिचतुर्धाविजयायहि ॥ कृ
त्तिकाचमघापुष्यंपूर्वाचैवतुफल्गुनी ॥ विशाखाभरणीचैवपूर्वाभाद्रपदातथा ॥ आग्नेयंमंडलंभद्रेनस्यवक्ष्या
मिलक्षणं ॥२॥ यद्यत्रचलतेवायुर्वेष्टनंशशिसूर्ययोः ॥ भूमिकंपोथनिर्घातोग्रहणंचंद्रसूर्ययोः ॥ ३॥ धूमज्वा

लादिशांदाहः केतोश्चैवप्रदर्शनं॥रक्तवृष्टिश्चोपतापःपाषाणतपनंतथा॥४॥नेत्ररोगोतिसारश्चअग्निश्चप्रबलोभवेत्॥स्वल्पक्षी
रास्तथागावःस्वल्पपुष्पफलाद्रुमाः॥५॥विनाशश्चैवसस्यानांस्वल्पवृष्टिंविनिर्दिशेत्॥चतुर्वर्णाःप्रपीड्यंतेक्षुधार्ताअखिला
नराः॥६॥सैंधवायामुनाश्चैवघुर्ज्जिकाबोजवाह्लिकाः॥जालंधरंचकाश्मीरसप्तमंचोत्तरापथं॥७॥देशाश्चैतेविनश्यंतितस्मि
न्नुत्पातदर्शने॥हस्तचित्रामघास्वातीमृगोयाथपुनर्वसुः॥८॥उत्तराफल्गुनीचैवअश्विनीचतथैवच॥यद्यत्रचलतेकिंचित्
द्वायव्यंतंविनिर्दिशेत्॥९॥नष्टधर्माप्रजाःसर्वाहाहाभूताविचेतसः॥डाहालंकामरूपंचकलिंगंकोशलस्तथा॥१०॥अयोध्या
चअवंतीचनश्यंतेकोंकणांध्रकाः॥अश्लेषाचैवमूलंतुपूर्वाषाढातथैवच॥११॥रेवतीवारुणर्क्षंतथाभाद्रपदोत्तरा॥यदात्रच
चलतेकिंचिद्दारुणंतंविनिर्दिशेत्॥१२॥बहुक्षीरप्रदागावोबहुपुष्पफलाद्रुमाः॥आरोग्यंतत्रजायेतबहुसस्याचमेदिनी॥१३॥
धान्यानिचसमर्घाणिसुभिक्षंपार्थिवंभवेत्॥परस्परंनरेंद्राणांसंग्रामोदारुणोभवेत्॥१४॥ज्येष्ठाचरोहिणीचैवअनुराधाचवै
ध्रुवं॥धनिष्ठाचोत्तराषाढाअभिजित्सप्तमस्तथा॥१५॥यद्यत्रचलतेकिंचिन्माहेंद्रंतंविनिर्दिशेत्॥प्रजाःसमुदितास्तस्मिन्
सर्वरोगविवर्जिताः॥१६॥संधिंकुर्वंतिराजानःसुभिक्षंपार्थिवंशुभं॥यामस्तद्विविधोज्ञेयोमुखपुच्छकरोमहान्॥१७॥चंद्रोरा
हुस्तथादित्यएकराशौयदास्थिताः॥मुखग्रासस्तुविज्ञेयोजामित्रेपुच्छउच्यते॥१८॥मनोपंचदशोत्पक्षेयदाचरतिचंद्रमाः॥
तिथिच्छेदतुसंप्राप्तेसोमग्रासंविनिर्दिशेत्॥१९॥ ॥इत्याग्नेयेयुद्धजयार्णवेमंडलानि॥१३१॥ईश्वरउवाच॥प्रदक्षि
णमकारादीन्स्वरान्पूर्वादितोलिखेत्॥चैत्राद्यंभ्रमणंचक्रंप्रतिपत्पूर्णिमातिथिः॥१॥त्रयोदशीचतुर्दशीअष्टम्येकाच
सप्तमी॥प्रतिपत्त्रयोदश्यंतातिथयोद्वादशस्मृताः॥२॥चैत्रचक्रेतुसंस्पर्शाज्जयलाभादिकंविदुः॥विषमेतु
शुभंज्ञेयंसमेचाशुभमीरितं॥३॥युद्धकालेसमुत्पन्नेयस्यनामघ्रदाहृतं॥मात्रारूढंतुयन्नामआदित्यागुरुरेवच॥४॥

जयस्तस्यसदाकालंसंग्रामेचैवभीषणे॥ह्रस्वनामयदायोधाम्रियतेह्यनिवारितः॥५॥प्रथमोदीर्घआदिस्थोद्वितीयोमध्यमंतकः॥द्वौमध्येन
प्रथमतोजायतेनात्रसंशयः॥६॥पुनश्चांतेयथावादोस्वरारूढंतुदृश्यते॥ह्रस्वस्यमरणंविद्याद्दीर्घस्यैवजयोभवेत्॥७॥नरचक्रंप्रवक्ष्यामि
ऋक्षपिंडात्मकंयथा॥प्रतिमामालिखेत्पूर्वंपश्चादृक्षाणिविन्यसेत्॥८॥शीर्षेत्रीणिमुखेचैकंद्वेऋक्षेनेत्रयोर्न्यसेत्॥वेदसंस्थानिहस्ता
भ्यांकरेऋक्षद्वयंपुनः॥९॥हृदयेभूतसंस्थानिवेदर्क्षाणिपादयोः॥नामाद्यृक्षंस्फुटंकृत्वाचक्रमध्येतुविन्यसेत्॥१०॥नामाद्यृक्षंस्फुटंकृ
त्वाचक्रमध्येतुविन्यसेत्॥नेत्रेशिरोदक्षकर्णेयाम्यहस्तेचपादयोः॥११॥हृद्ग्रीवावामहस्तेपुनरन्त्यंतुपादयोः॥यस्मिन्नृक्षेस्थितःसूर्यः
सौरिभौमिस्तसैंहिकः॥१२॥तस्मिन्स्थानेस्थितेविद्याद्धानमेवनसंशयः॥ इतिघातचक्रं॥जयचक्रंप्रवक्ष्यामिआदितोताश्चवैलि
खेत्॥१३॥लेखास्त्रयोदशालिख्यषड्रेखास्तिर्यगालिखेत्॥दिग्ग्रहामुनयःसूर्याऋषियुग्मतिथिःक्रमात्॥१४॥मूर्छनाःस्मृतिवेदर्क्षजि
अकडमायुधः॥आदिस्याद्यासप्तकृतेनामांतेधलिनोग्रहाः॥१५॥सौरिभौमाख्यायसौम्यश्चसंधये॥रेखाद्वादशचोर्ध्वस्थषट्चन्यास्त
थोत्तराः॥१६॥नरुश्चैवतुधनुःशाणिनेत्रेचरविमंडलं॥तिथयश्चसावेदाअपिसप्तदशाथवा॥१७॥चक्ररंध्राःसमाख्यातःअकटयान
मन्यसेत्॥एकैकमक्षरंन्यस्त्वाशेषाण्यपक्रमान्न्यसेत्॥१८॥नामाक्षरकृतंपिंडंवसुभिर्भाजयेत्ततः॥वायसान्मंडलोधूम्रोमंडलाद्रास
भोवरः॥१९॥रासभोवृषभःश्रेष्ठोवृषभात्कुंजरोवरः॥कुंजराच्चपुनःसिंहःसिंहाश्चैवतरुर्वरः॥२०॥तरोश्चैवबलीधूम्रात्समादिबलाब
लं॥सेवाचक्रंप्रवक्ष्यामिलाभालाभसुसूचकं॥२१॥पितामातातथाभ्रातादंपतीचविशेषतः॥तस्मिन्चक्रेतुविज्ञेयंयोयस्माल्लभ्यतेफ
लं॥२२॥षडूर्ध्वाःस्थापयेत्रेखाभिन्नाश्चाष्टौतुतिर्यगाः॥कोष्ठकाःपंचत्रिंशच्चतेषुवर्णान्समाविशेत्॥२३॥स्वरान्पंचसमुद्धृत्य
स्पर्शांश्चात्समालिखेत्॥ककारादिहकारांतान्हीनांगांस्त्रीन्विवर्जयेत्॥२४॥सिद्धसाध्यःसुसिद्धश्चअरिर्मृत्युश्चनामतः॥
अरिर्मृत्युश्चद्वावेतौवर्जयेत्सर्वकर्मसु॥२५॥एषांमध्येयदानामलक्षयेत्स्वप्रयत्नतः॥आत्मपक्षेस्थितास्ताःसर्वेतेशुभदाय
काः॥२६॥द्वितीयःपोषकश्चैवतृतीयश्चार्थदायकाः॥आत्मनाशश्चतुर्थस्तुपंचमोमृत्युदायकः॥२७॥स्थानेसर्वार्थलाभायमित्र
भ्रात्रादिबांधवाः॥सिद्धःसाध्यःसुसिद्धश्च॥२८॥सर्वेतेफलदायकाः२८॥अरिमृत्युश्चद्वावेतौवर्जयेत्सर्वकर्मसु॥आकारा

९१

अयथाप्रोक्तंअइउएओविदुस्तथा॥२९॥पुनश्चैवांशकान्वक्ष्येवर्गाकेशेस्मसंकुलान्॥देवाअकारवर्गेतुदैत्याःकवर्गमाश्रिताः॥३०॥नागा
श्चैवचवर्गाःस्युःगंधर्वाश्चटवर्गजाः॥तवर्गेऋषयःप्रोक्ताःपवर्गेराक्षसास्मृताः॥३१॥पिशाचाश्चयवर्गेचशवर्गेमानुषाःस्मृताःदेवेभ्यो
बलिनोदैत्याःदैत्येभ्यःपन्नगास्तथा॥३२॥पन्नगेभ्यगंधर्वागंधर्वादृषयोवराः॥ऋषिभ्योराक्षसाश्चराक्षसेभ्यःपिशाचकाः॥३३॥
पिशाचेभ्योमानुषास्युर्दुर्बलंवर्जयेत्बली॥पुनर्मित्रविभागंतुताराचक्रेक्रमाच्छृणु॥३४॥नामाद्यक्षरमृक्षंतुस्फुटंकृत्वातुपूर्वतः
ऋक्षेतुसंस्थितास्ताराःनवत्रिकयथाक्रमात्॥३५॥जन्मसंपद्विपत्क्षेमनामकेर्क्षतारकाइमाः॥प्रत्यराधनदाषष्ठीनैधनामैत्रकेप
रे॥३६॥परमैत्रास्त्विमास्ताराजन्मतारातुशोभना॥संपत्तारामहाश्रेष्ठाविपत्तारातुनिष्फला॥३७॥क्षेमतारासर्वकार्येप्रत्य
रीचात्मनाशिनी॥धनदाराज्यलाभादिनिधनाकार्यनाशिनी॥३८॥मित्रताराचमित्राच्चपरमित्राहितायदा॥३९॥ ॥
इतिताराचक्रं॥ ॥मात्रावैस्वरसंज्ञास्याच्चाममध्येक्षिपेप्रिये॥विंशत्याचहरेद्भागंयच्छेषंतत्फलंभवेत्॥३९॥ उभयोर्ना
ममध्येतुलक्षयेच्चधनऋणं॥हीनमात्रास्त्वृणंज्ञेयंधनंमात्राधिकंपुनः॥४०॥धनेनमैत्रतान्नृणांऋणेनैवस्वदासता॥सेवाचक्र
मिदंप्रोक्तंलाभालाभादिदर्शकं॥४१॥मेषमिथुनयोःप्रीतिर्मैत्रीमिथुनसिंहयोः॥तुलसिंहौमहामैत्रीएवंधनुर्घटेपुनः॥४२॥
मित्रसेवांनकुर्वीतमित्रैमीनवृषोमतौ॥वृषकर्कटयोर्मैत्रीकुलीरघटयोस्तथा॥४३॥कन्यावृश्चिकयोरेवंतथामकरकीटयोः॥
मीनमकरयोर्मैत्रीतृतीयैकादशेस्थिता॥४४॥तुलामेषोमहामैत्रीविद्विष्टौवृषवृश्चिकौ॥मिथुनधनुषोप्रीतिःकर्कटमकर
योस्तथा॥४५॥मृगकुंभकयोःप्रीतिःकन्यामीनौतथैवच॥४६॥ ॥आग्नेयेमहापुराणेयुद्धजयार्णवे॥१३२॥ ॥
अग्निरुवाच॥गर्भजातस्यवक्ष्यामिक्षेत्राधिपस्वरूपकं॥नातिदीर्घःकृशःस्थूलःसमांगोगौरपैत्तिकः॥१॥रक्ताक्षोगुणवां
छूरोगृहेसूर्यस्यजायते॥सौभाग्योमृदुस्वरश्चजातश्चंद्रगृहोदये॥२॥वाताधिकोनिलुब्धादिजातोभूमिभुवोगृहे॥बु
धिमान्सभगोमानीजातःसौम्यगृहोदये॥३॥षड्कोधश्चशुभकोजातोगुरुगृहेनरः॥त्यागीभोगीचसुभगोजातोभृगुगृहेन

रः॥४॥बुधिमान्सुभगोमानीजातश्चार्किगृहेनरः॥सौम्यलग्नेतुसौम्यःस्यात्क्रूरःस्यात्क्रूरलग्नके॥५॥दशाफलंगोरि
वक्ष्येनामराशौतुसंस्थितं॥गजाश्वधनधान्यानिराजश्रीर्विपुलाभवेत्॥६॥पुनर्धनागमश्चापिदशायांभास्करस्यतु॥
इव्यस्त्रीदाचंद्रदशाभूमिलाभःसुखंकुजे॥७॥भूमिर्धान्यधनंबौधेगजाश्वादिधनंगुरौ॥स्थानयानधनंशुक्रेशनौव्या
ध्यादिसंयुतः॥८॥स्थानसेवादिचाध्यानंवाणिज्यंराहुदर्शने॥वामनाडिप्रवाहेस्याच्चनामचेद्विषमाक्षरं॥९॥तदाजयति
संग्रामेशनिभौमसमैहिकाः॥दक्षनाडीप्रवाहोकैवाणिज्येचैवनिष्फला॥१०॥संग्रामेजयमाप्नोतिसमतामातरोभयं॥अ
थश्चोरजयंविद्यादूर्ध्वचौरेणैरेमृतिं॥११॥ॐह्रूंॐह्रुंॐस्तंभयमोदयॐॐचूर्णयॐसर्वशत्रुमर्दयॐह्रूंॐह्रःफट्॥१२॥
सप्तवारान्यसेमंत्रंध्यात्वास्यांनंतुभैरवं॥चतुर्भुजंदशभुजंविंशद्बाह्वथवाशुभं॥१३॥शूलखड्गांगहस्तेंतुरवड्गकट्टारिकोद्य
तं॥भक्षणपरसैन्यानांमात्मसैन्यपराङ्मुखं॥१४॥संमुखंशत्रुसैन्यस्यशतमष्टोत्तरंजपेत्॥जखाडमरुकाशब्दाछत्रं
त्यक्त्वापलायते॥१५॥परसैन्यंश्रृणुभंगंप्रयोगेनपुनर्वदे॥स्मशानांगारमादायविष्टांचोलूककाकयोः॥१६॥कपटेप्रतिमालिख्य
साध्यस्यैवाक्षरंयथा॥नामाथनवधालिख्यरिपोश्चैवयथाक्रमं॥१७॥मूर्ध्निवक्रेललाटेचहृदयेगुह्यपादयोः॥पृष्टेचबाहुमध्येतु
नामवैनवधालिखेत्॥१८॥मोटयेद्युद्धकालेतुलक्षयित्वातुविद्यया॥तार्क्ष्यचक्रंप्रवक्ष्यामिजयार्थंभूयथाक्षराः॥१९॥क्षिप
ओंस्वाहातार्क्ष्यात्माशक्रोरोगविषादिनुत्॥दुष्टभूतग्रहार्तस्यव्याधितस्यांतरस्यच॥२०॥करोतियादृशंकर्मतादृशंसिध्यते
खगात्॥स्थावरंजंगमंचैवमृताश्चकृत्रिमेविषं॥२१॥तत्सर्वनाशमायातिसाधकस्यावलोकनात्॥पुनर्ध्यायेन्महातार्क्ष्यं
द्विपक्षंमानुषाकृतिं॥२२॥द्विभुजंवक्रचंचुंचगजकूर्मधरंप्रभुं॥असंख्योरगपादस्थंमागच्छंतंखमध्यतः॥२३॥ग्रसंतंचै
वखादंतंतुदंतंचाहवेरिपुं॥चंचाहताश्चद्रष्टव्याःकेचित्सादैश्चचूर्णिताः॥२४॥पक्षपातैश्चूर्णिताश्चकेचिन्नष्टादिशो

९२

दश॥ तार्क्ष्यध्यानान्वितोयश्चत्रैलोक्येह्यजयोभवेत् ॥२५॥ पिच्छिकांतुप्रवक्ष्यामिमंत्रसाधनतांक्रियां॥ ॐ ह्रूं यक्षिक्षिप ॐ ह्रूं सः
महाबलपराक्रमपरसैन्यंसर्वंभक्षय॥२६॥ ॐ मर्दय ॐ चूर्णय ॐ विद्रावय ॐ ह्रूं खः ॐ ह्रूं भैरवोज्ञापयतीस्वाहा॥ अयंचद्रग्र
हणेतुजपंकृत्वातुपिच्छिकां॥ मंत्रयेत्भ्रामयेत्सैन्यंसंमुखंगजसिंहयोः॥२८॥ ध्यानाद्दर्वान्मर्दयेच्चसिंहारूढाम्मृगाविकान्
॥शल्यादुंगप्रवक्ष्यामिहरमंत्रेणबोधयेत्॥२९॥ मातृणांचरुकंदद्यात्कालरात्र्यैविशेषतः॥ स्मशानभस्मसंयुक्तंमालती
चामरीतथा॥३०॥ कार्पासस्यमूलमात्रांतेनक्हरंतुबोधयेत॥ ॐ अहेहेभाहंतिअहेमहेर्णिभजहि॥३१॥ नेहिहिमसान
हिहिनेहिमासानंहिकिलली॥ ॐ ह्रूं फट् अरेर्नाशंदाञ्जंभयाभगविध्याअपराजितान्वधन्त्रूरताभ्यांतुलिंकेनहि॥३३॥
किणिकिलिविकिलिइछाकिणीकिणीभूतहनिशंखड्गितुमेदंडहस्तेरौद्रिमाहेश्वरीउल्कामुखीज्वालामुखिशंकुकर्णे
शुष्कजंघेअलंछ्रषेहहरु ॐ सर्वादुष्टानख ॐ ॐ अन्यान्निरीक्षयद्द्विस्तान्मोहय ॐ रुद्रस्यहृदयेस्थितारोद्रिसोम्यं
नभावेनआत्मरक्षांततः कुरुस्वाहा॥३७॥ वाह्यतोमातृःमलिख्यसकलाकृतिवेष्टितोः॥ नागपत्रेलिखेद्विद्यांसर्वकामा
र्थसाधिनीं॥३८॥ हस्ताद्यैःधारितापूर्वंब्रह्मरुद्रेंद्रविष्णुभिः॥ गुरुसंग्रामकालेतुविधयारक्षतांस्कराः॥३९॥ रक्षयानारसिं
ह्याचभैरव्याशक्तिरूपया॥ सर्वत्रैलोक्यमोहिन्यासौर्यादिवास्करेरणे॥४०॥ बीजसंपुटितंनामकर्णिकायांदलेषुच॥ पूजा
क्रमेणचांगानिरक्षायंत्रस्मृतंशुभे॥४१॥ मृत्युंजयंप्रवक्ष्यामिनामसंस्कारमध्यगं॥ कलाभिर्वेष्टितंपश्चात्सकारेणानि
बोधितं॥४२॥ जकारंबिंदुसंयुक्तंओंकारेणसमन्वितं॥ धकारोदरमध्यस्थंटकारेणनिबोधितं॥४३॥ चंद्रसपुटमध्य
स्थंसर्वदुष्टविमर्दकं॥ अथवाकर्णिकायांचलिखेन्नामचकारणं॥४४॥ पूर्वेदलेतथोंकारंसंदक्षेचोत्तरेलिखेत्॥ आ
ग्नेय्यादौहंकारंदलेषोडशकेस्वरान्॥४५॥ चतुस्त्रिंशद्दलेकाद्यान्बाह्येमंत्रंचमृत्युजित्॥ लिखेद्वैभूर्जपत्रेतुरोचना
कुंकुमेनच॥४६॥ कर्पूरचंदनाभ्यंचश्वेतसूत्रेणवेष्टयेत्॥ सिक्थकेनपरिछाद्यकलशोपरिपूजयेत्॥ ४७॥

DR. BHAU DAJI MEMORIAL

Continuous p. 245-484 to the end

र्यविनानिसदाक्षयंमेक्षयंचमासंततिरभ्युपैतु॥१५॥ यथाच्युतस्त्वंपरतःपरस्मात्सब्रह्मभूतःपरतःपरात्मन्॥ तथाच्युतत्वंकुरुवांछि
तंमेमयाकृतंपापहराप्रमेय॥१६॥ अच्युतानंदगोविंदप्रसीदपदमीप्सितं॥ अक्षयंमाममेयात्मन्कुरुष्वपुरुषोत्तम॥१७॥ सप्तवर्षाणिसं
पूज्यभुक्तिमवाप्नुयात्॥ अनंतव्रतमाख्यास्येनक्षत्रव्रतकेऽर्थदं॥१८॥ मार्गशीर्षेमृगशिरेगोमूत्राशीयजेद्धरिं॥ अनंतंसर्वकामानामनंतोभ
गवान्फलं॥१९॥ ददात्यनंतंचपुनस्तदेवान्यत्रजन्मनि॥ अनंतपुण्योपचयंकरोत्येतन्महाव्रतं॥२० यथाभिलषितप्राप्तिंकरोत्यक्षयमेवच॥ पा
दादिपूज्यनक्तंचभुंजीयात्तैलवर्जितं॥२०॥ घृतेनानंतमुद्दिश्यहोमोमासचतुष्टये॥ चैत्रादौशालिनाहोमःपयसाश्रावणादिषु॥२१॥ मांधाताभूद्युव
नाश्वादनंतव्रतकारिणः॥२२॥ इत्याग्नेयेनक्षत्रव्रतानि॥ अग्निरुवाच॥ दिवसव्रतकंवक्ष्येत्वादौधेनुव्रतंवदे॥ यश्चोभयमुखींदत्त्वाप्रभूतकनकान्वि
तां॥ दिनंपयोव्रतस्तिष्ठेत्सयातिपरमंपदं॥ त्र्यहंपयोव्रतंकृत्वाकांचनंकल्पपादपं॥२॥ दत्त्वाब्रह्मपदंयातिकल्पवृक्षव्रतंस्मृतं॥ दद्याद्विंशत्पलादूर्ध्वं
महींकृत्वातुकांचनीं॥३॥ दिनंपयोव्रतस्तिष्ठेद्रुद्रगःस्याद्दिनव्रते॥ पक्षेपक्षेत्रिरात्रंतुभक्तेनैकेनयःक्षपेत्॥४॥ विपुलंधनमाप्नोतित्रिरात्रव्रतकृद्दिवं॥
मासेमासेत्रिरात्राशीएकभुक्तिगणेश्वरं॥५॥ यस्त्रिरात्रव्रतंकुर्यात्समुद्दिश्यजनार्दनं॥ कुलानांशतमादायसयातिभवनंहरेः॥६॥ नवम्यांचादिमेपक्षेनरो
मार्गशिरस्यथप्रारभेतत्रिरात्राणांशतंतुविधिवद्व्रती॥७॥ ॐ नमोभगवतेवासुदेवायसहस्रंवाशतंजपेत्॥ अष्टम्यामेकभक्ताशीदिनत्रयमुपावसेत्॥८॥
द्वादश्यांपूजयेद्विष्णुंकार्तिकेपावयेद्व्रतं॥ विप्रान्संभोज्यवस्त्राणिशयनान्यासनानिच॥९॥ छत्रोपवीतपात्राणिददत्संप्रार्थयेद्द्विजान्॥ व्रतेस्मिन्दुष्करे
चापिविकलंयदभून्मम॥१०॥ भवद्भिस्तदनुज्ञातंपरिपूर्णंभवत्विति॥ भुक्तभोगोव्रजेद्विष्णुंत्रिरात्रव्रतकव्रती॥११॥ कार्तिकेव्रतकंवक्ष्येभुक्तिमुक्तिप्रदाय
कं॥ दशम्यांपंचगव्याशीएकादश्यामुपोषितः॥१२॥ कार्तिकस्यासितेप्रार्च्यविष्णुंदेवोविमानगः॥ चैत्रेत्रिरात्रंनक्ताशीत्स्वगांपंचप्रदःसुखी॥१३ त्रिरात्रंपयसः
पानंमुपवासःपरंत्र्यहं॥ षष्ठ्यादिकार्तिकेशुक्लेकृच्छ्रोमाहेंद्रउच्यते॥१४॥ पंचरात्रंपयःपीत्वादध्याहारोह्युपोषितः॥ एकादश्यांकार्तिकेतुकृच्छ्रोयंभास्करोऽर्थदः॥१५
यवागुंयावकंशाकंदधिक्षीरंघृतंजलं॥ पंचगव्यादिनेश्रेष्ठःकृच्छ्रःसांतपनिःस्मृतः॥१६॥ आग्नेयेदिवसव्रतानि॥ अग्निरुवाच॥ मासव्रतकमाख्यास्येभु
क्तिमुक्तिप्रदायकं॥ आषाढादिचतुर्मासमभ्यंगंवर्जयेत्सुखी॥१॥ वैशाखेपुष्पलवणेत्यक्त्वागोदोऽनृपोभवेत्॥ गोदोमासोपवासीचभीमव्रतकरोहरिः॥२॥ आ
षाढादिचतुर्मासंप्रातःस्नायीचविष्णुगः॥ माघेमास्यथचैत्रेवागुडधेनुप्रदोभवेत्॥३॥ गुडव्रतंतृतीयायांगौरीगःस्यान्महाव्रती॥ मार्गशीर्षादिमासेषुनक्तकृ
द्विष्णुलोकभाक्॥४॥ एकभक्तव्रतीतद्वद्द्वादशीव्रतकंत्वथ॥ फलव्रतीचतुर्मासंफलंत्यक्त्वाप्रदापयेत्॥५॥ श्रावणादिचतुर्मासंव्रतैःसर्वंलभेद्व्रती॥ आषाढ
स्यासितेपक्षेएकादश्यामुपोषितः॥६॥ चातुर्मास्यव्रतानांतुकुर्वीतपरिकल्पनं॥ आषाढ्यांचाथसंक्रांतौकर्कटस्यहरिंयजेत्॥७॥ इदंव्रतंमयादेवगृहीतंपुरत

दद्य

स्तव॥निर्विघ्नं प्रसिद्धिमायातु प्रसन्ने त्वयि केशवे॥८॥गृहीतेस्मिन्व्रते देव यद्यपूर्णे म्रियेह्यहं॥तन्मे भवतु संपूर्णं त्वत्प्रसादाज्जनार्दन॥मांसत्यागी तु विप्रः
स्यात्तैलत्यागी हरिं व्रजेत्॥एकांतरोपवासी च त्रिरात्री विष्णुलोकभाक्॥१०॥चांद्रायणी विष्णुलोकी मौनी स्यान्मुक्तिभाजनं॥प्राजापत्यव्रती स्वर्गी सक्तु
यावकभक्षकः॥११॥दुग्धाद्याहारवान्स्वर्गी पंचगव्यादिभुक्तथा॥शाकमूलफलाहारो नरो विष्णुपुरीं व्रजेत्॥१२॥मांसवर्जी यवाहारो रसवर्जी हरिं व्रजेत्॥
कौमुदं च व्रतमाख्यास्ये आश्विने समुपोषितः॥१३॥द्वादश्यां प्रजयेद्विष्णुं प्रलिप्य ओत्पलादिभिः॥घृतेन तिलतैलेन दीपो नैवेद्यमर्पयेत्॥१४॥ओंनमो वासु
देवाय मालत्या मालया यजेत्॥धर्मकामार्थमोक्षांश्च प्राप्नुयात्कौमुदव्रती॥१५॥सर्वं लभेद्धरिं प्राप्य मासोपवासकृद्व्रती॥ आग्नेये महापुराणे मासव्रतानि॥
अग्निरुवाच॥ऋतुव्रतान्यहं वक्ष्ये भुक्तिमुक्तिप्रदानि ते॥इंधनानि तु यो दद्याद्वर्षादिचतुरो ह्यृतून्॥१॥घृतधेनुप्रदश्चांते ब्राह्मणोग्निव्रती भवेत्॥कृत्वा मौनं तु संध्यायां
समाप्ते घृतकुंभदः॥तिलघंटावस्त्रदानात्सुखी: सारस्वतव्रती॥पंचामृतेन स्नपनं कृत्वाब्दं धेनुदो नृपः॥३॥एकादश्यां तु नक्ताशी चैत्रे भक्तं निवेदयेत्॥हैमं विष्णोः
पदं याति समाप्तो विष्णुसद्व्रती॥४॥पायसाशी गोयुगदः श्रीभाग्देवी व्रती भवेत्॥निवेद्य पितृदेवेभ्यो यो भुंक्ते स भवेन्नृपः॥५॥वर्षव्रतानि चोक्तानि संक्रांतिव्रतकं
वे॥संक्रांतौ स्वर्गलोकी स्याद्रात्रिजागरणान्नरः॥६॥अमावास्यां तु संक्रांतौ शिवार्कयजनात्तथा॥उत्तरे त्वयने चेश्यः प्रातःस्नानेन केशवः॥७॥द्वात्रिंशत्पलमानेन सर्वपा
पैः प्रमुच्यते॥घृतक्षीरादिना स्नाप्य प्राप्नोति विषुवादिषु॥८॥स्त्रीणामुमाव्रतं श्रीदं तृतीयास्वष्टमीषु वा॥गौरीं महेश्वरीं चापि यजेत्सौभाग्यमाप्नुयात्॥९॥उमाम
हेश्वरौ प्रार्च्य अविद्योगादिमाप्नुयात्॥मूलव्रतकरी स्त्री च उमेशव्रतकारिणी॥१०॥सूर्यभक्ता तु या नारी ध्रुवं सा पुरुषो भवेत्॥११॥ इत्याग्नेये नानाव्रतानि॥
अग्निरुवाच॥दीपदानव्रतं वक्ष्ये भुक्तिमुक्तिप्रदायकं॥देवद्विजातिकगृहे दीपदोब्दं स सर्वभाक्॥१॥चतुर्मासं विष्णुलोकी कार्तिके स्वर्गलोक्यपि॥दीपदानात्परं ना
स्ति न भूतं न भविष्यति॥२॥दीपेनायुश्च चक्षुष्मान्दीपाल्लक्ष्मीसुतादिकं॥सौभाग्यं दीपदः प्राप्य स्वर्गलोके महीयते॥३॥विदर्भराजदुहिता ललिता दीपदानभाक्
चारुधर्मक्षमापत्नी शतभार्याधिकाभवत्॥४॥ददौ दीपसहस्रं सा विष्णोरायतने सती॥पृष्टा सा दीपमाहात्म्यं सपत्नीभ्य उवाच च॥५॥ललितोवाच॥सौवीरराजस्य
पुरा मैत्रेयो भूत्पुरोहितः॥तेन चायतनं विष्णोः कारितं देविकातटे॥६॥कार्तिके दीपकस्तेन दत्तः संप्रेरितो मया॥वक्त्रप्रांतेन नश्यंती सा मार्जारस्य तदा भयात्॥७॥निर्वा
णवान्प्रदीपो भूद्दर्शौ मूषिकया तदा॥ततो राजात्मजा जाता राजपत्नी शताधिका॥८॥असंकल्पितमप्यस्य प्रेरणं यत्कृतं मया॥विष्ण्वायतनदीपस्य तस्येदं भुज्यते फलं
॥९॥जातिस्मरा ह्यतो दीपान्प्रयच्छामि तु नित्यशः॥एकादश्यां दीपदो वै विमाने दिवि मोदते॥१०॥जायते दीपहर्ता तु मूको वा जड एव वा॥अंधे तमसि दुष्पारे नरके पतिता
किल॥११॥विक्रोशमानांश्च नरान्यमकिंकर आहतान्॥विलापैरलमप्यत्र किं वो विलपिते फलं॥१२॥यदा प्रमादिभिः पूर्वमत्यंतं समुपेक्षितः॥जंतुर्जन्मसहस्रेभ्यो ह्येक
स्मिन्मानुषे यदि॥१३॥न आप्यति विमूढात्मा किं भोगानभिधावति॥स्वहितं विषयास्वादैः क्रंदनं तदिहागतं॥१४॥भुज्यते यत्कृतं पूर्वमेतत्किं वो न चिंतितं॥परस्त्रीपुरु

षाद्यंगं प्रनये दुःखदं हि वः॥१५॥मुहूर्तविषयास्वादो नैककोट्यब्ददुःखदः॥परस्त्रीहारि यद्गीतं हाहा तेः किं विलप्यते॥१६॥कोतिभारो हरेर्नाम्नि जिह्वायाः परिकीर्त
ने॥वर्तितैलेन्यमूल्येपि यदग्निर्लभ्यते स्वयं॥१७॥दानाशक्तो हरेर्दीपो हृतस्तत्रोति दुःखदं॥इदानीं किं विलापेन सहध्वं यदुपागतं॥१८॥अग्निरु०॥ललितोक्तं व्रताश्च
त्वा दीपदानादिवं ययुः॥तस्माद्दीपप्रदानेन व्रतानामधिकं फलं॥१९॥ इत्याग्नेये दीपदानव्रतं॥ अग्निरु०॥नवव्यूहार्चनं वक्ष्ये नारदाय हरीरितं॥मंडलेब्जे चर्चयेन्म
ध्ये अबीजं वासुदेवकं॥१॥आबीजं च संकर्षणं अं प्रद्युम्नं च दक्षिणे॥अनिरुद्धं चनैर्ऋते अः नारायणमप्सु च॥२॥तत्सद्ब्रह्माणमनिले हूं विष्णुं क्षौं नृसिंहकं॥उत्तरे भूव
राहं चर्ईशे द्वारि च पश्चिमे॥३॥कं टं गंसं गरुडत्मंतं पूर्ववक्त्रे च दक्षिणे॥खंजं वंहूं फडिति खं त्सैं ठं फं शंगदाविधौ॥४॥वं णं मं क्षं कोणे शंखं धं दं भं हं श्रियं यजेत्॥दक्षिणे
चोत्तरे पुष्टिं गं डं वं शं खबीजकं॥५॥पीठस्य पश्चिमे पंवं वनमालां च पश्चिमे॥श्रीवत्सं चैव सं हं लं छं तं यं कौस्तुभं जलं॥६॥दशमांगं क्रमाद्विष्णोर्नमोनंतमधोर्चयेत्
दशांगादि महेंद्रादीन् पूर्वादौ चतुरो घटान्॥तोरणानि वितानं च अग्न्यनिलेंदुबीजकैः॥मंडलानि क्रमाद्ध्यात्वा तत्कृद्ध्यात्ततः प्लवेत्॥८॥अंबरस्थं ततो ध्या
त्वा सूक्ष्मरूपमथात्मनः॥सितामृतेन निमग्नं च चंद्रबिंबात्स्रुतेन च॥९॥नदेवचात्मनो बीजं ममृतं प्लवसंभवं॥उत्पत्स्यमानं पुरुषं मात्मानमुपकल्पयेत्॥१०॥उत्प
न्नोस्मि स्वयं विष्णुर्बीजं द्वादशाक्षरं जपेत्॥हृच्छिरस्तु शिखा चैव कवचं चास्त्रमेव च॥११॥वक्षो मूर्ध्नि शिखा पृष्ठलोचनेषु न्यसेत्सुतः॥अस्त्रं करद्वये न्यस्य ततो
दिव्यतनुर्भवेत्॥यथात्मनि तथा देवे शिष्यदेहे न्यसेत्तथा॥अनिर्माल्यास्मृता पूजा यद्धरेः पूजनं ह्यदः॥१३॥अनिर्माल्याम्बुजादौ बद्धनेत्राश्च शिष्यकाः॥पु
ष्पं क्षिपेयुर्यन्मूर्तौ तस्य तन्नाम कारयेत्॥१४॥निवेश्य वामतः शिष्यान्तिलव्रीहिघृतं हुनेत्॥शतमष्टोत्तरं हुत्वा सहस्रं कायशुद्धये॥१५॥नवव्यूहस्य मूर्ती
नामंगानां च शताधिकं॥पूर्णां दत्वा दीक्षयेत्तान्गुरुः प्रच्छन्नैर्धनैः॥१६॥ इत्याग्नेये नवव्यूहार्चनं॥ अग्निरुवाच॥पुष्पगंधधूपदीपनैवेद्यैस्तुष्यते
हरिः॥पुष्पाणि देवयोग्यानि ह्ययोग्यानि वदामि ते॥१॥पुष्पं श्रेष्ठं मालती च तमालो भुक्तिमुक्तिमान्॥मल्लिका सर्वपापघ्नी यूथिका विष्णुलोकदा॥२॥अतिमुक्त
कमयं तद्वत्पाटला विष्णुलोकदा॥करवीरैर्विष्णुलोको जपापुष्पैश्च पुण्यवान्॥३॥पावंतीकुब्जकोशैश्च तगरैर्विष्णुलोकभाक्॥कर्णिकारैर्विष्णुलोकः
कुरबैः पापनाशनं॥४॥पद्मैश्च केतकीभिश्च कुंदपुष्पैः परागतिः॥बाणपुष्पैर्बर्बरीभिः कृष्णाभिर्हरिलोकभाक्॥५॥अशोकैस्तिलकैस्तद्वदाटरूषभवैस्तथा
मुक्तिभागी बिल्वपत्रैः शमीपत्रैः परागतिः॥६॥विष्णुलोकं भृंगराजैस्तमालस्य दलैस्तथा॥तुलसी कृष्णगौराख्या कल्हारोत्पलकानि च॥७॥पद्मं कोक
नदं पुण्यं शतपत्रमालयं हरेः॥नीपार्जुनकदंबैश्च बकुलैश्च सुगंधिभिः॥८॥किंशुकैर्मुनिपुष्पैस्तु गोकर्णैर्नागकर्णकैः॥संध्यापुष्पैर्बिल्वतकै रंजनीकेतकी
भवैः॥९॥कूष्मांडतिमिरोत्थैश्च कुशकाशशरोद्भवैः॥कृतामरैश्च मरुकैः पत्रैरन्यैः सुगंधकैः॥१०॥भुक्तिर्मुक्तिः पापहानिर्भक्त्या सर्वैस्तु तुष्यति॥स्वर्ण
लक्षाधिकं पुष्पं माला कोटिगुणाधिका॥११॥स्ववने स्ववने पुष्पैस्त्रिगुणं वनजैः फलं॥विशीर्णैर्नार्चयेद्विष्णुं नाधिकांगैर्न भूटकैः॥१२॥कांचनारैस्त

थान्यैर्गिरिकर्णिकया तथा॥ कुटजैः शाल्मलीजैश्च शिरीषैर्नवकादिकं॥१३॥ स्नानं धूपैश्च स्नपयेच्च पुष्पैर्नीलोत्पलैर्हरिः॥ अर्कमंदारधत्तूरकुसुमैरर्च्यते
ते हरः॥१४॥ कुटजैः कर्कटीपुष्पैः केतकीं न शिवे ददेत्॥ कूष्मांडनिबसंभूतं पैशाचं गंधवर्जितं॥१५॥ अहिंसा इंद्रियजयः क्षांतिर्ज्ञानं दयाश्रुतं॥ भावाष्ट
पुष्पैः संपूज्य देवं स्यात् भुक्तिमुक्तिभाक्॥१६॥ वारुणं वारिजं पुष्पं सौम्यं घृतपयोदधि॥ प्राजापत्यं तथान्नादि आग्नेयं धूपदीपकं॥१७॥ फलपुष्पादिकं चैव
वानस्पत्यं तु पंचमं॥ पार्थिवं कुशमूलाद्यं वायव्यं गंधचंदनं॥१८॥ श्रद्धाख्यं विष्णुपुष्पं च सर्वदा चाष्टपुष्पिका॥ आसनं मूर्तिपंचांगं विष्णुर्वा अष्टपुष्पिका॥१९॥ वि
ष्णोस्तु वासुदेवाद्यैरीशानाद्यैः शिवस्य च॥ इत्याग्नेये पुष्पाध्यायः॥ अग्निरुवाच॥ पुष्पाद्यैः पूजनाद्विष्णोर्न याति नरकान्वदे॥ आयुषोंते नरः प्राणैरनिच्छन्न
पि मुच्यते॥१॥ जलमग्निर्विषं शस्त्रं क्षुद्व्याधिः पतनं गिरेः॥ निमित्तं किंचिदासाद्य देही प्राणैर्विमुच्यते॥२॥ अन्यच्छरीरमादत्ते यातनीयं स्वकर्मभिः॥ भुंक्तेथपा
पकृद्दुःखं सुखं च धर्मायसंगतः॥३॥ नीयते यमदूतैस्तु यमं प्राणिभयंकरैः॥ कुपथे दक्षिणद्वारि धार्मिकः पश्चिमादिभिः॥४॥ यमाज्ञप्तैः किंकरैस्तु पात्यते नरके
षु च॥ स्वर्गं तु नीयते धर्मो वसिष्ठाद्युक्तिसंश्रयात्॥५॥ गोघाती तु महावीच्यां वर्षलक्षं तु पीड्यते॥ ताम्रकुंभे महादीप्ते ब्रह्महा भूमिप्रहारकः॥६॥ महाप्रलयकं या
वद्रौरवे पीड्यते शनैः॥ स्त्रीबालवृद्धहंता तु यावदिंद्राश्चतुर्दश॥७॥ महारौरवके रौद्रे गृहक्षेत्रादिदीपकः॥ दह्यते कल्पमेकं स चौरस्तामिस्रके पतेत्॥८॥ नैक
कल्पं च शूलाद्यैर्भिद्यते यमकिंकरैः॥ महातामिस्रके सर्पजलौकाभिश्च पीड्यते॥९॥ यावद्भूमिर्मातृहाद्या असिपत्रवने सिभिः॥ नैककल्पं तु नरके करंभवालुका
स्व च॥१०॥ येन दग्धो जनस्तत्र दह्यते वालुकादिभिः॥ काकोले कृमिविष्ठाशी एकाकी मिष्टभोजनी॥११॥ कुड्मले मूत्ररक्ताशी पंचयज्ञक्रियोज्झितः॥ सुदुर्गंधे स्त्रभो
जी भवेच्चाभक्ष्यभक्षकः॥१२॥ तैलपाके तु तिलवत्पीड्यते परपीडकः॥ तैलपात्रे तु पच्येत शरणागतघातकः॥१३॥ निरुच्छ्वासे दारुणा शोरसविक्रयको धरो॥ ना
नावज्रकटाहे च महापाते तु वाऽनृती॥१४॥ महाज्वाले पापबुद्धिः क्रकचेऽगम्यगामिकः॥ संकरी गुडपाके च प्रहृदे परमर्मकृत्॥१५॥ क्षारोदे प्राणिहंता च क्षुर
धारे च भूमिहृत्॥ अंबरीषे गोस्वर्णहृत् द्रुमच्छिद्वज्रशस्त्रके॥१६॥ मधुहंता परीतापे कालसूत्रे परार्थहृत्॥ कश्मले त्वतिमांसाशी उग्रगंधे च पिंडदः॥१७॥ दुर्ध
रे शुल्कीचभक्षी बंदियाहरणाश्रये॥ मंजुषे नरके लोहे प्रतिष्ठे श्रुतिनिंदकः॥१८॥ पूतिकृष्णे कूटसाक्षी परिलुंठे धनापहा॥ बालस्त्रीवृद्धघाती च कालेब्र
ह्मणार्तिकृत्॥१९॥ विलेपे मद्यपो विप्रो महता प्रेतभेदनः॥ तथा कस्य परदारान् ज्वलंती मायसीं शिलां॥२०॥ शाल्मले स्येतमालिंगेन्नारी बहुनंगमा॥ आस्वा
द्यजिह्वाकर्णं स्त्रीणां वै नेत्रभेदनं॥२१॥ अंगारराशौ क्षिप्यंते मातृपुत्र्यादिगामिनः॥ चोराः क्षुरैश्च भिद्यंते कृमांसाशी च मांसभुक्॥२२॥ मासोपवासकर्ता
च न याति नरकं नरः॥ एकादशीव्रतकरो भीष्मपंचकसद्व्रती॥२३॥ इत्याग्नेये नरकस्वरूपं॥ अग्निरुवाच॥ व्रतं मासोपवासं च सर्वोत्कृष्टं वदामि
ते॥ कृत्वा तु वैष्णवं यज्ञं गुरोराज्ञामवाप्य च॥ कृच्छ्राद्यैः स्वबलं बुध्वा कुर्यान्मासोपवासकं॥१॥ वानप्रस्थो यतिर्वाथ नारी वा विधवा मुने॥२॥ आश्विनस्या

मले पक्षे एकादश्यामुपोषितः॥ व्रतमेतत्तु गृह्णीयाद्यावत्त्रिंशद्दिनानि तु॥३॥ कार्तिकाश्विनयोर्विष्णो यावदुत्थानकं तव॥ म्रियेय यद्यंतराले हं व्रतभं
गो न मे भवेत्॥४॥ त्रिकालं पूजयेद्विष्णुं त्रिः स्नातो गंधपुष्पकैः॥ विष्णोर्गीतादिकं जप्यं ध्यानं कुर्याद्व्रती नरः॥५॥ वृथावादं परिहरेदन्नाकांक्षां विसर्ज
येत्॥ नाव्रतस्थं स्पृशेत्कं विद्विकर्मस्थान्न चालयेत्॥६॥ देवतायतने तिष्ठेद्यावत्त्रिंशद्दिनानि तु॥ द्वादश्यां पूजयित्वा तु भोजयित्वा द्विजान्व्रती॥७॥ क्षमाप्य
दक्षिणां दत्वा पारणं तु समाचरेत्॥ भुक्तिमुक्तिमवाप्नोति कुर्यात्तांस्त्रयोदशीं॥८॥ कारयेद्वैष्णवान्शान्यजेद्विप्रांस्त्रयोदश॥ तावंति वस्त्रयुग्मानि भाजनान्या
सनानि च॥९॥ छत्राणि सपवित्राणि तथोपानद्युगानि च॥ योगपट्टोपवीतानि दद्याद्विप्राय तैर्मतः॥१०॥ अन्यविप्राय शय्यायां हैमं विष्णुं प्रपूज्य च॥ आत्मनश्च त
था मूर्तिं वस्त्राद्यैश्च प्रपूजयेत्॥११॥ सर्वपापविनिर्मुक्तो विप्रविष्णुप्रसादतः॥ विष्णुलोकं गमिष्यामि विष्णुरेव भवाम्यहं॥१२॥ व्रज व्रज देव बुद्धे विष्णोः स्थानमनामयं
विमानेनामलस्तत्र तिष्ठ विष्णुस्वरूपधृक्॥१३॥ द्विजोऽन्ते लाथनीं शय्यां गुरवे च निवेदयेत्॥ कुलानां शतमुद्धृत्य विष्णुलोकं नयेद्व्रती॥१४॥ मासोपवासी यद्देशे स दे
शो निर्मलो भवेत्॥ किं पुनस्तत्कुलं सर्वं यत्र मासोपवासकृत्॥१५॥ व्रतस्थं मूर्छितं दृष्ट्वा क्षीराज्यं चैव पाययेत्॥ नैते व्रतं विनिघ्नंति हविर्विप्रानुमोदितं॥१६॥ क्षीरं गुरो
र्हितौषध आपो मूलफलानि च॥ विष्णुर्महौषधं कर्ता व्रतमस्मात्समुद्धरेत्॥१७॥ इत्याग्नेये मासोपवासव्रतं॥ अग्निरुवाच॥ भीष्मपंचकमाख्यास्ये व्रतरा
जं च सर्वदं॥ कार्तिकस्यामले पक्षे एकादश्यां समाचरेत्॥१॥ दिनानि पंच त्रिः स्नायी पंचव्रीहितिलैस्तथा॥ तर्पयेद्देवपित्रादीन्मौनी संपूजयेद्धरिं॥२॥ पंचगव्येन संस्नाप्
य देवं पंचामृतेन च॥ चंदनाद्यैः समालिप्य गुग्गुलं सघृतं दहेत्॥३॥ दीपं दद्याद्दिवारात्रौ नैवेद्यं परमान्नकं॥ ओं नमो वासुदेवाय जपेदष्टोत्तरं शतं॥४॥ जुहुयाच्च घृ
तं शाल्यान्तिलव्रीहींस्ततो व्रती॥ षडक्षरेण मंत्रेण स्वाहाकारान्वितेन च॥५॥ कमलैः पूजयेत्पादौ द्वितीये बिल्वपत्रकैः॥ जानुं वद्धीलं तृतीयेथ नाभिं भृंगिरजेन तु॥६॥ बा
णबिल्वजपाभिस्तु चतुर्थे पंचमे हरिं॥ मालत्या भूमिशायी स्यादेकादश्यां तु गोमयं॥७॥ गोमूत्रं दधि दुग्धं च पंचमे पंचगव्यकं॥ पौर्णमास्यां चरेन्नक्तं भुक्तिं मुक्तिं लभेद्व्रती॥
८॥ भीष्मः कृत्वा हरिं प्राप्तः तेनैव भीष्मपंचकं॥ ब्राह्मणः पूजनाद्यैश्च उपवासादिकं व्रतं॥९॥ इत्याग्नेये भीष्मपंचकं॥ अग्निरुवाच॥ अगस्त्यो भगवान्विष्णुस्त
मभ्यर्च्य प्राप्नुयाद्धरिं॥ अप्राप्ते भास्करे कन्यां सत्रिभागैस्त्रिभिर्दिनैः॥१॥ अर्घ्यं दद्यादगस्त्याय पूजयित्वा उपोषितः॥ काशपुष्पमयीं मूर्तिं प्रदोषे विन्यसेद्घटे॥२॥ निमज्जये
त्तां कुंभस्थां रात्रौ कुर्यात्प्रजागरं॥ आगस्त्य मुनिशार्दूल तेजोराशे महामते॥३॥ इमां मम कृतां पूजां गृह्णीष्व प्रिययासह॥ आवाह्यार्घ्यं च संमुख्यं प्रार्चयेच्चंदनादिना॥
४॥ जलाशयसमीपे तु प्रातर्नीत्वार्घ्यमर्पयेत्॥ काशपुष्पप्रतीकाश अग्निमारुतसंभव॥५॥ मित्रावरुणयोः पुत्र कुंभयोने नमोस्तु ते॥ आतापी भक्षितो येन वातापी च महासु
रः॥६॥ समुद्रः शोषितो येन सोगस्त्यः संमुखोस्तु मे॥ अगस्तिं प्रार्थयिष्यामि कर्मणा मनसा गिरा॥७॥ अर्चयिष्याम्यहं मैत्रं परलोकाभिकांक्षया॥ द्वीपांतरसमुत्पन्नं देवानां
परमं प्रियं॥८॥ राजानं सर्वसस्यानां चंदनं प्रतिगृह्यतां॥ धर्मार्थकाममोक्षाणां भाजनी पापनाशिनी॥९॥ सौभाग्यारोग्यलक्ष्मीदा पुष्पमाला प्रगृह्यतां॥ धूपोयं गृह्यतां देव

२

भक्तिमेव्यचलां कुरु॥१०॥ईप्सितं मे वरं देहि परत्र च शुभां गतिं॥कुंभ्यास्त्वं मुनिश्रेष्ठ सर्वकामफलप्रद॥११॥पत्न्यश्रीहिफलैर्हेम्नादत्तस्त्वर्घो मयाऽनघ॥ अगस्तिं वा
चयिष्यामि यन्मया मनसो द्धृतं॥१२॥फलैरर्घ्यं प्रदास्यामि गृहाणार्घ्यं महामुने॥ अगस्त्य एवं खनमानः खनित्रैः प्रजामपत्यं बलमिच्छमानः॥उभौ वर्णावृषिरुग्रः पुपो
ष सत्यादेवेष्वाशिषः संजगाम॥१३॥राजपुत्रि नमस्तुभ्यं मुनिपत्नि महाव्रते॥अर्घ्यं गृहाण देवेशि लोपामुद्रे यशस्विनि॥१४॥पंचरत्नसमायुक्तं हेमरूप्यसमन्वि
तं॥सप्तधान्यभृतं पात्रं दधिचंदनसंयुतं॥१५॥अर्घ्यं दद्यादगस्त्याय स्त्रीशूद्राणामवैदिकं॥अगस्त्यमुनिनाऽऽद्रेऽलं तेजोराशे च सर्वद॥१६॥इमां मम कृतां पूजां गृही
त्वा प्रशांतये॥त्यजेदगस्त्यमुद्दिश्य धान्यमेकं फलं रसं॥१७॥ततो विप्रान्भोजयेद्विप्रान्घृतपायसमोदकान्॥गां सुवर्णं च वासांसि तेभ्यो दद्याच्च दक्षिणां॥१८॥घृत
पायसयुक्तेन पात्रेण स्थगितानने॥सहिरण्ये च तं कुंभं ब्राह्मणायोपकल्पयेत्॥१९॥सप्तवर्षाणि दत्त्वार्घ्यं सर्वं सर्वमवाप्नुयुः॥नारी पुत्रांश्च सौभाग्यं पतिं कन्यापि सोऽयं
२०॥ इत्याग्नेये अगस्त्यार्घः॥ अग्निरुवाच॥ कौमुदाख्यमजो कंचरेदाश्वयुजे सिते॥हरिं यजेन्मासमेकं मेकादश्यामुपोषितः॥१॥आश्विने शुक्लपक्षे तु मे
का हारो हरिं यजे॥मासमेकं भुक्तिमुक्त्यैकरिष्ये कौमुदव्रतं॥२॥उपोष्य विष्णुं द्वादश्यां यजेद्देवं विलिप्य च॥चंदनागरुकाश्मीरैः कमलोत्पलपुष्पकैः॥३॥कल्हारै
र्वाथ मालत्या दीपं तैलेन वाग्यतः॥अहोरात्रं च नैवेद्यं पायसापूपमोदकैः॥४॥ओं नमो वासुदेवाय विज्ञाप्याथ समापयेत्॥भोजनादि द्विजे दद्याद्यावद्देवः प्रबुध्यते॥
५॥तावन्मासोपवासः स्यादधिकं फलमाप्नुतः॥६॥ इत्याग्नेये कौमुदीव्रतं॥ अग्निरुवाच॥ व्रतदानानि सामान्यं प्रवदामि समासतः॥तिथौ प्रतिपदादौ च सूर्यादौ
कृत्तिकासु च॥विष्कंभादौ च मेषादौ काले च ग्रहणादिके॥यत्काले यद्व्रतं दानं यद्द्रव्यं नियमादि यत्॥२॥तद्द्रव्याख्यं च कालाख्यं सर्वं वै विष्णुदैवतं॥रवीशब्रह्मलोका
याः सर्वे विष्णोर्विभूतयः॥३॥तमुद्दिश्य व्रतं दानं पूजादि स्यात्सुसर्वदा॥जगत्पते समागच्छ आसनं पाद्यमर्घ्यकं॥४॥मधुपर्कं तथाचामं स्नानं वस्त्रं च गंधकं॥पुष्पं धूपं
च दीपं च नैवेद्यादि नमोऽस्तु ते॥५॥इति पूजा व्रते दाने दानवाक्यं समं शृणु॥अद्यामुकसगोत्राय विप्रायामुकशर्मणे॥६॥एतद्द्रव्यं विष्णुदेवं सर्वपापोपशांतये॥आयु
रारोग्यवृद्ध्यर्थं सौभाग्याय सुखद्धये॥७॥गोत्रसंततिवृद्ध्यर्थं विजयाय धनाय च॥धर्मायैश्वर्यकामाय तत्पातकशमनाय च॥८॥संसारमुक्तये दानं तुभ्यं संप्रददे स्वहं॥एत
द्दानप्रतिष्ठार्थं तुभ्यमेतद्ददाम्यहं॥९॥एतेन प्रीयतां नित्यं सर्वलोकपतिः प्रभुः॥यस्य दानं व्रतपते विप्राकीर्त्यादि देहि मे॥१०॥धर्मकामार्थमोक्षांश्च देहि मे मनसेप्सितं॥
यः पठेच्छृणुयान्नित्यं व्रतदानसमुच्चयं॥११॥संप्राप्तकामो विमलो भुक्तिमुक्तिमवाप्नुयात्॥तिथिवारर्क्षसंक्रांतियोगमन्वादिकं व्रतं॥१२॥नैकधा वासुदेवादेर्नियमात्स
र्वदा भवेत्॥१३॥ इत्याग्नेये व्रतदानसमुच्चयः॥ अग्निरुवाच॥दानधर्मान्प्रवक्ष्यामि भुक्तिमुक्तिप्रदान्शृणु॥दानमिष्टं तथा पूर्तं धर्मं कुर्वन्हि सर्वभाक्॥१॥वापीकू
पतडागादि देवतायतनानि च॥अन्नप्रदानमारामाः पूर्तं धर्मं च मुक्तिदं॥२॥अग्निहोत्रं तपः सत्यं वेदानां चानुपालनं॥आतिथ्यं वैश्वदेवं च प्राहुरिष्टं च नाकदं॥३॥ग्रहो
परागे यद्दानं सूर्यसंक्रमणेषु च॥द्वादश्यादौ च यद्दानं पूर्तं तदपि नाकदं॥४॥देशे काले च पात्रे च दानं कोटिगुणं भवेत्॥अयने विषुवे पुण्ये व्यतीपाते दिनक्षये॥५॥

युगादिषु च संक्रांतौ चतुर्दश्यष्टमीषु च॥सितपंचदशीपर्वद्वादशीष्वष्टकासु च॥६॥यज्ञोत्सवविवाहेषु तथा मन्वंतरादिषु॥वैधृते दृष्टदुःस्वप्ने द्रव्यब्राह्मणलाभ
तः॥७॥श्रद्धा वा यद्दिने तत्र सदा वा दानमिष्यते॥अयने द्वे विषुवे द्वे चतस्रः षडशीतयः॥८॥चतस्रो विष्णुपद्यश्च संक्रांत्यो द्वादशोत्तमाः॥कन्यायां मिथु
ने मीने धनुष्यपि रवेर्गतिः॥९॥षडशीतिमुखाः प्रोक्ताः षडशीतिगुणाः फलैः॥अतीतानागते पुण्ये द्वे उदग्दक्षिणायने॥१०॥त्रिंशत्कर्कटके नाड्यो मकरे विं
शतिः स्मृता॥वर्तमाने तुलामेषे नाड्यस्तूभयतो दश॥११॥षडशीत्यां व्यतीतायां षष्टिरुक्तास्तु नाडिकाः॥पुण्याख्या विष्णुपद्यां च प्राक्पश्चादपि षोडश॥१२॥
श्रवणाश्विधनिष्ठासु नागदैवतमस्तके॥यदा स्याद्रविवारेण व्यतीपातः स उच्यते॥१३॥नवम्यां शुक्लपक्षस्य कार्त्तिके निरगात्कृतं॥त्रेतासितत्तृतीयायां वैशा
खे द्वापरं युगं॥१४॥दर्शे वै माघमासस्य त्रयोदश्यां नभस्यके॥कलिं विजानीयाज्ज्ञेया मन्वंतरादयः॥१५॥अश्वयुक्शुक्लनवमी द्वादशी कार्त्तिके तथा॥
तृतीया चैव माघस्य तथा भाद्रपदस्य च॥१६॥फाल्गुनस्याप्यमावास्या पौषस्यैकादशी तथा॥आषाढस्यापि दशमी माघमासस्य सप्तमी॥श्रावणे चाष्टमी कृ
ष्णा तथाषाढे च पूर्णिमा॥कार्त्तिकी फाल्गुनी तद्वज्ज्येष्ठे पंचदशी तथा॥१८॥ऊर्जे चैवाग्रहायण्य अष्टकास्तिस्र ईरिताः॥अष्टकाख्या चाष्टमी स्याद्दत्तं दाना
नि चाक्षयं॥१९॥गयागंगाप्रयागादौ तीर्थे देवालयादिषु॥अप्रार्थितानि दानानि विद्यान्नं कन्यकादि हि॥२०॥दद्यात्सर्वं सुरवेदानं गृह्णीयादुत्तरामुखः॥आयुर्विव
र्धते दातुर्ग्रहीतुः क्षीयते न तत्॥२१॥नामगोत्रे समुच्चार्य संप्रदानस्य चात्मनः॥संप्रदेयं प्रयच्छंति कन्यादाने पुनस्त्रयं॥२२॥स्नात्वाभ्यर्च्य व्याहृतिभिर्दद्याद्दानं
तु सोदकं॥कनकाश्वतिला नागा दासी रथमहीगृहाः॥२३॥कन्या च कपिला धेनुर्महादानानि वै दश॥श्रुतशौर्यतपःकन्यायाज्यशिष्यादुपागतं॥२४॥शुक्लं
धनं हि शबलं शुल्कशिष्यार्थरक्षितः॥कुसीदकृषिवाणिज्यप्राप्तं यदुपकारतः॥२५॥पार्श्विकद्यूतचौर्यादि प्रतिरूपकसाहसैः॥व्याजेनोपार्जितं कृष्णं त्रिवि
धं त्रिविधं फलं॥२६॥अध्यग्न्यध्यावहनिकं दत्तं च प्रीतिकर्मणि॥भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतं॥२७॥ब्रह्मक्षत्रविशां द्रव्यं शूद्रस्यैषामनु
ग्रहात्॥बहुभ्यो न प्रदेयानि गौर्गृहं शयनं स्त्रियः॥२८॥कुलानां तु शतं दद्यात्प्रयच्छन्प्रतिश्रुतं॥देवानां च गुरूणां च मातापित्रोस्तथैव च॥२९॥पुण्यं
देयं प्रयत्नेन न पुण्यं चार्जितं क्वचित्॥प्रतिलाभेच्छया दत्तं यद्दत्तं तदपार्थकं॥३०॥श्रद्धया साध्यते धर्मो दत्तं वार्यपि चाक्षयं॥ज्ञानशीलगुणोपेतः परपीडा
वहिष्कृतः॥३१॥अज्ञानां पालनात्त्राणात्तत्पात्रं परमं स्मृतं॥मातुः शतगुणं दानं सहस्रं पितुरुच्यते॥३२॥अनंतं दुहितुर्दानं सोदर्ये दत्तमक्षयं॥अमनु
ष्ये समं दानं पापे से यं महाफलं॥३३॥वर्णसंकरे द्विगुणं शूद्रे दानं चतुर्गुणं॥वैश्ये चाष्टगुणं क्षत्रे षोडशाघ्नं द्विजब्रुवे॥३४॥वेदाध्ये शतगुणं अनंतं वेदपाठके
पुरोहिते याजकादौ दानमक्षयमुच्यते॥३५॥श्रीविहीनेषु यद्दत्तं तदनंतं च यज्वनि॥अतपस्त्वनधीयानः प्रतिग्रहरुचिर्द्विजः॥३६॥अंभस्यश्मप्लवेनैव स
ह तेनैव मज्जति॥स्नातः सम्यगुपस्पृश्य गृह्णीयात्प्रयतः शुचिः॥३७॥प्रतिगृह्णन्सावित्रीं सर्वथैव प्रकीर्तयेत्॥ततस्तु कीर्तयेत्सार्धं द्रव्येन सह दैवतं॥३८॥प्र

लिप्यहं पठेद्गुरुः प्रतिगृह्य द्विजो मन्त्रमात्॥ मंदं पठेत्क्षत्रियात्तु उपांशु च तथा विशः॥४२॥ मनसा च तथा शूद्रात्स्वस्तिवाचनकं तथा॥ अभयं सर्वदैवत्यं भूमिर्वै वि
ष्णुदेवता॥४०॥ कन्यादासस्तथा दासी प्राजापत्याः प्रकीर्तिताः॥ प्राजापत्यो गजः प्रोक्तस्तुरगो यमदैवतः॥४३॥ तथा चैकशफं सर्वं याम्यं च महिषस्तथा॥
उष्ट्रश्च नैर्ऋतो धेनू रौद्री छागोऽनलस्तथा॥४२॥ आप्यो मेषो हरिः क्रोड आरण्याः पशवोऽनिलाः॥ जलाशयं वारुणं स्याद्वारिधानी घटादयः॥४६॥ समु
द्रजानि रत्नानि हैमलोहानि चानिलः॥ प्राजापत्यानि सस्यानि पक्वान्नमपि सत्तम॥४७॥ गांधर्वं गंधमित्याहुर्वस्त्रं बार्हस्पतं स्मृतं॥ वायव्याः पक्षिणः स
र्वे विद्या ब्राह्मी तथांगकं॥४५॥ सारस्वतं पुस्तकादि विश्वकर्मा तु शिल्पके॥ वनस्पतिर्द्रुमादीनां द्रव्यदेहा हरेस्तनुः॥४९॥ छत्रं कृष्णाजिनं शय्या रथ
मासनमेव च॥ उपानहौ तथा याने उत्तानांगिरसे इरितं॥५०॥ रणोपकरणं शस्त्रं ध्वजाद्यं सर्वदैवतं॥ गृहं च सर्वदैवत्यं सर्वेषां विष्णुदेवता॥५१॥ शिवो वा न त
तो द्रव्यं व्यतिरिक्तं यतोऽस्ति हि॥ द्रव्यस्य नाम गृह्णीयाद्ददामीति तथा वदेत्॥५२॥ तोयं दद्यात्तथा हस्ते दाने विधिरयं स्मृतः॥ विष्णुर्दाता विष्णुर्द्रव्यं प्रति
गृह्णामि वै वदेत्॥५३॥ स्वस्ति प्रतिग्रहं धर्मं भुक्तिमुक्तिफलद्वयं॥ गुरून्भृत्यानुज्जिहीर्षुरर्चिष्यन्देवताः पितॄन्॥५४॥ सर्वतः प्रतिगृह्णीयान्न तु तृप्येत्स्वयं
ततः॥ शूद्रीयं न तु यत्सार्थं धनं तत्र द्रस्यते फलं॥५५॥ गुडतक्ररसा धान्यं शूद्राद्ग्राह्यं निवर्तिना॥ सर्वतः प्रतिगृह्णीयाद्वस्त्राकर्षितो द्विजः॥५६॥ नाध्याप
नाद्याजनाद्वा गर्हिताद्वा प्रतिग्रहात्॥ दोषो भवति विप्राणां ज्वलनार्कसमा हि ते॥५७॥ कृते तु दीयते गत्वा त्रेतास्वानीय दीयते॥ द्वापरे याचमानाय कलौ त द
नुगामिने॥५८॥ मनसा पात्रमुद्दिश्य जलं भूमौ विनिक्षिपेत्॥ विद्यते सागरस्यांतो नांतो दानस्य विद्यते॥५९॥ अयने सोमार्कग्रहणसंक्रांत्यादौ च कालके॥ गं
गागयाप्रयागादौ तीर्थदेशे महागुणे॥६०॥ तथा चानुकगोत्राय तथा चानुकशर्मणे॥ वेदवेदांगयुक्ताय पात्राय स्व महात्मने॥६१॥ यथानाम महाद्रव्यं विष्णु
रुद्रादिदैवतं॥ पुत्रपौत्रगृहैश्वर्यपत्नीधर्मार्थसद्गुणः॥६२॥ कीर्तिविद्यामहाकामसौभाग्यारोग्यवृद्धये॥ सर्वपापोपशांत्यर्थं स्वर्गार्थं भुक्तिमुक्तये॥६३॥
एतत्तुभ्यं संप्रददे प्रीयतां च हरिः शिवः॥ दिव्यांतरिक्षभौमादिसमुत्पातोघपालकृत्॥६४॥ धर्मार्थकाममोक्षाप्त्यै ब्रह्मलोकप्रदोऽस्तु मे॥ यथानामसगोत्राय वि
प्रायामुकशर्मणे॥६५॥ एतद्दानप्रतिष्ठार्थं स्वर्णं दक्षिणां ददे॥ अनेन दानवाक्येन सर्वदानानि वै ददेत्॥६६॥ इत्याग्नेये दानपरिभाषा॥ अग्निरुवाच॥
सर्वदानानि वक्ष्यामि महादानानि षोडश॥ तुलापुरुष आद्यं तु हिरण्यगर्भदानकं॥१॥ ब्रह्मांडं कल्पवृक्षश्च गोसहस्रं च पंचमं॥ हिरण्यकामधेनुश्च हिर
ण्याश्वश्च सप्तमः॥२॥ हिरण्याश्वरथस्तद्वद्धेमहस्तिरथस्तथा॥ पंचलांगलकं तद्वद्धरादानं तथैव च॥३॥ विश्वचक्रं कल्पलता सप्तसागरकं वरं॥ रत्नधेनु
र्महाभूतघटं शुभदिने प्रदेयत्॥४॥ मंडपे मंडले दानं वेदान्प्राच्यीर्ये द्विजे॥ मेरुदानानि पुण्यानि मेरवो दश तान्शृणु॥५॥ धान्यद्रोणसहस्रेण उत्तमो धीर्ध
तोऽपरे॥ उत्तमः षोडशद्रोणः कर्तव्यो लवणाचलः॥६॥ दशभारैर्गुडादिः स्यादुत्तमोऽर्धार्धतः परः॥ उत्तमः फलसाहस्रः स्वर्णमेरुस्तथा परो॥७॥ दशद्रोणैस्तिला

द्रिः स्यात्पंचभिश्च त्रिभिः क्रमात्॥ कार्पासपर्वतो विंशाभारैश्च दशपंचभिः॥८॥ विंशत्या घृतकुंभानामुत्तमः स्याद्घृताचलः॥ दशभिः पलसाहस्रैरुत्तमो र
जताचलः॥९॥ अष्टभारैः शर्कराद्रिर्मध्यो मंदोऽर्धतोऽर्धतः॥ दशधेनूः प्रवक्ष्यामि या दत्त्वा भुक्तिमुक्तिभाक्॥१०॥ प्रथमा गुडधेनुः स्याद्घृतधेनुस्तथापरा॥ तिल
धेनुस्तृतीया च चतुर्थी जलधेनुका॥११॥ क्षीरधेनुर्मधुधेनुः शर्कराद्धिधेनुके॥ रसधेनुः स्वरूपेण दशमी विधिरुच्यते॥१२॥ कुंभाः स्युर्द्रवधेनूनामितरा
सां तु राशयः॥ कृष्णाजिनं चतुर्हस्तं प्राग्ग्रीवं विन्यसेद्भुवि॥१३॥ गोमयेनानुलिप्तायां दर्भानास्तीर्य सर्वतः॥ लघ्वेण काजिनं तद्वद्वत्सस्य परिकल्पयेत्॥
१४॥ प्राङ्मुखीं कल्पयेद्धेनुमुदक्पादां सवत्सकां॥ उत्तमा गुडधेनुः स्यात्सदा भारचतुष्टयात्॥१५॥ वत्सं भारेण कुर्वीत भाराभ्यां मध्यमा स्मृता॥ अर्धभारेण
वत्सः स्यात्कनिष्ठा भारकेण तु॥१६॥ चतुर्थांशेन वत्सः स्याद्गुडवित्तानुसारतः॥ पंचकृष्णलको माषस्तैः सुवर्णस्तु षोडश॥१७॥ पलं सुवर्णाश्चत्वारस्तु
लापलशतं स्मृतं॥ स्याद्भारो विंशतितुला द्रोणस्तु चतुराढकः॥१८॥ धेनुवत्सौ गुडस्योभौ सितसूक्ष्मांबरावृतौ॥ शुक्तिकर्णौ विक्षुपादौ शुचिमुक्ताफलेक्ष
न णौ॥१९॥ सितसूत्रशिरालौ च सितकंबलकंबलौ॥ ताम्रगडुकपृष्ठौ तौ सितचामररोमकौ॥२०॥ विद्रुमभ्रूयुगावेतौ नवनीतस्तनान्वितौ॥ क्षौमपुच्छौ कांस्यदोहाविंद्र
नीलकतारकौ॥२१॥ स्वर्णशृंगाभरणौ राजतक्षुरसंयुतौ॥ नानाफलमयैर्दंतैर्गंधघ्राणौ प्रकल्पितौ॥२२॥ रचयित्वा यजेद्धेनुमिमैर्मंत्रैर्द्विजोत्तम॥ या लक्ष्मीः
सर्वभूतानां या च देवेष्ववस्थिता॥ धेनुरूपेण सा देवी मम शांतिं प्रयच्छतु॥ देहस्था या च रुद्राणी शंकरस्य सदा प्रिया॥२४॥ धेनुरूपेण सा देवी मम पापं व्यपोह
तु॥ विष्णुवक्षसि या लक्ष्मीः स्वाहा या च विभावसोः॥२५॥ चंद्रार्कशक्रशक्तिर्या धेनुरूपास्तु सा श्रिये॥ चतुर्मुखस्य या लक्ष्मीर्या लक्ष्मीर्धनदस्य च॥२६॥
लक्ष्मीर्या लोकपालानां सा धेनुर्वरदास्तु मे॥ स्वधा त्वं पितृमुख्यानां स्वाहा यज्ञभुजां यतः॥२७॥ सर्वपापहरा धेनुस्तस्माच्छांतिं प्रयच्छ मे॥ एवमामंत्रितां धेनुं ब्रा
ह्मणाय निवेदयेत्॥२८॥ समानं सर्वधेनूनां विधानं चैतदेव हि॥ सर्वयज्ञफलं प्राप्य निर्मलो भुक्तिमुक्तिभाक्॥२९॥ स्वर्णशृंगी शफै रौप्यैः सुशीला वस्त्रसंयुता॥
कांस्यदोहा दोहदानव्याप्ता क्षीरिणी गौः सदक्षिणा॥३०॥ दातास्याः स्वर्गमाप्नोति वत्सरान्रोमसंमितान्॥ कपिला चेत्तारयति भूयश्चासप्तमं कुलं॥३१॥ स्वर्णशृं
गीं रौप्यखुरीं कांस्यदोहनकान्वितां॥ शक्तितो दक्षिणां दद्याद्दत्वा स्याद्भुक्तिमुक्तिभाक्॥३२॥ सवत्सरोमतुल्यानि युगान्युभयतोमुखीं॥ दत्त्वा स्वर्गमवाप्नोति पूर्वेण
विधिना ददेत्॥३३॥ आसन्नमृत्युना देया सवत्सा गौस्तु पूर्ववत्॥ यमद्वारे महाघोरे कथिता वैतरणी नदी॥३४॥ तां च तर्तुं ददाम्येनां कृष्णां वैतरणीं च गां॥ इति महादाना
नि॥ अग्निरुवाच॥ एकां गां दशगुर्दद्याद्दश दद्याच्च गोशती॥ शतं सहस्रगुर्दद्यात्सर्वे तुल्यफला हि ते॥१॥ प्रासादा यत्र सौवर्णा वसोर्धारा च यत्र सा॥ गंधर्वाप्
सरसो यत्र तत्र यांति सहस्रदाः॥२॥ गवां शतप्रदानेन मुच्यते नरकार्णवात्॥ दत्वा वत्सतरीं चैव स्वर्गलोके महीयते॥३॥ गोदानादायुरारोग्यसौभाग्यस्वर्गमाप्नुयात्॥
इंद्रादिलोकपालानां याति राजमहिषी शुभा॥४॥ महिषीदानमाहात्म्याद्दत्तेनैव सर्वकामदा॥ धर्मराजस्य माहात्म्ये यस्याः पुत्रः प्रतिष्ठितः॥५॥ महिषासुरस्य जननी मा

सास्तु वरदा मम॥ महिषीदानाच्च सौभाग्यं वृषदानाद्दिवं व्रजेत्॥६॥ संयुक्तं हलपंक्त्याग्र्यं दानं सर्वफलप्रदं॥ पंक्तिं दशहला प्रोक्ता दारुजा वृषसंयुता॥७॥
सौवर्णपट्टसंयुक्तां दत्त्वा स्वर्गे महीयते॥ दशानां कपिलानां तु दत्तानां ज्येष्ठपुष्करे॥८॥ तत्फलं चाक्षयं स्याद्वै वृषभस्य तु मोक्षणे॥ धर्मोसि त्वं चतुष्पा
दश्चत्वारस्ते प्रिया इमाः॥९॥ नमो ब्रह्मण्यदेवाय पितृभूतर्षिपोषक॥ त्वयि दत्तेऽक्षया लोका मम संतु निरामयाः॥१०॥ मा मे ऋणोस्तु दैवो वा भौतः पैत्रो
ऽथ मानुषः॥ धर्मस्त्वं त्वत्प्रपन्नस्य या गतिः सास्तु मे ध्रुवा॥११॥ अंकयेच्चक्रशूलाभ्यां मंत्रेणानेन चोत्सृजेत्॥ एकादशाहे प्रेतस्य यस्य चोत्सृज्यते वृषः॥१२॥
मुच्यते प्रेतलोकात्तु षण्मासे चाब्दिकादिषु॥ दशहस्तेन दंडेन त्रिंशद्दंडानि वर्तनं॥१३॥ तान्येव दशविस्तारा ह्येतद्गोचर्मप्रदोऽभिधं॥ गोभूहिरण्यसंयुक्तं य
स्तु रुक्मशाजिनं ददेत्॥१४॥ सर्वदुष्कृतकर्माणि सायुज्यं ब्राह्मणो व्रजेत्॥ भाजनं तिलसंपूर्णं मधुना पूर्णमेव च॥१५॥ दद्याद्रुक्मशतिलानां च प्रस्थमेकं च माग
धं॥ शय्यां दत्त्वा तु सगुणां भुक्तिमुक्तिमवाप्नुयात्॥१६॥ हैमीं प्रतिकृतिं कृत्वा दद्यात्स्वर्गीस आत्मनः॥ विपुलं तु गृहं कृत्वा दत्त्वा स्याद्भुक्तिमुक्तिभाक्॥१७॥ गृ
हं मठं सभां स्वर्गी दत्त्वा स्याच्च प्रतिश्रयं॥ दत्त्वा कृत्वा गोगृहं च निष्पापः स्वर्गमाप्नुयात्॥१८॥ यममाहिषदानात्तु निष्पापः स्वर्गमाप्नुयात्॥ ब्रह्मा हरिहरो लो
केशः ध्येयमहत्कः॥१९॥ पाशीतस्य शिरस्थित्वा तं दत्त्वा स्वर्गभाग्भवेत्॥ त्रिमुखास्यमिदं दानं गृहीत्वा तु द्विजोऽघभाक्॥२०॥ चंद्रं रूप्यमयं कृत्वा कं भूत्वा
तत्प्रदापयेत्॥ होमयुक्तं द्विजाये तत्कालचक्रमिदं महत्॥२१॥ आत्मतुल्यं यो लोहं ददेन्न नरकं व्रजेत्॥ पंचाशत्पलसंयुक्तं लोहदंडं तु योर्पयेत्॥२२॥ वस्त्रे
णाच्छाद्य विभाय च मदं डोन विद्यते॥ तं कृत्वा दिवा द्रव्यैः संहतं वाथ चैकशः॥२३॥ मृत्युंजयं समुद्दिश्य दद्यादायुर्विवर्धनं॥ पुमान्रुक्मतिलैः कायेरोप्यदंतः
रूप्यवर्णहकः॥२४॥ खड्गोद्यतकरो दीर्घो जपाकुसुमसंकुलः॥ रक्तांबरधरः स्रग्वी शंखमालाविभूषितः॥२५॥ उपानद्युगयुक्तांघ्रिः कराः कमलपार्श्वकः॥
गृहीतमांसपिंडश्च वामे वैकालपूरुषः॥२६॥ संपूज्यैतं च गंधाद्यैर्ब्राह्मणायोपपादयेत्॥ मरणव्याधिहीनः स्याद्राजराजेश्वरो भवेत्॥२७॥ गोवृषौ तु द्विजे
दत्त्वा भुक्तिमुक्तिमवाप्नुयात्॥ हेमनाधिष्ठितं चार्घ्यं हैमं दत्त्वा न मृत्युभाक्॥२८॥ पंचादिपूर्णमप्येकं दत्त्वा स्याद्भुक्तिमुक्तिभाक्॥ सर्वान्कामानवाप्नोति यः प्रय
च्छति कांचनं॥२९॥ सुवर्णे दीयमाने तु रजतं दक्षिणेष्यते॥ अन्येषामपि दानानां सुवर्णं दक्षिणा स्मृता॥३०॥ सुवर्णं रजतं ताम्रं तंदुलं धान्यमेव च॥ नित्यश्रा
द्धं देवपूजा सर्वमेतददक्षिणं॥३१॥ रजतं दक्षिणा पित्र्ये धर्मकामार्थसाधनं॥ सुवर्णं रजतं ताम्रं मणिमुक्तावसूनि च॥३२॥ सर्वमेतन्महाप्राज्ञो ददाति वसु
धां ददत्॥ पितॄंश्च सर्वलोकस्थान्देवस्थाने च देवताः॥३३॥ संतर्पयति शांतात्मा यो ददाति वसुंधरां॥ खर्वटं खेटकं वापि ग्रामं वा सस्यशालिनं॥३४॥ निवर्त
नशतं वापि तदर्धं वा गृहादिकं॥ अपि गोचर्ममात्रं वा दत्त्वोर्वीं सर्वभाग्भवेत्॥३५॥ तैलबिंदुर्यथा चाप्सु प्रसर्पेद्भूगतं तथा॥ सर्वेषामेव दानानामेकजन्मानु
गं फलं॥३६॥ हाटकक्षितिगौरीणां सप्तजन्मानुगं फलं॥ त्रिःसप्तकुलमुद्धृत्य कन्यादो ब्रह्मलोकभाक्॥३७॥ गजं सदक्षिणं दत्त्वा निर्मलः स्वर्गभाग्भवेत्॥ अश्वं पं

दत्त्वायुरारोग्यसौभाग्यस्वर्गमाप्नुयात्॥३८॥ दासीं दत्त्वा द्विजेंद्राय अप्सरोलोकमाप्नुयात्॥ दत्त्वा ताम्रमयीं स्थालीं पलानां पंचचंदनं॥३९॥ अथैतदर्धेयु
क्तां वा भुक्तिमुक्तिमवाप्नुयात्॥ शकटं वृषसंयुक्तं दत्त्वा यानेन भिःशतैः॥४०॥ वस्त्रदानाद्भवेदायुरारोग्यं स्वर्गमक्षयं॥ धान्यगोधूमकलमयवादीन्सप्तभा
गदन्॥४१॥ आसनं तैजसं पात्रं लवणं गंधचंदनं॥ धूपदीपं च तांबूलं लोहं रूप्यं च रत्नकं॥४२॥ विद्यादिनानाद्रव्याणि दत्त्वा स्याद्भुक्तिमुक्तिभाक्॥ तिलांश्च
तिलपात्रं च दत्त्वा स्वर्गमवाप्नुयात्॥४३॥ अन्नदानात्परं नास्ति न भूतं न भविष्यति॥ हस्त्यश्वरथदानानि दासीदासगृहाणि च॥४४॥ अन्नदानस्य सर्वाणि
कलां नार्हंति षोडशीं॥ कृत्वापि सुमहत्पापं यः पश्चादन्नदो भवेत्॥४५॥ सर्वपापविनिर्मुक्तो लोकानाप्नोति चाक्षयान्॥ पानीयं च प्रपां दत्त्वा भुक्तिमुक्तिमवा
प्नुयात्॥४६॥ अग्नीष्टकां च मार्गादौ दत्त्वा दीपादिमाप्नुयात्॥ देवगंधर्वनारीभिर्विमाने सेव्यते दिवि॥४७॥ घृतं तैलं च लवणं दत्त्वा स्वर्गमवाप्नुयात्॥ छत्रो
पानहकाष्ठादि दत्त्वा स्वर्गे सुखी वसेत्॥४८॥ प्रतिपत्तिथिमुख्येषु विष्कंभादिषु योगके॥ चैत्रादौ वत्सरादौ च अश्विन्यादौ दतिं हरं॥४९॥ ब्रह्माणं लोकपाला
दीन्प्रार्च्य दानं महाफलं॥ वृक्षारामान्भोजनादीन्मार्गसेवाह्नादिकं॥५०॥ पादाभ्यंगादिकं दत्त्वा भुक्तिमुक्तिमवाप्नुयात्॥ त्रीणि तुल्यफलानीह गावः पृथ्वी
सरस्वती॥५१॥ ब्राह्मीं सारस्वतीं दत्त्वा निर्मलो ब्रह्मलोकभाक्॥ सप्तद्वीपमहीदस्स ब्रह्मज्ञानं ददाति यः॥५२॥ अभयं सर्वभूतेभ्यो यो दद्यात्सर्वभाङ्नरः॥ पुरा
णं भारतं वापि रामायणमथापि वा॥५३॥ लिखित्वा पुस्तकं दत्त्वा भुक्तिमुक्तिमवाप्नुयात्॥ वेदशास्त्रं नृत्यगीतं योऽध्यापयति नाकभाक्॥५४॥ वृत्तिं दद्यादुपाध्याये
छात्राणां भोजनादिकं॥ किमदत्तं भवेत्तेन धर्मकामादिदर्शिना॥५५॥ वाजपेयसहस्रस्य सम्यग्दत्तस्य यत्फलं॥ तत्फलं सर्वमाप्नोति विद्यादानान्न संशयः॥५६॥
विद्यालये विष्णुगृहे स्थेयं स्यभवने तथा॥ सर्वदानप्रदः स स्यात्पुस्तकं वाचयेत्तु यः॥५७॥ त्रैलोक्ये चतुरो वर्णाश्चत्वारश्चाश्रमाः पृथक्॥ ब्रह्माद्याद्देवताः स
र्वा विद्यादाने प्रतिष्ठिताः॥५८॥ विद्या कामदुहा धेनुर्विद्या चक्षुरनुत्तमं॥ उपवेदप्रदानेन मोक्षमाप्नोत्यसंशयं॥५९॥ गंधर्वैः सह मोदते॥५९॥ वेदांगा
नां च दानेन स्वर्गलोकमवाप्नुयात्॥ धर्मशास्त्रप्रदानेन धर्मेण सह मोदते॥६०॥ सिद्धांतानां प्रदानेन मोक्षमाप्नोत्यसंशयं॥ विद्यादानमवाप्नोति प्रदानात्
पुस्तकस्य तु॥६१॥ शास्त्राणि च पुराणानि दत्त्वा सर्वमवाप्नुयात्॥ शिष्यांश्च शिक्षयेद्यस्तु पुंडरीकफलं लभेत्॥६२॥ येन जीवति तद्दत्त्वा फलस्यांतो न वि
द्यते॥ लोके श्रेष्ठतमं सर्वमात्मनश्चापि यत्प्रियं॥६३॥ सर्वं पितॄणां दातव्यं तेषामेवाक्षयार्थिना॥ विष्णुं रुद्रं पद्मयोनिं देवीं विघ्नेश्वरादिकान्॥६४॥ पूज
यित्वा प्रदद्याद्यः पूजाद्रव्यं स सर्वभाक्॥ देवालये च प्रतिमां कारयन्सर्वमाप्नुयात्॥६५॥ संमार्जनं चोपलेपं कुर्वन्स्यान्निर्मलः पुमान्॥ नानामंडलका
र्ये मंडलाधिपतिर्भवेत्॥६६॥ गंधपुष्पं धूपदीपं नैवेद्यं च प्रदक्षिणं॥ घंटाध्वजं वितानं च प्रेक्षणं वाद्यगीतकं॥६७॥ वस्त्रादि दत्त्वा देवाय भुक्तिमुक्तिम
वाप्नुयात्॥ कस्तूरिकां सिल्हकं च श्रीखंडमगरुं तथा॥६८॥ कर्पूरं च नखं मुस्तं गुग्गुलुं विजयं ददेत्॥ घृतप्रस्थेन संस्नाप्य संक्रांत्यादौ स सर्वभाक्॥६९॥

स्नानं पलशतं शेयं मभ्यंगं पंचविंशतिः॥ पलानां तु सहस्रेण महास्नानं प्रकीर्तितं॥ ७१॥ दशापराधांस्तोयेन क्षीरेण स्नापनाच्छतं॥ सहस्रं पयसा दध्ना
घृतेनायुतमिष्यते॥ ७२॥ दासीदासमलंकारं गोभूम्यश्वगजादिकं॥ देवाय दत्वा सौभाग्यधनायुष्मान् व्रजेद्दिवं॥ ७३॥ इत्याग्नेये नानादानानि॥
अग्निरुवाच॥ काम्यदानानि वक्ष्यामि सर्वकामप्रदानि ते॥ नित्यपूजां मासि मासि कृत्वाथो काम्यपूजनं॥ १॥ व्रतार्हणं गुरोः पूजा वत्सरांते महार्चनं॥ अश्वं
चैमार्गशीर्षे तु कमलं पिष्टसंभवं॥ २॥ विधाय पूजां यो दद्यात्सूर्यलोके चिरं वसेत्॥ गजं पौषे पिष्टमयं त्रिसप्तकुलमुद्धरेत्॥ ३॥ माघे चाश्वरथं पैष्टं दत्वा न नरकं
व्रजेत्॥ फाल्गुने तु वृषं पैष्टं स्वर्गभुक्स्यान्महीपतिः॥ ४॥ चैत्रे चेक्षुमयागारं दासदासीसमन्वितं॥ दत्वा स्वर्गे चिरं स्थित्वा तदंते स्यान्महीपतिः॥ ५॥ सप्तव्रीहिं
श्च वैशाखे दत्वा शिवमयो भवेत्॥ शतद्वयं पलानां तु दत्वा धन्यकुले नृपः॥ ६॥ वलिमंडलकं ज्येष्ठे कृत्वापादे शिवो भवेत्॥ विमानं श्रावणे पैष्टं दत्वा स्वर्गी ततो
नृपः॥ ७॥ गुग्गुलादिदहेद्भाद्रे स्वर्गीतः स्यात्ततो नृपः॥ मेरुदानं द्वादशकं वक्ष्ये हं भुक्तिमुक्तिदं॥ ८॥ क्षीरं सर्पिर्घृतं पात्रमाश्विने स्वर्गगो ददत्॥ कार्तिके
गुडखंडाद्यं दत्वा स्वर्गी ततो नृपः॥ मेरुदानं द्वादशकं वक्ष्येहं भुक्तिमुक्तिदं॥ ९॥ मेरुव्रते तु कार्तिक्यां रत्नमेरुं ददेद्द्विजे॥ सर्वेषां चैव मेरूणां प्रमाणं क्रमशः
शृणु॥ १०॥ वज्रपद्ममहानीलनीलस्फटिकसंहतः॥ पुष्पं मरकतं मुक्ता प्रस्थमात्रेण चोत्तमः॥ ११॥ मध्योर्धस्यान्न दद्यो वित्तशाठ्यं विवर्जयेत्॥ कर्णि
कायां न्यसेन्मेरुं ब्रह्मविष्णुशिवादैवतं॥ १२॥ माल्यवान्पूर्वतः पूज्यस्तत्पूर्वे भद्रसंज्ञितः॥ अश्वरक्षस्ततः प्रोक्तो निषधो मेरुदक्षिणे॥ १३॥ हेमकूटोथ हिम
वान्त्रयं सौम्ये न थात्रयं॥ नीलः श्वेतश्च शृंगी च पश्चिमे गंधमादनः॥ १४॥ वैशांकः केतुमालः स्यान्मेरुर्द्वादशसंयुतः॥ सोपवासो र्चयेद्विष्णुं शिवं वा स्नान
पूर्वकं॥ १५॥ देवाये चार्च्य मेरुं च मंत्रैर्विप्राय वै ददेत्॥ विप्राया मुक्तगोत्राय मेरुं द्रव्यमयं परं॥ १६॥ भुक्त्यै मुक्त्यै निर्मलस्त्वं विष्णुदैवं ददामि ते॥ इंद्रलोके ब्रह्म
लोके शिवलोके हरेः पुरे॥ १७॥ कुलमुद्धृत्य क्रीडेत विमाने देवपूजितः॥ अन्येष्वपि च काले षु संक्रांत्यादौ प्रदापयेत्॥ १८॥ पलानां तु सहस्रेण महामेरुं प्रक
ल्पयेत्॥ शृंगत्रयसमायुक्तं ब्रह्मविष्णुहरान्वितं॥ १९॥ एकैकं पर्वतं तस्य शतैकैकेन कारयेत्॥ मेरुणा सह शैलास्तु रव्यातास्तत्र त्रयोदश॥ २०॥ अयने
ग्रहणादौ च विष्णुगेहे समर्च्य च॥ स्वर्णमेरुं द्विजायार्प्य विष्णुलोके चिरं वसेत्॥ २१॥ परमाणवो यावंतः स्युस्तावच्छिरं॥ रौप्यमेरुं द्वादशाद्रियुतं संक
ल्पतो ददेत्॥ २२॥ प्राग्युक्तं च फलं तस्य विष्णुं विप्रं प्रपूज्य च॥ भूमिमेरुं च विषयं यमलं ग्राममेव वा॥ २३॥ परिकल्प्याष्टमांशेन शेषांशाः पर्वतस्मृताः॥ द्वा
दशाद्रिसमायुक्तं हस्तिमेरुं च कल्पिणं॥ २४॥ ददे त्रिपुरुषैर्युक्तं दत्वानंतं फलं लभेत्॥ त्रिपंचाश्वैरश्वमेरुं स्याद्द्वादशसंयुतं॥ २५॥ विष्ण्वादीन्पूज्य तं
दत्वा भुक्तभोगो नृपो भवेत्॥ अश्वसंख्याप्रमाणेन गोमेरुं पूर्ववद्ददेत्॥ २६॥ पट्टवस्त्रैर्भारमात्रैश्च स्यान्मेरुश्च मध्यतः॥ शैलैर्द्वादशवस्त्रैश्च दत्वानंतं च भुक्तं
फलं॥ २७॥ घृतपंचसहस्रैश्च पलानां मान्यपर्वतः॥ शतैः पंचभिरेकैकः पर्वतोस्मिन्हरिं यजेत्॥ २८॥ विष्णवे ब्राह्मणायार्च्य सर्वं प्राप्य हरिं व्रजेत्॥ एवं तु
खंडमेरुं च कृत्वा दत्वा भुक्तिमुक्तिमाप्नुयात्फलं॥ २९॥ धान्यमेरुः पंचखारीः पराद्रेकैकखारकाः॥ स्वर्णत्रिशृंगकाः सर्वे ब्रह्मविष्णुमहेश्वराः॥ ३०॥ सर्वेषु पूजयेद्वि
ष्णुं वा विशेषादक्षयं फलं॥ एवं दशांशमानेन तिलमेरुं प्रकल्पयेत्॥ ३१॥ शृंगाणि पूर्ववत्तस्य तथैवान्यनगेषु च॥ तिलमेरुं प्रदत्वाथ बंधुभिर्विष्णुलो
कभाक्॥ ३२॥ नमो विष्णुस्वरूपाय धराधाराय वै नमः॥ ब्रह्मविष्णुशिवशृंगाय धरानाभिस्थिताय च॥ ३३॥ नगद्वादशनाथाय सर्वपापप्रहारिणे॥
विष्णुभक्ताय शांताय त्राणं मे कुरु सर्वथा॥ ३४॥ निष्पापः पितृभिः सार्धं विष्णुं गच्छामि ॐ नमः॥ त्वं हरिस्तु हरे रत्ने अहं विष्णुश्च विष्णवे॥ निवेद्या
मि भक्त्या तु भुक्तिमुक्त्यर्थहेतवे॥ ३५॥ इत्याग्नेये मेरुदानानि॥ अग्निरुवाच॥ पृथ्वीदानं प्रवक्ष्यामि पृथिवी त्रिविधा मता॥ शतकोटियोजनानां
सप्तद्वीपा ससागरा॥ १॥ जंबुद्वीपावधिः सा च उत्तमाद्रिः समीरिता॥ उत्तमां पंचभिर्भारैः कांचनैश्च प्रकल्पयेत्॥ २॥ तदर्धेन तु गं कूर्मं यथा पद्मं समा
दिशेत्॥ उत्तमा कथिता पृथ्वी अंशेनैव तु मध्यमा॥ ३॥ कन्यासात्त्रिभागेन त्रिहान्या कूर्मपंकजौ॥ पलानां तु सहस्रेण कल्पयेत्कल्पपादपं॥ ४॥ मूलदंड
सपत्रं च फलपुष्पसमन्वितं॥ पंचस्कंधं तु संकल्प्य पंचानां दापयेत्सुधीः॥ ५॥ एवं दाता ब्रह्मलोके पितृभिर्मोदते चिरं॥ विष्णवे कामधेनुं तु पलानां पंचभिः
शतैः॥ ६॥ ब्रह्मविष्णुमहेशाद्या देवा धेनौ व्यवस्थिताः॥ धेनुदानं सर्वदानं सर्वदं ब्रह्मलोकदं॥ ७॥ विष्णवे कपिलां दत्वा तारयेत्सकलं कुलं॥ अलंकृत्य स्त्रि
यं दद्यादश्वमेधफलं लभेत्॥ भूमिं दत्वा सर्वभाक्स्यात्सर्वसस्यप्ररोहिणीं॥ ग्रामं वाथ पुरं वापि खेटकं च ददत्सुखी॥ ९॥ कार्तिक्यादौ वृषोत्सर्गं कुर्वंस्तारयते
कुलं॥ १०॥ इत्याग्नेये महादानानि॥ अग्निरुवाच॥ नाडीचक्रं प्रवक्ष्यामि यज्ज्ञानाज्ज्ञायते हरिः॥ नाभेरधस्ताद्यत्कंदमंकुरास्तत्र निर्गताः॥ द्वासप्ततिस
हस्राणि नाभिमध्ये व्यवस्थिताः॥ तिर्यगूर्ध्वमधश्चैव व्याप्तं ताभिः समंततः॥ २॥ चक्रवत्संस्थिता ह्येताः प्रधाना दश नाडयः॥ इडा च पिंगला चैव सुषुम्ना च तथैव
च॥ ३॥ गांधारी हस्तिजिह्वा च पृथा चैव यशास्तथा॥ अलंबुषा कुहूश्चैव शंखिनी दशमी स्मृता॥ ४॥ दश प्राणवहा ह्येता नाडयः परिकीर्तिताः॥ प्राणोपानसमान
श्चोदानो व्यान एव च॥ ५॥ नागः कूर्मोथ कृकरो देवदत्तो धनंजयः॥ प्राणस्तु प्रथमो वायुर्दशानामपि स प्रभुः॥ ६॥ प्राणः प्राणयते प्राणं विसर्गात्पूरणं प्रति॥ नित्यमापूर
यत्येष प्राणिनामुरसि स्थितः॥ ७॥ निश्वासोच्छ्वासकासैस्तु प्राणो जीवसमाश्रितः॥ प्रयाणं कुरुते यस्मात्तस्मात्प्राणः प्रकीर्तितः॥ ८॥ अधो नयत्यपानस्तु आहारं च नृणाम
धः॥ मूत्रशुक्रवहो वायुरपानस्तेन कीर्तितः॥ ९॥ पीतभक्षितमाघ्रातं रक्तपित्तकफान्वितं॥ समं नयति गात्रेषु समानो नाम मारुतः॥ १०॥ स्पंदयत्यधरं वक्त्रं नेत्ररागप्र
कोपनं॥ उद्वेजयति मर्माणि उदानो नाम मारुतः॥ ११॥ व्यानो विनामयत्यंगं व्यानो व्याधिप्रकोपनः॥ प्रतिदानं तथा कंठाद्व्यापनाद्व्यान उच्यते॥ १२॥ उद्गारे नाग इत्युक्तः
कूर्मश्चोन्मीलने स्मृतः॥ कृकरो भक्षणे चैव देवदत्तो विजृंभणे॥ १३॥ धनंजयः स्थितो घोषे मृतस्यापि न मुंचति॥ जीवं प्रयाति दशधा नाडीचक्रं हि तेन तत्॥ १४॥ सं
क्रांतिर्विषुवं चैव अहोरात्रायनानि च॥ अधिमासमृणं चैव ऊनरात्रं धनं तथा॥ १५॥ ऊनरात्रं भवेद्धिक्का अधिमासो विजृंभिका॥ ऋणं चात्र भवेत्कासो निःश्वासो धनमुच्यते॥ १६॥ सो

उत्तरं दक्षिणं ज्ञेयं वामदक्षिणसंज्ञितं॥ मध्ये तु विषुवं प्रोक्तं पुटद्वयविनिःसृतं॥१७॥ संक्रांतिः पुनरस्यैव स्वस्थानात्स्थानयोगतः॥ सुषुम्नामध्यमे ह्यंगे इडा वामे प्रति
ष्ठिता॥१८॥ पिंगला दक्षिणे विप्र ऊर्ध्वं प्राणो ह्यहः स्मृतं॥ अपानो रात्रिरेवं स्यादेको वायुर्द्वयात्मकः॥१९॥ आयामो देहमध्यस्थः सोमग्रहणमिष्यते॥ देहातीतस्तमा
यामं मादित्यग्रहणं विदुः॥२०॥ उदरं पूरयेन्नावद्वायुना यावदीप्सितं॥ प्राणायामो भवेदेषः पूरको देहपूरकः॥२१॥ पिधाय सर्वद्वाराणि निश्वासोच्छ्वासवर्जितः॥ संपू
र्णकुंभवत्तिष्ठेत्प्राणायामः स कुंभकः॥२२॥ मुंचेद्वायुं ततस्तूर्ध्वं श्वासेनैकेन मंत्रवित्॥ उच्छ्वासयोगयुक्तस्तु वायुमूर्ध्वं विरेचयेत्॥२३॥ उच्चरति स्वयं यस्मात्स्वदेहाव
स्थितः शिवः॥ तस्मात्तत्त्वविदां चैव स एव जप उच्यते॥२४॥ अयुतैकं सहस्रैकं षट्शतानि तथैव च॥ अहोरात्रेण योगींद्रो जपसंख्यां करोति सः॥२५॥ अजपा नाम गा
यत्री ब्रह्मविष्णुमहेश्वरी॥ अजपां जपते यस्तु पुनर्जन्म न विद्यते॥२६॥ चंद्राग्निरविसंयुक्ता आद्या कुंडलिनी मता॥ हृत्प्रदेशे तु सा ज्ञेया अंकुराकारसंस्थि
ता॥२७॥ सृष्टिन्यासो भवेत्तत्र सर्वैः स्वर्गावलंबनात्॥ सकृद्वर्णं चिंतयेत्तस्मिन्नमृतं सात्त्विको नरः॥२८॥ देहस्थः सकलो ज्ञेयो निष्कलो देहवर्जितः॥ हंसहंसेति यो ब्रूया
द्धंसो देवः सदाशिवः॥२९॥ तिलेषु च यथा तैलं पुष्पे गंधः समाश्रितः॥ पुरुषस्य तथा देहे स बाह्याभ्यंतरस्थितः॥३०॥ ब्रह्मणो हृदये स्थानं कंठे विष्णुः समाश्रितः॥
तालुमध्ये स्थितो रुद्रो ललाटे तु महेश्वरः॥३१॥ प्राणाग्रं तु शिवं विद्यात्तस्मात्तु परात्परं॥ पंचधा सकलः प्रोक्तो विपरीतस्तु निष्कलः॥३२॥ प्रासादं नादमुत्थाप्य स
ततं तु जपेद्यदि॥ षण्मासात्सिद्धिमाप्नोति योगयुक्तो न संशयः॥३३॥ गमागमस्य ज्ञानेन सर्वपापक्षयो भवेत्॥ अणिमादिगुणैश्वर्यं षड्भिर्मासैरवाप्नुयात्॥३४॥ स्थू
लः सूक्ष्मः परश्चेति प्रासादः कथितो मया॥ ह्रस्वो दीर्घः प्लुतश्चेति प्रासादं लक्षयेत्त्रिधा॥३५॥ ह्रस्वो दहति पापानि दीर्घो मोक्षप्रदो भवेत्॥ आप्यायने प्लुतश्चे
ति मूर्ध्नि बिंदुविभूषितः॥३६॥ आद्यंते च तु ह्रस्वस्य फट्कारो मारणे द्विजः॥ आद्यंते च हृदयमाकृष्टौ संप्रकीर्तितः॥३७॥ देवस्य दक्षिणां मूर्तिं पंचलक्षं स्थितो जपेत्॥
जपांते घृतहोमस्तु दशसाहस्रिको भवेत्॥३८॥ एवमाप्यायितो मंत्रो वश्योच्चाटादिकं चरेत्॥ ऊर्ध्वशून्यमधःशून्यं मध्यशून्यं निरामयं॥३९॥ त्रिशून्यं यो विजा
नाति मुच्यते सो ध्रुवं द्विजः॥ प्रासादं यो न जानाति पंचमंत्रमहातनुं॥४०॥ अष्टत्रिंशत्कलायुक्तं न स आचार्य उच्यते॥ तथोंकारं च गायत्रीं रुद्रादीन्वेत्ति सो गुरुः॥४१
आग्नेये मंत्रमाहात्म्यं॥ अग्निरुवाच॥ ओंकारं यो विजानाति स योगी स हरिः पुमान्॥ ॐकारमभ्यसेत्तस्मान्मंत्रसारं तु सर्वदं॥१॥ सर्वमंत्रप्रयोगेषु प्रण
वः प्रथमः स्मृतः॥ तेन संपरिपूर्णं यत्तत्पूर्णं कर्म नेतरत्॥२॥ ओंकारपूर्विकास्तिस्रो महाव्याहृतयोऽव्ययाः॥ त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखं॥३॥ योऽधी
ते त्रिपदामेतां त्रीणि वर्षाण्यतंद्रितः॥ स ब्रह्म परमभ्येति वायुभूतः खमूर्तिमान्॥४॥ एकाक्षरं परं ब्रह्म प्राणायामः परं तपः॥ सावित्र्यास्तु परं नास्ति मौनात्स
त्यं विशिष्यते॥५॥ सप्तावर्ती पापहरा दशभिः प्रापयेद्दिवं॥ विंशावर्ती तु सा देवी नयते हीश्वरालयं॥६॥ अष्टोत्तरशतं जप्त्वा तीर्णः संसारसागरात्॥ रुद्रकूष्मां
डजप्येभ्यो गायत्री तु विशिष्यते॥७॥ न गायत्र्याः परं जप्यं न व्याहृतिसमं हुतं॥ गायत्र्याः पादमप्यर्धमृगर्धमृचमेव वा॥८॥ ब्रह्महत्यासुरापानं सुवर्णस्तेयमे

व च॥ गुरुदारागमं चैव जप्येनैव पुनाति सा॥९॥ पापे कृते तिलैर्होमो गायत्रीजप ईरितः॥ जप्त्वा सहस्रं गायत्र्या उपवासी स पापहा॥१०॥ गोघ्नः पितृघ्नो मा
तृघ्नो ब्रह्महा गुरुतल्पगः॥ ब्रह्मघ्नः स्वर्णहारी च सुरापो लक्षजप्यकः॥११॥ शुध्यते वाथवा स्नात्वा शतमंतर्जले जपेत्॥ अपः शतेन पीत्वा तु गायत्र्याः पापहा
भवेत्॥१२॥ शतं जप्त्वा तु गायत्री पापोपशमनी स्मृता॥ सहस्रं जप्ता सा देवी उपपातकनाशिनी॥१३॥ अभीष्टदा कोटिजप्या देवत्वं राजतामियात्॥ ॐका
रं पूर्वमुच्चार्य भूर्भुवः स्वस्तथैव च॥१४॥ गायत्रीं प्रणवं चांते जप एवमुदाहृतं॥ विश्वामित्र ऋषिश्छंदो गायत्रं सविता तथा॥१५॥ देवतोपनये जप्ये विनियोगे हु
ते तथा॥ अग्निर्वायू रविर्विद्युद्यमो जलपतिर्गुरुः॥१६॥ पर्जन्य इंद्रो गंधर्वः पूषा च तदनंतरं॥ मित्रोऽथ वरुणस्त्वष्टा वसवो मरुतः शशी॥१७॥ अंगिरा विश्वे नासत्यौ
कस्तथा सर्वदेवताः॥ रुद्रो ब्रह्मा च विष्णुश्च क्रमशोऽक्षरदेवताः॥१८॥ गायत्र्या जपकाले तु कथिताः पापनाशनाः॥ पादांगुष्ठौ च गुल्फौ च नलकौ जानुनी तथा
॥१९॥ जंघे शिश्नं च वृषणौ कटिर्नाभिस्तथोदरं॥ स्तनौ च हृदयं ग्रीवा मुखं तालु च नासिके॥२०॥ चक्षुषी च भ्रुवोर्मध्यं ललाटं पूर्वमाननं॥ दक्षिणोत्तरपार्श्वे द्वे शिर आ
स्यमनुक्रमात्॥२१॥ पीतः श्यामश्च कपिलो मारकतोऽग्निसन्निभः॥ रुक्मविद्युद्धूम्रकृष्णरक्तगौरेंद्रनीलभाः॥२२॥ स्फटिकस्वर्णपांड्वाभाः पद्मरागोऽखिलद्युतिः
हेमधूम्ररक्तनीलरक्तकृष्णसुवर्णभाः॥२३॥ शुक्लकृष्णपलाशाभा गायत्र्या वर्णकाः क्रमात्॥ ध्यानकाले पापहरा हुतैषा सर्वकामदा॥२४॥ गायत्र्या तु तिलैर्होमः स
र्वपापप्रणाशनः॥ शांतिकामो यवैः कुर्यादायुष्कामो घृतेन च॥२५॥ सिद्धार्थकैः कर्मसिद्ध्यै पयसा ब्रह्मवर्चसे॥ पुत्रकामस्तथा दध्ना धान्यकामस्तु शालिभिः॥२६॥ क्षी
रवृक्षसमिद्भिस्तु ग्रहपीडोपशांतये॥ धनकामस्तथा बिल्वैः श्रीकामः कमलैस्तथा॥२७॥ आरोग्यकामो दूर्वाभिस्त्रिरुत्पाते स एव हि॥ सौभाग्येच्छुर्गुग्गुलु
ना विद्यार्थी पायसेन च॥२८॥ अयुतेनोक्तसिद्धिः स्याल्लक्षेण मनसेप्सितं॥ कोट्या ब्रह्मवधाघ्नः कुलोद्धारी हरिर्भवेत्॥२९॥ ग्रहयज्ञमुखो वापि होमोऽयुतमुखो वा
र्थकृत्॥ आवाहनं च गायत्र्यास्ततः ॐकारमभ्यसेत्॥३०॥ स्मृत्वोंकारं तु गायत्रीं निबध्नीयाच्छिखां ततः॥ पुनराचम्य हृदयं नाभिस्कंधौ च संस्पृशेत्॥३१॥ प्रणवस्य ऋ
षिर्ब्रह्मा गायत्री छंद एव च॥ देवोऽग्निः परमात्मा स्याद्योगो वै सर्वकर्मसु॥३२॥ शुक्ला चाग्निमुखी दिव्या कात्यायनसगोत्रजा॥ त्रैलोक्यचरणा दिव्या पृथिव्या
धारसंयुता॥३३॥ अक्षसूत्रधरा देवी पद्मासनगता शुभा॥ ॐ तेजोऽसि बलमसि भ्राजोऽसि देवानां धामनामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुः॥ ओं अ
भिभूः॥ आगच्छ वरदे देवि जप्ये मे सन्निधौ भव॥ व्याहृतीनां तु सर्वासामृषिरेव प्रजापतिः॥३४॥ व्यस्ताश्चैव समस्ताश्च ब्राह्ममक्षरमोमिति॥ विश्वामि
त्रो जमदग्निर्भरद्वाजोऽथ गोतमः॥३५॥ ऋषिरत्रिर्वसिष्ठश्च कश्यपश्च यथाक्रमं॥ अग्निर्वायू रविश्चैव वाक्पतिर्वरुणस्तथा॥३६॥ इंद्रो विश्वे व्याहृतीनां देवता
नि यथाक्रमं॥ गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च॥३७॥ त्रिष्टुप् च जगती चेति छंदांस्याहुरनुक्रमात्॥ विनियोगो व्याहृतीनां प्राणायामे च होमके
॥३८॥ आपो हि ष्ठेत्यृचा चापि द्रुपदादिति वा स्मृता॥ तथा हिरण्यवर्णाभिः पावमानीभिरंततः॥३९॥ विप्रुषोऽष्टौ क्षिपेदूर्ध्वं जन्मकृतपापजित्॥ अंतर्जले

ऋतंचेतित्र्यचेत्रिरघमर्षणं॥५०॥ आपोहिष्ठेतिस्यृचस्य सिंधुद्वीपऋषिः स्मृतः॥ ब्रह्मस्नानाय छंदोस्य गायत्रं देवता जलं॥५१॥ मार्जने चविनियोगो
स्य ह्यावभृथके क्रतोः॥ अघमर्षणसूक्तस्य ऋषिर्वाघमर्षणं॥५२॥ अनुष्टुप् च भवेच्छंदो भाववृत्तं तु दैवतं॥ आपोज्योतीरस इति गायत्र्यास्तु शिरः स्मृ
तं॥५३॥ ऋषिः प्रजापतिस्तस्य छंदोहीनं यजुर्यतः॥ ब्रह्माग्निवायुसूर्याश्च देवताः परिकीर्तिताः॥५४॥ प्राणरोधात्तु वायुः स्याद्वायोरग्निश्च जायते॥ अग्नेरा
पस्ततः शुद्धिस्ततश्चाचमनं चरेत्॥५५॥ अंतश्चरति भूतेषु गुहायां विश्वमूर्तिषु॥ तपो यज्ञ वषट्कार आपोज्योतीरसोमृतं॥५६॥ उदुत्यं जातवेदस मृषिः प्रस्कण्व
उच्यते॥ गायत्रं छंद आख्यातं सूर्यश्चैव तु दैवतं॥५७॥ अतिरात्रे नियोगः स्यादग्नीषोमे नियोगकः॥ चित्रं देवेति चक्रस्य ऋषिः कौत्स उदाहृतः॥५८॥ त्रिष्टुप् छंदो
दैवतं च सूर्योस्याः परिकीर्तितः॥५९॥ इत्याग्नेये संध्याविधिः॥ अग्निरुवाच॥ एवं संध्याविधिं कृत्वा गायत्रीं च जपेत्स्मरेत्॥ गायत्रीध्यानतस्त्रायेत्भार्यां
प्राणांस्तथैव च॥१॥ ततः स्मृतेयं गायत्री सावित्रीयं ततो यतः॥ प्रकाशनात्सा सवितुर्वाग्रूपत्वात्सरस्वती॥२॥ तज्ज्योतिः परमं ब्रह्म भर्गस्तेजो यतः स्मृतं॥ भादीप्ताविति
रूपं हि भ्रस्जः पाके थवा स्मृतं॥३॥ औषध्यादिकं पचति भ्राजृ दीप्तौ तथा भवेत्॥ भर्गः स्याद्भ्राजत इति बहुलं छंदसीरितं॥४॥ वरेण्यं सर्वतेजोभ्यः श्रेष्ठं वै परमं प
स्वर्गापवर्गकामैर्वा वरणीयं सदैव हि॥५॥ वृणोतेर्वरणार्थत्वाज्जाग्रत्स्वप्नादिवर्जितं॥ नित्यशुद्धबुद्धमेकं सत्यं तद्धि महेश्वरः॥६॥ अहं ब्रह्म परं ज्योतिर्ध्यायेमहि वि
मुक्तये॥ तज्ज्योतिर्भगवान्विष्णुर्जगज्जन्मादिकारणं॥७॥ शिवं केचित्पठंति स्म शक्तिरूपं पठंति च॥ केचित्सूर्यं केचिदग्निं वेदगा अग्निहोत्रिणः॥८॥ अग्न्यादिरूपी
विष्णुर्हि वेदादौ ब्रह्म गीयते॥ तत्पदं परमं विष्णोर्देवस्य सवितुः स्मृतं॥९॥ महदाद्यं सूयते हि स्वयंज्योतिर्हरिः प्रभुः॥ पर्जन्यो वायुरादित्यः शीतोष्णाद्यैश्च पाचयेत्॥
१०॥ अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते॥ आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः॥११॥ दधातेर्वा धीमहीति मनसा धारयेमहि॥ नोस्माकं यच्च भर्गश्च सर्वे
षां प्राणिनां धियः॥१२॥ चोदयात्प्रेरयेद्बुद्धीर्भोक्तॄणां सर्वकर्मसु॥ दृष्टादृष्टविपाकेषु विष्णुः सूर्याग्निरूपवान्॥१३॥ ईश्वरप्रेरितो गच्छेत्स्वर्गं वाश्वभ्रमे
व वा॥ ईशावास्यमिदं विश्वं महदादिजगद्धरिः॥१४॥ स्वर्गाद्यैः क्रीडते देवो योहं स पुरुषः प्रभुः॥ आदित्यांतर्गतं यच्च भर्गाख्यं वै मुमुक्षुभिः॥१५॥ ज
न्ममृत्युविनाशाय दुःखस्य त्रिविधस्य च॥ ध्यानेन पुरुषोयं च द्रष्टव्यः सूर्यमंडले॥१६॥ तत्त्वं सदसि चिद्ब्रह्म विष्णोर्यत्परमं पदं॥ देवस्य सवितुर्भ
र्गो वरेण्यं हि तुरीयकं॥१७॥ देहादिजाग्रदाद्यस्तं ब्रह्माहमिति धीमहि॥ योसावादित्ये पुरुषः सोसावहमनंत ॐ॥१८॥ ज्ञानानि शुभकर्मादीन्प्रवर्त
यति यः सदा॥१९॥ इत्याग्नेये गायत्रीनिर्वाणं॥ अग्निरुवाच॥ लिंगमूर्तिं शिवं स्तुत्वा गायत्र्या योगमाप्तवान्॥ निर्वाणं परमं ब्रह्म वसिष्ठोन्यश्च
शंकरात्॥१॥ नमः कनकलिंगाय वेदलिंगाय वै नमः॥ नमः पुराणलिंगाय श्रुतिलिंगाय वै नमः॥२॥ नमः परमलिंगाय व्योमलिंगाय वै नमः॥२॥
नमः सहस्रलिंगाय बुद्धिलिंगाय वै नमः॥ नमः पुराणलिंगाय श्रुतिलिंगाय वै नमः॥३॥ नमः पाताललिंगाय ब्रह्मलिंगाय वै नमः॥ नमो रहस्यलिं

गाय सप्तद्वीपोर्ध्वलिंगिने॥४॥ नमः सर्वात्मलिंगाय सर्वलोकांगलिंगिने॥ नमस्त्वव्यक्तलिंगाय बुद्धिलिंगाय वै नमः॥५॥ नमो रहस्यलिंगाय सप्तद्वीपो
र्ध्वलिंगिने॥ नमो हुंकारलिंगाय भूतिलिंगाय वै नमः॥ इम इंद्रियलिंगाय नमस्तन्मात्रलिंगिने॥६॥ नमः पुरुषलिंगाय भवलिंगाय वै नमः॥ नमो ओर्ध्वलिंगा
य सत्त्वलिंगाय वै नमः॥७॥ नमस्ते भवलिंगाय नमस्त्रैगुण्यलिंगिने॥ नमोऽनागतलिंगाय तेजोलिंगाय वै नमः॥८॥ नमो वायूर्ध्वलिंगाय श्रुतिलिंगाय वै नमः॥
नमस्तेनखलिंगाय देवानुगतलिंगिने॥९॥ दिश नः परमं योगं अपत्यं सदृशं तथा॥ ब्रह्म चैवाक्षयं देव शमं चैव परं विभो॥१०॥ अक्षयत्वं च वंशस्य धर्मे च म
तिमक्षयां॥११॥ अग्निरुवाच॥ वसिष्ठेन स्तुतः शंभुस्तुष्टः श्रीपर्वते पुरा॥ वसिष्ठाय वरं दत्वा तत्रैवांतरधीयत॥१२॥ इत्याग्नेये॥ अग्निरुवाच॥ वसि
ष्ठेन स्तुतः शंभुः पुष्करेण च रामाय राजधर्मं हि पृच्छते॥ यथादौ कथितं तद्वद्वसिष्ठ कथयामि ते॥१॥ पुष्कर उवाच॥ राजधर्मं प्रवक्ष्यामि सर्वस्माद्राजधर्मतः॥ राजा
हितः शत्रुहंता प्रजापालः सदंडवान्॥२॥ पालयिष्यामि वः सर्वान्धर्मस्थान्व्रतमाचरेत्॥ संवत्सरं स वृणुयात्पुरोहितमथर्त्विजं॥३॥ मंत्रिणश्चाखिलात्म
वान्महिषीं धर्मलक्षणां॥ सांवत्सरो नृपः काले ससंभारोभिषेचनं॥४॥ कुर्यान्मृते नृपे नात्र कालस्य नियमः स्मृतः॥ तिलैः सिद्धार्थकैः स्नानं सांवत्सरपुरोहितौ॥
५॥ घोषयित्वा जयं राजा सो राजा भद्रासने स्थितः॥ अभयं घोषयेद्दुर्गान्मोचयेद्राज्यकालके॥६॥ पुरोधसाभिषेकात्प्राक्कार्यैंद्री शांतिरेव च॥ उपवासाभिषेकाहे
वेद्यग्नौ जुहुयान्मनून्॥७॥ वैष्णवानैंद्रमंत्रांस्तु सावित्रान्वैश्वदेवतान्॥ सौम्यान्स्वस्त्ययनं शर्म वर्मायुष्याभयान्मनून्॥८॥ अपराजितं च कलशं वह्नेर्द
क्षिणपार्श्वगं॥ संपातवंतं हैमं च पूजयेद्गंधपुष्पकैः॥९॥ प्रदक्षिणावर्तशिखस्तप्तजांबूनदप्रभः॥ रथौघमेघनिर्घोषो विधूमश्च हुताशनः॥१०॥ अनुलोमः सुगंधि
श्च स्वस्तिकाकारसन्निभः॥ प्रसन्नार्चिर्महाज्वालः स्फुलिंगरहितो हितः॥११॥ न व्रजेयुश्च मध्येन मार्जारमृगपक्षिणः॥ पर्वताग्रमृदा तावन्मूर्धानं शोधयेन्नरः॥१२॥
वल्मीकाग्रमृदा कर्णौ वदनं केशवालयात्॥ इंद्रालयमृदा ग्रीवां हृदयं तु नृपाजिरात्॥१३॥ करिदंतोद्धृतमृदा दक्षिणं तु तदा भुजं॥ वृषशृंगोद्धृतमृदा वामं चैव तथा
भुजं॥१४॥ सरोमृदा तथा पृष्ठमुदरं संगमान्मृदा॥ नदीतटद्वयमृदा पार्श्वे संशोधयेत्तथा॥१५॥ वेश्याद्वारमृदा राज्ञः कटिशौचं विधीयते॥ यज्ञस्थानात्तथैवोरू गोस्था
नाज्जानुनी तथा॥१६॥ अश्वस्थानात्तथा जंघे रथचक्रमृदांघ्रिके॥ मूर्धानं पंचगव्येन भद्रासनगतं नृपं॥१७॥ अभिषिंचेदमात्यानां चतुष्टयमथो घटैः॥ पूर्वतो हेम
कुंभेन घृतकुंभेन ब्राह्मणः॥१८॥ रूप्यकुंभेन याम्ये च क्षीरपूर्णेन क्षत्रियः॥ दध्ना च ताम्रकुंभेन वैश्यः पश्चिमगेन च॥१९॥ मृन्मयेन जलेनोदक् शूद्रामात्योभिषेच
येत्॥ ततोभिषेकं नृपतेर्बह्वृचप्रवरो द्विजः॥२०॥ कुर्वीत मधुना विप्रश्छंदोगश्च कुशोदकैः॥ संपातवंतं कलशं तथा गत्वा पुरोहितः॥२१॥ विधाय वह्निरक्षां तु सद
स्येषु यथाविधि॥ राजश्रियाभिषेके च ये मंत्राः परिकीर्तिताः॥२२॥ तैस्तु दद्यान्महाभाग ब्राह्मणानां स्वनेन तथा॥ ततः पुरोहितो गच्छेद्वेदिमूलं तदेव तु॥२३॥ शतच्छिद्रे
ण पात्रेण सौवर्णेनाभिषेचयेत्॥ या ओषधीत्योषधीभिर्रथेत्यक्षेति गंधकैः॥२४॥ पुष्पैः पुष्पवतीत्येव ब्राह्मणेति च बीजकैः॥ रत्नैराशुः शिशान इत्येवं ये देवाश्च कुशोदकैः॥२५

यजुर्वेदाथर्ववेदीगंधद्वारेतिसंस्पृशेत्॥शिरःकंठेरोचनयासर्वतीर्थोदकैर्द्विजाः॥२६॥गीतवाद्यादिनिर्घोषैश्चामरव्यजनादिभिः॥सर्वौषधिमयंकुंभंधारयेयु
र्द्विजोत्तमाः॥२७॥तंपश्येद्दर्पणेराजाघृतंवैमंगलादिकं॥अभ्यर्च्यविष्णुंब्रह्माणमिंद्रादींश्चग्रहेभकान्॥२८॥व्याघ्रचर्मोत्तरांशय्यामुपविष्टःपुरोहितः॥म
धुपर्कादिकंदत्वापट्टबंधंप्रकारयेत्॥२९॥राज्ञोमुकुटबंधंचपंचचर्मोत्तरच्छदे॥ध्रुवाद्यौरितिचवृषिरोहिपवृषविषदंशजं॥३०॥द्वीपिजंसिंहजंव्याघ्रजा
तंचर्मतदासने॥अमात्यसचिवादींश्चप्रतीहारःप्रदर्शयेत्॥३१॥गोजाविगृहदानाद्यैश्चसंवत्सरपुरोहितौ॥पूजयित्वाद्विजान्प्राच्यैर्भूपोन्यान्गोत्रमुख्य
कैः॥३२॥वह्निंप्रदक्षिणीकृत्यगुरुंनत्वाथपृष्ठतः॥वृषमालभ्यगांवत्सांपूजयित्वाथमंत्रितं॥३३॥अश्वमारुह्यनागंचपूजयेत्संसमारुहेत्॥परिभ्रमेद्राज
मार्गेबलयुक्तःप्रदक्षिणं॥३४॥पुरंविशेत्सदानाद्यैःप्राच्यसर्वान्विसर्जयेत्॥३५॥ इत्याग्नेयेराजाभिषेकः॥ पुष्कर उवाच॥ राजदेवाद्यभिषेकमंत्रान्वक्ष्ये
घमर्दनान्॥कुंभात्कुशोदकैःसिंचेत्तेनसर्वंहिसिध्यति॥१॥सुरास्त्वामभिषिंचंतुब्रह्मविष्णुमहेश्वराः॥वासुदेवःसंकर्षणःप्रद्युम्नश्चानिरुद्धकः॥२॥भवं
तुविजयायेतेइंद्राद्यादशदिग्गजाः॥रुद्रोधर्मोमनुर्दक्षोरुचिःश्रद्धाचसर्वदा॥३॥भृगुरत्रिर्वसिष्ठश्चसनकश्चसनंदनः॥सनत्कुमारोंगिराश्चपुलस्त्यःपुलहः
क्रतुः॥४॥मरीचिःकश्यपःपांतुप्रजेशाःपृथिवीपते॥प्रभासुरावर्हिषदःअग्निष्वात्ताश्चपांतुते॥५॥क्रव्यादाश्चोपहूताश्चआज्यपाश्चसुकालिनः॥अग्निभि
श्चाभिषिंचंतुलक्ष्म्याद्याधर्मवल्लभाः॥६॥आदित्याद्याःकश्यपस्यबहुपुत्रस्यवल्लभाः॥कृशाश्वस्यास्तुपुत्राश्चभार्याश्चारिष्टनेमिनः॥७॥अश्विन्याद्याश्चचं
द्रस्यपुलहस्यतथाप्रियाः॥भूताचकपिशादंष्ट्रीसुरसासरमादनुः॥८॥श्येनीभासीतथाक्रौंचीधृतराष्ट्रीशुकीतथा॥पत्न्यस्त्वामभिषिंचंतुअरुणस्यार्कसारथेः
॥९॥आयतिर्नियतीरात्रिर्निद्रालोकस्थितौस्थिताः॥उमामेनाशचीपांतुधूम्रोर्मानिर्ऋतिर्जयेश॥१०॥गौरीशिवाचऋद्धिश्चवेलायाचैवनड्वला॥असिक्नीचत
थाज्योत्स्नादेवपत्न्योवनस्पतिः॥११॥महाकल्पश्चकल्पश्चमन्वंतरयुगानिच॥संवत्सराणिवर्षाणिपांतुत्वामयनद्वयं॥ऋतवश्चतथामासाःपक्षारात्र्यहनीतथा॥
संध्यातिथिमुहूर्ताश्चकालस्यावयवाकृतिः॥१३॥सूर्याद्याश्चग्रहाःपांतुमनुःस्वायंभुवादिकः॥स्वायंभुवःस्वारोचिषऔत्तमस्तामसोमनुः॥१४॥रैवतश्चा
क्षुषःषष्ठोवैवस्वतइहावतात्॥सावर्णोब्रह्मपुत्रश्चधर्मपुत्रश्चरुद्रजः॥१५॥दक्षजोरौच्यभौत्यौचमनवस्तुचतुर्दश॥विश्वभुक्चविपश्चिच्चसुचित्तिश्चशि
खिर्विभुः॥मनोजवस्तथौजस्वीबलिरद्भुतशांतयः॥वृषश्चऋतधामाचदिवस्पृक्कविरिंद्रकाः॥१७॥रेवंतश्चकुमारश्चतथावत्सविनायकाः॥वीरभद्रश्चनंदी
चविश्वकर्मापुरोजवः॥१८॥एतेत्वामभिषिंचंतुसुरमुख्याःसमागताः॥नासत्यौदेवभिषजौध्रुवाद्यावसवोष्टकाः॥१९॥दशचांगिरसोदेवास्त्वाभिषिंचंति
सिद्धये॥आत्माह्यायुर्मनोदक्षोमदःप्राणस्तथैवच॥२०॥हविष्मांश्चगरिष्ठश्चऋतःसत्यश्चपांतुते॥क्रतुर्दक्षोवसुःसत्यःकालकामोधुरिर्जयेत्॥२१॥पु
रूरवामाद्रवाश्चविश्वेदेवाश्चरोचनः॥अंगारकोद्यास्त्वयंस्त्वांतिकंतिश्चतथायनः॥२२॥अजैकपादहिर्बुध्न्योधूमकेतुश्चरुद्रजाः॥भरतश्चतथामृत्युःकापा

लिरथकिंकिणिः॥२३॥भुवनोभावनःपांतुस्वजन्यःस्वजनस्तथा॥क्रतुःस्वरश्चमूर्धाचओजश्चाभिभुजस्तथा॥२४॥प्रसवश्चाव्ययश्चैवदक्षश्चभृगवस्तथा॥
क्रतुःस्वरश्चमूर्धाचओजश्चाभिभुजस्तथा॥मनोनुमंताप्राणश्चनरोपानश्चवीर्यवान्॥२५॥वीतिहोत्रोनयःसाध्योहंसोनारायणोवतु॥विभुश्चैवप्रभुश्चैवदेवाः
श्रेष्ठाजगद्धिताः॥२६॥धातामित्रोर्यमापूपाशक्रोंशोवरुणोभगः॥त्वष्टाविवस्वान्सवितविष्णुर्द्वादशभास्कराः॥२७॥एकज्योतिश्चद्विज्योतिस्त्रिश्चतुर्ज्यो
तिरेवच॥एकशक्रोद्विशक्रश्चत्रिशक्रश्चमहाबलः॥२८॥इंद्रश्चमेत्यादिशातुततःप्रतिमकृत्तथा॥मितश्चसंमितश्चैवअमितश्चमहाबलः॥२९॥ऋतजि
त्सत्यजिच्चैवसुषेणःश्येनजित्तथा॥अतिमित्रोनमित्रश्चपुरुमित्रोपराजितः॥३०॥ऋतश्चऋतवाग्दाताविधाताधारणोध्रुवः॥विधारणोमहातेजावा
सवस्यपरःसखा॥३१॥ईदृक्षश्चाप्यदृक्षश्चएतादृग्मिताशनः॥क्रीडितश्चप्रसदृक्षश्चशरभश्चमहातपाः॥३२॥धातुर्धुर्योधुरिर्भीमअभियुक्तःक्षपात्
सहः॥धृतिर्वसुरनाधृष्योरामःकामोजयोविराट्॥३३॥देवाएकोनपंचाशन्मरुतस्त्वामवंतुते॥चित्रांगदश्चित्ररथश्चित्रसेनश्चवैकलिः॥३४॥ऊर्णायु
रुग्रसेनश्चधृतराष्ट्रश्चनंदकः॥हाहाहूहूर्नारदश्चविश्वावसुश्चतुंबुरुः॥३५॥एतेत्वामभिषिंचंतुगंधर्वाविजयायते॥पांतुत्वेकुरवोमुख्यादिव्याश्चा
प्सरसांगणाः॥३६॥अनवद्यासुकेशीचमेनकासहजन्यया॥क्रतुस्थलाघृताचीचविश्वाचीपुंजिकस्थला॥३७॥प्रम्लोचाचोर्वशीरंभापंचचूडातिलोत्त
मा॥चित्रलेखालक्ष्मणाचपुंडरीकाचवारुणी॥३८॥प्रह्लादोविरोचनोथबलिर्बाणोथतत्सुताः॥एतेचान्येभिषिंचंतुदानवाराक्षसास्तथा॥३९॥हेतिश्चैव
प्रहेतिश्चविद्युत्स्फूर्जस्तथोग्रकः॥यक्षःसिद्धार्थकःपांतुमणिभद्रश्चनंदनः॥४०॥पिंगाक्षोद्युतिमांश्चैवपुष्पवंतोजयावहः॥शंखःपद्मश्चमकरःकच्छ
पश्चनिधिर्जयेत्॥४१॥पिशाचाऊर्ध्वकेशाद्याभूताभूम्यादिवासिनः॥महाकालंपुरस्कृत्यनरसिंहंचमातरः॥४२॥गुहःस्कंदोविशाखस्त्वांनैगमेयोभि
षिंचतु॥डाकिन्योयाश्चयोगिन्यःखेचराभूचराश्चयाः॥४३॥गरुडश्चारुणःपांतुसंपातीप्रमुखाःखगाः॥अनंताद्यामहानागाःशेषवासुकितक्षकाः॥४४
ऐरावतोमहापद्मःकंबलाश्वतरावुभौ॥शंखःकर्कोटकश्चैवधृतराष्ट्रोधनंजयः॥४५॥कुमुदैरावणोपद्मःपुष्पदंतोथवामनः॥सुप्रतीकोंजनोनागाः
पांतुत्वांसर्वतःसदा॥४६॥पैतामहस्तथाहंसोवृषभःशंकरस्यच॥दुर्गासिंहश्चपांतुत्वांयमस्यमहिषस्तथा॥४७॥उच्चैःश्रवाश्चाश्वपतिःस्तथाध
न्वंतरिःसदा॥कौस्तुभःशंखराजश्चवज्रंशूलंचचक्रकं॥४८॥नंदकोस्त्राणिरक्षंतुधर्मश्चव्यवसायकः॥चित्रगुप्तश्चदंडश्चपिंगलोमृत्युकालकौ
॥४९॥वालखिल्यादिमुनयोव्यासोवाल्मीकिमुख्यकाः॥पृथुर्दिलीपोभरतोदुष्यंतःशत्रुजिद्बली॥५०॥मनुःककुत्स्थश्चानेनायुवनाश्वोजयद्रथः॥
मांधाताचमुचुकुंदश्चपांतुत्वांचपुरूरवाः॥५१॥वास्तुदेवाःपंचविंशतत्वानिविजयायते॥रुक्मभौमःशिलाभौमःपातालोनीलमृत्तिकः॥५२॥पी
तरक्तक्षितिश्चैवश्वेतभौमोरसातलं॥भूर्लोकोथभुवर्मुख्याजंबुद्वीपादयश्चते॥५३॥उत्तराःकुरवःपांतुरम्योहिरण्यकस्तथा॥भद्राश्वःकेतुमालश्च

वर्षश्चैव रसावृतः॥५४॥ हरिवर्षः किंपुरुषं इद्दीपः शकेरुमान्॥ ताम्रवर्णो गभस्तिमांश्च नागद्वीपश्च सौम्यकः॥५५॥ गंधर्वो वारुणोयं च नवमः पां
तु राजसदा॥ हिमवान् हेमकूटश्च निषधो नीलएव च॥५६॥ श्वेतश्च शृंगवान्मेरुर्माल्यवान् गंधमादनः॥ महेंद्रो मलयः सह्यः शुक्तिमान् ऋक्षवान् गिरिः॥
५७॥ विंध्यश्च पारियात्रश्च गिरयः शांतिदास्तु ते॥ ऋग्वेदाद्याः षडंगानि इतिहासं पुराणकं॥५८॥ आयुर्वेदश्च गांधर्व धनुर्वेदोपवेदकाः॥ शिक्षा
कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः॥५९॥ छंदोगानि च वेदाश्च मीमांसा न्यायविस्तरः॥ धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश॥६०॥ सांख्ययोगः पाशु
पतं वेदा वै पंचरात्रकं॥ कृतांतं पंचकं ह्येतद् गायत्री च शिरस्तथा॥६१॥ दुर्गा विद्या च गांधारी पांतु त्वां शांतिदा च ते॥ लवणेक्षुसुरासर्पिर्दधिदुग्धज
लान्वयः॥६२॥ चत्वारः सागराः पांतु तीर्थानि विविधानि च॥ पुष्करश्च प्रयागश्च प्रभासो नैमिषः परः॥६३॥ गयाशीर्षं ब्रह्मशिरस्तीर्थमुत्तरमानसं॥
कालोदको नंदिकुंडं तीर्थं पंचनदस्तथा॥६४॥ भृगुतीर्थं प्रभासं च तथा चामरकंटकं॥ जंबुमार्गश्च विपुलः कपिलस्याश्रमस्तथा॥६५॥ गंगाद्वारं कुशा
वर्तो विंध्यकं नीलपर्वतः॥ वराहपर्वतश्चैव तीर्थं कनखलं तथा॥६६॥ कालंजरश्च केदारो रुद्रकोटिस्तथैव च॥ वाराणसी महातीर्थं बदर्याश्रम एव च॥
६७॥ द्वारका श्रीगिरिस्तीर्थं तीर्थं च पुरुषोत्तमः॥ शालग्रामोथ वाराहः सिंधुसागरसंगमः॥६८॥ फल्गुतीर्थं बिंदुसरः करवीराश्रमस्तथा॥ नद्यो
गंगा सरस्वत्यः शतद्रुर्गंडकी तथा॥६९॥ अच्छोदा च विपाशा च वितस्ता देविकानदी॥ कावेरी वरुणा चैव निश्चिरा गोमती नदी॥७०॥ पारा चर्मण्वती
रूपा मंदाकिनी महानदी॥ तापी पयोष्णी वेणी च गौरी वैतरणी तथा॥७१॥ गोदावरी भीमरथी तुंगभद्रा प्रणी तया॥ चतुर्भागा शिवा गौरी अभिषिंचं
तु पांतु च॥७२॥ इत्याग्नेये अभिषेकमंत्राः॥ पुष्कर उवाच॥ सोभिषिक्तः सहामात्यो जयेच्छत्रुं नृपोत्तमः॥ राज्ञा सेनापतिः कार्यो ब्राह्मणः क्ष
त्रियोथवा॥१॥ कुलीनो नीतिशास्त्रज्ञः प्रतीहारश्च नीतिवित्॥ दूतश्च प्रियवादी स्यादक्षीणोतिबलान्वितः॥२॥ तांबूलधारी ना स्त्री वा भक्तः क्लेश
सहः प्रियः॥ सांधिविग्रहिकः कार्यः षाड्गुण्यादिविशारदः॥३॥ खड्गधारी रक्षकः स्यात्सारथिः स्याद्बलादिवित्॥ सूदध्यक्षो हितोर्थसो महानसगतो
हितः॥४॥ सभासदस्तु धर्मज्ञो लेखकोक्षरविद्धितः॥ आह्वानकालज्ञाः स्युर्हिता दौवारिका जनाः॥५॥ रत्नादिज्ञो धनाध्यक्ष अर्थद्वारे हितो नरः॥ स्या
दायुर्वेदविद्वैद्यो गजाध्यक्षोथ हस्तिवित्॥६॥ जितश्रमो गजारोहो हयाध्यक्षो हयादिवित्॥ दुर्गाध्यक्षो हितो धीमान् स्थपतिर्वास्तुवेदवित्॥७॥
अस्त्राचार्यो नियुद्धे च कुशलो नृपतेर्हितः॥ वृद्धश्चांतःपुराध्यक्षः पंचाशद्वार्षिकाः स्त्रियः॥८॥ सप्तत्यब्दास्तु पुरुषाश्चरेयुः सर्वकर्मसु॥ जाग्रत्स्या
दायुधागारे ज्ञात्वा वृत्तिर्विधीयते॥९॥ उत्तमाधममध्यानि बुध्वा कर्माणि पार्थिवः॥ उत्तमाधममध्यानि पुरुषाणि नियोजयेत्॥१०॥ जयेच्छुः पृथिवीं रा
जा सहायान्नानयेद्धितान्॥ धर्मिष्ठान्धर्मकार्येषु शूरान्संग्रामकर्मसु॥११॥ निपुणानर्थकृत्येषु सर्वत्र च तथा शुचीन्॥ स्त्रीषु षंढान्नियुंजीत तीक्ष्णान्

दारुणकर्मसु॥१२॥ यो यत्र विदितो राज्ञा शुचित्वेन तु तं नरं॥ धर्मे चार्थे च कामे च नियुंजीताधमेधमान्॥१३॥ राजा यथार्हं कुर्याच्च उपधाभिः परीक्षितान्॥
समंत्री तो यथान्यायात्कुर्याद्धस्तिवनेचरान्॥१४॥ तत्पदान्वेषणे यत्तानध्यक्षांस्तत्र कारयेत्॥ यस्मिन् कर्मणि कौशल्यं यस्य तस्मिन्नियोजयेत्॥१५॥ पि
तृपैतामहान्भृत्यान् सर्वकर्मसु योजयेत्॥ विना दायादकृत्येषु तत्र ते हि समा मताः॥१६॥ परराजगृहात्प्राप्तान् जनान्संश्रयकाम्यया॥ दुष्टानप्यथवादुष्टान्
संश्रयेत प्रयत्नतः॥१७॥ दुष्टं ज्ञात्वा विश्वसेन्न तद्वृत्तिं वर्तयेद्वशे॥ देशांतरगतान्प्राप्य चारैर्ज्ञात्वा हि पूजयेत्॥१८॥ शत्रवोग्निर्विषं सर्पो निस्त्रिंशमपि चैकतः॥ भृ
त्या विशिष्टा विज्ञेयाः कुभृत्याश्च तथैकतः॥१९॥ चारचक्षुर्भवेद्राजा नियुंजीत सदा चरान्॥ जनस्याविदितान्सौम्यांस्तथाज्ञातान्परस्परं॥२०॥ वणिजो मंत्रकुश
लाः सांवत्सरचिकित्सकान्॥ तथा प्रव्रजिताकारान् बलाबलविवेकिनः॥२१॥ नैकस्य राजा श्रद्दध्याच्छ्रद्दध्याद्बहुवाक्यतः॥ रागापरागौ भृत्यानां जनस्य च गुणा
गुणान्॥ शुभानामशुभानां च ज्ञानं कुर्याद्वशाय वा॥ अनुरागकरं कर्म चरेज्जह्याद्विरागजं॥२२॥ जनानुरागया लक्ष्म्या राजा स्याज्जनरंजनात्॥ इत्याग्नेये महा
संपत्तिः॥ पुष्कर उवाच॥ भृत्यः कुर्यादनुज्ञां हि शिष्यवत्सत्क्रियः पतेः॥ न क्षिपेद्वचनं राज्ञो अनुकूलं प्रियं वदेत्॥१॥ रहोगतस्य वक्तव्यमप्रियं यद्धितं भवेत्
न नियुक्तं हरेद्वित्तं नोपेक्षेतास्य मानकं॥२॥ राज्ञश्च न तथा कार्यं वेशभाषाविचेष्टितं॥ अंतःपुरचराध्यक्षैर्वैरिभृतैर्निराकृतैः॥३॥ संसर्गं न व्रजेद्भृत्यो राज्ञो गुह्यं च गोप
येत्॥ प्रदर्श्य कौशलं किंचिद्राजानं तु विशेषयेत्॥४॥ राज्ञा यच्छ्रावितं गुह्यं न तल्लोके प्रकाशयेत्॥ आज्ञाप्यमाने वान्यस्मिन् किं करोमीति वादयेत्॥५॥ वस्त्रं रत्नमलं
कारं राज्ञा दत्तं च धारयेत्॥ नानिर्दिष्टो द्वारि विशेन्नायोग्ये भुवि राजदृक्॥६॥ जृंभां निष्ठीवनं कासं कोपं पर्यंतिकाश्रयं॥ भृकुटीं वातमुद्गारं तत्समीपे विवर्ज
येत्॥७॥ स्वगुणाख्यापने युक्त्या परानेव प्रयोजयेत्॥ शाठ्यं लौल्यं सपैशुन्यं नास्तिक्यं क्षुद्रतां तथा॥८॥ चापल्यं च परित्याज्यं नित्यं राजानुजीविना॥ श्रुतेन विद्या
शिल्पैश्च संयोज्यात्मानमात्मना॥९॥ राजसेवां ततः कुर्याद्भूतये भूतिवर्धिनीं॥ नमस्कार्याः सदा चास्य पुत्रवल्लभमंत्रिणः॥१०॥ सचिवैर्नास्ति विश्वासो राजचि
त्तप्रियं चरेत्॥ त्यजेद्विरक्तं रक्तां तु वृत्तिमीहेत राजवित्॥११॥ अपृष्टश्चास्य न ब्रूयात्कामं कुर्यात्तथापदि॥ प्रसन्नो वाक्यसंग्राही रहस्ये न वशीकृते॥ कुशला
कुशलादि परिप्रश्नं संप्रयच्छति चासनं॥ तत्कथाश्रवणाद्धृष्टो अप्रियाण्यपि नंदते॥१२॥ अल्पं दत्तं प्रगृह्णाति स्मरेत्कथांतरेष्वपि॥ इति रक्तस्य कर्तव्या सेवा
त्वरक्तं विवर्जयेत्॥१४॥ इत्याग्नेये अनुजीविवृत्तं॥ पुष्कर उवाच॥ दुर्गसंपत्तिमाख्यास्ये दुर्गदेशे वसेन्नृपः॥ वैश्यशूद्रजनप्रायोनाहार्यस्तथा परैः॥१॥
किंचिद्ब्राह्मणसंयुक्तो बहुकर्मकरस्तथा॥ अदेवमातृको भक्तजनो देशः प्रशस्यते॥२॥ परैरपीडितः पुष्पफलधान्यसमन्वितः॥ अगम्यः परचक्राणां व्यालतस्करवर्जितः॥
३॥ षण्णामेकतमं दुर्गं तत्र कृत्वा वसेद्बली॥ धनुर्दुर्गं महीदुर्गं नरदुर्गं तथैव च॥४॥ वार्क्षं चैवांबुदुर्गं च गिरिदुर्गं च भार्गव॥ सर्वोत्तमं शैलदुर्गमभेद्यं चान्यभेदनं॥५॥
पुरं तत्र च हट्टादि देवतायतनादिकं॥ अनुयंत्रायुधोपेतं सोदकं दुर्गमुत्तमं॥६॥ राजरक्षां प्रवक्ष्यामि रक्ष्यो भूपो विषादितः॥ पंचांगस्तु शिरीषः स्यान्मूत्रपिष्टो विषा

दंनः॥७॥शतार्धरीतिच्छिन्नंतुहृताविप्रश्रीनंदुलीयकं॥घोषातकीचकल्हारीब्राह्मीचित्रपटोलिका॥८॥मंडूकपर्णीवाराहीधान्यावंदकमेवच॥९॥उन्मादिनीसोम
राजीविषघ्नंरत्नमेवच॥१०॥वास्तुलक्षणसंयुक्तेवसन्दुर्गेस्वराष्ट्रजे॥प्रजाश्चपालयेद्दुष्टान्जयेद्दानंदिदापयेत्॥११॥देवद्रव्यादिहरणात्कल्पंतुनरकं
वसेत्॥देवालयानिकुर्वीतदेवपूजारतोनृपः॥१२॥सुरालयाःपालनीयाःस्थापनीयाश्चदेवताः॥मृन्मयाद्दारुजंपुण्यंदारुजादिष्टकामयं॥१३॥ऐष्टकाच्छै
लजंपुण्यंशैलजात्स्वर्णरत्नजं॥क्रीडन्सुरगृहंकुर्वन्भुक्तिमुक्तिमवाप्नुयात्॥१४॥चित्रकृद्गीतवाद्यादिप्रेक्षणीयादिदानकृत्॥तैलाज्यमधुदुग्धाद्यैःस्नाप्य
देवंदिवंव्रजेत्॥१५॥पूजयेत्पालयेद्विप्रान्द्विजस्वंनहरेन्नृपः॥सुवर्णमेकंगामेकांभूमेरप्येकमंगुलं॥१६॥हरन्नरकमाप्नोतियावदाभूतसंप्लवं॥दुराचारं
नद्विषेच्चसर्वपापेष्वपिस्थितं॥१७॥नैवास्तिब्राह्मणवधात्पापंगुरुतरंक्वचित्॥अदेवंदेवतंकुर्युःकुर्युर्देवमदैवतं॥१८॥ब्राह्मणाहिमहाभागास्तान्नमस्या
त्सदैवतु॥ब्राह्मणीरुदतीहंतिकुलंराज्यंप्रजास्तथा॥१९॥साध्वीस्त्रीणांपालनंचराजाकुर्याच्चधार्मिकः॥स्त्रियाप्रहृष्टयाभाव्यंगृहकार्यैकदक्षया॥२०॥सु
संस्कृतोपस्करयाव्ययेचामुक्तहस्तया॥यस्मैदद्यात्पितात्वेनांशुश्रूषेत्तंपतिंसदा॥२१॥मृतेभर्तरिस्वर्यायात्ब्रह्मचर्येस्थितांगना॥परवेश्मरुचिर्नस्यान्नस्यात्कल
हशालिनी॥२२॥मंडनंवर्जयेन्नारीतथाप्रोषितभर्तृका॥देवताराधनपरातिष्ठेद्भर्तृहितेरता॥२३॥धारयेन्मंगलार्थायकिंचिदाभरणादिकं॥भर्त्राग्निंयाविशे
न्नारीसापिस्वर्गमवाप्नुयात्॥२४॥श्रियःसंपूजनंकार्यंगृहसंमार्जनादिकं॥द्वादश्यांकार्तिकेविष्णुंगांसवत्सांयजेत्तथा॥२५॥सावित्र्यारक्षितोभर्तासत्याचारव्र
तेनच॥सप्तम्यांमार्गशीर्षेतुसितेभ्यर्च्यदिवाकरं॥२६॥पुत्रानाप्नोतिचस्त्रीहिनात्रकार्याविचारणा॥२७॥ इत्याग्नेयेराजधर्मे॥ पुष्करउवाच॥ग्रामस्याधिपतिं
कुर्याद्दशग्रामाधिपंनृपः॥शतग्रामाधिपंचान्यंतथैवविषयेश्वरं॥१॥तेषांभोगविभागश्चभवेत्कर्मानुरूपतः॥नित्यमेवतथाकार्यंतेषांचारैःपरीक्षणं॥२॥ग्रामे
दोषान्समुत्पन्नान्ग्रामेशःप्रशमंनयेत्॥अशक्तोदेशपालस्यसतुगत्वानिवेदयेत्॥३॥श्रुत्वापिदेशपालोपितत्रयुक्तिमुपाचरेत्॥वित्ताद्याप्नोतिराजावैविष
यानुरक्षितात्॥४॥धनवान्धर्ममाप्नोतिधनवान्काममश्नुते॥उच्छिद्यंतेविनाह्यर्थैःक्रियाग्रीष्मेसरिद्यथा॥५॥विशेषोनास्तिलोकेपतितस्याधनस्यच॥पति
तान्नतुगृह्णंतिदरिद्रोनप्रयच्छति॥६॥धनहीनस्यभार्यापिनैवस्याद्वशवर्तिनी॥राष्ट्रपीडाकरोराजानरकेवसतेचिरं॥७॥नित्यंराज्ञातथाभाव्यंगर्भिणीसहधर्मिणा॥यथा
स्वसुखमुत्सृज्यगर्भस्यसुखमावहेत्॥८॥किंयज्ञैस्तपसातस्यप्रजायस्यनरक्षिता॥अरक्षिताःप्रजायस्यनरकंतस्यमंदिरं॥९॥राजाषड्भागमादत्तेसुकृताद्दुष्कृताद
पि॥धर्माधर्मौविचक्षणात्सपापमाप्नोत्यरक्षणात्॥सुभगाविटदुर्वृत्ताराजवल्लभतस्करैः॥भक्ष्यमाणाःप्रजारक्ष्याःकायस्थैश्चविशेषतः॥११॥रक्षितातद्भयेभ्यस्तुरा
भवतिसाप्रजा॥अरक्षितासाभवतितेषामेवेहभोजनं॥१२॥दुष्टसंमर्दनंकुर्याच्छास्त्रोक्तंकरमाददेत्॥कोशेप्रवेशयेदर्धंनित्यंचार्धंद्विजेददेत्॥१३॥निधिंद्विजोर्ग
संप्राप्यगृह्णीयात्सकलंतथा॥चतुर्थमष्टमंभागंतथाषोडशमंद्विजः॥१४॥वर्णक्रमेणदद्याच्चनिधिंपात्रेतुधर्मतः॥अनृतंतुवदन्दंड्यःसुवित्तस्यांशमष्टमं॥१५॥प्रनष्ट

स्वामिकंरिक्थंराजात्र्यब्दंनिधापयेत्॥अर्वाक्त्र्यब्दाद्धरेत्स्वामीपरेणनृपतिर्हरेत्॥१६॥ममेदमितियोब्रूयात्सोनुयुक्तोयथाविधि॥संपाद्यरूपसंख्यादीन्
स्वामीतद्द्रव्यमर्हति॥१७॥बालदायादिकंरिक्थंतावद्राजानुपालयेत्॥यावत्स्यात्ससमावृत्तोयावद्वातीतशैशवः॥१८॥बालपुत्रासुचैवंस्याद्रक्षणंनि
ष्कुलासुच॥पतिव्रतासुचस्त्रीषुविधवास्वातुरासुच॥१९॥जीवंतीनांतुतासांयेतद्धरेयुःस्वबांधवाः॥तांश्छिष्याच्चौरदंडेनधार्मिकःपृथिवीपतिः॥२०॥
सर्ववर्णकृतंचौरैस्तस्मात्तंतद्ददेन्नृपः॥चौररक्षाधिकारिभ्योराजापिकृतमाप्नुयात्॥२१॥अकृतेयोकृतंब्रूयात्निःसार्योदंड्यएवसः॥नतद्राजाप्रदातव्यंगृहे
यद्गृहेहृतं॥२२॥स्वराष्ट्रपण्यादादद्याद्राजाविंशतिमंद्विज॥शुल्कांशंपरदेशाच्चक्षयव्ययप्रकाशकं॥२३॥ज्ञात्वासंकल्पयेच्छुल्कंलाभंवणिग्यथाप्नुयात्
विंशांशंलाभमादद्याद्दंडनीयस्ततोन्यथा॥२४॥स्त्रीणांप्रव्रजितानांचतरशुल्कंविवर्जयेत्॥तरेषुदासदोषेणनष्टंदासांस्तुदापयेत्॥२५॥शूकधान्येषुषड्भा
गंशिंबिधान्येतथाष्टमं॥राजावन्यार्थमादद्याद्देशकालानुरूपकं॥२६॥पंचषड्भागमादद्याद्राजापशुहिरण्ययोः॥गंधौषधिरसानांचपुष्पमूलफलस्यच॥२७
पत्रशाकतृणानांचवंशानांवैणवचर्मणां॥वैदलानांचभांडानांसर्वस्याश्ममयस्यच॥२८॥षड्भागमेवचादद्यान्मधुमांसस्यसर्पिषः॥म्रियन्नपिनचाददीतब्राह्मणे
भ्यस्तथाकरं॥२९॥यस्यराज्ञस्तुविषयेश्रोत्रियःसीदतिक्षुधा॥तस्यसीदतितद्राष्ट्रंव्याधिदुर्भिक्षतस्करैः॥३०॥श्रुतंवित्तंतुविज्ञायवृत्तिंतस्यप्रकल्पयेत्॥रक्षे
च्चसर्वतस्त्वेनंपितापुत्रमिवौरसं॥३१॥संरक्ष्यमाणोराज्ञायःकुरुतेधर्ममन्वहं॥तेनायुर्वर्धतेराज्ञोद्रविणंराष्ट्रमेवच॥३२॥कर्मकुर्युर्नरेंद्रस्यमासेनैकेनशिल्पिनः॥
भुक्तमात्रेणयेचान्येस्वशरीरोपजीविनः॥३३॥ इत्याग्नेयेराजधर्मे॥ पुष्करउवाच॥वक्ष्येंतःपुरचिंतांचधर्माद्याःपुरुषार्थकाः॥अन्योन्यरक्षयातेषांसेवा p. 275
कार्यास्त्रियानृपैः॥१॥धर्ममूलोर्थविटपस्तथाकामफलोमहान्॥त्रिवर्गपादपस्तत्ररक्षयाफलभाग्भवेत्॥२॥कामाधीनाःस्त्रियोरामतदर्थंरत्नसंग्रहः॥सेव्यास्ता
नातिसेव्याश्चभूभुजाविषयैषिणा॥३॥आहारोमैथुनंनिद्रासेव्यमानातिरुग्भवेत्॥नचाधिकारेकर्तव्याःस्त्रियःसेव्याःस्वरात्मिकाः॥४॥द्विष्टान्याचरतेयातुनाभि
नंदतितत्कथां॥ऐक्यंद्विषद्भिर्व्रजतिगर्वंवहतिचोद्धता॥५॥चुंबितामार्ष्टिवदनंदत्तंचबहुमन्यते॥स्वपित्यादौप्रसुप्तापितथापश्चाद्विबुध्यते॥६॥स्पृष्टाधुनोतिगा
त्राणिगात्रंचविरुणद्धिया॥ईषच्छृणोतिवाक्यानिप्रियाण्यपिपराङ्मुखी॥७॥नपश्यत्यग्रदत्तांगंजघनंचनिगूहते॥दृष्टेविवर्णवदनामित्रेष्वपिपराङ्मुखी॥८
तत्कामितासुचस्त्रीषुमध्यस्थेवचलक्ष्यते॥ज्ञातमंडनकालापिनकरोतिचमंडनं॥९॥यासाविरक्तातांत्यक्त्वासानुरागांस्त्रियंभजेत्॥दृष्ट्वैवहृष्टाभवतिवीक्षते
चपराङ्मुखं॥१०॥दृश्यमानातथान्यत्रदृष्टिंक्षिपतिचंचलां॥तथाप्युपावर्तयितुंनैवशक्नोत्यशेषतः॥११॥विवृणोतितथांगानिस्वस्यगुह्यानिभार्गव॥गर्हितंचाथ
वामंप्रयत्नेननिगूहति॥१२॥तद्दर्शनेचकुरुतेबालालिंगनचुंबनं॥आभाष्यमाणाभवतिसत्यवाक्यातथैवच॥१३॥स्पृष्टापुलकितैरंगैःस्वेदेनैवचभुज्यते॥करोतिचत
थाराममुलभाद्रव्ययाचनं॥१४॥ततःस्वल्पमपिप्राप्यकरोतिपरमांमुदं॥नामसंकीर्तनादेवमुदिताबहुमन्यते॥१५॥करजांकांकितान्यस्यफलानिप्रेषयत्यपि॥तत्प्रेषि

तं च हृदये विन्यस्य तथापि चादरात् ॥१६॥ आलिंगने श्वगात्राणि लिपेल्लीलामृगेन या ॥ कृतेस्त्वपि तथा दौर्गतथा लस्य विबुध्यते ॥१७॥ उरूस्पृशति चात्यर्थं स्कंधे
नं निघुंषति ॥ कपित्थचूर्णयोगेन तथा दध्रः स्रुजातता ॥ धूनं स्रगंधि भवति दार्धैः क्षिप्त्वा तथा यवैः ॥ भोज्यस्य कल्पने यं स्यात् गंधयुक्तिः प्रदर्श्यते ॥१९॥ शौचमाच
मनं वामं तथैव च विरेचनं ॥ भावना चैव पाकश्च बोधनं धूपनं तथा ॥२०॥ वसनं चैव निर्दिष्टं कर्माष्टकमिदं स्मृतं ॥ कपित्थबिल्वजंबाम्रकाशीरकपल्लवैः ॥२१॥
कृत्वोदकं तु यद्द्रव्यं शौचितं शौचनं तु तत् ॥ तेषामभावे शौचं तु मृगदर्पाभसाभवेत् ॥२२॥ नखं कुष्ठं घनं मांसी स्पृक्का शैलेयजं जलं ॥ तथैव कुंकुमं लाक्षा चंदनाग
रुनीपत्रं ॥२३॥ सरलं देवकाष्ठं च कर्पूरं कांतया सह ॥ वालुकं च दुरुष्कं च गुग्गुलुः श्रीनिवासकः ॥२४॥ सहसर्जरसेनेयं धूपद्रव्येकविंशतिः ॥ धूपद्रव्यगणादस्मा
देकविंशाद्यथेच्छया ॥२५॥ द्वे द्वे द्रव्ये समादाय सर्वभागैर्नियोजयेत् ॥ नखपिण्याकमलयैः संयोज्य मधुना तथा ॥२६॥ धूपयोगा भवंतीह यथावत् स्वेच्छया हृतामा
त्वचं जातीफलं तैलं कुंकुमं ग्रंथिपर्वकं ॥२७॥ शैलेयं तगरं क्रांता चोलं कर्पूरमेव च ॥ मांसी सुरा च कुष्ठं च स्नानद्रव्याणि निर्दिशेत् ॥२८॥ एतेभ्यस्तु समादाय द्रव्यत्रयमथेच्छ
या ॥ मृगदर्पयुतं स्नानं कार्यं कंदर्पवर्धनं ॥२९॥ त्वक्कुरानलदैस्तुल्यैर्दलिकार्धसमायुतैः ॥ स्नानमुत्पलगंधि स्यात्सतैलं कुंकुमायते ॥३०॥ जातीपुष्पसुगंधि स्यात्त
गरार्धेन योजितं ॥ सद्ध्यामकं स्याद्बकुलैस्तुल्यं गंधिमनोहरं ॥३१॥ मंजिष्ठातगरं चोलं त्वचं व्याघ्रनखं नखं ॥ गंधपत्रं च विन्यस्य गंधतैलं भवेच्छुभं ॥३२॥ तैलं निपीडि
तं राम तिलैः पुष्पाधिवासितैः ॥ वासनात्पुष्पसदृशं गंधेन तु भवेद् ध्रुवं ॥३३॥ एलालवंगकंकोलजातीफलनिशाकराः ॥ जातीपत्रिकया सार्धं स्वतंत्रा मुखवासकाः ॥
३४॥ कर्पूरं कुंकुमं कांतं मृगदर्पं करेणुकं ॥ कंकोलैलालवंगं च जातीकोशकमेव च ॥३५॥ त्वक्पत्रं त्रुटिमुस्तौ च लता कस्तूरिकं तथा ॥ कटकानि लवंगस्य फलेपत्रे च
जातितः ॥३६॥ कटुकं च फलं राम कार्षिकानुपकल्पयेत् ॥ तच्चूर्णे खदिरसारं दद्यात्तुर्यं तु नामितं ॥३७॥ सहकाररसेनास्मात् कर्तव्या गुटिकाः शुभाः ॥ मुखवासस्ता
स्सुगंधास्ता मुखरोगविनाशकाः ॥३८॥ पूगं प्रक्षालितं सम्यक् पंचपल्लववारिणा ॥ तस्मात् गुटिकाद्रव्यैर्वासितं मुखवासकं ॥३९॥ कटुकं दंतकाष्ठं च गोमूत्रे वासि
तं त्र्यहं ॥ कृतं च पूगवद्राम मुखसौगंधिकारकं ॥४०॥ त्वक्पथ्ययोः समावंशौ शशिभागार्धसंयुतौ ॥ नागवल्लीसमो भाति मुखवासो मनोहरः ॥४१॥ एवं कुर्यात्सदा स्त्री
णां रक्षणं पृथिवीपतिः ॥ न चासां विश्वसेज्जातु पुत्रमातुर्विशेषतः ॥४२॥ न स्वपेत्स्त्रीगृहे रात्रौ विश्वासं कृत्रिमं भवेत् ॥ इत्याग्नेये स्त्रीरक्षादिकामशास्त्रं ॥
पुष्कर उवाच ॥ राजपुत्रस्य रक्षा च कर्तव्या पृथिवीक्षिता ॥ धर्मार्थकामशास्त्राणि धनुर्वेदं च शिक्षयेत् ॥ शिल्पानि शिक्षयेच्चैमाप्तैर्मिथ्याप्रियंवदैः ॥ शरीररक्षा
व्याजेनरक्षिणोस्य नियोजयेत् ॥२॥ न चास्य संगो दातव्यः क्रुद्धलुब्धविमानितैः ॥ अशक्यं च गुणाधानं कर्तुं तं बंधयेत्सुखैः ॥३॥ अधिकारेषु सर्वेषु विनीतं विनियो
जयेत् ॥ मृगयां पानमक्षांश्च राज्यनाशांस्त्यजेन्नृपः ॥४॥ दिवास्वप्नं वृथाटनं वाक्पारुष्यं विवर्जयेत् ॥ निंदां च दंडपारुष्यमर्थदूषणमुत्सृजेत् ॥५॥ आकराणां समुच्छे
दो दुर्गादीनामसत्क्रिया ॥ अर्थानां दूषणं प्रोक्तं विप्रकीर्णत्वमेव च ॥६॥ अदेशकाले यद्दानमपात्रे दानमेव च ॥ अर्थेषु दूषणं प्रोक्तमसत्कर्मप्रवर्तनं ॥७॥ कामं क्रोधं मदं

DR BHAU DAJI MEMORIAL

मानं लोभं दर्पं च वर्जयेत् ॥ निंदां च दंडपातं ततो भृत्यजयं कृत्वा पौरजानपदं जयेत् ॥८॥ जयेद्बाह्यानरीन्पश्चाद्बाह्याश्च त्रिविधारयः ॥ गुरवस्ते यथापूर्वं कुल्यानंतरकृत्रिमाः ॥
९॥ पितृपैतामहं मित्रं सामंतं च तथा रिपोः ॥ कृत्रिमं च महाभाग मित्रं त्रिविधमुच्यते ॥१०॥ स्वाम्यमात्यं जनपदा दुर्गं दंडस्तथैव च ॥ कोशो मित्रं च धर्मज्ञ सप्तांगं राज्यमु
च्यते ॥११॥ मूलं स्वामी स वै रक्ष्यः तस्माद्राज्यं विशेषतः ॥ राज्यांगद्रोहिणं हन्यात्काले तीक्ष्णो मृदुर्भवेत् ॥१२॥ एवं लोकद्वयं राज्ञो भृत्यैर्हासं विवर्जयेत् ॥ भृत्यापरिभ
वंतीह नृपं हर्षणसत्कथं ॥१३॥ लोकसंग्रहणार्थाय मृतकव्यसनो भवेत् ॥ स्मितपूर्वाभिभाषी स्याल्लोकानां रंजनं भवेत् ॥१४॥ दीर्घसूत्रस्य नृपतेः कर्महानिर्भवेद् ध्रुवं ॥
रागे दर्पे च माने च द्रोहे पापे च कर्मणि ॥१५॥ अप्रिये चैव वक्तव्ये दीर्घसूत्रः प्रशस्यते ॥ गुप्तमंत्रो भवेद्राजा आपदो गुप्तमंत्रतः ॥१६॥ ज्ञायते हि कृतं कर्म नारब्धं तस्य राजकं
आकारैरिंगितैर्गत्या चेष्टया भाषितेन च ॥१७॥ नेत्रवक्त्रविकाराभ्यां गृह्यतेंतर्गतं मनः ॥ नैकस्तु मंत्रयेन्मंत्रं न राजा बहुभिः सह ॥१८॥ बहुभिर्मंत्रयेत्कामं राजा मंत्रान् पृथ
क् पृथक् ॥ मंत्रिणामपि नो कुर्यान्मंत्री मंत्रप्रकाशनं ॥१९॥ क्वापि कस्यापि विश्वासो भवतीह सदा नृणां ॥ निश्चयस्य तथा मंत्रे कार्य एकेन सूरिणा ॥२०॥ नश्येद्विनयी
राजा राज्यं च विनयी लभेत् ॥ त्रैविद्येभ्यस्त्रयीं विद्यां दंडनीतिं च शाश्वतीं ॥२१॥ आन्वीक्षिकीं चार्थविद्यां वार्तारंभांश्च लोकतः ॥ जितेंद्रियो हि शक्नोति वशे स्थापयि
तुं प्रजाः ॥२२॥ पूज्या देवद्विजाः सर्वे दद्याद्दानानि तेषु च ॥ द्विजे दानं चाक्षयो यं निधिः कैश्चिन्न नाश्यते ॥२३॥ संग्रामेष्वनिवर्तित्वं प्रजानां परिपालनं ॥ दानानि ब्राह्मणानां च
राज्ञेति श्रेयसं परं ॥२४॥ कृपणानाथवृद्धानां विधवानां च योषितां ॥ योगक्षेमं च वृत्तिं च तथैव परिकल्पयेत् ॥२५॥ वर्णाश्रमव्यवस्थानात्कार्यं तापसपूजनं ॥ न विश्वसे
च्च सर्वत्र तापसेषु च विश्वसेत् ॥२६॥ विश्वासयेच्चापि परं तत्त्वभूतेन हेतुना ॥ बकवच्चिंतयेदर्थं सिंहवच्च पराक्रमेत् ॥२७॥ वृकवच्चावलुंपेत शशवच्च विनिष्पतेत् ॥ दृ
ढप्रहारी च भवेत्तथा सूकरवन्नृपः ॥२८॥ चित्राकारश्च शिखिवद् दृढभक्तिस्तथा श्ववत् ॥ भवेच्च मधुराभाषी तथा कोकिलवन्नृपः ॥२९॥ काकशंकी भवेन्नित्यं न ज्ञातां वसतिं व
सेत् ॥ नापरीक्षितपूर्वं च भोजनं शयनं स्पृशेत् ॥३०॥ नाविज्ञातां स्त्रियं गच्छेन्नाज्ञातां नावमारुहेत् ॥ राष्ट्रकर्षी भ्रश्यते च राज्यार्थाच्चैव जीवितात् ॥३१॥ भृतो वत्सो जातबलः कर्म
योग्यो यथा भवेत् ॥ तथा राष्ट्रं महाभाग भृतं कर्मसहं भवेत् ॥३२॥ सर्वं कर्मेदमायत्तं विधाने दैवपौरुषे ॥ तयोर्दैवमचिंत्यं हि पौरुषे विद्यते क्रिया ॥३३॥ जनानुरागप्रभवा
राज्ञो राज्यमहीश्रियः ॥३४॥ इत्याग्नेये राजधर्माः ॥ पुष्कर उवाच ॥ स्वमेव कर्म दैवाख्यं विद्धि देहांतरार्जितं ॥ तस्मात्पौरुषमेवेह श्रेष्ठमाहुर्मनीषिणः ॥१॥
प्रतिकूलं तथा दैवं पौरुषेण विहन्यते ॥ सात्विकात्कर्मणः पूर्वात्सिद्धिः स्यात्पौरुषं विना ॥२॥ पौरुषं दैवसंपत्त्या काले फलति भार्गव ॥ दैवं पुरुषकारश्च द्वयं पुंसः फलाव
हं ॥३॥ कृषेर्वृष्टिसमायोगात्काले स्युः फलसिद्धयः ॥ सधर्मं पौरुषं कुर्यान्नालसो न च दैववान् ॥४॥ सामादिभिरुपायैस्तु सर्वे सिध्यंत्युपक्रमाः ॥ साम चोपप्रदानं च भे
दं दंडस्तथापरौ ॥५॥ मायोपेक्षेंद्रजालाश्च उपायाः सप्त तान् शृणु ॥ द्विविधं कथितं साम तथ्यं चातथ्यमेव च ॥६॥ तत्राप्यतथ्यं साधूनामाक्रोशायैव जायते ॥ महाकुलीना
ह्यृजवो धर्मनित्या जितेंद्रियाः ॥७॥ सामसाध्या अतथ्यैश्च गृह्यंते राक्षसा अपि ॥ तथा तदुपकाराणां कृतानां चैव वर्णनं ॥८॥ परस्परं तु ये द्विष्टाः क्रुद्धा भीतावमानिताः ॥ तेषां

93

भेदंप्रयुंजीतपरमंदर्शयेद्भयं॥९॥आत्मीयान्दर्शयेद्दोषान्येनदोषेणभिद्यते॥परास्तेनैवतेभेद्यारक्षोवैज्ञातिभेदकः॥१०॥सामेनकोपोराज्ञस्तुमंत्रामात्यात्मजादिकाः
अंतःकोपश्चोपसाम्यःकुर्वन्शत्रोश्चतंजयेत्॥११॥उपायश्रेष्ठंदानंस्याद्दानादुभयलोकभाक्॥नासोस्तिनामदानेनवशगोयोनजायते॥१२॥दानवानेवशक्नोति
संहतान्भेदितुंपरान्॥त्रयीसाध्यंसाधयितुंदंडेनचसकृत्सदा॥१३॥दंडेसर्वंस्थितोदंडोनाशयेद्दुःप्रणीतकः॥अदंड्यान्दंडयंश्चैवदंड्यान्राजाप्यदंडयन्॥१४
देवदैत्योरगनराःसिद्धाभूताःपतत्रिणः॥उत्क्रमेयुःस्वमर्यादांयदिदंडोनपालयेत्॥१५॥यस्माद्दांतान्दमयतिदंड्यान्दंडयत्यपि॥दमनाद्दंडनाच्चैवतस्माद्दंडंविदुर्बु
धाः॥तेजसादुर्निरीक्ष्योहिराजाभास्करवत्ततः॥लोकप्रसादंगच्छेतदर्शनाच्चंद्रवत्ततः॥१७॥जगद्व्याप्नोतिवैचारैस्ततोराजासमीरणः॥दोषनिग्रहकारित्वाद्राजावैप
स्वतःप्रभुः॥१८॥यदादहतिदुर्बुद्धिंतदाभवतिपावकः॥यदादानंद्विजादिभ्योदद्यात्तस्माद्धनेश्वरः॥१९॥धनधाराप्रवर्षित्वाद्देवादौवरुणःस्मृतः॥क्षमयाधारयंल्लोका
न्पार्थिवःपार्थिवोभवेत्॥२०॥उत्साहमंत्रशक्त्याद्यैरक्षेयस्माद्धरिस्ततः॥२१॥ इत्याग्नेयेसामाद्युपायः॥ पुष्करउवाच॥ दंडप्रणयनंवक्ष्येयेनराज्ञःपरागतिः॥ p. 278
त्रियवंकृष्णलंविद्धिमाषस्तत्पंचकंभवेत्॥१॥कृष्णलानांतथाषष्ट्याकर्षार्धंरामकीर्तितं॥सुवर्णश्चविनिर्दिष्टोरामषोडशमाषकः॥२॥निष्कःसुवर्णाश्चत्वारोधरणंदश
भिस्तुतैः॥ताम्ररौप्यसुवर्णानांमानमेतत्प्रकीर्तितं॥३॥ताम्रिकैःकार्षिकारामप्रोक्तःकार्षापणोबुधैः॥पणानांद्वेशतेसार्द्धेप्रथमःसाहसःस्मृतः॥मध्यमःपंचविज्ञेयः
सहस्रमपिचोत्तमः॥चौरैरमुषितोयस्तुमुषितोस्मीतिभाषते॥५॥तत्प्रदातरिभूपालेसदंड्यस्तावदेवतु॥योयावन्निह्नुवीतार्थंमिथ्यावायोवदेत्ततं॥६॥तौनृपेणह्यधर्म
ज्ञौदाप्यौतद्द्विगुणंदमं॥कूटसाक्ष्यंतुकुर्वाणांस्त्रीन्वर्णांश्चप्रवासयेत्॥७॥विवासयेद्ब्राह्मणंतुभोज्योनाधिर्नहीयते॥निक्षेपस्यसमंमूल्यंदंड्योनिक्षेपभुक्तथा॥८
वस्त्रादिकस्यधर्मज्ञतथाधर्मोनहीयते॥योनिक्षेपंघातयतियश्चानिक्षिप्ययाचते॥९॥तावुभौचोरवच्छास्यौदंड्योवाद्विगुणंदमं॥अज्ञानाद्यःपुमान्कुर्यात्परद्र
व्यस्यविक्रयं॥१०॥निर्दोषोज्ञानपूर्वंतुचोरवद्दंडमर्हति॥मूल्यमादाययःशिल्पंनदद्याद्दंड्यएवसः॥११॥प्रतिश्रुत्याप्रदातारंसुवर्णंदंडयेन्नृपः॥भृतिंगृह्यनकुर्या
द्यःकर्माष्टौकृष्णलोदमः॥१२॥अकालेतुत्यजन्भृत्यंदंड्यःस्यात्तावदेवतु॥क्रीत्वाविक्रीयवाकिंचिद्यस्येहानुशयोभवेत्॥१३॥सोंतर्दशाहात्तत्स्वामीदद्याच्चैवा
ददीतवा॥परेणतुदशाहस्यनदद्यान्नैवदापयेत्॥१४॥आददद्धिददच्चैवराज्ञादंड्यःशतानिषट्॥वरोदोषानविख्याप्ययःकन्यांवरयेदिह॥१५॥दत्वाप्यदीत्वासा
तस्यराज्ञादंड्यःशतद्वयं॥प्रदायकन्यांयोन्यस्मैपुनस्तांसंप्रयच्छति॥१६॥दंडःकार्योनरेंद्रेणतस्याप्युत्तमसाहसः॥सत्यंकारेणवाचावायुक्तंपुण्यमसंशयं॥१७॥लुब्धो
न्यत्रविक्रेताषट्शतंदंडमर्हति॥दद्याद्धेनुंनयःपालोगृहीत्वाभक्तवेतनं॥१८॥सतुदंड्यःशतंराज्ञासुवर्णंवाप्यरक्षिता॥धनुःशतंपरीणाहोग्रामस्यतुसमंततः॥१९॥
द्विगुणंत्रिगुणंवापिनगरस्यचकल्पयेत्॥वृतिंतत्रप्रकुर्वीतयामुष्ट्रोनावलोकयेत्॥२०॥तत्रापरिवृतेधान्येहिंसितेनैवदंडनं॥गृहंतडागमारामंक्षेत्रंवाभाषयाहरन्॥२१
शतानिपंचदंड्यःस्यादज्ञानाद्द्विशतोदमः॥मर्यादाभेदकाःसर्वेदंड्याःप्रथमसाहसं॥२२॥शतंब्राह्मणमाक्रुश्यक्षत्रियोदंडमर्हति॥वैश्यश्चद्विशतंराजन्शूद्रश्चवधमर्ह

ति॥२३॥पंचाशद्ब्राह्मणोदंड्यःक्षत्रियस्याभिशंसने॥वैश्येप्यर्धपंचाशच्छूद्रेद्वादशकोमतः॥२४॥क्षत्रियस्याप्नुयाद्वैश्यःसाहसंपूर्वमेवतु॥शूद्रःक्षत्रि
यमाक्रुश्यजिह्वाच्छेदनमाप्नुयात्॥२५॥धर्मोपदेशंविप्राणांशूद्रःकुर्वंश्चदंडभाक्॥श्रुतदेशादिवितथीदंड्योद्विगुणसाहसं॥२६॥उत्तमःसाहसस्त
स्ययःपापैरुत्तमान्क्षिपेत्॥प्रमादाद्यैर्मयाप्रीत्यादंडार्धमर्हति॥२७॥मातरंपितरंज्येष्ठंभ्रातरंश्वशुरंगुरुं॥आक्षारयं[illegible]तंदंड्यःपंथानंचाददद्गुरोः॥२८
एकजातिर्द्विजातिंतुयेनांगेनापराध्नुयात्॥तदेवच्छेदयेत्तस्यक्षिप्रमेवाविचारयन्॥२९॥अवनिष्ठीवतोदर्पाद्द्वावोष्ठौच्छेदयेन्नृपः॥अवमूत्रयतोमेढ्रमवशर्ध
यतोगुदं॥३०॥उत्कृष्टासनसंस्थस्यनीचस्याधोनिकृंतनं॥योयदंगंचरुजयेत्तदंगंतस्यकर्तयेत्॥३१॥अर्धपादकराःकार्यागोगजाश्वोष्ट्रघातकाः॥वृक्षं
तुसफलंछित्वासुवर्णंदंडमर्हति॥३२॥द्विगुणंदापयेच्छिन्नेपथिसीम्निजलाशये॥द्रव्याणियोहरेद्यस्यज्ञानतोऽज्ञानतोपिवा॥३३॥सतस्योत्पाद्यतुष्टिंराज्ञेद
द्यात्ततोदमं॥यस्तुरज्जुंघटंकूपाद्धरेच्छिंद्याच्चतांप्रपां॥३४॥सदंडंप्राप्नुयान्माषंदंड्यःस्यात्प्राणिताडने॥धान्यंदशभ्यःकुंभेभ्योहरतोभ्यधिकंवधः॥३५॥शे
षेप्येकादशगुणंतस्यदंडंप्रकल्पयेत्॥सुवर्णरजतादीनांनृस्त्रीणांहरणेवधः॥३६॥येनयेनयथांगेनस्तेनोनृषुविचेष्टते॥तत्तदेवहरेदस्यप्रत्यादेशायपार्थिवः॥३७
ब्राह्मणःशाकधान्यादिअल्पंगृह्णन्नदोषभाक्॥गोदेवार्थंहरंश्चापिहन्याद्दुष्टंवधोद्यतं॥३८॥गृहक्षेत्रापहर्तारंतथापत्न्यभिगामिनं॥अग्निदंगरदंहन्यात्तथा
चाभ्युद्यतायुधं॥३९॥राजागोभ्यभिचाराभ्यांहन्याच्चैवाततायिनः॥परस्त्रियंनभाषेतप्रतिषिद्धोविशेन्नहि॥४०॥अदंड्यास्त्रीभवेद्राज्ञावरयंतीपतिंस्वयं॥
उत्तमांसेवमानःस्त्रीमजघन्योवधमर्हति॥४१॥भर्तारंलंघयेद्यातांश्वभिःसंखादयेत्स्त्रियं॥सवर्णदूषितांकुर्यात्पिंडमात्रोपजीविनीं॥४२॥दंज्यासाद्दूषितानारी
मुंडनंसमवाप्नुयात्॥वैश्यागमेतुविप्रस्यक्षत्रियस्यांत्यजागमे॥४३॥क्षत्रियःप्रथमंवैश्योदंड्यःशूद्रागमेभवेत्॥गृहीत्वावेतनंवेश्यालोभादन्यत्रगच्छति
४४॥वेतनंद्विगुणंदद्याद्दंडंचद्विगुणंतथा॥भार्यापुत्राश्चदासाश्चशिष्योभ्राताचसोदरः॥४५॥लाधराधास्तड्यास्युरज्ज्वावेणुदलेनवा॥पृष्ठेनमस्तकेहन्याच्चौर
स्याप्नोतिकिल्बिषं॥४६॥रक्षार्थाधिकृतैर्यैस्तुप्रजाभ्योर्थोविलुप्यते॥तेषांसर्वस्वमादायराजाकुर्यात्प्रवासनं॥४७॥येनियुक्ताःस्वकार्येषुहन्युःकार्याणिकर्मिणां॥
निर्घृणाःक्रूरमनसस्तान्निःस्वान्कारयेन्नृपः॥४८॥अमात्यःप्राड्विवाकोवायःकुर्यात्कार्यमन्यथा॥तस्यसर्वस्वमादायतंराजाविप्रवासयेत्॥४९॥गुरुतल्पेभगः
कार्यःसुरापानेसुराध्वजः॥स्तेयेतुश्वपदंविद्याद्ब्रह्महत्याशिरःपुमान्॥५०॥शूद्रादीन्घातयेद्राजापापान्विप्रान्प्रवासयेत्॥महापातकिनांवित्तंवरुणा
योपपादयेत्॥५१॥ग्रामेष्वपिचयेकेचिच्चौराणांभक्तदायकाः॥भांडारकाशकाश्चैवसर्वांस्तानपिघातयेत्॥५२॥राष्ट्रेषुराष्ट्राधिकृतान्सामंतांपापिनाहनन्
संधिंछित्वातुयेचौर्यंरात्रौकुर्वंतितस्कराः॥५३॥तेषांछित्वानृपोहस्तौतीक्ष्णशूलेनिवेशयेत्॥तडागदेवतागारभेदकान्घातयेन्नृपः॥५४॥समुत्सृजेद्राजमार्गेय
स्त्वमेध्यमनापदि॥सहिकार्षापणंदंड्यस्तममेध्यंचशोधयेत्॥५५॥प्रतिमासंक्रमभिदोदंड्याःपंचशतानिते॥समैश्चविषमंयोवाचरतेमूल्यतोपिवा॥५६॥द्व

ध्यमादाय वणिजामनर्घेणो वरुंधनं ॥ राजा पृथक् पृथक् कुर्याद्दंडमुत्तमसाहसं ॥५७॥ द्रव्याणां दूषको यश्च प्रतिच्छकविक्रयी ॥ मध्यमं प्राप्नुयाद्दंडं कूटकर्ता तथोत्तमं
५८॥ कलहापहृतं देयं दंडश्च द्विगुणस्ततः ॥ अभक्ष्यभक्षे विप्रे वा शूद्रे कृष्णलो दमः ॥५९॥ तुलाशासनकर्ता च कूटकृन्नाणकस्य च ॥ एभिश्च व्यवहर्ता यः स दंड्यो
दममुत्तमं ॥६०॥ विषाग्निदां पतिगुरुविप्रापत्यप्रमापणीं ॥ विकर्णकरनासोष्ठीं कृत्वा गोभिः प्रवासयेत् ॥६१॥ क्षेत्रवेश्मग्रामवनविदारकास्तथा नराः ॥ राजपत्न्य
भिगामी च दग्धव्यास्तु कटाग्निना ॥६२॥ ऊनं वाप्यधिकं वापि लिखेद्यो राजशासनं ॥ पारजायिकचौरौ च मुंचतो दंड उत्तमः ॥६३॥ राजयानासनारोढुर्दंड उत्त
मसाहसः ॥ यो मन्येताजितोऽस्मीति न्यायेनापि पराजितः ॥६४॥ तमायांतं पराजित्य दंडयेद्द्विगुणं दमं ॥ आह्वानकारी वध्यः स्यादनाहूतमथाह्वयन् ॥६५॥ दांडि
कस्य च यो हस्तादभिमुक्तः पलायते ॥ हीनः पुरुषकारेण तद्दद्याद्दांडिको धनं ॥६६॥ इत्याग्नेये दंडप्रणयनं ॥ पुष्कर उवाच ॥ यदा मन्येत नृपती राष्ट्रे
न बलीयसा पार्ष्णिग्राहोऽभिभूतो मे तदा यात्रां प्रयोजयेत् ॥१॥ पुष्टा योधा भृता भृत्याः संभूतं च बलं मम ॥ मूलरक्षासमर्थोऽस्मि चैत्रे मार्गशिरे व्रजेत् ॥२॥ रा
ज्ञो वा व्यसने यायात् देवाद्यैः पीडितं पुरं ॥ भूकंपो यां दिशं याति यां च केतुर्व्यधूपयेत् ॥३॥ विद्विष्टनायकं सैन्यं संभूतांतः प्रकोपनं ॥ शरीरस्फुरणे धन्ये तथा स्व
प्नदर्शने ॥४॥ निमित्ते शकुने धन्ये जाते शत्रुपुरं व्रजेत् ॥ पदातिनागबहुलां सेनां प्रावृषि योजयेत् ॥५॥ हेमंते शिशिरे चैव रथवाजिसमाकुलां ॥ चतुरंग
बलोपेतां वसंते वा शरद्यथ ॥६॥ सेना पदातिबहुला शत्रून् जयति सर्वदा ॥ अंगदक्षिणभागे तु शस्तं प्रस्फुरणं भवेत् ॥७॥ न शस्तं तु तथा वामे पृष्ठस्य हृदय
स्य च ॥ लांछनं पिटकं चैव ज्ञेयं प्रस्फुरणं तथा ॥ विपर्ययेणाभिहितं सव्ये स्त्रीणां शुभं भवेत् ॥८॥ इत्याग्नेये यात्रायां ॥ पुष्कर उवाच ॥ स्वप्नं शुभा
शुभं वक्ष्ये दुःस्वप्नहरणं तथा ॥ नाभिं विनान्यत्र गात्रे तृणवृक्षसमुद्भवः ॥१॥ चूर्णनं मूर्ध्नि कांस्यानां मुंडनं नग्नता तथा ॥ मलिनांबरधारित्वमभ्यंगः पंकदिग्धता ॥
२॥ उच्चात्प्रपतनं चैव विवाहो गीतमेव च ॥ तंत्रीवाद्यविनोदश्च दोलारोहणमेव च ॥३॥ अर्जनं पद्मलोहानां सर्पाणामथ मारणं ॥ रक्तपुष्पद्रुमाणां च चंडालस्य
तथैव च ॥४॥ वराहश्वखरोष्ट्राणां तथा चारोहणक्रिया ॥ भक्षणं पक्षिमांसानां तैलस्य कृसरस्य च ॥५॥ मातुः प्रवेशो जठरे चितारोहणमेव च ॥ शक्रध्वजाभिप
तनं पतनं शशिसूर्ययोः ॥६॥ दिव्यांतरिक्षभौमानामुत्पातानां च दर्शनं ॥ देवद्विजातिभूपानां गुरूणां कोप एव च ॥७॥ नर्तनं हसनं चैव विवाहो गीतमेव च
तंत्रीवाद्यविहीनानां वाद्यानामपि वादनं ॥८॥ स्रोतोवहावगमनं स्नानं गोमयवारिणा ॥ पंकोदकेन च तथा शीततोयेन वाप्यथ ॥९॥ आलिंगनं कुमारीणां पुरु
षाणां च मैथुनं ॥ हानिं चैव स्वगात्राणां विरेको वमनक्रिया ॥१०॥ दक्षिणाशाप्रगमनं व्याधिनाभिभवस्तथा ॥ फलानामुपहानिश्च पुष्पाणां भेदनं तथा ॥११॥ गृहाणां
चैव पतनं गृहसंमार्जनं तथा ॥ क्रीडा पिशाचक्रव्यादवानरांत्यनरैरपि ॥१२॥ परादभिभवश्चैव तस्माच्च व्यसनोद्भवः ॥ काषायवस्त्रधारित्वं तद्वत्स्त्रीभिः क्रीडनं तथा ॥
१३॥ स्नेहपानावगाहौ च रक्तमाल्यानुलेपनं ॥ इत्यधन्यानि स्वप्नानि तेषामकथनं शुभं ॥१४॥ भूयश्च स्वपनं तद्वत्कार्यं स्नानं द्विजार्चनं ॥ तिलैर्होमो हरिब्र

ह्मशिवार्कगणपूजनं ॥१५॥ तथा स्तुतिप्रपठनं पुंसूक्तादिजपस्तथा ॥ स्वप्नास्तु प्रथमे यामे संवत्सरविपाकिनः ॥१६॥ षड्भिर्मासैर्द्वितीये तु त्रिभिर्मासैस्त्रियामि
काः ॥ चतुर्थे अर्धमासेन दशाहादरुणोदये ॥१७॥ एकस्यामथ चेद्रात्रौ शुभो वा यदि वाऽशुभः ॥ पश्चाद्दृष्टस्तु यः स्वप्नस्तस्य पाकं विनिर्दिशेत् ॥१८॥ तस्मात्तु शोभने स्व
प्ने पश्चात्स्वापो न शस्यते ॥ शैलप्रासादनागाश्ववृषभारोहणं हितं ॥१९॥ द्रुमाणां श्वेतपुष्पाणां गगने च तथा द्विज ॥ द्रुमतृणोद्भवो नाभौ तथा च बहुबाहुता ॥२०॥ तथा
च बहुशीर्षत्वं पलितोद्भव एव च ॥ सुशुक्लमाल्यधारित्वं सुशुक्लांबरधारिता ॥२१॥ चंद्रार्कताराग्रहणं परिमार्जनमेव च ॥ शक्रध्वजालिंगनं च ध्वजोच्छ्रायक्रिया तथा ॥
२२॥ भूम्यंबुधीनां ग्रहणं शत्रूणां चैव विक्रिया ॥ जयो विवादे द्यूते च संग्रामे च तथा द्विज ॥२३॥ भक्षणं चार्द्रमांसानां पायसस्य च भक्षणं ॥ दर्शनं रुधिरस्यापि स्नानं वा रु
धिरेण च ॥२४॥ सुरारुधिरमद्यानां पानं क्षीरस्य वाप्यथ ॥ अस्त्रैर्विचेष्टनं भूमौ निर्मलं गगनं तथा ॥२५॥ मुखेन दोहनं शस्तं महिषीणां तथा गवां ॥ सिंहीनां हस्तिनीनां
च वडवानां तथैव च ॥२६॥ प्रसादो देवविप्रेभ्यो गुरुभ्यश्च तथा द्विज ॥ अंभसा चाभिषेकस्तु गवां शृंगस्रुतेन च ॥२७॥ चंद्राद्भ्रष्टेन वा राम ज्ञेयं राज्यप्रदं हि तत् ॥ राज्याभिषे
कश्च तथा छेदनं शिरसोऽप्यथ ॥२८॥ मरणं वह्निलाभश्च वह्निदाहो गृहादिषु ॥ लब्धिश्च राजलिंगानां तंत्रीवाद्याभिवादनं ॥२९॥ यस्तु पश्यति स्वप्नांते राजानं कुंजरं हयं
हिरण्यं वृषभं गां च कुटुंबं तस्य वर्धते ॥३०॥ वृषेभगृहशैलाग्रवृक्षारोहणरोदनं ॥ घृतविष्ठानुलेपो गम्यागम्यागमनं तथा ॥३१॥ सितवस्त्रं प्रसन्नांभः फली वृक्षो नभोऽमलं
३२॥ इत्याग्नेये स्वप्नाध्यायः ॥ पुष्कर उवाच ॥ औषधानि च युक्तानि धान्यं कृष्णमशोभनं ॥ कार्पासं तृणशुष्कं च गोमयं बंधनानि च ॥१॥ अंगारगुडसर्जौ च मुंड
भ्यक्तं च नग्नकं ॥ अयः पंकं चर्मकेशौ उन्मत्तं च नपुंसकं ॥२॥ चंडालश्वपचाद्या नरा बंधनपालकाः ॥ गर्भिणी स्त्री च वधकीः पिण्याकादीनि वै मृतं ॥३॥ तुषभस्मकपाला
स्थिभिन्नभांडमशस्तकं ॥ अशस्तो वाद्यशब्दश्च भिन्नभैरवझर्झरः ॥४॥ एहीति पुरतः शब्दः शस्यते न तु पृष्ठतः ॥ गच्छेति पश्चाच्छब्दोऽग्र्यः पुरस्तात्तु विगर्हितः ॥५॥ क्व या
सि तिष्ठ मा गच्छ किं ते तत्र गतस्य च ॥ अनिष्टशब्दा मृत्यर्थं क्रव्यादश्च ध्वजादिगः ॥६॥ स्खलनं वाहनानां च शस्त्रभंगस्तथैव च ॥ शिरोघातश्च द्वाराद्यैश्छत्रवासादिपा
तनं ॥७॥ हरिमभ्यर्च्य संस्तुत्वा स्यादमंगल्यनाशनं ॥ द्वितीयं तु ततो दृष्ट्वा विरुद्धं प्रविशेद्गृहं ॥८॥ श्वेताः सुमनसः श्रेष्ठाः पूर्णकुंभो महोत्तमः ॥ मांसं मत्स्याः स्थूलशब्दा वृ
द्ध एकः पशुस्त्वजः ॥९॥ गावस्तुरंगमा नागा देवाश्च ज्वलितोऽनलः ॥ दूर्वार्द्रगोमयं वेश्या स्वर्णरूप्यं च रत्नकं ॥१०॥ वचासिद्धार्थकौषध्यो मुद्ग आयुधखड्गकं ॥ छत्रपीठरा
जलिंगं शवं रुदितवर्जितं ॥११॥ फलं घृतं दधि पयः अक्षतादर्शमाक्षिकं ॥ शंख इक्षुः शुभं वाक्यं भक्तवादित्रगीतकं ॥१२॥ गंभीरमेघस्तनितं तडित्तुष्टिश्च मानसी ॥ ए
कतः सर्वलिंगानि मनसस्तुष्टिरेकतः ॥१३॥ इत्याग्नेये मंगल्याध्यायः ॥ पुष्कर उवाच ॥ तिष्ठेतागमने प्रश्ने पुरुषस्य शुभाशुभं ॥ निवेदयंति शकुना देशस्य नगरस्य च ॥१
सर्वपापफलोद्देशो निर्दिष्टो दैवचिंतकैः ॥ शांतः शुभफलश्चैव दैवज्ञैः समुदाहृतः ॥२॥ षट्प्रकारा विनिर्दिष्टा शकुनानां च दीप्तता ॥ वेलादिग्देशकरणैः रुतजातिविभेदतः ॥
३॥ पूर्वा पूर्वा च विज्ञेया सा तेषां बलवत्तरा ॥ दिवाचरो रात्रिचरस्तथा रात्रौ दिवाचरः ॥४॥ क्रूरेषु दीप्ता विज्ञेया ऋक्षलग्नग्रहादिषु ॥ धूपिता सा तु विज्ञेया यां गमिष्यति भास्करः ॥
५॥ यस्यां स्थितः सा ज्वलिता मुक्ता चांगारिणी मता ॥ एतास्तिस्रः स्मृता दीप्ताः पंच शांतास्तथापराः ॥६॥ दीप्तायां दिशि दिग्दीप्तिः शकुनः परिकीर्तितः ॥ ग्रामे वन्यो वने ग्राम्यः

९५

सथानिंदितपादपे॥७॥ देशैचैवाशुभेज्ञेयो देशदीप्तो द्विजोत्तम॥ क्रियादीप्तो विनिर्दिष्टः स्वजात्यनुचितक्रियः॥८॥ ऋतुदीप्तश्च कथितो भिन्नभैरवनिस्वनः
जातिदीप्तस्तथा ज्ञेयः केवलं मांसभोजनः॥९॥ दीप्ताच्छांतो विनिर्दिष्टः स्वजात्यनुचितक्रियः॥ सर्वैर्भेदैः प्रयत्नतः॥ मिश्रामिश्रो विनिर्दिष्टस्तस्य वाच्यं फला
फलं॥१०॥ गोश्वोष्ट्रगर्दभश्वानः सारिका गृहगोधिका॥ चटको मांसकर्माद्याः कथिता ग्रामवासिनः॥११॥ अजाविशुकनागेंद्राः कोलो महिषवायसौ॥ ग्राम्या
रण्या विनिर्दिष्टाः सर्वेन्ये वनगोचराः॥१२॥ मार्जारकुक्कुटौ ग्राम्यौ तौ चैव वनगोचरौ॥ तयोर्भवति विज्ञानं नित्यं वैरूप्यभेदतः॥१३॥ गोकर्णशिखिचक्राह्वखरहा
रीतवायसाः॥ कुलालकुक्कुटश्येनफेरवंजुलवानराः॥१४॥ शतघ्नचटकश्यामवासश्येनकपिंजलाः॥ तित्तिरिः शतपत्रश्च कपोतश्च तथाग्रमः(?)॥१५॥ खंजरीटकदात्यू
हभुकाशीरककुक्कुटाः॥ भारद्वाजश्च सारंग इति ज्ञेया दिवाचराः॥१६॥ वागुल्युलूककरारभक्रौंचाः शशकक्षयपाः॥ लोमाशिकाः पिंगलिकाः कथिता रात्रिगोचराः॥१७॥
हंसश्च मृगमार्जारनकुलर्क्षभुजंगमाः॥ वृकारिसिंहव्याघ्रोष्ट्रश्वसूकरकमानुषाः॥१८॥ श्वाविद्वृषभगोमायुवृकाः कोकिलसारसाः॥ तुरंगगोपीतनरागोधाश्चुभयचारिणः॥१९
रणस्थानयोः सर्वे पुरस्तात्संप्रचारिणः॥ अग्रा वर्गा विनिर्दिष्टाः पश्चान्निधनकारिणः॥२०॥ गृहगम्यो यदा वामो व्याहरेत्पुरतः स्थितः॥ नृपावमानं वदति वामः कमलभोजने॥२१
यानेतदर्शनं शस्तं सप्तनंगस्य वा पथ॥ चौरैर्मोषमथाख्याति नयतो भिन्ननिस्वनः॥२२॥ प्रयातस्याचतो शमनृगः प्राणहरो भवेत्॥ ऋक्षाखुजंबुकव्याघ्रसिंहमार्जारगर्दभाः॥२३॥
प्रतिलोमास्तथा शस्ताः खरश्चाविकृतस्वनः॥ वामः कपिंजलः श्रेष्ठस्तथा दक्षिणसंस्थितः॥२४॥ पृष्ठतो निंदितफलस्तित्तिरिस्तु न शस्यते॥ एणा वराहाः पृषता वामा भूत्वा तु दक्षि
णाः॥२५॥ भवंत्यर्थकरा नित्यं विपरीता विगर्हिताः॥ वृषाश्वजंबुकव्याघ्रसिंहमार्जारगर्दभाः॥२६॥ वांछितार्थकरा ज्ञेया दक्षिणाद्वामतो गताः॥ शिवाः श्यामाननाः छुछुः पिं
गलागृहगोधिका॥२७॥ सूकरी परपुष्टा च पुंनामानश्च वामतः॥ स्त्रीसंज्ञा भासकाकूषकपिश्रीकर्णच्छित्वराः॥२८॥ कपिश्रीकर्णपिप्पीकारवकः श्येनाश्च दक्षिणाः॥ जातिका
हिशशकोडगोधानां कीर्तनं शुभं॥२९॥ ततः संदर्शनं नेष्टं प्रतीपं वानरर्क्षयोः॥ कार्यकृद्बलिशकुनः प्रस्थितस्य च योन्वहं॥३०॥ भवेत्तस्य फलं वाच्यं तदेव दिवसे बुधैः॥ मत्ताभ
क्ष्यार्थिनो बाला वैरसक्तास्तथैव च॥३१॥ सीमांतनयताः(?) ता विज्ञेया निष्फला द्विज॥ एकद्वित्रिचतुर्भिस्तु शिवा धन्या रुतैर्भवेत्॥३२॥ पंचभिश्च तथा षड्भिरधन्या परिकीर्तिता॥
सप्तभिश्च तथा धन्या निष्फला परतो भवेत्॥३३॥ नृणां रोमांचजननी वाहनानां भयप्रदा॥ ज्वालानना सूर्यमुखी विज्ञेया भयवर्धिनी॥३४॥ प्रथमं सारंगे दृष्टे शुभे देशे शुभं
देत॥ संवत्सरं मनुष्यस्य अशुभे त्वशुभं तथा॥३५॥ यथाविधं नरः पश्येच्छारंगं प्रथमेहनि॥ आत्मनश्च तथा तेन ज्ञातव्यं वत्सरं फलं॥३६॥ इत्याग्नेये शकुनानि॥ पुष्कर उ०
विंशतियेन मार्गेण वायसावहवः पुरं॥ तेन मार्गेण कर्तुस्य पुरस्य ग्रहणं भवेत्॥१॥ सेनायां यदि वा सार्थे विविशो वायसो वदन्॥ वामो भयातुरस्त्रस्तो भयं वदति दुस्तरं॥२॥ छायांग
वाहनोपानच्छत्रवस्त्रादिकुट्टने॥ मृत्युस्तत्पूजने प्रशांतदिष्टकरणे शुभं॥३॥ प्रोषितागमकृत्काकः कुर्वन् द्वारि गतागतं॥ रक्तं दग्धं प्रदेद्द्रव्यं तस्य लब्धिं विनिर्दिशेत्॥ क्षिपन्नथ ह्रेनि
वेदकः॥४॥ न्यसेत्प्रातः पुरस्ताच्च निवेदयति बंधनं॥ पीतं द्रव्यं तथा रुक्मं रूप्यमेव तु भार्गव॥५॥ यच्चैवोपनयेद्द्रव्यं तस्य लब्धिं विनिर्दिशेत्॥ द्रव्यं वापनयेद्यत्तु तस्य हानिं विनिर्दि
शेत्॥६॥ पुरतो धनलब्धिः स्यादाममांसस्य छर्दने॥ भूलब्धिः स्यान्मृदः क्षेपे राज्यं रत्नार्पणे महत्॥७॥ यातः काकोनुकूलस्तु क्षेपः कर्णसमो भवेत्॥ नत्वर्थसाधको ज्ञेयः प्रतिकूलो

भयावहः॥८॥ संमुखेभ्येति विरुवन् यात्राघातकरो भवेत्॥ वामः काकः स्मृतो धन्यो दक्षिणोर्थविनाशकृत्॥९॥ वामेनुलोमगः श्रेष्ठो मध्यमो दक्षिणः स्मृतः॥ प्रतिलोम
गतिर्वामो गमनप्रतिषेधकृत्॥१०॥ निवेदयति यात्रार्थमभिप्रेतं गृहे गतः॥ एकाक्षिचरणस्त्वर्कं वीक्षमाणो भयावहः॥११॥ कोटरे वसमानश्च महानर्थकरो भवेत्॥ न शुभः
स्तूपरे काकः पंकांकः सतु शस्यते॥१२॥ अमेध्यपूर्णवदनः काकः सर्वार्थसाधकः॥ ज्ञेयाः पतत्रिणोन्येपि काकवद्भृगुनंदन॥१३॥ स्कंधावारापसव्यस्थाः श्वानो विप्रविना
शकाः॥ इंद्रस्थाने नरेंद्रस्य पुरेशस्य तु गोपुरे॥१४॥ अंतर्गृहे गृहेशस्य मरणाय भवेद्वृषन्॥ यस्य जिघ्रति वामांगं तस्य स्यादर्थसिद्धये॥१५॥ भयाय दक्षिणं चांगं तथा भुजमद
क्षिणं॥ यात्राघातकरो यातुर्भवेत्प्रतिमुखागतः॥१६॥ मार्गावरोधको मार्गे चौरान्वदति भार्गव॥ अलाभोस्थिमुखः पापो रज्जुं चीरमुखस्तथा॥१७॥ सोपानत्कमुखो धन्यो
मांसपूर्णमुखो मिष्टौ॥ अमंगल्यमथ द्रव्यं केशं चैवाशुभं तथा॥१८॥ अवमुत्र्याग्रतो याति यस्य तस्य भयं भवेत्॥ यस्यावमुत्र्य व्रजति शुभं देशं तथा द्रुमं॥१९॥ मंगल्यं च तथा द्र
व्यं तस्य स्यादर्थसिद्धये॥ श्ववच्च शृगालविज्ञेयास्तथैव जंबुकादयः॥२०॥ भयाय स्वामिनो ज्ञेयमनिमित्तं रुतं गवां॥ निशि चौरभयाय स्याद्विकृतं मृत्यवे तथा॥२१॥ शिवाय स्वामि
नो रात्रौ बलीवर्दो नदन् भवेत्॥ उत्सृष्टवृषभो राज्ञो विजयं संप्रयच्छति॥२२॥ अभक्ष्यं भक्षयंत्यश्च गावो दंतास्तथा स्वकान्॥ त्यक्तस्नेहाः स्ववत्सेषु गर्भक्षयकरा मताः॥२३॥ भू
मिं पादैर्विनिघ्नंत्यो दीना भीता भयावहाः॥ आर्द्रांगो हृष्टरोमा च शृंगलग्नमृदः शुभाः॥२४॥ महिष्यादिषु चाप्येतत्सर्वं वाच्यं विजानता॥ आरोहणं तथान्येन सपर्याणस्य वाजि
नः॥२५॥ जलोपवेशनं नेष्टं भूमौ च परिकीर्तितं॥ विपत्करं तुरंगस्य सुप्तं वाप्यनिमित्ततः॥२६॥ यवमोदकयोर्द्वेषस्त्वकस्माच्च न शस्यते॥ वदनाद्रुधिरोत्पत्तिर्वेपनं च न शस्यते॥
२७॥ क्रीडन् बकैः कपोतैश्च सारिकाभिर्मृतिं वदेत्॥ साश्रुनेत्रो जिह्वया च पादलेही विनष्टये॥२८॥ वामपादेन च तथा विलिखंश्च वसुंधरां॥ स्वपेद्वा वामपार्श्वेन दिवा वा न शुभप्र
दः॥२९॥ भयाय स्यात्सकृन्मूत्री माजायां नाष्टसंशयः॥ आरोहणं न चेद्द्याद्प्रतीपं वा गृहं व्रजेत्॥३०॥ यात्राविघातमाचष्टे वामपार्श्वं तथा स्पृशन्॥ हेषमाणः शत्रुयोधं पादस्पर्शी
जयावहः॥३१॥ ग्रामे व्रजति नागश्चेन्मैथुनं देशहा भवेत्॥ प्रसूता नागवनिता मत्ता चेष्टा य भूपतेः॥३२॥ आरोहणं न चेद्द्याद्प्रतीपं वा गृहं व्रजेत्॥ मदं वा वारणो जह्याद्राजघा
तकरो भवेत्॥३३॥ वामं दक्षिणपादेन पादमाक्रमते शुभः॥ दक्षिणं च तथा दंतं परिमार्ष्टि करेण च॥३४॥ वृषोश्वः कुंजरो वापि रिपुसैन्यगतोशुभः॥ खंडमेघातिवृष्ट्या तु सेना
नाशमवाप्नुयात्॥३५॥ प्रतिकूलग्रहर्क्षाभूः सत्यासंमुखमारुता॥ यात्राकाले रणे वापि छत्रादि पतनं भयं॥३६॥ हृष्टा नराश्चानुलोमा ग्रहा वा जयलक्षणं॥ काकैर्योधाभि
भवनं क्रव्याद्भिर्मंडलं क्षये॥३७॥ प्राचीपश्चिमकैशानी सौम्या प्रहुः शुभा च दिक्॥ इत्याग्नेये शकुनानि॥ पुष्कर उवाच॥ सर्वयात्रां प्रवक्ष्यामि राजधर्मसमाश्रयात्॥ अस्तं f. 286
गते नीचगते विकले रिपुराशिगे॥१॥ प्रतिलोमे च विध्वस्ते शुक्रे यात्रां विसर्जयेत्॥ प्रतिलोमे बुधे यात्रां दिक्पतौ च तथा ग्रहे॥२॥ वैधृते च व्यतीपाते नागे च शकुनौ तथा॥ चतुष्
पदे च किंस्तुघ्ने तथा यात्रां विवर्जयेत्॥३॥ विपत्तारे नैधने च प्रत्यरौ चाथ जन्मनि॥ गंडे विवर्जयेद्यात्रां रिक्तायां च तिथावपि॥४॥ उदीची च तथा प्राची तयोरैक्यं प्रकीर्तितं॥ पश्चिमा
दक्षिणा या दिक् तयोरैक्यं प्रकीर्तितं॥५॥ वाय्वग्निदिक्समुद्भूतं परिघं न तु लंघयेत्॥ आदित्यचंद्रसौरास्तु दिवसाश्च न शोभनाः॥६॥ कृत्तिकाद्यानि पूर्वेण मघाद्यानि च याम्य
तः॥ मैत्राद्यान्यपरे चाथ वासवाद्यानि चाप्युदक्॥७॥ सर्वद्वाराणि शस्तानि छायामानं वदाम्यहं॥ आदित्ये विंशतिर्ज्ञेया चंद्रे षोडश कीर्तिता॥८॥ भौमे पंचदश प्रोक्ताश्चतुर्दश

९५

तथा बुधे॥ त्रयोदश तथा जीवे भृगौ द्वादश कीर्तिताः॥ १९॥ एकादश तथा सौरे सर्वकर्मसु कीर्तिताः॥ जन्मलग्ने रिपौ चापे संमुखेन व्रजेन्नरः॥ २०॥ शकुनादौ शुभे याया
ज्जयाय हरिमास्मरन्॥ वक्ष्ये मंडलचिंतां ते कर्तव्यं राजलक्षणं॥ ११॥ स्वाम्यमात्यं तथा दुर्गं कोशो दंडस्तथैव च॥ मित्रं जनपदश्चैव राज्यं सप्तांगमुच्यते॥ १२॥ सप्तांगस्य
तु राज्यस्य विघ्नकर्तॄन् विनाशयेत्॥ मंडलेषु च सर्वेषु वृद्धिः कार्या महीक्षिता॥ १३॥ आत्ममंडलमेवात्र प्रथमं मंडलं भवेत्॥ सामंतास्तस्य विज्ञेया रिपवो मंडलस्य तु॥ १४॥
उपेतस्तु सुहृज्ज्ञेयः शत्रुर्मित्रमतः परं॥ मित्रमित्रं ततो ज्ञेयं मित्रमित्ररिपुस्ततः॥ १५॥ एतत्पुरस्तात्कथितं पश्चादपि निबोध मे॥ पार्ष्णिग्राहस्ततः पश्चात्ततस्त्वाक्रंद उच्यते
१६॥ आसारस्तु ततोन्यः स्यादाक्रंदासार उच्यते॥ जिगीषोः शत्रुयुक्तस्य विमुक्तस्य तथा द्विज॥ १७॥ नात्रापि निश्चयः शक्यो वक्तुं मनुजपुंगव॥ निग्रहानुग्रहे शक्तो मध्य
स्थः परिकीर्तितः॥ निग्रहानुग्रहे शक्तः सर्वेषामपि यो भवेत्॥ उदासीनः स कथितो बलवान् पृथिवीपतिः॥ १९॥ मंडलं तव संप्रोक्तमेतद्द्वादशराजकं॥ न कस्यचिद्रिपुर्मित्रं कारणा
च्छत्रुमित्रके॥ २०॥ त्रिविधा रिपवो ज्ञेयाः कुल्यानंतरकृत्रिमाः॥ पूर्वः पूर्वो गुरुस्तेषां दुश्चिकित्स्यतमो मतः॥ २१॥ अनंतरोपि यः शत्रुः सोपि मे कृत्रिमो मतः॥ पार्ष्णिग्राहो भवेच्छत्रो
र्मित्राणि रिपवस्तथा॥ २२॥ पार्ष्णिग्राहमुपायैश्च शमयेच्च तथा स्वकं॥ मित्रेण शत्रोरुच्छेदं प्रशंसंति पुरातनाः॥ २३॥ मित्रं च शत्रुतामेति सामंतत्वादनंतरं॥ शत्रुं जिगीषुरुच्छिंद्यात्
स्वयं शक्नोति चेद्यदि॥ २४॥ प्रतापवृद्धौ तेनापि नामित्राज्जायते भयं॥ यथास्य नोद्विजेल्लोको विश्वासश्च यथा भवेत्॥ २५॥ जिगीषुर्धर्मविजयी तथा लोकं वशं नयेत्॥ इत्या
ग्नेये नाम मंडलचिंतादि॥ पुष्कर उवाच॥ साम भेदो मया प्रोक्तो दानदंडौ तथैव च॥ दंडः स्वदेशे कथितः परदेशे ब्रवीमि ते॥ १॥ प्रकाशश्चाप्रकाशश्च द्विविधो दंड उच्यते॥ लुंठ
नं ग्रामघातश्च सस्यघातोग्निदीपनं॥ २॥ प्रकाशोथ विषं वह्निर्विविधैः पुरुषैर्वधः॥ दूषणं चैव साधूनामुदकानां च दूषणं॥ ३॥ दंडप्रणयनं प्रोक्तमुपेक्षां शृणु भार्गव॥ यदा म
न्येत नृपतिर्नेनं मम विग्रहे॥ ४॥ अन्यथा जातु बंधः स्यात् संधिना च तथा भवेत्॥ सामलब्धौ पदं चात्र दानं चार्थक्षयंकरं॥ ५॥ भेददंडानुबंधः स्यात्तदोपेक्षां समाश्रयेत्॥ न चायं म
म शक्नोति किंचित्कर्तुमुपद्रवं॥ ६॥ न चाहमस्य शक्नोमि तत्रोपेक्षां समारभे॥ अवज्ञोपहतस्तत्र राज्ञा कार्यो रिपुर्भवेत्॥ ७॥ मायोपायं प्रवक्ष्यामि उत्पातैरनृतैश्चरेत्॥ शत्रोरुद्वेजनं श
त्रोः शिबिरस्थस्य पक्षिणः॥ ८॥ स्थूलस्य तस्य पुच्छस्थां कृत्वोल्कां विपुलां द्विज॥ विसृजेच्च ततश्चैवमुल्कापातं प्रदर्शयेत्॥ ९॥ एवमन्ये दर्शनीया उत्पाता बहवोपि च॥ उद्वेजनं तथा कुर्या
त्कुहकैर्विविधैर्द्विषां॥ सांवत्सरास्तापसाश्च नाशं ब्रूयुः परस्य च॥ जिगीषुः पृथिवीं राजा तेन चोद्वेजयेत्परं॥ ११॥ देवतानां प्रसादश्च कीर्तनीयः परस्य तु॥ आगतं नो मित्रबलं
प्रहरध्वमभीतवत्॥ १२॥ एवं ब्रूयाद्रणे प्राप्ते भग्नाः सर्वे परे इति॥ क्ष्वेलाः किलकिलाः कार्या वाच्यः शत्रुर्हतस्तथा॥ १३॥ देवाज्ञा बृंहितो राजा संनद्धः समरं प्रति॥ इंद्रजा
लं प्रवक्ष्यामि इंद्रं कालेन दर्शयेत्॥ चतुरंगं बलं राजा सहाय्यार्थं दिवौकसां॥ बलं तु दर्शयेत्प्राप्ते रक्तवृष्टिं चरेद्रिपौ॥ १५॥ छिन्नानि रिपुशीर्षाणि प्रासादाग्रे प्रदर्शयेत्
षाड्गुण्यं संप्रवक्ष्यामि तद्वरौ संधिविग्रहौ॥ संधिश्च विग्रहश्चैव यानमासनमेव च॥ द्वैधीभावः संश्रयश्च षड्गुणाः परिकीर्तिताः॥ १७॥ पणबंधः स्मृतः संधिरपकारस्तु
विग्रहः॥ जिगीषोः शत्रुविषये यानं यात्राभिधीयते॥ १८॥ विग्रहेण स्वके देशे स्थितिरासनमुच्यते॥ बलार्धेन प्रयाणं तु द्वैधीभावः स उच्यते॥ १९॥ उदासीने मध्यमे वा
संश्रयात्संश्रयः स्मृतः॥ समेन संधिरन्वेष्यो हीनेन च बलीयसा॥ २०॥ तत्रापि शुद्धपार्ष्णिस्तु बलीयांसं समाश्रयेत्॥ आसीनः कर्मविच्छेदं शक्तः कर्तुं रिपोर्यदा॥ २१॥

अशुद्धपार्ष्णिश्चासीनो विगृह्य वसुधाधिपः॥ अशुद्धपार्ष्णिर्बलवान् द्वैधीभावं समाश्रयेत्॥ २२॥ बलिना विगृहीतस्तु यो संधीयते पार्थिवः॥ संश्रयस्तेन कर्तव्यो गुणाना
मधमो गुणः॥ २३॥ बहुक्षयव्ययायासं तेषां यानं प्रकीर्तितं॥ बहुलाभकरं पश्चात्तदा राजा समाश्रयेत्॥ २४॥ सर्वशक्तिविहीनस्तु तदा कुर्यात्तु संश्रयं॥ इत्याग्नेये उपायषा
ड्गुण्यं॥ पुष्कर उवाच॥ अजस्रं कर्म वक्ष्यामि दिनं प्रति यदाचरेत्॥ द्विमुहूर्तावशेषायां रात्रौ निद्रां त्यजेन्नृपः॥ १॥ वाद्यवंदिस्वनैर्गीतैः पश्येद्गूढांस्ततो नरान्॥ विज्ञायंते
न ये लोके तदीया इति केनचित्॥ २॥ आयव्ययस्य श्रवणं ततः कार्यं यथाविधि॥ मूत्रोत्सर्गं ततः कृत्वा राजा स्नानगृहं व्रजेत्॥ ३॥ स्नानं कुर्यान्नृपः पश्चाद्दंतधावनपूर्वकं॥ कृत्वा
संध्यां ततो जप्यं वासुदेवं प्रपूजयेत्॥ ४॥ वह्नौ पवित्रान् जुहुयात्तर्पयेदुदकैः पितॄन्॥ दद्यात्सकांचनां धेनुं द्विजाशीर्वादसंयुतः॥ ५॥ अनुलिप्तोलंकृतश्च मुखं पश्येच्च दर्पणे॥
ससुवर्णे घृते राजा शृणुयाद्दिवसादिकं॥ ६॥ औषधं भिषजोक्तं च मंगलालंभनं चरेत्॥ पश्येद्गुरुं तेन दत्ताशीर्वादोथ व्रजेत्सभां॥ ७॥ तत्रस्थो ब्राह्मणान् पश्येदमात्यान्मंत्रि
णस्तथा॥ प्रकृतीश्च महाभाग प्रतीहारनिवेदिताः॥ ८॥ श्रुत्वेतिहासं कार्याणि कार्याणां कार्यनिर्णयं॥ व्यवहारं ततः पश्येन्मंत्रं कुर्यात्तु मंत्रिभिः॥ ९॥ नैकेन सहितः कुर्यान्न कु
र्याद्बहुभिः सह॥ न च मूर्खैर्न चानाप्तैर्गुप्तं न प्रकटं चरेत्॥ १०॥ मंत्रं स्वधिष्ठितं कुर्याद्येन राष्ट्रं न बाधते॥ आकारग्रहणे राज्ञो मंत्ररक्षा परा मता॥ ११॥ आकारैरिंगितैः प्राज्ञा मं
त्रं गृह्णंति पंडिताः॥ सांवत्सराणां वैद्यानां मंत्रिणां वचने रतः॥ १२॥ राजा विभूतिमाप्नोति धारयंति नृपं हि ते॥ मंत्रं कृत्वाथ व्यायामं चक्रे याने न शस्त्रके॥ १३॥ नियुद्धादौ नृपः स्नातः
पश्येद्विष्णुं सुपूजितं॥ हुतं च पावकं पश्येद्विप्रान् पश्येत्सुपूजितान्॥ १४॥ भूषितो भोजनं कुर्याद्धुताद्यैः सुपरीक्षितं॥ भुक्त्वा गृहीततांबूलो वामपार्श्वेन संस्थितः॥ शास्त्राणि
चिंतयेद्दृष्ट्वा योधान् कोशायुधादि गृहं॥ अन्वास्य पश्चिमां संध्यां कार्याणि च विचिंत्य तु॥ १६॥ चारान् संप्रेष्य भुक्त्वान्नमंतःपुरचरो भवेत्॥ वाद्यगीतै रक्षितोन्यैरेवं नित्यं चरेन्नृ
पः॥ १७॥ इत्याग्नेये आजस्रिकं॥ पुष्कर उवाच॥ यात्राविधानपूर्वं तु वक्ष्ये सांग्रामिकं विधिं॥ सप्ताहेन यदा यात्रा भविष्यति महीपतेः॥ १॥ पूजनीयो हरिः शंभुर्मोदका
द्यैर्विनायकः॥ द्वितीयेहनि दिक्पालान् संपूज्य शयनं चरेत्॥ २॥ शय्यायां हि तदग्रे च देवान् प्रार्थ्य मनुं स्मरेत्॥ ग्रहान्यजेच्चतुर्थेह्नि पंचमे चाविलान्यजेत्॥ ३॥ मार्गीया देवतास्ता
सां नद्यादीनां च पूजनं॥ दिव्यांतरिक्षभौमानां देवानां च तथा बलिः॥ ४॥ सर्वभूतगणानां च वासुदेवादिपूजनं॥ भद्रकाल्याः श्रियं कुर्यात्प्रार्थयेत्सर्वदेवताः॥ ५॥
वासुदेवः संकर्षणः प्रद्युम्नश्चानिरुद्धकः॥ नारायणोब्जजो विष्णुर्नारसिंहो वराहकः॥ ६॥ शिव ईशस्तत्पुरुषो ह्यघोरो वामसद्यजः॥ सूर्यः सोमः कुजश्चांद्रिजीव
शुक्रशनैश्चराः॥ ७॥ राहुः केतुर्गणपतिः सेनानीश्चंडिका ह्युमा॥ लक्ष्मीः सरस्वती दुर्गा ब्रह्माणीप्रमुखा गणाः॥ ८॥ रुद्रा इन्द्रादयो वह्निर्नागास्तार्क्ष्योपरे सुराः॥
दिव्यांतरिक्षभूमिष्ठा विजयाय भवंतु मे॥ ९॥ मर्दयंतु रणे शत्रून् संप्राप्योपकारकं॥ सपुत्रमातृभृत्योहं देवा वः शरणं गतः॥ १०॥ चमूनां पृष्ठतो गत्वा रिपुनाशो नमोस्तु
वः॥ विनिवृत्तः प्रदास्यामि दत्तादभ्यधिकं बलिं॥ ११॥ षष्ठेह्नि विजयस्नानं कर्तव्यं चाभिषेकवत्॥ यात्रादिने सप्तमे च पूजयेच्च त्रिविक्रमं॥ १२॥ नीराजनोक्तमंत्रैश्च आ
युधं वाहनं यजेत्॥ पुण्याहजयशब्देन मंत्रमेनं निशामयेत्॥ १३॥ दिव्यांतरिक्षभूमिष्ठाः संतु स्वर्गे स्फुराश्च ते॥ देवसिद्धिं प्रभुत्वं देव यात्रास्तु सा नव॥ १४॥ रक्षां तु देवताः स
र्वा इति श्रुत्वा नृपो व्रजेत्॥ गृहीत्वा सशरं चापं धनुर्नागेति मंत्रितः॥ १५॥ न द्विशो इति जप्त्वाथ दद्याद्रिपुमुखे पदं॥ दक्षिणं पदं द्वात्रिंशद्दिक्षु प्राच्यादिषु क्रमात्॥ १६॥

९८

नागेरथं हयं चैव धर्यानं चारुहेत्क्रमात्॥ आरुह्य वाश्वैर्गच्छेन पृष्ठतो नावकल्पयेत्॥१७॥ क्रोशमात्रगतिस्तिष्ठेत् पूजयेद्देवतादिजान्॥ परदेशं व्रजेत्स्याद्दासैन्यद्विपा
लयम्॥ राज्ञा प्राप्य विदेशं तु देशाचारेण पालयेत्॥ देवानां पूजनं कुर्यात्स्वायत्या दानमत्र तु॥१९॥ नावमानयेत्तद्देश्यान् आगत्य स्वपुरं पुनः॥ जयं प्राप्यार्चयेद्देवान्दद्याद्दा
नानि पार्थिवः॥२०॥ द्वितीये हनि संग्रामो भविष्यति यदा तदा॥ स्नापयेत्कुंजराश्वादि यजेद्देवं नृसिंहकं॥२१॥ छत्रादिराजलिंगानि शस्त्राणि निशि वै गणान्॥ प्रातर्नृ
सिंहकं पूज्य वाहनाद्यं मशेषतः॥२२॥ पुरोधसा हुतं पश्येद्वह्निं हुत्वा द्विजान्यजेत्॥ गृहीत्वा सशरं चापं गजाद्यारुह्य वै व्रजेत्॥२३॥ देशे वै दृश्यः शत्रूणां कुर्यात्प्रकृति
कल्पनां॥ संहतान्योधयेदल्पान् कामं विस्तारयेद्बहून्॥२४॥ सूचीमुखमनीकं स्यादल्पानां बहुभिः सह॥ व्यूहाः प्राण्यंगरूपाश्च द्रव्यरूपाश्च कीर्तिताः॥२५॥ गरुडो म
करो व्यूहः श्येनस्तथैव च॥ अर्धचंद्रश्च वज्रश्च शकटव्यूह एव च॥२६॥ मंडलः सर्वतोभद्रः सूचीव्यूहश्च ते नव॥ व्यूहानामथ सर्वेषां पंचधा सैन्यकल्पना॥२७॥
द्वौ पक्षावनुपक्षौ द्वावरस्यं पंचमं भवेत्॥ एकेन यदि वा द्वाभ्यां भागाभ्यां युद्धमाचरेत्॥२८॥ भागत्रयं स्थापयेत्तेषां रक्षार्थमेव च॥ न व्यूहकल्पना कार्या राज्ञा भवति क
र्हिचित्॥२९॥ मूलच्छेदे विनाशः स्यान्न युध्येच्च स्वयं नृपः॥ सैन्यस्य पश्चात्तिष्ठेत्तु क्रोशमात्रे महीपतिः॥३०॥ भग्नसंधारणं तत्र योधानां परिकीर्तितं॥ प्रधानभंगे सैन्यस्य
नावस्थानं विधीयते॥३१॥ न संहतान्न विरलान् योधान् व्यूहे प्रकल्पयेत्॥ आयुधानां तु संमर्दो यथा न स्यात्परस्परं॥३२॥ भवेत्कामः परानीकं संहतैरेव भेदयेत्॥ भेदरक्षा
परेणापि कर्तव्याः संहतास्तथा॥३३॥ व्यूहं भेदावहं कुर्यात् परव्यूहेषु चेच्छया॥ गजस्य पादरक्षार्थं चत्वारस्तु रथा द्विज॥३४॥ रथस्य चाश्वाश्चत्वारः समास्तस्य च चर्मिणः॥
धन्विनश्चर्मिभिस्तुल्याः पुरस्ताच्चर्मिणो रणे॥३५॥ पृष्ठतो धन्विनः पश्चाद्धन्विनां तुरगा रथाः॥ रथानां कुंजराः पश्चाद्दातव्याः पृथिवीक्षिता॥३६॥ पदातिकुंज
राश्वानां धर्मकार्यं प्रयत्नतः॥ शूराः प्रमुखतो देया नदेया भीरवः पुरः॥३७॥ प्रोत्साहयंत्येव रणे भीरून् शूराः पुरःस्थिताः॥ प्रांशवः शुकनासाश्च ये वा जिह्मेक्षणा नराः॥३८॥
संहतभ्रुवः क्रोधनाः कलहप्रियाः नित्यहृष्टाः प्रहृष्टाश्च शूरास्ते याश्च कामिनः॥३९॥ संहतानां हतानां च रणापनयनक्रिया॥ प्रतियुद्धं गजानां च तोयदानादिकं च य
द्॥ आयुधानयनं चैव पत्तिकर्म विधीयते॥ रिपूणां भेत्तुकामानां स्वसैन्यस्य तु रक्षणं॥४१॥ भेदनं संहतानां च चर्मिणां कर्म कीर्तितं॥ विमुखीकरणं युद्धे धन्विनां च तथोच्यते॥४२॥
दूरापसरणं यानं सहयस्य तथोच्यते॥ त्रासनं रिपुसैन्यानां रथकर्म तथोच्यते॥४३॥ भेदनं संहतानां च भिन्नानामपि संहतिः॥ प्राकारतोरणाट्टालद्रुमभंगश्च सद्गजे॥४४॥
पत्तेर्भूर्विषमा ज्ञेया रथाश्वस्य तथा समा॥ सकर्दमा च नागानां युद्धभूमिरुदाहृता॥४५॥ एवं विरचितव्यूहः पृष्ठदिवाकरः॥ तथा स्वलोकपान्विष्णुं आर्कि दिक्पालमृद्धु
मारुतः॥४६॥ योधानुत्तेजयेत्सर्वान् नामगोत्रावदानतः॥ भोगप्राप्त्या च विजये स्वर्गप्राप्त्या मृतस्य च॥४७॥ जित्वारीन् भोगसंप्राप्तिर्मृतस्य च परा गतिः॥ निष्कृतिः स्वामिपिं
डस्य नास्ति युद्धसमा गतिः॥४८॥ शूराणां रक्तमायाति तेन पापं त्यजंति ते॥ घातादि दुःखसहनं रणे तत्परमं तपः॥४९॥ वराप्सरसहस्राणि यांति शूरं रणे मृतं॥ स्वामी सुकृतमादत्ते
भग्नानां विनिवर्तनात्॥५०॥ ब्रह्महत्याफलं तेषां तथा प्रोक्तं पदे पदे॥ त्यक्त्वा सहायान्यो गच्छेद्देवास्तस्य विनष्टये॥५१॥ अश्वमेधफलं प्रोक्तं शूराणामनिवर्तिनां॥ धर्मनिष्ठा
जयो राज्ञो योद्धव्याश्च समाः समैः॥५२॥ गजाद्यैश्च गजाद्याश्च न हंतव्याः पलायिनः॥ न प्रेक्षकाः प्रविष्टाश्च अशस्त्राः पतितादयः॥५३॥ शांते निद्राभिभूते च अर्द्धोत्तीर्णे

दीबले॥ दुर्दिने कूटयुद्धानि शत्रुनाशार्थमाचरेत्॥५४॥ बाहू प्रगृह्य विक्रोशेद्भग्ना भग्नाः परे इति॥ प्राप्तं मित्रबलं भूरि नायको त्र निपातितः॥५५॥ सेनानी निहतश्चायं भूप
तिश्चापि विद्रुतः॥ विद्रुतानां तु योधानां सुखं घातो विधीयते॥५६॥ धूपाश्च देयास्तस्य परमोहनाः॥ पताकाश्चैव संभारो वादित्राणां भयावहः॥५७॥ संप्राप्य विजयं
युद्धे देवान्विप्रांश्च संयजेत्॥ रत्नानि राजगामीनि भनयेन कृते रणे॥५८॥ न स्त्रियो न कस्यापि रक्ष्यास्ताश्च परस्य च॥ शत्रुं प्राप्य रणे मुक्तं पुत्रवत्परिपालयेत्॥५९॥ पुनस्तेन न यो
द्धव्यं देशाचारादि पालयेत्॥ ततश्च स्वपुरं प्राप्य ध्रुवे प्रविशेद्गृहं॥६०॥ देवादिपूजनं कुर्याद्रक्षेद्योधकुटुंबकं॥ संविभागं पराप्तैः कुर्याद्भृत्यजनस्य च॥६१॥ रणदीक्षा मयोक्ता
ते जयाय नृपतेर्ध्रुवा॥६२॥ इत्याग्नेये रणदीक्षणं॥ पुष्कर उवाच॥ राजलक्ष्मीस्थिरत्वाय यथेंद्रेण पुरा श्रियः॥ स्तुतिः कृता तथा राजा जयार्थं स्तुतिमाचरेत्॥१॥ इंद्र उवाच॥ p. 291
नमस्ये सर्वलोकानां जननीमब्धिसंभवां॥ श्रियमुन्निद्रपद्माक्षीं विष्णुवक्षःस्थलस्थितां॥२॥ त्वं सिद्धिस्त्वं स्वधा स्वाहा सुधा त्वं लोकपावनी॥ संध्या रात्रिः प्रभा भूतिर्मेधा श्रद्धा
सरस्वती॥३॥ यज्ञविद्या महाविद्या गुह्यविद्या च शोभने॥ आत्मविद्या च देवि त्वं विमुक्तिफलदायिनी॥४॥ आन्वीक्षिकी त्रयी वार्ता दंडनीतिस्त्वमेव च॥ सौम्या सौम्यैर्ज
गद्रूपैस्त्वयैतद्देवि पूरितं॥५॥ कात्वन्या त्वामृते देवि सर्वयज्ञमयं वपुः॥ अध्यास्ते देवदेवस्य योगिचिंत्यं गदाभृतः॥६॥ त्वया देवि परित्यक्तं सकलं भुवनत्रयं॥ विनष्टप्रायम
भवत्त्वयेदानीं समेधितं॥७॥ दाराः पुत्रास्तथागारं सुहृद्धान्यधनादिकं॥ भवत्येतन्महाभागे नित्यं त्वद्वीक्षणान्नृणां॥८॥ शरीरारोग्यमैश्वर्यमरिपक्षक्षयः सुखं॥ देवि त्वद्दृष्टि
दृष्टानां पुरुषाणां न दुर्लभं॥९॥ त्वमंबा सर्वभूतानां देवदेवो हरिः पिता॥ त्वयैतद्विष्णुना चापि जगद्व्याप्तं चराचरं॥१०॥ मानः कोशं तथा कोष्ठं मा गृहं मा परिच्छदं॥ मा शरीरं कलत्रं
च त्यजेथाः सर्वपावनि॥११॥ मा पुत्रान्मा सुहृद्वर्गान्मा पशून्मा विभूषणं॥ त्यजेथा मम देवस्य विष्णुवक्षःस्थलालये॥१२॥ सत्येन सत्यशौचाभ्यां तथा शीलादिभिर्गुणैः॥ त्य
ज्यंते ते नराः सद्यः संत्यक्ता ये त्वयामले॥१३॥ त्वया विलोकिताः सद्यः शीलाद्यैरखिलैर्गुणैः॥ कुलैश्वर्यैश्च युज्यंते पुरुषा निर्गुणा अपि॥१४॥ अश्लाघ्यः स गुणी धन्यः स कुलीनः
स बुद्धिमान्॥ स शूरः स च विक्रांतो यस्त्वया देवि वीक्षितः॥१५॥ सद्यो वैगुण्यमायांति शीलाद्याः सकला गुणाः॥ पराङ्मुखी जगद्धात्री यस्य त्वं विष्णुवल्लभे॥१६॥ न ते वर्ण
यितुं शक्ता गुणान् जिह्वापि वेधसः॥ प्रसीद देवि पद्माक्षि मा मां त्याक्षीः कदाचन॥१७॥ एवं स्तुता ददौ श्रीश्च वरमिंद्राय वांछितं॥ सुस्थिरत्वं च राज्यस्य संग्रामविजया
दिकं॥१८॥ स्वस्तोत्रपाठश्रवणकर्तॄणां भुक्तिमुक्तिदं॥ श्रीस्तोत्रं सततं तस्मात्पठेच्च शृणुयान्नरः॥१९॥ इत्याग्नेये श्रीस्तोत्रं॥ नीतिस्ते पुष्करोक्ता तु रामोक्तां लक्ष्म
णाय यां॥ जयाय तां प्रवक्ष्यामि शृणु धर्मविवर्धिनीं॥१॥ राम उवाच॥ न्यायेनार्जनमर्थस्य वर्धनं रक्षणं चरेत्॥ सत्पात्रप्रतिपत्तिश्च राजवृत्तं चतुर्विधं॥२॥ नयस्य विनयो मूलं
विनयः शास्त्रनिश्चयात्॥ विनयो हींद्रियजयस्तैर्युक्तः पालयेन्महीं॥३॥ शास्त्रं प्रज्ञा धृतिर्दाक्ष्यं प्रागल्भ्यं धारयिष्णुता॥ उत्साहो वाग्मिता दार्ढ्यमापत्क्लेशसहिष्णुता॥४॥
प्रभावः शुचिता मैत्री त्यागः सत्यं कृतज्ञता॥ कुलं शीलं दमश्चेति गुणाः संपत्तिहेतवः॥५॥ प्रकीर्णविषयारण्ये धावंतं विप्रमाथिनं॥ ज्ञानांकुशेन कुर्वीत वश्यमिंद्रियदंतिनं॥
६॥ कामः क्रोधस्तथा लोभो हर्षो मानो मदस्तथा॥ षड्वर्गमुत्सृजेदेनमस्मिंस्त्यक्ते सुखी नृपः॥७॥ आन्वीक्षिकीं त्रयीं वार्तां दंडनीतिं च पार्थिवः॥ तद्विद्यैस्तत्क्रियोपेतैश्चिंत
येद्विनयान्वितः॥८॥ आन्वीक्षिक्यार्थविज्ञानं धर्माधर्मौ त्रयीस्थितौ॥ अर्थानर्थौ तु वार्तायां दंडनीत्यां नयानयौ॥ अहिंसा सूनृता वाणी सत्यं शौचं दया क्षमा॥ वर्णिनां लिं

९८

गिनांचैवसामान्योधर्मउच्यते॥१०॥प्रजाःसमनुगृह्णीयात्कुर्यादाचारसंस्थितिं॥वाक्सूनृतादयादानंदीनोपगतरक्षणं॥इतिवृत्तंसतांसाधुहितंसत्पुरुषव्रतं॥
आधिव्याधिपरीतायअद्यश्वोवाविनाशिने॥११॥कोहिराजशरीरायधर्मापेतंसमाचरेत्॥नहिस्वसुखमन्विच्छन्पीडयेत्कृपणंजनं॥१२॥कृपणःपीड्यमानोपिमन्युना
हंतिपार्थिवं॥क्रियतेभ्यर्हणीयायस्वजनाययथांजलिः॥१३॥ततःसाधुतरःकार्योदुर्जनायशिवात्मना॥प्रियमेवाभिधातव्यंसत्सुनित्यंद्विषत्सुच॥१४॥देवास्तेप्रियवक्ता
रःपशवःक्रूरवादिनः॥शुचिरास्तिक्यपूतात्मापूजयेद्देवताःसदा॥१६॥देवतावद्गुरुजनमात्मवच्चसुहृज्जनं॥प्रणिपातेनहिगुरुंसतोनूनानुचेष्टितैः॥१७॥कुर्वीताभिमुखान्
भृत्यैर्देवान्सुकृतकर्मणा॥सद्भावेनहरेन्मित्रंसंभ्रमेणचबांधवान्॥१८॥स्त्रीभृत्यान्प्रेमदानाभ्यांदाक्षिण्येनेतरंजनं॥अनिंदापरकृत्येषुस्वधर्मपरिपालनं॥१९॥कृपणेषुदया
लुत्वंसर्वत्रमधुरागिरः॥प्राणैःप्रत्युपकारित्वंमित्रायाव्यभिचारिणे॥२०॥गृहागतेपरिष्वंगःशक्त्यादानंसहिष्णुता॥स्वसमृद्धिष्वनुत्सेकःपरवृद्धिष्वमत्सरः॥२१॥औरोपतापिवच
नंमौनव्रतचारिष्णुता॥बंधुभिर्बद्धसंयोगःस्वजनेचतुरस्रता॥२२॥उचितानुविधायित्वमितिवृत्तंमहात्मनां॥ इत्याग्नेयेरामोक्तनीतौ॥ रामउवाच॥स्वाम्यमात्यश्चराष्ट्रंचदु
र्गंकोशोबलंसुहृत्॥परस्परोपकारीदंसप्तांगंराज्यमुच्यते॥१॥राज्यांगानांवरंराष्ट्रंसाधनंपालयेत्सदा॥कुलंशीलंवयःसत्वंदाक्षिण्यंक्षिप्रकारिता॥२॥अविसंवादितासत्यंवृ
द्धसेवाकृतज्ञता॥दैवसंपन्नताबुद्धिरक्षुद्रपरिवारता॥३॥शक्यसामंततावैवतथाचदृढभक्तिता॥दीर्घदर्शित्वमुत्साहःशुचितास्थूललक्षिता॥४॥विनीतत्वंधार्मिकतासाधो
श्चनृपतेर्गुणाः॥प्रख्यातवंशमक्रूरंलोकसंग्राहिणंशुचिं॥कुर्वीतात्महिताकांक्षीपरिचारंमहीपतिः॥वाग्मीप्रगल्भःस्मृतिमानुदग्रोबलवान्वशी॥६॥नेतादंडस्यनिपुणःकृत
शिल्पःपरग्रहः॥पराभियोगप्रसहःसर्वदुष्टप्रतिक्रिया॥७॥परवृत्तान्ववेक्षीचसंधिविग्रहतत्ववित्॥गूढमंत्रप्रचारज्ञोदेशकालविभागवित्॥८॥आदातासम्यगर्थानांवि
नियोक्ताचपात्रवित्॥क्रोधलोभभयद्रोहदंभचापलवर्जितः॥९॥परोपतापपैशून्यमात्सर्येर्ष्यानृतातिगः॥वृद्धोपदेशसंपन्नःशक्तोमधुरदर्शनः॥१०॥गुणानुरागस्थितिमा
नात्मसंपद्गुणाःस्मृताः॥कुलीनाःशुचयःशूराःश्रुतवंतोनुरागिणः॥११॥दंडनीतेःप्रयोक्तारःसचिवाःस्युर्महीपतेः॥सुविग्रहोजानपदःकुलशीलकलान्वितः॥१२॥वा
ग्मीप्रगल्भश्चक्षुष्मानुत्साहीप्रतिपत्तिमान्॥स्तंभचापलहीनश्चमैत्रःक्लेशसहःशुचिः॥सत्यसत्वधृतिस्थैर्यप्रभावारोग्यसंयुतः॥कृतशिल्पश्चदक्षश्चप्रज्ञावान्धा
रणान्वितः॥दृढभक्तिरकर्ताचवैराणांसचिवोभवेत्॥स्मृतिस्तत्परतार्थेषुवितर्कोज्ञाननिश्चयः॥१५॥दृढतामंत्रगुप्तिश्चमंत्रसंपत्प्रकीर्तिता॥त्रय्यांचदंडनीत्यांचकुशलःस्या
त्पुरोहितः॥१६॥अथर्ववेदविहितंकुर्याच्छांतिकपौष्टिकं॥साधुतेषाममात्यानांतद्विद्यैःसहचक्षुष्मान्॥१७॥चक्षुष्मत्तांचशिल्पंचपरीक्षेतगुणद्वयं॥स्वजनेभ्योविजानी
यात्कुलंस्थानमवग्रहं॥१८॥परिकर्मसुदाक्ष्यंचविज्ञानंधारयिष्णुतां॥गुणत्रयंपरीक्षेतप्रागल्भ्यंप्रतिभांतथा॥१९॥कथायोगेषुबुध्येतवाग्मित्वंसत्यवादितां॥उत्साहंचप्रभा
वंचतथाक्लेशसहिष्णुतां॥२०॥धृतिंचैवानुरागंचस्थैर्यंचापदिलक्षयेत्॥भक्तिंमैत्रींचशौचंचजानीयाद्व्यवहारतः॥२१॥संवासिभ्योबलंसत्वमारोग्यंशीलमेवच॥अस्तब्धता
मचापल्यंवैराणांचाप्यकीर्तनं॥२२॥प्रत्यक्षतोविजानीयाद्भद्रतांक्षुद्रतामपि॥फलानुमेयाःसर्वत्रपरोक्षगुणवृत्तयः॥२३॥सस्याकरवतीपुण्याखनिद्रव्यसमन्विता॥गो
हिताभूरिसलिलापुण्यैर्जनपदैर्युता॥२४॥रम्यासकुंजरवनावारिस्थलपथान्विता॥अदेवमातृकाचेतिशस्यतेभूरिभूतये॥२५॥शूद्रकारुवणिक्प्रायोमहारंभकृषीवलः॥

Dr BHAU DAJI MEMORIAL

सानुरागोरिपुद्वेषीपीडासहःपृथुः॥२६॥नानादेश्यैःसमाकीर्णोधार्मिकःपशुमान्बली॥ईदृग्जनपदःशस्तोमूर्खव्यसनिनायकः॥२७॥पृथुसीमंमहाखातमुच्चप्राका
रतोरणं॥पुरंसमावसेच्छैलसरिन्मरुवनाश्रयं॥जलवद्धान्यधनवद्दुर्गकालसहंमहत्॥औदकंपार्वतंवार्क्षमैरिणंधान्वनंचाष्टधा॥ईप्सितद्रव्यसंपूर्णःपितृपैतामहोचितः॥
धर्मार्जितोव्ययसहःकोशोधर्मादिवृद्धये॥३०॥पितृपैतामहोवश्यःसंहतोदत्तवेतनः॥विख्यातपौरुषोजन्यःकुशलःशकुनैर्वृतः॥नानाप्रहरणोपेतोनानायुद्धविशारदः॥ना
नायोधसमाकीर्णोनीराजितहयद्विपः॥३२॥प्रवासायासदुःखेषुयुद्धेषुचकृतश्रमः॥अद्वैधःक्षत्रियप्रायोदंडोदंडविदांमतः॥योगविज्ञानसत्वाढ्यंमहापक्षंप्रियंवदं॥आयतिक्षम
मद्वैधंमित्रंकुर्वीतसत्कुलं॥३४॥दूरादेवाभिगमनंस्पष्टार्थहृदयानुगा॥वाक्सत्कृत्यप्रदानंचत्रिविधोमित्रसंग्रहः॥धर्मकामार्थसंयोगोमित्रात्तुत्रिविधंफलं॥औरसंतत्रसंबंधं
तथावंशक्रमागतं॥३६॥रक्षितंव्यसनेभ्यश्चमित्रंज्ञेयंचतुर्विधं॥मित्रेगुणाःसत्यताद्याःसमानसुखदुःखता॥वक्ष्येनुजीविनांवृत्तंसेवीसेवेतभूपतिं॥दक्षताभद्रतादार्ढ्यंक्षांतिःक्ले
शसहिष्णुता॥३८॥संतोषःशीलमुत्साहोमंडयत्यनुजीविनं॥यथाकालमुपासीतराजानंसेवकोनयात्॥परस्थानगमंक्रौर्यमौद्धत्यंमत्सरंत्यजेत्॥विगृह्यकथनंभृत्यैर्नकुर्याज्ज्याय
सासह॥४०॥गुह्यंधर्मंचमंत्रंचनभर्तुःप्रकाशयेत्॥रक्ताद्वृत्तिंसमीहेतविरक्तंसंत्यजेन्नृपं॥अकार्यप्रतिषेधश्चकार्येचापिप्रवर्तनं॥संक्षेपादितिसद्वृत्तंबंधुमित्रानुजीविनां॥४२॥आ
जीव्यःसर्वसत्वानांराजापर्जन्यवद्भवेत्॥आयद्वारेषुचाप्तार्थधनवीवादवीतच॥कुर्याद्दुर्योगसंपन्नानध्यक्षान्सर्वकर्मसु॥कृषिर्वणिक्पथोदुर्गंसेतुकुंजरबंधनं॥४४॥खन्याकर
करादानंशून्यानांचनिवेशनं॥अष्टवर्गमिमंराजासाधुवृत्तोनुपालयेत्॥आयुक्तिकेभ्यश्चोरेभ्यःपौरेभ्योराजवल्लभात्॥पृथिवीपतिलोभाच्चप्रजानांपंचधाभयं॥४६॥अवेक्ष्यैतद्भयंका
लेआददीतकरंनृपः॥अभ्यंतरंशरीरंस्वंबाह्यंराष्ट्रंचरक्षयेत्॥दंड्यांस्तुदंडयेद्राजास्वरक्षेच्चविषादितः॥स्त्रियःपुत्राश्चशत्रुभ्योविश्वसेन्नकदाचन॥४८॥ इत्याग्नेयेराजधर्मे॥
रामउवाच॥मंडलंचिंतयेन्मुख्यंराजाद्वादशराजकं॥अरिर्मित्रमरेर्मित्रंमित्रमित्रमतःपरं॥तथारिमित्रमित्रंचविजिगीषोःपुरःस्मृताः॥पार्ष्णिग्राहःस्मृतःपश्चादाक्रंदस्तद
नंतरं॥२॥आसारावनयोश्चैवविजिगीषोश्चमंडलं॥अरेश्चविजिगीषोश्चमध्यमोभूम्यनंतरः॥अनुग्रहेसंहतयोर्निग्रहेव्यस्तयोःप्रभुः॥मंडलाद्बहिरेतेषामुदासीनोबलाधिकः॥४॥
अनुग्रहेसंहतानांव्यस्तानांचवधेप्रभुः॥संधिंचविग्रहंयानमासनादिवदाश्रिते॥बलवद्विग्रहीतेनसंधिंकुर्याच्छिवायच॥कपालउपहारश्चसंतानःसंगतस्तथा॥६॥उपन्यासःप्रतीका
रःसंयोगःपुरुषांतरः॥अदृष्टनरआदिष्टआत्मामिषउपग्रहः॥परिक्रमस्तथाच्छिन्नस्तथाचपरदूषणं॥स्कंदोपनयःसंधिश्चसंधयःषोडशोदिताः॥८॥परस्परोपकारश्चमैत्रःसं
बंधकस्तथा॥उपहारश्चचत्वारःतेषुमुख्याश्चसंधयः॥बालोवृद्धोदीर्घरोगीतथाबंधुबहिष्कृतः॥भीरुकोभीरुजनकोलुब्धोलुब्धजनस्तथा॥१०॥विरक्तप्रकृतिश्चैवविष
येष्वतिशक्तिमान्॥अनेकचित्तमंत्रश्चदेवब्राह्मणनिंदकः॥दैवोपहतकश्चैवदैवचिंतकएवच॥दुर्भिक्षव्यसनोपेतोबलव्यसनसंकुलः॥१२॥अदेशस्थोबहुरिपुर्युक्तःकालेन
यश्चह॥सत्यधर्मव्यपेतश्चविंशतिःपुरुषाअमी॥एतैःसंधिंनकुर्वीतविगृह्णीयात्तुकेवलं॥परस्परापकारेणपुंसांभवतिविग्रहः॥१४॥आत्मनोभ्युदयाकांक्षीपीड्यमानःपरे
णवा॥देशकालबलोपेतःप्रारभेतेहविग्रहं॥राज्यस्त्रीस्थानदेशानांज्ञानस्यचबलस्यच॥अपहारोमदोमानःपीडावैषयिकीतथा॥१६॥ज्ञानात्मशक्तिधर्माणांविघातोदैवमे
वच॥मित्रार्थंचापमानश्चतथाबंधुविनाशनं॥भूतानुग्रहविच्छेदःस्तथामंडलदूषणं॥एकार्थाभिनिवेशित्वमितिविग्रहयोनयः॥१८॥सापत्न्यंवास्तुजंस्त्रीजंवाग्जंवैपापराधजं

९९ वैरं पंचविधं प्रोक्तं साधनैः प्रशमं नयेत्॥ किंचित्फलं निष्फलं वा संदिग्धफलमेव च॥ तदात्वदोषजननमायत्यां चैव निष्फलं॥२०॥ आयत्यां च तदात्वे च दोषसंजननं त
था॥ अपविज्ञातवीर्येण परेण लोभितोपि वा॥ परार्थं स्त्रीनिमित्तं च दीर्घकालं द्विजैः सह॥ अकाले दैवयुक्तेन बलोद्धतसखेन च॥२२॥ तदात्वफलसंयुक्तं मायत्यां
फलवर्जितं॥ आयत्यां फलसंयुक्तं तदात्वे निष्फलं तथा॥ इतीमं षोडशविधं न कुर्यादेव विग्रहं॥ तदात्वायतिसंशुद्धे कर्म राजा समाचरेत्॥२४॥ हृष्टं पुष्टं बलं मत्वा ग
ह्णीयाद्विपरीतकं॥ मित्रमाक्रंद आसारो यदा स्युर्दृढभक्तयः॥ परस्य विपरीतं च न दा विग्रहमाचरेत्॥ विगृह्य संधाय तथा संभूयाथ प्रसंगतः॥२५॥ उपेक्षया च निपुणै
र्यानं पंचविधं स्मृतं॥ परस्परस्य सामर्थ्यविघातादासनं स्मृतं॥ अरेश्च विजिगीषोश्च यानवत्संधवास्मृते॥ बलिनो द्विषतो मध्ये वाचात्मानं समर्पयन्॥२८॥ द्वैधीभा
वेन तिष्ठेत्काकाक्षिवदलक्षितः॥ उभयोरपि संपाते सेवेत बलवत्तरं॥ यदा द्वावपि नेच्छेतां संश्लेषं जातसंविदौ॥ तदोपसर्पेत्तच्छत्रुमधिकं वा स्वयं व्रजेत्॥३०॥ उच्छि
द्यमानो बलिना निरुपायप्रतिक्रियः॥ कुलोद्भवं सत्यमार्यमासेवेत बलोत्कटं॥ तद्दर्शनोपास्तिकता नित्यं तद्भावभाविता॥ तत्कारिता प्रश्रयिता वृत्तिः संश्रयिणः स्मृता॥
३२॥ इत्याग्नेये राजधर्मे॥ राम उवाच॥ प्रभावोत्साहशक्तिभ्यां मंत्रशक्तिः प्रशस्यते॥ प्रभावोत्साहवान् काव्यो जितो देवपुरोधसा॥ मंत्रयेत्तेह कार्याणि नानाप्तैर्ना
विपश्चिता॥ अशक्यारंभवृत्तीनां कुतः क्लेशादृते फलं॥२॥ अविज्ञातस्य विज्ञानं विज्ञातस्य च निश्चयः॥ अर्थद्वैधस्य संदेहच्छेदनं शेषदर्शनं॥ सहायाः साधनोपाया वि
भागो देशकालयोः॥ विपत्तेश्च प्रतीकारः पंचांगो मंत्र इष्यते॥४॥ मनःप्रसादः श्रद्धा च तथा करणपाटवं॥ सहायोत्थानसंपच्च कर्मणां सिद्धिलक्षणं॥ मदः प्रमादः काम
श्च सुप्तप्रलपितानि च॥ भिंदंति मंत्रं प्रच्छन्नाः कामिन्यो धूर्ततास्तथा॥६॥ प्रगल्भः स्मृतिमान् वाग्मी शस्त्रे शास्त्रे च निष्ठितः॥ अभ्यस्तकर्मा नृपतेर्दूतो भवितुमर्हति॥ नि
सृष्टार्थो मितार्थश्च तथा शासनहारकः॥ सामर्थ्यात्पादतो हीनो दूतस्तु त्रिविधः स्मृतः॥८॥ नाविज्ञातः पुरं शत्रोः प्रविशेच्च न संसदं॥ कालमीक्षेत कार्यार्थमनुज्ञातश्च निष्पतेत्॥
छिद्रं च शत्रोर्जानीयात्कोशमित्रबलानि च॥ रागापरागौ जानीयाद्दृष्टिगात्रविचेष्टितैः॥१०॥ कुर्याच्चतुर्विधं स्तोत्रं पक्षयोरुभयोरपि॥ तपस्विव्यंजनोपेतैः स्वचरैः सह संवसेत्॥
चरः प्रकाशो दूतः स्यादप्रकाशश्चरो दिवा॥ वणिक्कृषीवलो लिंगी भिक्षुकाद्यात्मकाश्चराः॥१२॥ यायादरिं व्यसनिनं निष्फले दूतचेष्टिते॥ प्रकृतिव्यसनं यत्स्यात्तत्स
मीक्ष्य समुत्पतेत्॥ अनयाद्यस्यति श्रेयस्तस्माद्व्यसनं स्मृतं॥ हुताशनो जलं व्याधिर्दुर्भिक्षं मरकं तथा॥१४॥ इति पंचविधं दैवं व्यसनं मानुषं परं॥ दैवं पुरुषकारेण शांत्या
च प्रशमं नयेत्॥ उत्थापितेन नीत्या च मानुषं व्यसनं हरेत्॥ मंत्रो मंत्रफलावाप्तिः कार्यानुष्ठानमायतिः॥१६॥ आयव्ययौ दंडनीतिरमित्रप्रतिषेधनं॥ व्यसनस्य प्रतीकारो राज्यरा
जाभिरक्षणं॥ इत्यमात्यस्य कर्मेदं हंति सव्यसनान्विताः॥ हिरण्यधान्यवस्त्राणि वाहनं प्रजया भवेत्॥१८॥ तथान्यद्रव्यनिचया हंति सव्यसनाः प्रजाः॥ प्रजानामापदि स्थानं रक्षणं को
शदंडयोः॥ पौराश्चोपकुर्वंति संश्रयायेह दुर्गिणं॥ तूष्णीं युद्धं जनत्राणं मित्रामित्रपरिग्रहः॥२०॥ सामंतादिकृतं दुर्गे निरस्येत्तु व्यसनी भवेत्॥ भृत्यानां भरणं दानं प्रजामित्रप
रिग्रहः॥ धर्मकामादिभेदश्च दुर्गसंस्कारभूषणं॥ कोशात्तद्व्यसनाद्धंति कोशमूलो हि भूपतिः॥२२॥ मित्राविश्वासनीहेमसाधनं रिपुमर्दनं॥ दूरकार्याशुकारित्वं दंडात्तद्व्यसनाद्ध
रेत्॥ स च राजा सव्यसनी हन्याद्राजकार्याणि यानि च॥ वाग्दंडयोश्च पारुष्यमर्थदूषणमेव च॥ पानं स्त्री मृगया द्यूतं व्यसनानि महीपतेः॥ आलस्यं स्तब्धता दर्पः प्रमादो द्वैधकारि
त्वं तथा॥ इति पूर्वोपदिष्टं च सचिवव्यसनं स्मृतं॥ अनावृष्टिश्च पीडादिराष्ट्रव्यसनमुच्यते॥ विशीर्णयंत्रप्राकारपरिखात्वमशस्त्रता॥ क्षीणघाससंधनान्नत्वं दुर्गव्यसनमुच्यते॥२८॥ व्य
यीकृतः परिक्षिप्तो प्रजितो संचितस्तथा॥ दूषितो दूरसंस्थश्च कोशव्यसनमुच्यते॥ उपरुद्धं परिक्षिप्तममानितविमानितं॥ अभृतं व्याधितं श्रांतं दूरायातं नवागतं॥३०॥ परिक्षीणं प्रतिह
तं प्रहताग्रजवं तथा॥ आशानिर्वेदभूयिष्ठमनृतप्राप्तमेव च॥ कलत्रगर्भं निक्षिप्तमंतःशल्यं तथैव च॥ विच्छिन्नवीवधासारं शून्यमूलं तथैव च॥३२॥ अस्वाम्यसंहतं वापि भिन्नकूटं तथै
व च॥ दुष्पार्ष्णिग्राहसार्थं च बलव्यसनमुच्यते॥ दैवोपपीडितं मित्रं ग्रस्तं शत्रुबलेन च॥ कामक्रोधादिसंयुक्तमुत्साहादरिभिर्भवेत्॥३४॥ अर्थस्य दूषणं क्रोधः पारुष्यं वाक्यदंडयोः॥ कामजं मृ
गया द्यूतं व्यसनं पानकं स्त्रियः॥ वाक्पारुष्यं परं लोके ह्युद्वेजनमनर्थकं॥ असिद्धसाधनं दंडस्तं युक्त्यैव नयेन्नृपः॥३६॥ उद्वेजयति भूतानि दंडपारुष्यवान्नृपः॥ भूतान्युद्वेज्यमानानि द्विषतां यांति
संश्रयं॥ विवृद्धाः शत्रवस्तेभ्यो विनाशाय भवंति ते॥ दूष्यस्य दूषणार्थं च परित्यागो महीयसः॥३८॥ अर्थस्य नीतितत्त्वज्ञैरर्थदूषणमुच्यते॥ पानात्कार्यादिनो ज्ञानं न गच्छतीति तेः क्षयः॥ जितश्रमार्थं मृग
यां विचरेद्रक्षिते वने॥ धर्मार्थप्राणनाशादि द्यूते स्यात्कलहादिकं॥४०॥ कालातिपातो धर्मार्थपीडा स्त्रीव्यसनाद्भवेत्॥ पानदोषात्प्रणाशः कार्याकार्याद्यनिश्चयः॥ स्कंधावारनिवेशज्ञो निमित्तज्ञो
रिपुं जयेत्॥ स्कंधावारस्य मध्ये तु सकोशो नृपतेर्गृहं॥४२॥ मौलं भृतं श्रेणि सुहृद्द्विषदाटविकं बलं॥ राजहर्म्यं समावृत्य क्रमेण विनिवेशयेत्॥ सैन्यैकदेशः सन्नद्धः सेनापतिपुरःसरः॥ परिभ्रमेद्वहिश्चम
ण्डलेन बहिर्निशि॥४४॥ वार्ताः स्वाः कविजानीयुर्द्रसीमांतचारिणः॥ निर्गच्छेत्प्रविशेच्चैव सर्वे लोपलक्षितः॥ सामदानं च भेदश्च दंडोपेक्षेंद्रजालकं॥ मायोपायाः सप्त परे निक्षिपेत्साधनाय तान्॥४६॥
चतुर्विधं स्मृतं साम उपकारानुकीर्तनं॥ मिथः संबंधकथनं मृदुपूर्वं च भाषणं॥ आयतेर्दर्शनं वाचा तवाहमिति चार्पणं॥ यः संप्राप्तधनोत्सर्ग उत्तमाधममध्यमः॥४८॥ प्रतिदानं तदा तस्य गृहीतस्या
नुमोदनं॥ द्रव्यदानमपूर्वं च स्वयंग्राहप्रवर्तनं॥ देयस्य प्रतिमोक्षश्च दानं पंचविधं स्मृतं॥ स्नेहरागापनयनं संहर्षोत्पादनं तथा॥५०॥ मिथो भेदश्च भेदज्ञैर्भेदश्च त्रिविधः स्मृतः॥ वधोऽर्थहरणं
चैव परिक्लेशस्त्रिधा दमः॥ प्रकाशश्चाप्रकाशश्च लोकद्विष्टान् प्रकाशतः॥ उद्विजेत हतैर्लोकस्तेषु पांशुप्रशस्यते॥५२॥ विषेणोपनिषद्योगैर्हन्याच्छस्त्रादिना द्विषः॥ जातिमात्रं द्विजं नैव
हन्यात्सामोत्तरं वशी॥ प्रतिपन्निव चेतांसि द्रक्ष्यसाधुपि च लिवा॥ यस्त्वि वामृतं साम प्रयुंजीत प्रियं वचः॥५४॥ मिथ्याभिशस्तः श्रीकाम आहूयाप्रतिमानितः॥ अकारणात्परित्यक्तः कृतवैरो
पि सांत्वितः॥ हृतद्रव्यकलत्रश्च पूजार्हो प्रतिपूजितः॥ एतांस्तु भेदयेच्छत्रौ स्थितान्नित्यं सशंकितान्॥५६॥ आगतान् पूजयेत्कामैर्निजांश्च प्रशमं नयेत्॥ सामं तु सामसंधानमस्तु
त्तमभयदर्शनं॥ प्रधानदानमानं च भेदोपायाः प्रकीर्तिताः॥ मित्रं हर्तुं कापुरुषं प्रबुणज्यं विशीर्यते॥५८॥ त्रिशक्तिर्देशकालज्ञो दंडेनास्तं नयेदरीन्॥ मैत्रीप्रधानं कल्याणबुद्धिं सांत्वेन
साधयेत्॥ लुब्धं क्षीणं च दानेन मिथान्योन्यशंकया॥ दंडस्य दर्शनाद्दुष्टान् पुत्रभ्रात्रादि सामतः॥६०॥ दानभेदैश्चमूमुख्यान्योधाञ्जनपदादिकान्॥ सामंताटविकान्भेददंडाभ्यामपराद्धका
न्॥ देवताप्रतिमानां तु पूजयांतर्गतैर्नरैः॥ पुमान् स्त्रीवाससंवीतो निशि चाद्भुतदर्शनः॥६२॥ वेतालोल्कापिशाचानां शिवानां च सरूपकी॥ कामतो रूपधारित्वं शस्त्राग्न्यस्त्रांबुवर्षणं॥ त
मोनिलो नलो मेघ इति माया ह्यमानुषी॥ जघान कीचकं भीम आस्थितः स्त्रीस्वरूपतां॥६४॥ अन्याये व्यसने युद्धे प्रवृत्तस्यानिवारणं॥ उपेक्षेयं स्मृता भ्रातोपेक्षितश्च हिडिंबया॥ मेघांधका
रवृष्ट्यग्निपर्वताद्भुतदर्शनं॥ दूरस्थानां च सैन्यानां दर्शनं ध्वजशालिनां॥६६॥ छिन्नपाटितभिन्नानां संस्रुतानां च दर्शनं॥ इतींद्रजालं द्विषतां भीत्यर्थमुपकल्पयेत्॥ इत्याग्नेये सामादि॥
राम उवाच॥ षड्विधं तु बलं व्यूह्य देवान्प्रार्च्य रिपुं व्रजेत्॥ मौलं भृतं श्रेणि सुहृद्द्विषदाटविकं बलं॥ पूर्वं पूर्वं गरीयस्तु बलानां व्यसनं तथा॥ षडंगं मंत्रकोशाभ्यां पदात्यश्वरथद्विपैः॥२॥ नद्यद्रिव

२०

नदुर्गेषु प्रयत्नमयं समवेत्य सेनापतिस्तत्र तत्र गच्छेद्वृतः कृतैर्धनैः ॥ नायकः पुरतो यातः प्रवीरपुरुषावृतः ॥ मध्ये कलत्रं स्वामी च कोशः फल्गु च यद्बलं ॥४॥ पार्श्वयोरुभयोरश्वा वाजिनां पार्श्व
योरथाः ॥ रथानां पार्श्वयोर्नागा नागानां चाटवीबलं ॥ पश्चात्सेनापतिः सर्वं पुरस्कृत्य कृती स्वयं ॥ यायात्सन्नद्धसैन्यौघः खिन्नानाश्वासयञ्छनैः ॥६॥ यायाद्व्यूहेन महता मकरेण पुरो भये ॥
श्येनेनोद्धृतपक्षेण सूच्या वा वीरवक्त्रया ॥ पश्चाद्भये तु शकटं पार्श्वयोर्वज्रसंज्ञितं ॥ सर्वतः सर्वतोभद्रं भये व्यूहं प्रकल्पयेत् ॥८॥ कंदरे शैलगहने निम्नगावनसंकटे ॥ दीर्घाध्वनि परिश्रांतं क्षु
त्पिपासाहितक्लमं ॥ व्याधिदुर्भिक्षमरकपीडितं दस्युविद्रुतं ॥ पंकपांसुजलस्कंदं व्यस्तं पुंजीकृतं पथि ॥१०॥ प्रसुप्तं भोजने व्यग्रमभूमिष्ठमसंस्थितं ॥ चौराग्निभयवित्रस्तं वृष्टिवातसमा
हतं ॥ इत्यादौ स्वचमूं रक्षेत्परसैन्यं च घातयेत् ॥ विशिष्टो देशकालाभ्यां भिन्नारिप्रकृतिर्बली ॥१२॥ कुर्यात्प्रकाशयुद्धं हि कूटयुद्धं विपर्यये ॥ तेष्ववस्कंदकालेषु परं हन्यात्समाकुलं ॥ अभूमि
ष्ठं स्वभूमिष्ठः स्वभूमौ चोपजापतः ॥ प्रकृतिप्रग्रहाकृष्टं पार्श्वे च वनवादिभिः ॥१४॥ हन्यात्प्रवीरपुरुषैर्भंगदानापकर्षणैः ॥ पुरस्ताद्दर्शनं दत्वा तत्कृतस्थिरनिश्चयान् ॥ हन्यात्पश्चात्प्रवीरेण व
लेनोपेत्य वेगिना ॥ पश्चाद्वा संकुलीकृत्य हन्याच्छूरेण पूर्वतः ॥१६॥ आभ्यां पार्श्वाभिघातौ तु व्याख्यातौ कूटयोधने ॥ पुरस्ताद्विषमे देशे पश्चाद्धन्यात्तु वेगवान् ॥ पुरः पश्चात्तु विषमे एवमेव तु पा
र्श्वयोः ॥ प्रथमं योधयित्वा तु दूष्यामित्राटवीबलैः ॥१८॥ श्रांतं मंदं निराक्रंदं हन्यादश्रांतवाहनः ॥ दूष्यामित्रबलैर्वापि भंगं दत्वा प्रयत्नवान् ॥ जितमित्येव विश्वस्तं हन्यान्मंत्रव्यपाश्र
यः ॥ स्कंधावारपुरग्रामसस्यस्वामिप्रजादिषु ॥२०॥ विश्रंभितं परानीकमप्रमत्तो विनाशयेत् ॥ अथवा गोग्रहाकृष्टं तल्लक्ष्यं मार्गबंधनात् ॥ अवस्कंदभयाद्रात्रिप्रजागरकृतश्रमं ॥ दिवा
सुप्तं समाहन्यान्निद्राव्याकुलसैन्यकं ॥२२॥ निशि विश्रब्धसंसुप्तं नागैर्वा खड्गपाणिभिः ॥ प्रयाणे पूर्वयायित्वं वनदुर्गप्रवेशनं ॥ अभिन्नानामनीकानां भेदनं भिन्नसंग्रहः ॥ विभीषि
काद्वारघातं कोशरक्षेभकर्म च ॥२४॥ अभिन्नभेदनं भिन्नसंधानं रथकर्म च ॥ वनादिष्वार्गविचयो वीवधासाररक्षणं ॥ अनुयातापसरणे शीघ्रकार्योपपादनं ॥ दीनानुसरणं घातः को
टीनां जघनस्य च ॥२६॥ अश्वकर्माथ पत्तेश्च सर्वदा शस्त्रधारणं ॥ शिबिरस्य च मार्गादेः शोधनं विष्टिकर्म च ॥ सस्थूलस्थाणुवल्मीकवृक्षगुल्मापकंटकं ॥ सापसारा पदातीनां भूर्नाति
विषमा मता ॥२८॥ स्वल्पवृक्षोपला क्षिप्रलंघनीयनगा स्थिरा ॥ निःशर्करा विपंका च सापसारा च वाजिभूः ॥ निःस्थाणुवृक्षकेदारा रथभूमिरकर्दमा ॥ मर्दनीयतरुच्छेद्यव्रततिः पंकव
र्जिता ॥३०॥ निगुल्मागम्यशैला च विषमा गजमेदिनी ॥ उरस्यादीनि भिन्नानि प्रतिगृह्णन्बलानि हि ॥ प्रतिग्रह इति ख्यातो राजकार्यांतरक्षमः ॥ तेन शून्यस्तु यो व्यूहः स भिन्न इव लक्ष्यते ॥
३२॥ जयार्थी न च युध्येत मतिमानप्रतिग्रहः ॥ यत्र राजा तत्र कोशः कोशाधीना हि राजता ॥ योधेभ्यस्तु ततो दद्यात्किं हि दाता न युध्यते ॥ द्रव्यलक्षं राजघाते तदर्धं तत्सुतार्दने ॥३४॥ सेना
पतिवधे तद्वद्दद्याद्धस्त्यादिमर्दने ॥ तथा वा खलु युध्येरन्पत्त्यश्वरथदंतिनः ॥ यथा भवेदसंबाधो व्यायामविनिवर्तने ॥ असंकरेण युध्येरन्संकरः संकुलावहः ॥३६॥ महासंकुलयुद्धे
षु संश्रयेरन्मतंगजं ॥ अश्वस्य प्रतियोद्धारो भवेयुः पुरुषास्त्रयः ॥३७॥ इति कल्प्यास्त्रयः साश्वा विधेयाः कुंजरस्य तु ॥ पादगोपा भवेयुश्च पुरुषा दश पंच च ॥३८॥ विधा
नमिति नागस्य विहितं स्यंदनस्य च ॥ अनीकमिति विज्ञेयमिति कल्प्या वनद्विपाः ॥३९॥ तथानीकस्य च स्थानं तु यदर्धं प्रचक्षते ॥ इत्यनीकविभागेन स्थापये
द्व्यूहसंपदः ॥४०॥ उरस्य कक्ष पक्षांस्तु कल्प्यानेतान् प्रचक्षते ॥ उरः कक्षौ च पक्षौ च मध्यं पृष्ठं प्रतिग्रहः ॥४१॥ कोटिं च व्यूहशास्त्रज्ञैः सप्तांगो व्यूह उ
च्यते ॥ उरस्य कक्ष पक्षांस्तु व्यूहोयं सप्रतिग्रहः ४२ गुरोरेष च शुक्रस्य कक्षाभ्यां परिवर्जितः तिष्ठेयुः सेनापतयः प्रवीरैः पुरुषैर्वृताः ४३

अभेदेन च युध्येरन् रक्षेयुश्च परस्परं मध्यव्यूहे फल्गुसैन्यं युद्धवस्तु जघन्यतः ४४ युद्धं हि नायकप्राणं हन्यते
तदनायकं उरसि स्थापयेन्नागान् प्रचंडान् कक्षयो रथान् ४५ हयांश्च पक्षयोर्व्यूहो मध्यभेदी प्रकीर्तितः मध्यदे
शे हयानीकं रथानीकं च कक्षयोः ४६ पक्षयोश्च गजानीकं व्यूहोंतर्भेद्ययं स्मृतः रथस्थाने हयान् दद्यात् पदातीं
श्च हयाश्रये ४७ रथाभावे तु द्विरदान् व्यूहे सर्वत्र दापयेत् यदि स्याद्दंडबाहुल्यमाबाधः संप्रकीर्तितः ४८ मं
डलासंहतो भोगो दंडस्ते बहुधा शृणु तिर्यग्वृत्तिस्तु दंडः स्यात् भोगोन्यावृत्तिरेव च ४९ मंडलं सर्वतो वृत्तिः पृथ
ग्वृत्तिरसंहतः प्रदरो दृढकोसह्यः स्यात्पक्षैस्तु कुक्षिरेव च ५० प्रतिष्ठश्चाप्रतिष्ठश्च स्वनो विजय संजयो विशालो
विजयः स्थूणाकर्णचमूमुखौ ५१ सर्पास्यो वलयश्चैव दंडभेदाश्चतुर्दश अतिक्रांतः प्रतिक्रांतः कक्षाभ्यां
कक्ष पक्षतः ५२ अतिक्रांतस्तु पक्षाभ्यां त्रयोन्ये तद्विपर्यये । पक्षोरस्यैरतिक्रांतः प्रतिष्ठोन्यो विपर्ययः ५३ स्थूणा
पक्षो धनुःपक्षो द्विस्थूणो दंडऊर्ध्वगः द्विगुणो युध्यतिक्रांतः पक्षोन्यास्यविपर्ययः ५४ द्विचतुर्दंड इत्येते ज्ञेया
लक्षणतः क्रमात् गोमूत्रिका हंसचारी शकटो मकरस्तथा भोगभेदाः समाख्याता स्तथा रिपुपतंगकः दंडप
क्षौ युगोरस्यः शकटस्तद्विपर्यये ५६ मकरो व्यतिकर्णश्च शेषकुंजरवाजिभिः मंडलस्य द्विभेदौ तु सर्वतोभद्र
दुर्जयौ ५७ अष्टानीको द्वितीयस्तु प्रथमः सर्वतोमुखः अर्धचंद्रक ऊर्ध्वांगो वज्रभेदास्तु संहतेः ५८ तथा कर्क
टशृंगी च काकपादी च गोधिका त्रिचतुः पंचसैन्यानां ज्ञेया कारणभेदतः ५९ दंडस्य स्युः सप्तदश व्यूहा द्वौ मं
डलस्य च असंघातस्य षट् पंच भोगस्यैव तु संगरे ६० पक्षादीनामथैकेन हत्वा शेषैः परिक्षिपेत् उरसा वा
समाहत्य कोटिभ्यां परिवेष्टयेत् ६१ परे कोटी समाक्रम्य पक्षाभ्यामप्रतिग्रहात् कोटिभ्यां जघनं हन्यात् उरसा
च प्रपीडयेत् ६२ यतः फल्गु यतो भिन्नं यतश्चान्यैरधिष्ठितं ततश्चारिबलं हन्यादात्मनश्चोपबृंहयेत् ६३
सारं द्विगुणसारेण फल्गुसारेण पीडयेत् संहतं च गजानीकैः प्रचंडैर्दारयेद्बलं ६४ स्यात्कक्षपक्षोरस्यश्च
वर्तमानस्तु दंडकः तत्रयोप्रे गो दंडस्य स्थानं तुर्येण दर्शयेत् ६५ स्याद्दंडसमपक्षाभ्यामतिक्रांतः प्रदरकः
प भवेत्स[illegible] पक्षाभ्यामतिक्रांतो दृढः स्मृतः ६६ कक्षाभ्यां च प्रतिक्रांत व्यूहोऽसह्यः स्मृतो यथा कक्षः पक्षावव
स्थाप्योरस्यैः कांतश्च खातकः ६७ द्वौ दंडौ वलयः प्रोक्तो व्यूहो रिपुदारुणः दुर्जयश्चतुर्वलयः शत्रोर्बलवि

29

मर्दनः ६८ कक्षपक्षौस्ये र भोगोविषमंपरिवर्त्तयन् सर्वसारि गोमूत्री काशकटः शकटाकृतिः ६९ विपर्ययोमरः शोक्तः
सर्वशत्रुविमर्द्दकः स्यात्कक्षपक्षौरस्यानामेकीभावस्तुमंडलः ७० चक्रपद्मादयोभेदा मंडलस्यप्रभेदकाः एवंचसर्व
तोभद्रो वज्रो गो तार्क्ष्यकाकवत् ७१ अर्धचंद्रश्चश्रृंगाटोह्यचलोनामरूपतः व्यूहायथासुखंकार्याः शत्रूणांबलवार
णाः ७२ अग्निरुवाच रामस्तुरावणंहत्वा अयोध्यांप्राप्तवान् द्विज रामोक्तनीत्येंद्रजितं हतवान् लक्ष्मणः पुरा
७३ इत्याग्नेयेमहापुराणे रामोक्ताराजनीतिः

continued on fol. 23

22 blank

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक संग्रहालय

Continued from fol. 21. (22 blank)

कौ शमीं॒त्क्रामयानीतिः स्त्रीणांराजन्नृणांवदे लक्षणंयत्समुद्रेण गर्गायोक्तंयथा पुरा समुद्र उवाच पुंसांचलक्ष
णंवक्ष्येस्त्रीणांचैवशुभाशुभं एकाधिकोद्विशुक्लश्च त्रिगंभीरस्तथैवच त्रित्रिकस्त्रिप्रलंबश्च त्रिभिर्व्याप्नोति
यस्तथा त्रिवलीमांस्त्रिविनतस्त्रिकालज्ञश्चसुव्रत पुरुषस्यात् सुलक्षण्यो विपुलश्चतथात्रिषु चतुर्लेखस्तथा
यश्च तथैवच चतुःसमः चतुष्किष्कुश्चतुर्दंष्ट्रश्शुक्लः कृष्णस्तथैवच चतुर्गंधश्चतुर्ह्रस्वः सूक्ष्मो दीर्घश्चपं
चसु षडुन्नतोष्टवंशश्च सप्तस्नेहो नवामलः दशपद्मोदशवृहन्न्यग्रोधपरिमंडलः चतुर्दशसमद्वंद्वः षो
डशाक्षश्चशस्यते धर्मार्थकामसंयुक्तोधर्मोह्येकाधिकोमतः तारकाभ्यांविनानेत्रेशुक्लदंतोद्विशुक्लकः गंभी
रस्त्रिस्वरोनाभिः सत्त्वंचैकंत्रिकंस्मृतं अनसूयादयाक्षांतिर्मंगलाचारमुक्तता शौचस्पृहात्वकार्पण्यमनाया
सश्चशौर्यता त्रित्रिकास्त्रिप्रलंबस्याद्वृषणेभुजयोर्नरः दिग्देशजातिवर्णांश्च तेजसा यशसाश्रिया १०
व्याप्नोतियस्त्रिकव्यापी त्रिवलीमान्नरस्त्वसौ उदरेवलयस्तिस्रो नरंत्रिविनतंशृणु देवतानांद्विजानांच
गुरूणांप्रणतस्तुयः धर्मार्थकामकालज्ञस्त्रिकालज्ञोभिधीयते उरोललाटंवक्त्रंच त्रिविस्तीर्णोद्विलेखवान्
द्वौपाणी द्वौतथापादौ ध्वजछत्रादिभिर्युतौ अंगुल्योहृदयंपृष्ठं कटिः शस्तं चतुःसमं षण्णवत्यंगुलोत्सेधः
चतुष्किष्कुप्रमाणतः दंष्ट्राश्चतस्त्रश्चंद्राभाश्चतुष्कृष्णंवदामिते नेत्रतारेभ्रुवौश्मश्रु कृष्णाः केशास्तथैवच ना
सायांवदनेस्वेदे कक्षयोर्वदगंधकः ह्रस्वंलिंगंतथाग्रीवाजंघेस्याद्दृढह्रस्वकः सूक्ष्माण्यंगुलिपर्वाणि नखके
शद्विजत्वचः हनुर्नेत्रललाटेच नासादीर्घास्तनोतरं वक्षः कक्षौनखानासोन्नतंवक्त्रंकृकाटिका स्निग्धाः
त्वक्केशदंताश्चलोमदृष्टिर्नखाश्चवाक् जान्वोरूर्वंश्चपृष्ठस्य वंशौद्वौकरनासयोः नेत्रेनासापुटेकर्णौ
मेढ्रं पायुमुखेमलं जिह्वौष्ठेतालुनेत्रेतु हस्तपादौनखास्तथा शिश्नाग्रवक्त्रं शस्यंते पद्मभादशदेहिनां पा
णिपादंमुखंग्रीवाश्रवणेहृदयंशिरः ललाटपृष्ठमुदरं वृहंतः पूजितादश प्रसारितस्यह मध्यासाग्रहयों करं
तरं उच्छ्रायेणसमैयस्यन्यग्रोधपरिमंडलः पादौगुल्फौस्फिचौपार्श्वौवृषणौवंक्षणौकुचौ कर्णौ सुसक्थि
नीजंघेहस्तौबाहूतथाक्षिणी चतुर्दशसमद्वंद्व एतत्सामान्यतोनरः विद्याश्चतुर्दश[illegible] पर्यायैः षोड स्निग्धां ।व
शाक्षकः रूक्षंशिरा ततंगात्रमशुभंमांसवर्जितं दुर्गंधिविपरीतंयत् शस्तंदृष्यात्रसन्नयो धन्यस्यमधुरावा

22 blank

Dr. BHAU DAJI
डाक्टर भाऊदाजी स्मारकम्
MEMORIAL

Continued from fol. 21. (22 blank)

कौ शमीत्क्रामयानीतिः स्त्रीणां राजन्नृणां वदे लक्षणं यत्समुद्रेण गर्गायुक्तं यथा पुरा समुद्र उवाच पुंसां च लक्ष
णं वक्ष्ये स्त्रीणां चैव शुभाशुभं एकाधिको द्विशुक्लश्च त्रिगंभीरस्तथैव च त्रित्रिकस्त्रिप्रलंबश्च त्रिभिर्व्याप्नोति
यस्तथा त्रिवलीमांस्त्रिविनतस्त्रिकालज्ञश्च सुव्रत पुरुषस्यात् सुलक्षण्यो विपुलश्च तथा त्रिषु चतुर्लेखस्तथा
यश्च तथैव च चतुःसमः चतुष्किष्कुश्चतुर्दंष्ट्रश्चुक्लः कृष्णस्तथैव च चतुर्गंधश्चतुर्ह्रस्वः सूक्ष्मो दीर्घश्चिपं
चसु षडुन्नतोष्टवंशश्च सप्तस्नेहो नवामलः दशपद्मो दशव्यूहन्न्यग्रोधपरिमंडलः चतुर्दशसमद्वंद्वषो
डशाक्षश्च शस्यते धर्मार्थकामसंयुक्तो धर्मो ह्येकाधिको मतः तारकाभ्यां विना नेत्रे शुक्लदंतौ द्विशुक्लकः गंभी
रस्त्रिस्वरो नाभिः सत्त्वं चैकं त्रिकं स्मृतं अनसूयादयाक्षांतिर्मंगलाचारमुक्तता शौचस्पृहालकार्पण्यमनाया
सश्च शौर्यता त्रित्रिकस्त्रिप्रलंबस्याद् वृषणे भुजयोर्नरः दिग्देशजातिवर्णांश्च तेजसा यशसा श्रिया १०
व्याप्नोति यस्त्रिकव्यापी त्रिवलीमान्नरस्त्वसौ उदरे वलयस्तिस्रो नरं त्रिविनतं शृणु देवतानां द्विजानां च
गुरूणां प्रणतस्तु यः धर्मार्थकामकालज्ञस्त्रिकालज्ञोभिधीयते उरो ललाटं वक्त्रं च त्रिविस्तीर्णो द्विलेखवान्
द्वौ पाणी द्वौ तथा पादौ ध्वजछत्रादिभिर्युतौ अंगुल्यो हृदयं पृष्ठं कटिः शस्तं चतुःसमं षण्णवत्यंगुलोत्सेधः
चतुष्किष्कुप्रमाणतः दंष्ट्राश्चतस्रश्चंद्राभाश्चतुष्कृष्णं वदामि ते नेत्रतारे भ्रुवौ श्मश्रु कृष्णाः केशास्तथैव च ना
सायां वदने स्वेदे कक्षयोर्वै दर्गंधकः ह्रस्वं लिंगं तथा ग्रीवा जंघे स्याद्ध्रुद ह्रस्वकः सूक्ष्माण्यंगुलिपर्वाणि नखके
शद्विजत्वचः हनुर्नेत्रे ललाटं च नासा दीर्घास्तनांतरं वक्षः कक्षौ नखा नासोन्नतं वक्त्रं कृकाटिका स्निग्धाः
त्वक् केशदंताश्च लोमदृष्टिर्नखाश्च वाक् जान्वोरूवंशश्च पृष्ठस्य वंशौ द्वौ करनासयोः नेत्रे नासापुटे कर्णौ
मेढ्रं पायुमुखे मलं जिह्वौष्ठे तालु नेत्रे तु हस्तपादौ नखास्तथा शिश्नाग्रं वक्त्रं शस्यं ते पद्माभा दश देहिनां पा
णिपादं मुखं ग्रीवा श्रवणे हृदयं शिरः ललाटं पृष्ठमुदरं हृदंतः पूजिता दश प्रसारितस्य हमध्यासाग्रद्वयां करं
तरं उच्छ्रायेण समीयस्य न्यग्रोधपरिमंडलः पादौ गुल्फौ स्फिचौ पार्श्वौ वृषणौ वंक्षणौ कुचौ कर्णौ सुसक्थि
नी जंघे हस्तौ बाहू तथाक्षिणी चतुर्दश समद्वंद्व एतत्सामान्यतो नरः विद्याश्चतुर्दश पर्यर्युः षोड क्षिप्यां १ व
शाक्षकः रूक्षं शिरा ततं गात्रमशुभं मांसवर्जितं दुर्गंधि विपरीतं यत् शस्तं दृष्यात्र सन्नयो धन्यस्य मधुरा वा

23

णी गतिर्मत्तेभसंनिभा एककूपभवं रोम भयेरक्षासरूत्कै सेत्   इत्याग्नेये महापुराणे पुरुषलक्षणं· समुद्र उवाच· शस्ता
स्त्री चारु सर्वांगी मत्तमातंगगामिनी ऊरू जघना या च मत्तपारावतेक्षणा १ सुनीलकेशी तन्वंगी विलोमांगी मनोहरा समभूमि
स्पृशौ पादौ संहतौ च तथा स्तनौ २ नाभिः प्रदक्षिणावर्ता गुह्यमश्वत्थपत्रवत् गुल्फौ निगूढौ मध्येन नाभिरंगुष्ठमानिका जठरं
न लंबं च रोमरूक्षा न शोभना नर्क्षवृक्षनदीनाम्नी न सदा कलहप्रिया ४ न लोलुपा न दुर्भाषा शुभा देवादिपूजिका गंडैर्मधु
लो क पुष्पाभैर्न शिरालीन [illegible]मन्नरा ५ न संहतभ्रूः कुटिला पतिप्राणा पतिप्रिया अलक्षणापि लक्षण्या यत्राकारस्ततो गुणाः ६
भुवं कनिष्ठिका यस्या न स्पृशेन्मृत्युरेव सा   इत्याग्नेये स्त्रीलक्षणं·   अग्निरुवाच चामरो रुक्मदंडोऽग्र्यः छत्रं राज्ञः प्रशस्य
ते हंसपक्षैर्विरचितं मयूरस्य शुकस्य च १ पक्षैर्वाथ बलाकाया न कार्यं मिश्रपक्षकैः चतुरस्रं ब्राह्मणस्य छत्रं राज्ञश्च शुक्लकं
त्रिचतुः पंचषट्सप्त अष्टपर्वश्च दंडकः भद्रासनं क्षीरवृक्षैः पंचाशद्धस्तकोच्छ्रयैः ३ विस्तारेण त्रिहस्तं स्यात्स्वर्णाद्यैश्च वि
चित्रितं धनुर्द्रव्यं त्रयं लोहं शृंगि दारु द्विजोत्तम ज्याद्रव्यं त्रितयं चैव वंशभंगा त्वचस्तथा दारुचापप्रमाणं तु श्रेष्ठं हस्तचतुष्ट
यं ५ तदेव समहीनं तु प्रोक्तं मध्यकनीयसे मुष्टिग्राहनिमित्तानि मध्ये द्रव्याणि कारयेत् ६ स्वल्पकोटिस्त्वचा शृंगं शार्ङ्गं लोह
मये द्विज कामिनी भ्रूलताकारा कोटिः कार्या सुसंयुता पृथग्वा विप्र मिश्रं वा लोहं शार्ङ्गं तु कारयेत् शार्ङ्गं स मुचितं कार्यं रु —
क्मबिंदुविभूषितं कुटिलं स्फुटितं चापं सच्छिद्रं च न शस्यते सुवर्णं रजतं ताम्रं कृष्णायो धनुषि स्मृतं माहिषं शारभं शार्ङ्गं
तः रोहितं वा धनुः शुभं चंदनं वेतसं शालं धावनं ककुभं तरु[illegible] सर्वश्रेष्ठं धनुर्वंशैर्गृहीतैः शरदि श्रितैः पूजयेत्तु धनुः खड्गं
मंत्रैस्त्रैलोक्यमोहनैः ११ अयसश्चाथ वंशस्य शरस्याथ शराश्च ते ऋजवो हेमवर्णाभाः स्नायुश्लिष्टाः सुपत्रकाः १२ रुक्मपुं
खाः सुपुंखास्ते तैलधौताः सुवर्णकाः यात्रायामभिषेकाद्यैर्यजेद्बाण धनुर्मुखान् १३ सपताकास्त्र संग्राहः सांवत्सरकरान्वि
रे तः ब्रह्मा वै मेरुशिखरे स्वर्गगंगातटेऽयजत् १४ लोहदैत्यं स दृष्ट्वा विघ्नं यज्ञे तु चिंतयन् तस्य चिंतयतो वह्नेः पुरुषोऽभूद्बली द
महान् १५ ववंदे जं च तं देवा अभ्यनंदंत हर्षिताः तस्मात्स नंदकः खड्गो देवो को हरिरग्रहीत् १६ तं जग्राह गले देवो वि
कोशः सोऽभ्यपद्यत खड्गो नीलो रत्नमुष्टिस्ततोऽभूच्छतबाहुकः १७ दैत्यः स गदया देवान् द्रावयामास वै रणे विष्णुना
खड्गच्छिन्नानि दैत्यगात्राणि भूतले १८ पतितानि तु संस्पर्शात् नंदकस्य च तानि हि लोहभूतानि सर्वाणि हत्वा तस्मै ह
रिर्वरं १९ ददौ पवित्रमंग त आयुधाय भवद्भुवि हरिप्रसादात् ब्रह्मापि विना विघ्नं हरिं प्रभुं २० पूजयामास यज्ञेन
वक्ष्येऽथो खड्गलक्षणं खटीखट्टरजाताये दर्शनीयास्तु ते स्मृताः २१ कायच्छिदस्त्वार्षिकास्तु दृढाः शूर्पारकोद्भवाः
तीक्ष्णाच्छेदसहा वंगास्तीक्ष्णास्तु अंगदेशजाः २२ शतार्धमंगुलानां च श्रेष्ठं खड्गं प्रकीर्तितं तदर्धं मध्यमं ज्ञेयं त
तो हीनं न धारयेत् २३ दीर्घसुमधुरं शब्दं यस्य खड्गस्य सत्तम किंकिणीसदृशं तस्य धारणं श्रेष्ठमुच्यते २४ खड्गः

पद्मपत्राग्रो मंडलाग्रश्च शस्यते करवीरदलाग्राभो घृतगंधो वियत्प्रभः २५ समांगुलस्थाः शस्यंते वर्णाः खड्गे स्फुलिंगवत्
काकोलूकसुवर्णाभा विषमास्ते न शोभनाः २६ खड्गे न पश्येद्वदनं उच्छिष्टो न स्पृशेदसिं मूल्यं जातिं न कथयेत् निशि कुर्या
न्न शीर्षके   इत्याग्नेये महापुराणे शस्त्रलक्षणे   अग्निरुवाच रत्नानां लक्षणं वक्ष्ये रत्नं धार्यमिदं नृपैः वज्रं मरकतं
रत्नं पद्मरागं च मौक्तिकं १ इंद्रनीलं महानीलं वैडूर्यं गंधशस्यकं चंद्रकांतं सूर्यकांतं स्फटिकं पुलकं तथा [illegible] २ कर्केतरं पु
ष्यरागं तथा ज्योतिरसं द्विज स्फटिकं राजवर्त्तं च तथा राजमयं शुभं ३ सौगंधिकं तथा गाजं शंखब्रह्ममयं तथा गोमेदं रुधि
राक्षं च तथा भल्लातकं द्विज ४ धूलीमरकतं चैव तुत्थकं सीसमेव च पिलुं प्रवाहकं चैव गिरिवज्रं द्विजोत्तम ५ भुजंगमम
णिं चैव तथा वज्रमणिं शुभं टिट्टिभं च तथा पीतं भ्रामरं च तथोपलं ६ सुवर्णप्रतिरत्नानि रत्नानि श्रीजयारिके अंतः प्रभ
त्वं वैमल्यं सुसंस्थानत्वमेव च ७ सुधार्या नैव धार्यास्तु निष्प्रभा मलिनास्तथा खंडाः सशर्करा ये च प्रशस्तं वज्रधारणं ८ अं
भस्तरति यद्वज्रमभेद्यं विमलं च यत् षट्कोणं शक्रचापाभं लघु चार्कनिभं शुभं ९ शुकपक्षनिभः स्निग्धः कांतिमान् विमलस्त
था स्वर्णचूर्णनिभैः सूक्ष्मैर्यन्मारतबिंदुभिः १० स्फटिकाः पद्मरागास्तु रागवंतोऽतिनिर्मलाः जातरंगा भवंतीह कुरुविंदस
मुद्भवाः ११ सौगंधिकोत्थकाषायो मुक्ताफलास्तु शुक्तिजाः विमलास्तेभ्य उत्कृष्टा ये च शंखोद्भवा मुने १२ नागकुंभभवाश्चा
ग्र्याः कुंभसूकरमत्स्यजाः वेणुनागभवाः श्रेष्ठाः मौक्तिकं मेघजं वरं १३ वृत्तत्वं शुक्लता स्वाच्छ्यं महत्त्वं मौक्तिके गुणाः इंद्रनीलं
शुभं क्षीरे राजते भ्राजते स्थितं १४ रंजयेत् स्वप्रभावेन तममूल्यं विनिर्दिशेत् नीलरक्तं तु वैडूर्यं श्रेष्ठं हारादिकं भजेत् ॥
इत्याग्नेये महापुराणे रत्नपरीक्षा   ॥ अग्निरुवाच वास्तुलक्ष्म प्रवक्ष्यामि विप्रादीनां च भूरिद शुक्ला रक्ता तथा पी
ता कृष्णा चैव यथाक्रमं १ घृतरक्ता[illegible]न्नमद्यानां गंधाधारसतश्च भूः मधुरा च कषाया च आम्ला द्योषरसा क्रमात् २ [illegible]कुरौः
शरैस्तथा काशैः दूर्वाभिर्या च संश्रिता प्रार्च्य विप्रांश्च निःशल्यां खातपूर्वां तु कल्पयेत् ३ चतुःषष्टिपदं कृत्वा मध्ये ब्रह्मा चतु
ष्पदः प्राक् तेषां वै गृहस्वामी कथितस्तु तथार्यमा ४ दक्षिणेन विवस्वांश्च मित्रः पश्चिमतस्तथा उद[illegible]ङ् महीधरश्चैव
आपवत्सौ च वह्निगे ॥ ५ सावित्रश्चैव सविता जयेंद्रौ नैरृते बुधौ रुद्रव्याधी च वाय[illegible]व्ये पूर्वादौ कोणगाद्बहिः ६ महेंद्रश्च
रविः सोमो भृगुः पूर्वोथ दक्षिणे गृहक्षतो यमध्रतौ गंधर्वश्चाथ वारुणे ७ पुष्पदंतोसुरश्चैव वरुणो यक्ष एव च सौम्ये भल्ला
टसोमौ च अदितिर्धनदस्तथा ८ नागः करग्रहश्चैशे अष्टौ देवा दिशि स्मृताः आद्यंतौ तु तयोर्देवौ प्रोक्तावत्र ग्रहेश्वरौ ९ पर्ज
न्यः प्रथमो देवो द्वितीयश्च करग्रहः महेंद्ररविसत्याश्च भृशोऽथ गगनं तथा १० पवनः पूर्वतश्चैव अंतरिक्षं धनेश्वरौ आग्ने
ये चाथ नैरृत्ये मृगसुग्रीवकौ सुरौ ११ रोगो मुख्यश्च वाय[illegible]व्ये दक्षिपुष्पवितदौ गृहक्षतौ यमभृंगौ गंधर्वो मृगपैतृकः
१२ आप्ये दौवारिसुग्रीवौ पुष्पदंतोसुरो जलं यक्ष्मा रोगश्च शोषश्च उत्तरे नागराजकः १३ मुख्यो भल्लाट शशिनौ अदिति

28

श्च कुबेरकः नागोहुताशः श्रेष्ठो वैशाकस्सूर्यैश्च पूर्वतः १४ दक्षे गृहकृतः पुष्यः आस्येसुग्रीव उत्तमः पुष्पदंतोक्षुद्रकद्वारि
भल्लाटः पुष्पदंतकः १५ शिलेष्टकादिविन्यासं मंत्रैः प्रार्च्य सुरांश्चरेत् नंदेनंदयवासिष्ठे वसुभिः प्रजया सह जये भार्गवदायादे
प्रजानां जयमावह पूर्णे गिरसदायादे पूर्णकामं कुरुष्व मां १७ भद्रे काश्यपदायादे कुरु भद्रां मतिं मम सर्वबीज समायुक्ते स
र्वरत्नौषधैर्युते १८ रुचिरे नंदने नंदे वासिष्ठे रम्यतामिह प्रजापतिसुते देवि चतुरस्रे महीमये १९ सुभगे सुव्रते भद्रे गृहे का
श्यपि रम्यतां पूजिते परमाचार्यैर्गंधमाल्यैरलंकृते २० भवभूतिकरी देवि गृहे भार्गवि रम्यतां अव्यंगे चाक्षते पूर्णे मुने रंगि
रसः सुते २१ इष्टके लं प्रयच्छेष्टं प्रतिष्ठां कारयाम्यहं देशस्वामि पुरस्वामि गृहस्वामि परिग्रहे २२ मनुष्यधनहस्त्यश्व
पशुवृद्धिकरी भव गृहप्रवेशेपि तथा शिलान्यासं समाचरेत् २३ उत्तरेण शुभः प्लक्षो वटः प्राच्यां गृहादितः उदुंबरश्च
याम्येन पश्चिमे श्वत्थ उत्तमः २४ वामभागे तथोद्याने कुर्याद्वासं गृहे शुभं सायं प्रातस्तु धर्मांते शीतकाले दिनांतरे २५
वर्षा रात्रे भुवः शोषे सेक्तव्या रोपिता द्रुमाः विडंग घृतपंकाक्तान् सेचयेत् शीतवारिणा २६ फलनाशे कुलत्थैश्च मा
षैर्मुद्गैस्तिलैर्यवैः घृतशीतपयः सेकः फलपुष्पाय सर्वदा २७ मत्स्यांभसां तु सेकेन वृद्धिर्भवति शाखिनः अविकाजश
कृच्चूर्णं यवचूर्णं तिलानि च २८ गोमांसमुदकं चेति सप्तरात्रं निधापयेत् उत्सेकं सर्ववृक्षाणां फलपुष्पादिवृद्धिदं २९
मत्स्योदकेन शीतेन आम्राणां सेक उच्यते प्रशस्तं चाप्यशोकानां कामिनी पादताडनं ३० खर्जूरनारिकेलादेल
वणाद्भिर्विवर्धनं विडंगमत्स्यमांसाद्भिः सर्वेषां दोहदं शुभं ३१ इत्याग्नेये महापुराणे वास्त्वादि ॥
अग्निरुवाच पुष्पैस्तु पूजनाद्विष्णुः सर्वकार्येषु सिद्धिदः मालतीमल्लिकायूथी पाटला करवीरकं यावंतिरतिमुक्तश्च
कर्णिकारः कुरंटकः कुब्जकस्तगरो नीपो बाणो बर्बरमल्लिका अशोकस्तिलकः कुंदः पूजायै स्यात्तमालजं बिल्वपत्रं शमी
पत्रं पत्रं भृंगरजस्य तु ३ तुलसी कालतुलसी पत्रं वासकमर्चने केतकीपत्रपुष्पं च पद्मं रक्तोत्पलादिकं ४ नार्कोनोन्मत्तकं कां
वं चि पूजने गिरिमल्लिकाः कौटजं शाल्मलीपुष्पं कंटकारीभवं नहि ५ घृतप्रस्थेन विष्णोश्च स्नानं गोकोटिसत्फलं आढकेन
तु राजा स्यात् घृतक्षीरैर्दिवं व्रजेत् इत्याग्ने पुष्पादि पूजाफलं अग्निरुवाच चतुष्पादं धनुर्वेदं वेदे पंचविधं न्प
रथनागाश्वपत्तीनां योधांश्चाश्रित्य कीर्तितं १ यंत्रमुक्तं पाणिमुक्तं मुक्तसंधारितं तथा अमुक्तं बाहुयुद्धं च पंचधा तत्प्रकीर्ति
स्त्र तं २ तत्र शस्त्रास्त्रसंपत्त्या द्विविधं परिकीर्तितं ऋजुमायाविभेदेन भूयो द्विविधमुच्यते ३ क्षेपणी चापयंत्राद्यैर्यंत्रमुक्तं प्र
कीर्तितं शिलातोमरयंत्राद्यं पाणिमुक्तं प्रकीर्तितं ४ मुक्तसंधारितं ज्ञेयं प्रासाद्यमपि यद्भवेत् खड्गादिकममुक्तं च नियु
द्धं विगतायुधं ५ कुर्याद्योग्यानि पात्राणि योद्धुमिच्छुर्जितश्रमः धनुःश्रेष्ठानि युद्धानि प्रासमध्यानि तानि च ६ तानि ख

ड्गजघन्यानि बाहुप्रत्यवराणि च धनुर्वेदगुरुर्विप्रः प्रोक्तो वर्णद्वयस्य च ७ युद्धाधिकारः शूद्रस्य स्वयं चापादि शिक्षया देश
स्थैः शंकरै राज्ञः कार्या युद्धे सहायता ८ अंगुष्ठगुल्फपार्ष्ण्यंघ्रिः शिष्टाः स्युः सहिता यदि दृष्टं समपदं स्थानमेतद्वैशाखमु
च्यते ९ हंसपंक्त्याकृतिसमे दृश्येते यत्र जानुनी चतुर्वितस्तिविच्छिन्ने तदेतन्मंडलं स्मृतं १० हलाकृतिसमं यत्र यत्र जान्वूरु
दक्षिणे वितस्त्यः पंचविस्तारे तदालीढं प्रकीर्तितं ११ एतदेव विपर्यस्तं प्रत्यालीढमिति स्मृतं तिर्यग्भूतो भवेद्वामो दक्षिणो
पि भवेदृजुः गुल्फौ पार्ष्णिस्थितौ चैव स्थितौ पंचांगुलांतरौ स्थानं जातं भवेदेतद् द्वादशांगुलमायतं १३ ऋजुर्जानुर्भवेद्वा
मो दक्षिणोपि भवेदृजुः अथवा दक्षिणं जानु कुब्जं भवति निश्चलं १४ दंडायतो भवेदेष चरणः सहजानुना एवं विकटमु
द्दिष्टं द्विहस्तांतरमायतं १५ जानुनी द्विगुणे स्यातामुत्तानौ चरणावुभौ अनेन विधियोगेन संपुटं परिकीर्तितं १६ किंचि
द्विवर्तितौ पादौ समदंडायतौ स्थिरौ दृष्टमेव यथान्यायं षोडशांगुलमायतं १७ स्वस्तिकेनात्र कुर्वीत प्रणामं प्रथमं द्विज कार्मुकं
गृह्य वामेन बाणं दक्षिणकेन च १८ वैशाखे यदि वा याते स्थितो वाप्यथवायतो गुणात्तं तु ततः कृत्वा कार्मुकं प्रियकार्मुकः १९
अधः कोटिं तु धनुषः फलदेशं तु पत्रिणः धरण्यां स्थापयित्वा तु तुलयित्वा तथैव च २० भुजाभ्यां मत्रगुप्ताभ्यां प्रकोष्ठाभ्यां
शुभव्रत यस्य बाणं धनुःश्रेष्ठं पुंखदेशे च पत्रिणः २१ विन्यासो धनुषश्चैव द्वादशांगुलमंतरं ज्यया विशिष्टः कर्तव्यो ना
तिहीनो न चाधिकः निवेश्य कार्मुकं नाभ्यां नितंबे सशरं करं उत्क्षिपेदूर्ध्वतं हस्तमंतरेणाक्षिकर्णयोः २३ पूर्वेण मुष्टिना
ग्राह्यः स्तनाग्रे दक्षिणे शरः हरणं तु ततः कृत्वा शीघ्रं पूर्वं प्रसारयेत् २४ नाभ्यंतरा नैव बाह्या नोर्ध्वका नाधरा तथा न च कु
ब्जा न चोत्ताना लवणा नातिवेष्टिता २५ समाः स्थैर्यगुणोपेता पूर्वा दंडमिव स्थिताः छादयित्वा ततो लक्ष्यं पूर्वेणानेन मु
ष्टिना २६ उरसा तूत्थितो यंता त्रिकोणविनतस्थितः स्वस्थांशो निश्चलग्रीवो मयूरांचितमस्तकः २७ ललाटनासा
कुर्युरस्वसमं भवेत् अंतरं अंगुलं ज्ञेयं चुबुकं स्यासकस्य च २८ प्रथमं त्र्यंगुलं ज्ञेयं द्वितीयं द्व्यंगुलं स्मृतं त्रितीयं गु
लमुद्दिष्टमायतं चुबुकांसयोः २९ गृहीत्वा सायकं पुंखात् तर्जन्यांगुष्ठकेन तु अनामया पुनर्गृह्य तथा मध्यमयापि च
३० तावदाकर्षयेद्वेगात् यावद्बाणः सपूरितः एवंविधमुपक्रम्य मोक्तव्यं विधिवत्खगं ३१ दृष्टिमुष्टिहतं लक्ष्यं भिं
द्याद्बाणेन सुव्रत मुक्त्वा तु दक्षिणं हस्तं क्षिपेद्वेगेन पृष्ठतः ३२ एतदुच्छेदमिच्छंति ज्ञातव्यं हि त्वया द्विज कूर्परं तदधः
कार्यमाकृष्य तु धनुष्मता ३३ ऊर्ध्वं विमुक्तके कार्यमक्षिशिष्टं तु मध्यमं श्रेष्ठं प्रकृष्टं विज्ञेयं धनुःशास्त्रविशारद ३४ ज्ये
ष्ठस्तु सायको ज्ञेयो भवेद्द्वादशमुष्टिकः एकादश तथा मध्यः कनीयान् दशमुष्टिकः ३५ चतुर्हस्तं धनुःश्रेष्ठं त्रयः सा
र्धं तु मध्यमं कनीयस्तु त्रयः प्रोक्तं नित्यमेव पदातिनः ३६ अश्वे रथे गजे ज्येष्ठं तदेव परिकीर्तितं इत्याग्नेये ध

२५

नुर्वेदे अग्निरुवाच पूर्णायतं द्विजः कृत्वा ततो मासैर्गदायुधान् खलिधौतं धनुः कृत्वा यज्ञभूमौ विधानवत् १ ततो बाणं
समागृह्य दंशितः सुसमाहितः २ तूणमासाद्य बध्नीयात् दृढां कक्षां च दक्षिणां विलक्ष्यमपि तद्बाणं तत्र चैव सुसंस्थितं ३
ततः समुद्धरेद्बाणं तूणाद्दक्षिणपाणिना तेनैव सहितं मध्ये शरं संगृह्य धारयेत् ४ वामहस्तेन वै कक्षां धनुस्तस्मात्समुद्ध
रेत् सुनिषण्णमतिर्भूत्वा गुणे पुंखं निवेशयेत् ५ संपीड्य सिंहकर्णेन पुंखेनापि समं दृढं वामकर्णोपरिस्थश्च फलं वा
मस्य धारयेत् ६ वर्णान्मध्यमया तत्र वामांगुल्या च धारयेत् मनो लक्ष्यगतं कृत्वा मुष्टिना च विधानवित् ७ दक्षिणे गा
त्रभागे तु कृत्वा कर्णं विमोक्षयेत् ललाटपुटसंस्थानं दंडलक्ष्यं निवेशयेत् । ८ आकृष्य ताडयेत्तत्र चंद्रकं षोडशां
गुलं मुक्का बाणं ततः पश्चात् भद्रशिक्षस्तदा तया ९ निगृह्णीयान्मध्यमया ततोंगुल्या पुनः पुनः अक्षिलक्ष्यं क्षिपेत्तूणात् चतु
रस्रं च दक्षिणं १० चतुरस्रगतं वेध्यमभ्यसेच्चादितः स्थितं तस्मादनंतरं तीक्ष्णं परावृत्तगतं च यत् ११ निम्नमुन्नतवेधं च अभ्यसे
त्क्षिप्रकृत्ततः वेध्यस्थानेषु सर्वेषु सन्यस्य पुटकाद्धनुः १२ हस्तावापशतैश्चित्रैस्तर्जयेत् दुस्तरैरपि तस्मिन् वेध्यगते विप्र द्वे वे
ध्ये दृढसंज्ञके १३ द्वे वेध्ये दुष्करे वेध्ये द्वे तथा शीर्षे दुष्करे नतु निम्नं च तीक्ष्णं च दृढवेध्ये प्रकीर्तिते १४ निम्नं दुष्करमुद्दि
ष्टं वेध्यमूर्ध्वगतं च यत् मस्तकायनमध्ये तु चित्रदुष्करसंज्ञके १५ ननु निम्न एवं वेध्यगुणं कृत्वा दक्षिणेनोत्तरेण च आरो
हेत् प्रथमं वीरो जितलक्ष्यस्ततो नरः १६ एष एव विधिः प्रोक्तः तत्र दृष्टः प्रयोक्तृभिः अधिकं भ्रमणं तस्य तस्माद्द्विविधात् प्र
कीर्तितं १७ लक्ष्यं संयोजयेत्तत्र पत्रिपत्रगतं दृढं भ्रांतं प्रचलितं चैव स्थिरं यच्च भवेदिति १८ समंतात्ताडयेद्भीत्या छेदयेद्व्य
थयेदपि कर्मयोगविधानज्ञो ज्ञात्वैवं विधिमाचरेत् १९ मनसा चक्षुषा दृष्ट्या योगशिक्षुर्यमं जयेत् इत्याग्नेये महापुराणे धनु
र्वेदे ॥ अग्निरुवाच जितहस्तो जितमतिर्जितदृक् लक्ष्यसाधकः नियतां सिद्धिमासाद्य ततो वाहनमारुहेत् १ दृढाह
स्तो भवेत्ताद्वा रत्नः करमुखस्तथा गणकार्पासमूलानां भणस्त्वायूर्कचर्मिणां २ अन्येषां सुदृढानां च सुकृतं परिवेष्टितं तथा
त्रिंशत्समं पाशं बुधः कुर्यात् सुवर्तितं ३ कर्तव्यं शिक्षकैस्तस्य स्थानं लक्ष्याश्रुगैस्तथा वामहस्तेन संगृह्य दक्षिणेनोद्धरेत्ततः ४
कुंडलस्याकृतिं कृत्वा भ्राम्यैकं मस्तकोपरि क्षिपेत्तूणमये तूर्णं पुरुषे चर्मवेष्टिते ५ चलिते च प्लुते चैव तथा प्रव्रजिते षु च
समयोगविधिं कृत्वा प्रयुंजीत सुशिक्षितं ६ विजित्वा तु यथान्यायं ततो बंधं समाचरेत् कट्यां बध्वा ततः खड्गं वामपार्श्वविलं
बिनं दृढं विस्रव्य वामेन निष्कर्षेद्दक्षिणेन तु षडंगुलपरीणाहं सप्तहस्तसमुच्छ्रितं ८ अयोमय्यः शलाकाश्च कर्माणि विविधा
नि च अर्धहस्ते समे चैव तिर्यगूर्ध्वगतं तथा ९ योजयेद्विधिना येन तथा त्वं गदतः शृणु तं तु चर्मावनद्धांगं स्थापयित्वा नवं दृढं
१० करेणादाय लगुडं दक्षिणांगुल्यकांतरं उद्यम्य घातयेद्यस्य नाशस्तेन शिरो दृढं ११ उभाभ्यामथ हस्ताभ्यां कुर्यात्तस्य निपा
तनं अक्लेशेन ततः कुर्वन् वधे सिद्धिः प्रकीर्तिता १२ वाहानां श्रमकरणं प्रचारार्थं पुरा तव इत्याग्नेये महापुराणे धनुर्वेदे

अग्निरुवाच भ्रांतमुद्भ्रांतमाविद्धमाप्लुतं विप्लुतं स्रुतं संपातं समुदीर्णं च श्येनपातमथाकुलं १ उद्धूतमवधूतं च सव्यं दक्षि
णमेव च अनालक्षितविस्फोटौ करालेंद्रमहासुखौ २ विकरालनिपातौ च विभीषणभयानकौ समग्रार्धतृतीयांश पादपादार्ध
वारिजाः ३ प्रत्यालीढमथालीढं वराहं लुलितं तथा इति द्वात्रिंशतो ज्ञेयाः खड्गचर्मविधौ रणे ४ परावृत्तमपावृत्तं गृहीतं
लघुसंज्ञितं ऊर्ध्वोत्क्षिप्तमधःक्षिप्तं संधारितविधारितं ५ श्येनपातं गजपातं ग्राह्यग्राह्यं तथैव च एवमेकादशाविधाञ्ज्ञे
या पाशविधारणा ६ ऋज्वायतं विशालं च तिर्यक् भ्रामितमेव च विकर्तनं कर्तनं च चेककर्मेदमेव च ७ आस्फोटः क्ष्वेडणं भेद
पातं तोमरस्य प्रकीर्तितं ९ आहतं विप्र गोमूत्रं -- नकमलासनं ततोर्ध्वगात्रनमितं वामदक्षिणमेव च १० आवृत्तं च परावृत्तं
ग पादोद्धूतमवप्लुतं हंसमार्गं विमर्दं च गदाकर्म प्रकीर्तितं ११ करालमवघातं च दंशोपप्लुतमेव च क्षिप्तहस्तं स्थितं शून्यं परशो
स्तु विनिर्दिशेत् १२ ताडनं छेदनं विप्र तथा चूर्णनमेव च मुद्गरस्य तु कर्माणि तथा प्लवनघातनं १३ संभ्रांतमथ विभ्रांतं गोविसं
गं सुदुर्धरं भिंदिपालस्य कर्माणि लगुडस्य च तान्यपि १४ हरणं छेदनं घातो भेदनं रक्षणं तथा कृपाणकर्म निर्दिष्टं पातनं स्फो
टनं तथा १५ त्रासनं रक्षणं घातो बलोद्धरणमायतं क्षेपणीकर्म निर्दिष्टं यंत्रकर्म तथैव तु १६ सप्तांगमवदंशं च वराहोद्धृतकं
तथा हस्तावहस्तयालीकमेकहस्तावहस्तके १७ द्विहस्तबाहुपाशौ च कटिरेचितकोद्गते उरोललाटघातौ च भुजाविधमनं त
था १८ करोद्धृतं विमानं च पादाहति विपादकं गात्रसंश्लेषणं कांतं तथा गात्रविपर्ययः १९ ऊर्ध्वप्रहारं घातं च गोमूत्रं सव्यदक्षिणे
पारकं तारकं गंडं कबरीबंधमाकुलं २० तिर्यक्बंधमपामार्गं भीमवेगं सुदर्शनं सिंहाक्रांतं गजाक्रांतं गर्दभाक्रांतमेव च २१
गदाकर्माणि जानीयात् नियुद्धस्याथ कर्म च आकर्षणं विकर्षं बाहूनां नमनमेव च २२ ग्रीवाविपरिवर्तं च पृष्ठभागं सुदारुणं पर्या
सनविपर्यासौ पशुमारमजाविकं २३ पादप्रहारमास्फोटं कटिरेचितकं तथा गात्राश्लेषं स्कंधगतं महीव्याजनमेव च २४ देव
मार्गमधोमार्गममार्गगमनर्गलं उरोललाटघातं च विस्पष्टकरणं तथा २५ उद्धृतमवधूतं च तिर्यङ्मार्गगतं तथा गजस्कंध
मवक्षेपमवाङ्मुखकमेव च २६ यष्टिघातमवक्षेपो वसुधादारितं तथा जानुबंधं भुजाबंधं गात्रबंधं सुदारुणं २७ विष्ट
सोदरं शुभ्रं भुजावेष्टितमेव च संनद्धैः संयुगे भाव्यं सशस्त्रैः स्तैर्गजादिभिः २८ वरांकुशधरौ चोभौ एको ग्रीवागतोपरः स्कंध
गो द्वौ च धानुष्कौ द्वौ च खड्गधरौ गजे २९ रथे रथे गजे चैव तुरंगाणां त्रयं भवेत् धानुष्काणां त्रयं प्रोक्तं रक्षार्थं तुरगस्य च
३० धन्विनो रक्षणार्थाय चर्मिणां तु नियोजयेत् सुमंत्रैः शस्त्रमभ्यर्च्य शस्त्रं त्रैलोक्यमोहनं ३१ यो युद्धे याति स जयेदरीन् संपा
तयेद्ध्रुवं इत्याग्नेये महापुराणे धनुर्विद्यासमाप्ता अग्निरुवाच स्वामर्थं प्रवक्ष्यामि व्यवहारं प्रवक्ष्यामि नयानय

२६

विवेकरं सच्चतुष्पाच्चतुःस्थानश्चतुःसाधनउच्यते चतुर्हितश्चतुर्व्यापी चतुष्कारी च कीर्त्यते १ अष्टांगोष्टादशपदः शतशा
खस्तथैव च त्रियोनिर्व्यभियोगश्च द्विद्वारो द्विगतिस्तथा धर्मश्च व्यवहारश्च चरित्रं राजशासनं चतुष्पाद्व्यवहाराणामुत्तरः पूर्वसा
द्वितः धकः तत्र सत्ये स्थितो धर्मो व्यवहारस्तु साक्षिषु · चरित्रं संग्रहे पुंसां राजाज्ञायां तु शासनं ४ सामाद्युपायसाध्यत्वाच्चतुःसाधनउ
च्यते चतुर्णामाश्रमाणां च रक्षणात्स चतुर्हितः ५ कर्तारं साक्षिणश्चैव सभ्यान् राजानमेव च व्याप्नोति पादशो यस्मात् चतुर्व्यापी ततः
स्मृतः ६ धर्मस्यार्थस्य यशसो लोकपंक्तेस्तथैव च चतुर्णां करणादेष चतुष्कारी प्रकीर्तितः ७ राजा सपुरुषः सभ्याः शास्त्रं गणक
लेखकौ हिरण्यमग्निरुदकमष्टांगः समुदाहृतः ८ कामात्क्रोधाच्च लोभाच्च त्रिभ्यो यस्मात्प्रवर्तते त्रियोनिं कीर्त्यते तेन त्रयमेतद्विवाद
हृत् ९ व्यभियोगस्तु विज्ञेयः शंकातत्त्वाभियोगतः शंकासद्भिस्तु संसर्गात्तत्त्वं होढादिदर्शनात् १० पक्षद्वयाभिसंबंधात् द्विद्वारः समु
दाहृतः पूर्ववादस्तयोः पक्षः प्रतिपक्षस्त्वनंतरं ११ भूतच्छलानुसारित्वात् द्विगतिः समुदाहृतः ऋणं देयमदेयं च येन यत्र यथा च यत् १२
दानग्रहणधर्मश्च ऋणादानमिति स्मृतं स्वद्रव्यं यत्र विश्रंभात् निक्षिपत्यविशंकितः १३ निक्षेपं नाम तत्प्रोक्तं व्यवहारपदं बुधैः वणि
क्प्रभृतयो यत्र कर्म संभूय कुर्वते १४ तत्संभूतसमुत्थानं व्यवहारपदं विदुः दत्वा द्रव्यं च सम्यग्यः पुनरादातुमिच्छति १५ दत्ताप्रदानिकं
नाम तद्विवादपदं स्मृतं समुपस्थाय शुश्रूषां यस्तां न प्रतिपद्यते १६ अशुश्रूषामुपेत्यैतद्विवादपदमुच्यते भृत्यानां वेतनस्योक्तादानादा
दानविधिक्रिया १७ वेतनस्यानपाकर्म तद्विवादपदं स्मृतं निक्षिप्तं वा परद्रव्यं नष्टं लब्ध्वापहृत्य वा १८ विक्रीयते परोक्षं यत् स ज्ञेयो
ग स्वामिविक्रयः विक्रीय पण्यं मूल्येन क्रेत्रे यच्च न दीयते १९ विक्रीयासंप्रदानं तत् विवादपदमुच्यते क्रीत्वा मूल्येन यः पण्यं क्रेता न ब
यः हु मन्यते क्रीत्वा मूल्येन पुण्यं दुष्कृतं मन्यते क्रयी पाषंडनैगमादीनां स्थितिः समय उच्यते २१ समयस्यानपाकर्म तद्विवादपदं स्मृतं
सेतुकेदारमर्यादा विक्रुष्टाकृष्टनिश्चयाः २२ क्षेत्राधिकारे यत्र स्युर्विवादः क्षेत्रजस्तु सः वैवाहिको विधिः स्त्रीणां यत्र पुंसां च कीर्त्यते
२३ स्त्रीपुंसयोगसंज्ञं तु तद्विवादपदं स्मृतं विभागोऽर्थस्य पैत्र्यस्य पुत्रैर्यस्तु प्रकल्प्यते २४ दायभागमिति प्रोक्तं तद्विवादपदं बुधैः सहसा
क्रियते कर्म यत्किंचिद्बलदर्पितैः २५ तत्साहसमिति प्रोक्तं विवादपदमुच्यते देशजातिकुलादीनामाक्रोशासंगसंयुतं २६ यद्व
चः प्रतिकूलार्थं वाक्पारुष्यं तदुच्यते परगात्रेष्वभिद्रोहो हस्तपादायुधादिभिः २७ अग्न्यादिभिश्चोपघातैर्दंडपारुष्यमुच्यते अक्ष
वज्रशलाकाद्यैर्देवनं द्यूतमुच्यते २८ पशुक्रीडा वयोभिश्च प्राणिद्यूतसमाह्वयः प्रकीर्णकः पुनर्ज्ञेयो व्यवहारो निराश्रयः २९ राज्ञा
माज्ञाप्रतीघातस्तत्कर्मकरणं तथा व्यवहारोऽष्टादशपद एषां भेदोऽथ वै शतं ३० क्रियाभेदान्मनुष्याणां शतशाखो निगद्यते व्यवहारा
न्नृपः पश्येत् ज्ञानिविप्रैरगोपनः ३१ शत्रुमित्रसमाः सभ्या अलोभाः श्रुतिवेदिनः अपश्यता कार्यवशात् सभ्यैर्विप्रं नियोजयेत्
३२ रागाल्लोभाद्भयाद्वापि स्मृत्यपेतादिकारिणः सभ्याः पृथक् पृथक् दंड्या विवादाद्द्विगुणं दमं ३३ स्मृत्याचारव्यपेतेन मार्गेणाधर्षि
तः परैः आवेदयति यद्राज्ञे व्यवहारपदं हि तत् ३४ प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थिना समामासतदर्धाहर्नामजात्यादि
चिह्नितं ३५ श्रुतार्थस्योत्तरं लेख्यं पूर्वावेदकसंनिधौ ततोऽर्थी लेखयेत् सद्यः प्रतिज्ञातार्थसाधनं ३६ तत्सिद्धौ सिद्धिमाप्नोति

विपरीतमतोऽन्यथा चतुष्पाद्व्यवहारोऽयं विवादे षूपदर्शितः ३७ अभियोगमनिस्तीर्य नैनं प्रत्यभियोजयेत् अभियुक्तं च नान्येन नोक्तं वि
प्रकृतिं नयेत् ३८ कुर्यात्प्रत्यभियोगं तु कलहे साहसेषु च उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्यनिर्णये ३९ निह्नवे भावितो दद्यात् धनं राज्ञे
तु तत्समं मिथ्याभियोगी द्विगुणमभियोगाद्धनं वहेत् ४० साहसस्तेयपारुष्यगोभिशापात्यये स्त्रियः विचारयेत्सद्य एव कालोऽन्यत्रेच्छया स्मृतः ४१
देशाद्देशांतरं याति सृक्किणी परिलेढि च ललाटं स्विद्यते चास्य मुखं वैवर्ण्यमेव च ४२ स्वभावात् विकृतिं गच्छेत् मनोवाक्कायकर्मभिः अभि
योगे थ वा साक्ष्ये वाक्दुष्टः परिकीर्तितः ४३ संदिग्धार्थं स्वतंत्रो यः साधयेद्यश्च निष्पतेत् न चाहूतो वदेत्किंचित् हीनो दंड्यश्च स स्मृतः
४४ साक्षिषूभयतः सत्सु साक्षिणः पूर्ववादिनः पूर्वपक्षेऽधरीभूते भवंत्युत्तरवादिनः ४५ सपणश्चेद्विवादः स्यात्तत्र हीनं तु दापयेत् दंडं च
सपणं चैव धनिने धनमेव च ४६ छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः भूतमप्यनुपन्यस्तं हीयते व्यवहारतः ४७ निह्नुते लिखितानेक
मेकदेशविभावितं दाप्यः सर्वं नृपेणार्थी न ग्राह्यस्त्वनिवेदितः ४८ स्मृत्योर्विरोधे न्यायस्तु बलवान् व्यवहारतः अर्थशास्त्रात्तु बलवद्ध
र्मशास्त्रमिति स्थितिः ४९ प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितं एषामन्यतमाभावे दिव्यान्यतममुच्यते ५० सर्वेष्वेव विवादेषु
बलवत्युत्तरा क्रिया आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा ५१ पश्यतो ब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी परेण भुज्यमानाया धनस्य दशवार्षिकी ५२
आधिसीमोपनिक्षेपजडबालधनैर्विना तथोपनिधिराजस्त्रीश्रोत्रियाणां धनैरपि ५३ आध्यादीनां विहर्तारं धनिने दापयेद्धनं दंडं च तत्स
मं राज्ञे शक्त्यपेक्षमथापि वा ५४ आगमोऽप्यधिको भुक्तिं विना पूर्वक्रमागतां आगमोऽपि बलं नैव भुक्तिः स्तोकापि यद्भवेत् ५५ आगमेन विशुद्धेन
भोगो याति प्रमाणतां अविशुद्धागमो भोगः प्रामाण्यं नाधिगच्छति ५६ आगमस्तु कृतो येन सोऽभियुक्तः समुद्धरेत् न तत्सुतस्तत्सुतो वा
भुक्तिस्तत्र गरीयसी योऽभियुक्तः परेतः स्यात्तस्य रिक्थी तमुद्धरेत् न तत्र कारणं भुक्तिरागमेन विना कृता ५८ बलोपाधिविनिर्मुक्ता
न् व्यवहारान्निवर्तयेत् स्त्रीनक्तमंतरागारबहिःशत्रुकृतांस्तथा ५९ मत्तोन्मत्तार्तव्यसनी बालभीतः प्रयोजितः असंबद्धकृतश्चैव व्यवहा
रो न सिध्यति ६० प्रनष्टाधिगतं ज्ञेयं नृपेण धनिने धनं विभावयेन्न चेल्लिंगैस्तत्समं दंडमर्हति ६१ देयं चौरहृतं द्रव्यं राज्ञा जनपदाय तु
अशीतिभागो वृद्धिः स्यान्मासि मासि सबंधके ६२ वर्णक्रमाच्छतं द्वित्रिचतुःपंचकमन्यथा संततिस्तु पशुस्त्रीणां रसस्याष्टगुणा परा ६३ ॥ श्रु
न वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा तथा यामांतरात्तु दशकं सामुद्रादपि विंशतिः ६४ दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु प्रपन्नं
साधयन्नर्थं न वाच्यो नृपतेर्भवेत् साध्यमानो नृपं गच्छेत् दंड्यो दाप्यश्च तद्धनं ६५ इत्याग्नेये पुराणे व्यवहारे अग्निरुवाच गृहीतार्थः
क्रमाद्दाप्यो धनिनामधमर्णिकः दत्वा तु ब्राह्मणायादौ नृपतेस्तदनंतरं १ राज्ञाधमर्णिको दाप्यः साधिताद्दशकं शतं पंचकं च शतं दा
प्यः प्राप्तार्थो ह्युत्तमर्णकः २ हीनजातिं परिक्षीणमृणार्थं कर्म कारयेत् ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयं ३ दीयमानं न गृह्णाति प्र
युक्तं यः स्वकं धनं मध्यस्थस्थापितं तत्स्याद्वर्धते न ततः परं ४ ऋक्थग्राह ऋणं दाप्यो योषिद्ग्राहस्तथैव च पुत्रोऽनन्याश्रितद्रव्यः पुत्र
हीनस्य ऋक्थिनः ५ अविभक्तैः कुटुंबार्थं यदृणं तु कृतं भवेत् दद्युस्तद्रिक्थिनः प्रेते प्रोषिते वा कुटुंबिनि ६ न योषित्पतिपुत्राभ्यां न
पुत्रेण कृतं पिता दद्यादृते कुटुंबार्थान्न पतिः स्त्रीकृतं ७ गोपशौंडिकशैलूषरजकव्याधयोषितां ऋणं दद्यात्पतिस्तासां यस्माद्वृत्तिस्तदाश्रया
८ पितरि प्रोषिते प्रेते व्यसनाभिप्लुते पि वा पुत्रपौत्रैरृणं देयं निह्नवे साक्षिभावितं ९ सुराकामद्यूतकृतं दंडशुल्कावशिष्टकं वृथादानं तथै

24

वेह प्रचोदयान्न पैतकं भ्रातृणामथ दंपत्योः पितुः पुत्रस्य चैव हि प्रातिभाव्यमृणं साक्ष्यमविभक्तेन तत्स्मृतं दर्शने प्रत्ययेदाने प्रातिभाव्यं वि
धीयते आद्यौतु वितथे दाप्याविनरस्य सुता अपि १२ दर्शन प्रतिभूर्यत्र मृतः प्रात्ययिकोपि वा नतत्पुत्रा धनं दद्युर्दद्यु र्दानाय यः स्थितः
१३ बहवस्युर्यदि स्वांशैर्दद्युः प्रतिभुवो धनं एकछायाश्रितेष्वेषु धनिकस्य यथारुचि प्रतिभूर्दापितो यत्र प्रकाशं धनिने धनं द्विगुणं प्रति
दातव्यमृणिकैस्तस्य तद्भवेत् १५ ससंतति स्त्रीपशव्यं धान्यं द्विगुणमेव च वस्त्रं चतुर्गुणं प्रोक्तं रसश्चाष्टगुणस्तथा १६ आधिः प्रणश्ये
द्विगुणे धने यदि न मोक्ष्यते काले कालकृतो नश्येत् फलभोग्यो न नश्यति १७ गोप्याधिभोगि नो वृद्धिः सोपकारेथ हापिते नष्टो देयो
विनाशश्च देवराजकृतादृते आधेः स्वीकरणात्सिद्धिः रक्ष्यमाणोप्यसारतां यातश्चेदन्य आधेयो धनभाग्वा धनी भवेत् १९ चारि
त्रबंधककृतं सवृद्धं दापयेत् धनं सत्यंकारकृतं द्रव्यं द्विगुणं प्रतिदापयेत् २० उपस्थितस्य मोक्तव्य आधिर्दंडोन्यथा
भवेत् प्रयोजके सति धनं कुलेन्यस्याधिमाप्नुयात् २१ तत्कालकृतमूल्यो वा तत्र तिष्ठेदवृद्धिकः विना धारणकाद्वापि विक्रीणीते ससाक्षि
कं २२ यदा तु द्विगुणीभूतमृणमाधौ तदा खलु मोच्यश्चाधिस्तदुत्पाद्य प्रविष्टे द्विगुणे धने २३ व्यसनस्थमनाख्याय हस्तेन्यस्य
यदर्पयेत् द्रव्यं तदौपनिधिकं प्रतिदेयं तथैव तत् २४ न दाप्यो पहृतं तत्तु राजदैविकतस्करैः भ्रेषश्चेन्मार्गिके दत्ते दाप्यो दंडं च तत्समं
२५ आजीवन् स्वेच्छया दंड्यो दाप्यस्तं चापि सोदयं याचितान्वाहितन्यासे निक्षेपेष्वप्ययं विधिः इत्याग्नेये महापुराणे व्यवहारे ग ६५
अग्निरुवाच तपस्विनो दानशीलाः कुलीनाः सत्यवादिनः धर्मप्रधाना ऋजवः पुत्रवंतो धनान्विता १ पंचयज्ञक्रियायुक्ताः साक्षिणः
पंच वा त्रयः यथाजाति यथावर्णं सर्वे सर्वेषु वा स्मृताः २ स्त्रीवृद्धबालकितवमत्तोन्मत्ताभिशस्तकाः रंगावतारि पाषंडि कूटकृद्विक
लेंद्रियाः ३ पतिताप्तार्थसंबंधिसहायरिपुतस्कराः असाक्षिणः सर्वसाक्षि चौर्यपारुष्यसाहसे ४ उभयानुमतः साक्षी भवत्येको
पि धर्मवित् अब्रुवन् हि नरः साक्ष्यमृणं सदशबंधकं ५ राज्ञा सर्वं प्रदाप्यः स्यात् षट्चत्वारिंशमेहनि न ददाति हि यः साक्ष्यं जान
न्नपि नराधमः स कूटसाक्षिणां पापैस्तुल्यो दंडेन चैव हि साक्षिणः श्रावयेद्वादिप्रतिवादिसमीपगान् ७ ये पातककृतां लोका महापा
तकिनां तथा अग्निदानां च ये लोका ये च स्त्रीबालघातिनां ८ तान् सर्वान् समवाप्नोति यः साक्ष्यमनृतं वदेत् सुकृतं यत्त्वया किंचित्
जन्मांतरशतैः कृतं तत्सर्वं तस्य जानीहि यं पराजयसे मृषा द्वैधे बहूनां वचनं ग्राह्यं येगुणवत्तराः यस्योचुः साक्षिणः सत्यां प्रतिज्ञां
स जयी भवेत् ११ अन्यथा वादिनो यस्य ध्रुवं तस्य पराजयः उक्तेपि साक्षिभिः साक्ष्ये यद्यन्ये गुणवत्तराः द्विगुणा वान्यथा ब्रूयुः
कूटाः स्युः पूर्वसाक्षिणः पृथक् पृथग् दंडनीयाः कूटकृत्साक्षिणस्तथा १३ विवादाद्द्विगुणं द्रव्यं विवास्यो ब्राह्मणः स्मृतः यः साक्ष्यं श्रा
वितोन्येभ्यो निह्नुते तत्तमोवृतः १४ स दाप्योष्टगुणं दंडं ब्राह्मणं तु विवासयेत् वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेत् १५ यः कश्चि
दर्थोभिमतः स्वरुच्या तु परस्परं लेख्यं तु साक्षिमत्कार्यं यस्मिन् धनिकपूर्वकं समामासतदर्धाहर्नामजातिस्वगोत्रकैः सब्रह्मचा
रिकात्मीयपितृनामादिचिह्नितं १७ समाप्तेर्थे ऋणी नाम स्वहस्तेन निवेशयेत् मतं मेमुकपुत्रस्य यदत्रोपरि लेखितं १८ साक्षि
णश्च स्वहस्तेन पितृनामकपूर्वकं अत्राहममुकः साक्षी लिखेयुरिति ते समाः १९ अलिपिज्ञो ऋणी यः स्यात् लेखयेत् स्वमतं तु सः
प साक्षी वा साक्षिणान्येन सर्वसाक्षिसमीपतः २० उभयाभ्यर्थितेनैतन्मया ह्यमुकसूनुना लिखितं ह्यमुकेनेति लिखितार्थं ततोन

येत् विनापि साक्षिभिर्लेख्यं स्वहस्तलिखितं च यत् तत्प्रमाणं स्मृतं सर्वं बलोपधिकृतादृते २२ ऋणं लेख्यकृतं देयं पुरुषैः स्त्रीभिरेव तु आधिस्तु
भुज्यते तावद्यावत्तन्न प्रदीयते २३ देशांतरस्थे दुर्लेख्ये नष्टोन्मृष्टे हृते तथा भिन्ने छिन्ने तथा दग्धे लेख्यमन्यत्तु कारयेत् २३ संदिग्धार्थविशुद्ध्य
र्थं स्वहस्तलिखितं तु यत् युक्तिप्राप्तिक्रियाचिह्नसंबंधागमहेतुभिः लेख्यस्य पृष्ठेभिलिखेत् प्रविश्य मधमर्णिना धनी चोपगतं दद्यात् स्वहस्त
परिचिह्नितं १२६ तन्न्यर्णे पाटयेल्लेख्यं शुद्ध्यै वान्यत्तु कारयेत् साक्षिमच्च भवेद्यत्तु तद्दातव्यं ससाक्षिकं २७ तुलाग्न्यापो विषं कोशो दिव्यानीह
विशुद्धये महाभियोगेष्वेतानि शीर्षकस्थेभियोक्तरि २८ रुच्या वान्यतरः कुर्यात् अपरो वर्तयेच्छिरः विनापि शीर्षकात् कुर्यात् नृपद्रोहेथ पा
तके २९ नासहस्राद्धरेत्फालं न तुलां न विषं तथा नृपार्थेष्वपि योगेषु वहेयुः शुचयः सदा सहस्रार्थे तुलादीनि कोशमल्पेपि दापयेत् शताद्दंडदा
पयेच्छुद्धमशुद्धो दंडभाग्भवेत् ३१ सचैलस्नानमाहूय सूर्योदय उपोषितं कारयेत् सर्वदिव्यानि नृपब्राह्मणसन्निधौ ३२ तुला स्त्रीबालवृद्धां
धपंगुब्राह्मणरोगिणां अग्निर्जलं वा शूद्रस्य यवाः सप्त विषस्य च ३३ तुलाधारणवि[illegible] द्भिरभियुक्तस्तुलास्थितः प्रतिमानसमीभू
तो लेखं कृत्वावतारितः ३४ आदित्यचंद्रावनिलोनलश्च द्यौर्भूमिरापो हृदयं यमश्च अहश्च रात्रिश्च उभे च संध्ये धर्मश्च जानाति नरस्य वृत्तं
३५ त्वं तुले सत्यधामासि पुरा देवैर्विनिर्मिता सत्यं वदस्व कल्याणि संशयान्मां विमोचय ३६ यद्यस्मि पापकृन्मातः ततो मां त्वमधो नय शु
द्धश्चेद्गमयोर्ध्वं मां तुलामित्यभिमंत्रयेत् ३७ करौ विमृदितव्रीहीलक्षयित्वा ततोन्यसेत् सप्ताश्वत्थस्य पत्राणि तावत्सूत्रेण वेष्टयेत् ३८ त्वमेव
सर्वभूतानामंतश्चरसि पावक साक्षिवत्पुण्यपापेभ्यो ब्रूहि सत्यं कवे मम ३९ तस्येत्युक्तवतो लोहं पंचाशत्पलिकं समं अग्निवर्णं न्यसेत् पिंडं हस्त
योरुभयोरपि ४० स तमादाय सप्तैव मंडलानि शनैर्व्रजेत् षोडशांगुलकं ज्ञेयं मंडलं तावदंतरं ४१ मुक्त्वाग्निं मृदितव्रीहिर दग्धः शुद्धिमाप्नुया
त् अंतरा पतिते पिंडे संदेहे वा पुनर्हरेत् ४२ पवित्राणां पवित्रं त्वं शोध्यं शोधय पावन सत्येन माभिरक्षस्व वरुणेत्यभिशाप्य कं ४३ नाभिदघ्नो
दकस्थस्य गृहीत्वोरू जलं विशेत् समकालमिषुं मुक्तमानीयान्यो जवान्नरः ४४ इति तस्मिन्निमग्नांगं पश्येच्चेत् स शुद्धिमाप्नुयात् त्वं विष ब्रह्म
णः पुत्र सत्यधर्मे व्यवस्थितः ४५ त्रायस्वास्मादभीशापात् सत्येन भव मेमृतं एवमुक्त्वा विषं शांगं भक्षयेत् हिमशैलजं ४६ यस्य वेगैर्विना जीर्णं
शुद्धिं तस्य विनिर्दिशेत् देवानुग्रान् समभ्यर्च्य तत्स्नानोदकमाहरेत् ४७ संस्राव्य पाययेत्तस्मात् जलात्तु प्रसृतित्रयं आचतुर्दशमादह्नो
यस्य नो राजदैविकं ४८ व्यसनं जायते घोरं स शुद्धः स्यादसंशयं सत्यवाहनशस्त्राणि गोबीजकनकानि च ४९ देवतागुरुपादांश्च इष्टापू
र्तकृतानि च इत्येते सुकराः प्रोक्ताः शपथाः स्वल्पसंशये ५० इत्याग्नेये दिव्यानि प्रमाणानि अग्निरुवाच विभागं चेत्पिता कुर्यादिच्छ
या विभजेत्सुतान् ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा स्युः समांशिनः १ यदि दद्यात्समानांशान् कार्याः पत्न्यः समांशिकाः न दत्तं स्त्रीधनं यासां भर्त्रा
वा श्वशुरेण वा २ शक्तस्यानीहमानस्य किंचिद्दत्वा पृथक्क्रिया न्यूनाधिकविभक्तानां धर्म्यः पितृकृतः ३ विभजेयुः सुताः पित्रो
× रूर्ध्वमृक्थमृणं समं मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेन्वयः ४ पितृद्रव्याविनाशेन यदन्यत्स्वयमार्जयेत् मैत्रमौद्वाहिकं चैव दाया
दानां न तद्भवेत् ५ सामान्यार्थसमुत्थेन विभागस्तु समः स्मृतः अनेकपितृकाणां तु पितृतो भागकल्पना ६ भूर्या पितामहोपात्ता निबंधो द्रव्य
मेव वा तत्र स्यात् सदृशं स्वाम्यं पितुः पुत्रस्य चोभयोः ७ विभक्तेषु सुतो जातः सवर्णायां विभागभाक् दृश्याद्वा तद्विभागः स्यादायव्ययविशोधि
तात् क्रमादभ्यागतं द्रव्यं हृतमभ्युद्धरेच्च यः दायादेभ्यो न तद्द्याद्विद्यया लब्धमेव च ९ पितृभ्यां यस्य यद्दत्तं तत्तस्यैव धनं भवेत् पितुरू

28

र्ध्वं विभजतां माताप्यंशं समं हरेत् १० असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः भगिन्यश्च निजादंशात् दत्वांशं तु तुरीयकं ११ चतुस्त्रिद्व्येकभागा
नां वर्णशो ब्राह्मणात्मजाः क्षत्रजास्त्रिद्विरेकांशा विज्यास्तु द्व्येकभागिकाः १२ अन्योन्यापहृतं द्रव्यं विभक्ते यत्तु दृश्यते तत्पुनस्ते समैरंशैर्विभ
जेरन्निति स्थितिः १३ अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः उभयोरप्यसावृक्थी पिंडदाता च धर्मतः १४ औरसो धर्मपत्नीजः तत्समः पुत्रि
कासुतः क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा १५ गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः कानीनः कन्यकाजातः मातामहसुतो यतः १६
क्षतायामक्षतायां वा जातः पौनर्भवः सुतः दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत् १७ क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात् स्वयं कृतः द
त्तात्मा तु स्वयं दत्तो गर्भविन्नः सहोढजः १८ उत्सृष्टो गृह्यते यस्तु सोऽपविद्धो भवेत्सुतः पिंडदोंशहरश्चैषां पूर्वाभावे परापरः १९ सजातीये
ष्वयं प्रोक्तस्तनयेषु मया विधिः जातोपि दास्यां शूद्रस्य कामतोंशहरो भवेत् २० मृते पितरि कुर्युस्तं भ्रातरस्त्वर्धभागिकं अभ्रातृको हरेत्स
र्वं दुहितॄणां सुतादृते २१ पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा तत्सुतो गोत्रजो बंधुः शिष्यः सब्रह्मचारिणः २२ एषामभावे पूर्वस्य धन
भागुत्तरोत्तरः स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः २३ वानप्रस्थयतिब्रह्मचारिणां ऋक्थभागिनः क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेक
तीर्थिनः संसृष्टिनस्तु संसृष्टिः सोदरस्य तु सोदरः दद्याच्चापहरेच्चांशं जातस्य च मृतस्य च २५ अन्योदर्यस्तु संसृष्टी नान्योदर्यधनं हरेत्
असंसृष्ट्यपि वादद्यात् सोदर्यो नान्यमातृजः २६ पतितस्तत्सुतः क्लीबः पंगुरुन्मत्तको जडः अंधोऽचिकित्स्यरोगी च भर्तव्यास्तु निरंशकाः
२७ औरसः क्षेत्रजस्त्वेषां निर्दोषा भागहारिणः सुताश्चैषां प्रभर्तव्या यावद्वै भर्तृसात्कृताः २८ अपुत्रा योषितश्चैषां भर्तव्याः साधुवृत्तयः
निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च २९ पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतं आधिवेदनिकं चैव स्त्रीधनं परिकीर्तितं ३०
बंधुदत्तं तथा शुल्कं मन्वाधेयकमेव च अप्रजायामतीतायां बांधवास्तदवाप्नुयुः ३१ अप्रजस्त्रीधनं भर्तुर्ब्राह्मादिषु चतुर्ष्वपि दुहि
तॄणां प्रसूता चेच्छेषेषु पितृगामि तत् ३२ दत्वा कन्यां हरन् दंड्यो व्ययं दद्याच्च सोदयं मृतायां दत्तमादद्यात् परिशोध्योभयव्ययं ३३
दुर्भिक्षे धर्मकार्ये च व्याधौ संप्रतिरोधके गृहीतं स्त्रीधनं भर्ता न स्त्रियै दातुमर्हति ३४ अधिवित्तस्त्रियै दद्यात् आधिवेदनिकं समं न दत्तं स्त्री
धनं यस्यै दत्ते त्वर्धं प्रकीर्तितं ३५ विभागनिह्नवे ज्ञातिबंधुसाक्ष्यभिलेखितैः विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः ३६ इत्याग्नेये
महापुराणे दायविभागे । अग्निरुवाच सीम्नो विवादे क्षेत्रस्य सामंताः स्थविरा गणाः गोपाः सीमाकृषीणां ये सर्वे च वनगोचराः १ नयेयुरे
ते सीमानं स्थलांगारतुषद्रुमैः सेतुवल्मीकनिम्नास्थिचैत्याद्यैरुपलक्षितं २ सामंता वा समग्रामाश्चत्वारोष्टौ दशापि वा रक्तस्रग्वसनाः
सीमां नयेयुः क्षितिधारिणः ३ अनृते तु पृथग्दंड्या राज्ञा मध्यमसाहसं अभावे ज्ञातृचिह्नानां राजा सीम्नः प्रवर्तकः ४ आरामा त्वा
यतनग्रामनिपानोद्यानवेश्मसु एष एव विधिर्ज्ञेयो वर्षांबुप्रवहेषु च ५ मर्यादायाः प्रभेदे तु क्षेत्रस्य हरणे तथा मर्यादायाश्च
दंड्यास्तु उत्तमाधममध्यमाः ६ न निषेध्योल्पबाधस्तु सेतुः कल्याणकारकः परभूमिं हरन् कूपः स्वल्पक्षेत्रो बहूदकः स्वामिनोऽप्र
निवेद्य क्षेत्रे सेतुं प्रकल्पयेत् उच्छिन्नो स्वामिनो भोगस्तदभावे महीपतेः ८ फालाहतमपि क्षेत्रं यो न कुर्यान्न कारयेत् सं प्रदाप्या
कृष्टफलं क्षेत्रमन्येन कारयेत् ९ माषानष्टौ तु महिषी सस्यघातस्य कारिणी दंडनीया तदर्धं तु गौस्तदर्धमजाविका १० भक्षयि
त्वोपविष्टानां द्विगुणो वसतां दमः सममेषां विधीयेत खरोष्ट्रं महिषीसमं ११ यावत्सस्यं विनश्येत्तु तावत् क्षेत्री फलं लभेत् पालस्ता

Dr. BHAU DAJI MEMORIAL

ड्योथ गोमी तु पूर्वोक्तं दंडमर्हति १२ पथि ग्रामविवीतांते क्षेत्रे दोषो न विद्यते अकामतः कामचारे चोरवद्दंडमर्हति १३ महोक्षोत्सृष्टपशवः सूतिकाग
तुकी च गौः पालाये यां तु ने मोच्या दैवराजपरिप्लुताः १४ यथार्पितान् पशून् गोपः सायं प्रत्यर्पयेत्तथा प्रमादमृतनष्टांश्च प्रदाप्यः कृतवेतनः १५
पालदोषविनाशे तु पाले दंडो विधीयते अर्धत्रयोदशपणः स्वामिने द्रव्यमेव च १६ स्वामीच्छया गोप्रचारो भूमिराजवशेन वा द्विजस्तृणैधः पु
सर्वतः सर्वदा हरेत् १७ धनुःशतं परीणाहे ग्रामक्षेत्रांतरं भवेत् द्वे शते खर्वटस्य स्यान्नगरस्य चतुःशतं १८ स्वं लभेतान्यविक्रीतं क्रेतुर्दोषो
प्रकाशिते हीनाद्रहो हीनमूल्ये वेलाहीने च तस्करः १९ नष्टापहृतमासाद्य हर्तारं ग्राहयेन्नरं देशकालातिपत्तौ वा गृहीत्वा स्वयमर्पयेत्
२० विक्रेतुर्दर्शनाच्छुद्धिः स्वामी द्रव्यं नृपो दमं क्रेता मूल्यं समाप्नोति तस्माद्यस्तत्र विक्रयी २१ आगमेनोपभोगेन नष्टं भाव्यमतो
न्यथा पंचबंधो दमस्तस्य राज्ञस्तेनाप्यभाविते २२ हृतं प्रनष्टं यो द्रव्यं परहस्तादवाप्नुयात् अनिवेद्य नृपे दंड्यः स तु षण्णवतिं पणा
न् २३ शौल्किकैः स्थानपालैर्वा नष्टापहृतमाहृतं अर्वाक्संवत्सरात्स्वामी लभते परतो नृपः २४ पणानेकशफे दद्यात् चतुरः पंच मानुषे
महिषोष्ट्रगवां द्वौ द्वौ पादं पादमजाविके २५ स्वकुटुंबाविरोधेन देयं दारसुतादृते नान्वये सति सर्वस्वं देयं यच्चान्यसंश्रुतं २६ प्रतिग्रहः प्र
काशः स्यात् स्थावरस्य विशेषतः देयं प्रतिश्रुतं चैव दत्वा नापहरेत्पुनः २७ दशैकपंचसप्ताहमासत्र्यहार्धमासिकं बीजायोवाह्यरत्नस्त्री
दोह्यपुंसां परीक्षणं २८ अग्नौ सुवर्णमक्षीणं द्विपलं रजते शते अष्टौ त्रपुणि सीसे च ताम्रे पंच दशायसि २९ शते दशपला वृद्धिरौर्णकार्पा
सिके तथा मध्ये पंचपला ज्ञेया सूक्ष्मे तु त्रिपला मता ३० कार्मिके रोमबद्धे च त्रिंशद्भागः क्षयो मतः न क्षयो न च वृद्धिस्तु कौशेये वल्कलेषु च ३१
देशं कालं च भोगं च ज्ञात्वा नष्टे बलाबलं द्रव्याणां कुशला ब्रूयुर्यत्तद्दाप्यमसंशयं ३२ बलाद्दासीकृतश्चौरैः क्रीतश्चापि विमुच्यते स्वा
मि प्राणप्रदो भक्तत्यागान्निष्क्रयणादपि ३३ प्रव्रज्यावसितो राज्ञो दास आमरणांतिकात् वर्णानामानुलोम्येन दास्यं न प्रतिलोमतः
३४ कृतशिल्पोपि निवसेत् कृतं कालं गुरोर्गृहे अंतेवासी गुरुप्राप्तभोजनस्तत्फलप्रदः ३५ राजा कृत्वा पुरे स्थानं ब्राह्मणान्न्यस्य तत्र
तु त्रैविद्यं वृत्तिमद्ब्रूयात् स्वधर्मः पाल्यतामिति ३६ निजधर्माविरोधेन यस्तु सामयिको भवेत् सोपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च
यः ३७ गणद्रव्यं हरेद्यस्तु संविदं लंघयेच्च यः सर्वस्वहरणं कृत्वा तं राष्ट्राद्विप्रवासयेत् ३८ कर्तव्यं वचनं सर्वैः समूहहितवादिभिः
यस्तत्र विपरीतः स्यात्स दाप्यः प्रथमं दमं ३९ समूहकार्यप्रहितो यल्लभेत तदर्पयेत् एकादशगुणं दाप्यो यद्यसौ नार्पयेत्स्वयं
४० वेदज्ञाः शुचयो लुब्धाः भवेयुः कार्यचिंतकाः कर्तव्यं वचनं तेषां समूहहितवादिनां ४१ श्रेणिनैगमपाषंडिगणानामप्ययं विधिः
भेदं चैषां नृपो रक्षेत् पूर्ववृत्तिं च पालयेत् ४२ गृहीतवेतनः कर्म त्यजन् द्विगुणमावहेत् अगृहीते समं दाप्यो भृतैरक्ष्य उपस्करः
४३ दाप्यस्तु दशमं भागं वाणिज्यपशुसस्यतः अनिश्चित्य भृतिं यस्तु कारयेत्स महीक्षिता ४४ देशकालव्ययातीतो यानकर्म कुर्याच्च
योन्यथा तत्र तु स्वामिनश्छंदोधिकं देयं कृतेधिकं ४५ यो यावत्कुरुते कर्म तावत्तस्य तु वेतनं उभयोरप्यसाध्यं चेत् साध्यं कुर्याद्य

थाश्रुतं ४६ अराज्य रैविकान्नष्टं भांडं दाप्यं तु वाहकः प्रस्थानविघ्नकृच्चैव प्रदाप्यो द्विगुणां भृतिं ४७ प्रक्रांते सप्तमं भागं चतुर्थं पथि सं
त्यजेत् भृतिमर्धपथे सर्वां प्रदाप्यस्त्याजकोपि वा ४८ गलच्छतिकवृद्धेस्तु शांतिकः पंचकं शतं गृण्हीयाद्धूर्तकितवाद्दीनदशकं शतं
४९ स सम्यक्पालितो दद्याद्राज्ञो भागं यथाकृतं जितमुद्ग्राहयेज्जेत्रे दद्यात्सत्यवचः क्षमी ५० प्राप्ते नृपतिना भागे प्रसिद्धे धूर्तमंडले
जितं ससभिके स्थाने दापयेदन्यथा न तु ५१ द्रष्टारो व्यवहाराणां साक्षिणश्च त एव हि राज्ञा सचिन्हा निर्वास्याः कूटाक्षोपाधिदेविनः
५२ द्यूतमेकमुखं कार्यं तस्करज्ञानकारणात् एष एव विधिर्ज्ञेयः प्राणिद्यूते समाह्वये ५३ इत्याग्नेये महापुराणे व्यवहारे अग्नि
रुवाच सत्यासत्यान्यथास्तोत्रैः न्यूनांगेंद्रियरोगिणां क्षेपं करोति चेद्दंड्यः पणानर्धत्रयोदश १ अभिगंतास्मि भगिनीं मातरं वा तवे
ति च शपंतं दापयेद्राजा पंचविंशतिकं दमं २ अर्धोऽधमेषु द्विगुणः परस्त्रीषूत्तमेषु च दंडप्रणयनं कार्यं वर्णजात्युत्तराधरैः ३ प्रातिलो
म्यापवादेषु द्विगुणास्त्रिगुणो दमः सत्यस्तनोधिकः पाद नासाकर्णकरादिषु ४ अशक्तस्तु वदन्नेवं दंडनीयः पणान्दश तथाश
क्तः प्रतिभुवं दद्यात्क्षेमाय तस्य तु ५ पतनीयकृते क्षेपे दंड्यो मध्यमसाहसं उपपातकयुक्ते तु दाप्यः प्रथमसाहसं ६ त्रैविद्यनृपदेवानां
क्षेप उत्तमसाहसं मध्यमं जातिपूगानां प्रथमं ग्रामदेशयोः ७ असाक्षिकहते चिन्हैर्युक्तिभिश्चागमेन च द्रष्टव्यो व्यवहारस्तु कूटचिन्ह
कृताद्भयात् ८ भस्मपंकरजःस्पर्शे दंडो दशपणः स्मृतः अमेध्यपार्ष्णिनिष्ठीवस्पर्शने द्विगुणः स्मृतः ९ समेष्वेवं परस्त्रीषु द्विगुणस्तूत्त
मेषु च हीनेष्वर्धदमो मोहमदादिभिरदंडनं १० विप्रपीडाकरं छेद्यमंगमब्राह्मणस्य तु उद्गूर्णे प्रथमो दंडः संस्पर्शे तु तदर्धकः ११ उद्गूर्णे ह
स्तपादे तु दशविंशतिकौ दमौ परस्परस्य सर्वेषां शस्त्रे मध्यमसाहसः १२ पादकेशांशुककरालंबनेषु पणान्दश पीडाकर्षांशुकावेष्ट्यपाद
न्यासे शतं दमः १३ शोणितेन विना दुःखं कुर्वन्काष्ठादिभिर्नरः द्वात्रिंशतिपणान्दाप्यो द्विगुणा दर्शनेसृजः करपाददंतभंगे छेदने कर्ण
नासयोः मध्यं दंड्यो व्रणोद्भेदे मृतकल्पहते तथा १५ चेष्टाभोजनवाग्रोधे नेत्रादिप्रतिभेदने कंधराबाहुसक्थ्नां च भंगे मध्यमसाहसः १६
एकं घ्नतां बहूनां च यथावद्द्विगुणो दमः कलहापहृतं देयं दंडस्तु द्विगुणस्ततः १७ दुःखमुत्पादयेद्यस्तु स समुत्थानजं व्ययं दाप्याद्दंडं च यो
यस्मिन् कलहे समुदाहृतः १८ तरिकः स्थलजं शुल्कं गृण्हन् दंड्यः पणान्दश ब्राह्मणप्रातिवेश्यानामेतदेवानिमंत्रणे १९ अभिघा
ते तथा भेदे छेदे दंडाववपातने पणान्दाप्यः पंचदश विंशतिः स व्ययं तथा २० दुःखोत्पादि गृहे द्रव्यं क्षिपन् प्राणहरं तथा षोडशाद्यः पणान्
दाप्यो द्वितीयो मध्यमं दमं २१ दुःखे सशोणितोत्पादे शाखांगछेदने तथा दंडः क्षुद्रपशूनां स्याद् द्विपणप्रभृतिक्रमात् २२ लिंगस्य छेद
ने मृत्यौ मध्यमो मूल्यमेव च महापशूनामेतेषु स्थानेषु द्विगुणा दमाः २३ प्ररोहिशाखिनां शाखास्कंधसर्वविदारणे उपजीव्यद्रुमाणां
तु विंशतेर्द्विगुणा दमाः २४ यः साहसं कारयति स दाप्यो द्विगुणं दमं यस्त्वेवमुक्त्वाहं दाता कारयेत्स चतुर्गुणं २५ आर्याक्रोशातिक्रम

कृद्भ्रातृजायाप्रहारकः संदिष्टस्याप्रदाता च समुद्रगृहभेदकः २६ सामंतकुलिकादीनामपकारस्य कारकः पंचाशत्पणिको दंड
एषामिति विनिश्चयः २७ स्वच्छंदविधवागामी विक्रुष्टेनाभिधावकः आकारणे च विक्रोष्टा चंडालश्चोत्तमान्स्पृशन् शूद्रः प्रव्रजिता
नां च दैवपित्र्ये च भोजकः अयुक्तं शपथं कुर्वन्नयोग्यो योग्यकर्मकृत् २९ वृषक्षुद्रपशूनां च पुंस्त्वस्य प्रतिघातकृत् साधारणस्या
पलापी दासीगर्भविनाशकृत् ३० पितृपुत्रस्वसृभ्रातृदंपत्याचार्यशिष्यकाः एषामपतितान्योन्यत्यागी च शतदंडभाक् वसानस्त्री
न्पणान्दंड्यो नेजकस्तु परांशुकं विक्रयावक्रियादानयाचितेषु पणान्दश ३२ तुलाशासनमानानां कूटकृन्नाणकस्य च एभिश्च
व्यवहर्ता यः स दाप्यो दममुत्तमं ३३ अकूटं कूटकं ब्रूते कूटं यश्चाप्यकूटकं स नाणकपरीक्षी तु दाप्यः प्रथमसाहसं ३४ भिषङ्मिथ्या
चरन्दाप्यस्तिर्यक्षु प्रथमं दमं मानुषे मध्यमं राजमानुषेषूत्तमं तथा अवध्यं यश्च बध्नाति वध्यं यश्च प्रमुंचति अप्राप्तव्यवहारं
च स दाप्यो दममुत्तमं ३६ मानेन तुलया वापि योंशमष्टमकं हरेत् द्वाविंशतिपणान्दाप्यो वृद्धौ हानौ च कल्पितं ३७ भेषजस्नेहलवण
गंधधान्यगुडादिषु पण्येषु हीनं क्षिपतः पणान्दाप्यस्तु षोडश ३८ संभूय कुर्वतामर्घं संबाधं कारुशिल्पिनां अर्घस्य ह्रासं वृद्धिं वा सा
हस्रो दंड उच्यते ३९ राजनि स्थाप्यते योऽर्घः प्रत्यहं तेन विक्रयः क्रयो वा निक्रयस्तस्माद्वणिजां लाभकृत्स्मृतः ४० स्वदेशपण्ये तु शतं वणिक्
गृण्हीत पंचकं दशकं पारदेश्ये तु यः सद्यः क्रयविक्रयी ४१ पण्यस्योपरि संस्थाप्य व्ययं पण्यसमुद्भवं अर्घोनुग्रहकृत्कार्यः क्रेतुर्विक्रेतुरेव
च ४२ गृहीतमूल्यं यः पण्यं क्रेतुर्नैव प्रयच्छति सोदयं तस्य दाप्योसौ दिग्लाभं वा दिगागते ४३ विक्रीतमपि विक्रेयं पूर्वक्रेतर्यगृण्ह
ति हानिश्चेत्क्रेतृदोषेण क्रेतुरेव हि सा भवेत् ४४ राजदैवोपघातेन पण्ये दोषमुपागते हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः अन्य
हस्ते च विक्रीतं दुष्टं वादुष्टवद्यदि विक्रीणीते दमस्तत्र तन्मूल्याद्द्विगुणो भवेत् ४६ क्षयं वृद्धिं च वणिजा पण्यानामविजानता क्रीत्वा ना
नुशयः कार्यः कुर्वन्षड्भागदंडभाक् समवायेन वणिजां लाभार्थं कर्म कुर्वतां लाभालाभौ यथाद्रव्यं यथा वा संविदाकृतं प्रतिषिद्धमना
दिष्टं प्रमादाद्यच्च नाशितं स तद्दद्याद्विप्लवाच्च रक्षिताद्दशमांशभाक् अर्घप्रक्षेपणाद्विंशद्भागं शुल्कं नृपो हरेत् व्यासिद्धं राजयोग्यं च
विक्रीतं राजगामि तत् मिथ्या वदन्परीमाणं शुल्कस्थानादपक्रमन् दाप्यस्त्वष्टगुणं यश्च सव्याजः क्रयविक्रयी देशांतरगते
प्रेते द्रव्यं दायादबांधवाः ज्ञातयो वा हरेयुस्तदागतास्तैर्विना नृपः जिह्मं त्यजेयुर्निर्लाभमशक्तोन्येन कारयेत् अनेन विधिनाख्यात
मृत्विक्कर्षककर्मिणां ग्राहकैर्गृह्यते चोरो लोप्त्रेणाथ पदेन वा पूर्वकर्मापराधी वा तथैवाशुद्धवासकः अन्येपि शंकया ग्राह्या जातिना
मादिनिह्नवैः द्यूतस्त्रीपानसक्ताश्च शुष्कभिन्नमुखस्वराः परद्रव्यगृहाणां च पृच्छका गूढचारिणः निराया व्ययवंतश्च विनष्ट

द्रव्यविक्रयाः ५७ गृहीतः शंकया चौर्ये नात्मानं चेद्विशोधयेत् दापयित्वा हृतं द्रव्यं चोरदंडेन दंडयेत् ५८ चौरं प्रदाप्योपहृतं घा
तयेद्विविधैर्वधैः सचिन्हं ब्राह्मणं कृत्वा स्वराष्ट्राद्विप्रवासयेत् ५९ घातिते पहृते दोषो ग्रामभर्तुरनिर्गते स्वसीम्नि दद्यात्ग्रा
मस्तु पदं वा यदि गच्छति ६० पंचग्रामी गृहीतव्यो बहिर्ग्रामाश्वहारिणः प्रसह्य घातिनश्चैव शूलमारोपयेन्नरान् ६१ उत्क्षे
पकग्रंथिभेदौ करसंदंशहीनकौ कार्यौ द्वितीयापराधे करपादैकहीनकौ ६२ रक्षावकाशान्युदकं मन्त्रोपकरणव्ययात् कृत्वा
चौरस्य हंतुर्वा ज्ञानतो दम उत्तमः ६३ शस्त्रावघाते गर्भस्य पातने चोत्तमो दमः उत्तमो वाधमो वापि पुरुषस्त्रीप्रमापणे ६४
शि॰लां बध्वा क्षिपेदप्सु नरघ्नीं विषदां स्त्रियं विषाग्निदां निजगुरुनिजापत्यप्रमापणीं ६५ विकर्णकरनासौष्ठीं कृत्वा गो
भिः प्रमापयेत् क्षेत्रवेश्मवनग्रामविषातरवलदाहकः ६६ राजपत्न्यभिगामी च दग्धव्यस्तु कटाग्निना पुमान् संग्रहणे
ग्राह्यः केशाकेशि परस्त्रिया ६७ स्वजातावुत्तमो दंड आनुलोम्ये तु मध्यमः प्रातिलोम्ये वधः पुंसां नार्याः कर्णावकर्तनं
६८ नीवीस्तनप्रावरणं नाभिकेशावमर्दनं अदेशकालसंभाषं सहावस्थानमेव च ६९ स्त्री निषेधे शतं दद्यात् कुर्वीत
द्विशतं पुमान् अनिषेधे तयोर्दंडो यथा संग्रहणे तथा ७० पशून् गच्छंश्च तं दाप्यो हीनस्त्रीगश्च मध्यमं अवरुद्धा
सु दासीषु भुजिष्यासु तथैव च ७१ गम्यास्वपि पुमान् दाप्यः पंचाशत् पणिकं दमं प्रसह्य दास्यभिगमे दंडो दश
पणः स्मृतः ७२ कबंधेनां स्यगमयेदंत्या प्रव्रजितागमे न्यूनं वाप्यधिकं वापि लिखेद्यो राजशासनं ७३ पारदारिकचौ
रौ वा मुंचेने दंडमुत्तमं अभक्ष्यैर्दूषयन् विप्रं दंड्य उत्तमसाहसं ७४ राक्रोश्य मोक्षयत्स्वामी दंड्यः शृंगिणस्तथा
प्रथमं साहसं दद्याद्वि॰ कृष्टे द्विगुणं तथा ७५ अचौरं चौरेऽभिवदन् दाप्यः पंचशतं दमं राज्ञोऽनिष्टप्रवक्तारं तस्यैवाक्रोश
कं तथा तन्मंत्रस्य च भेत्तारं छित्वा जिह्वां प्रवासयेत् मृतांगलग्नविक्रेतुर्गुरोस्ताडयितुस्तथा राजयानासनारोढुर्दंडो म
ध्यमसाहसः द्विनेत्रभेदिनो राजद्विष्टादेशकृतस्तथा ७९ विप्रत्वेन च शूद्रस्य जीवतोऽष्टशतो दमः यो मन्येताजितो
स्मीति न्यायेनाभिपराजितः तमायांतं पुनर्जित्वा दंडयेद्द्विगुणं दमं राज्ञान्यायेन यो दंडो गृहीतो वरुणाय तं निवेद्य
दद्याद्विप्रेभ्यः स्वयं त्रिंशद्गुणीकृतं धर्मश्चार्थश्च कीर्तिश्च लोकपंक्तिरुपग्रहः प्रजाभ्यो बहुमानश्च स्वर्गस्थानं च शा
श्वतं पश्यतो व्यवहारांश्च गुणाः स्युः सप्त भूपतेः इत्यग्निपुराणे व्यवहाराः अग्निरुवाच ऋग्यजुःसामाथर्ववि
धानं पुष्करोदितं भुक्तिमुक्तिकरं जप्यहोमान् रामायतद्वदे पुष्कर उवाच प्रतिवेदं तु कर्माणि कार्याणि प्रवदामि ते
प्रथमं ह्यृग्विधानं वै शृणु त्वं भुक्तिमुक्तिभाक् २ अंतर्जले तथा होमे जपतो मनसेप्सितं कामं करोति गायत्री प्रा

णायामाद्विशेषतः गायत्र्या दशसाहस्रो जपो नक्ताशिनो द्विज बहुस्नातस्य तत्रैव सर्वकल्मषनाशनः ४ दशायुतानि
जप्त्वाथ हविष्याशी समुक्तिभाक् प्रणवो हि परं ब्रह्म तज्जपः सर्वपापहः ओंकारः शतजप्तस्तु नाभिमात्रोदकस्थितः
जलं पिबेत्स सर्वैस्तु पापैर्वै विप्रमुच्यते ६ मात्रात्रयं त्रयो वेदास्त्रयो देवास्त्रयोऽग्नयः महाव्याहृतयः सप्त लोका होमो
ऽखिलाघहा ७ गायत्री परमा जप्या होमे व्याहृतयस्तथा अंतर्जले यथा राम प्रोक्तश्चैवाघमर्षणः ॐ अग्निमी
ळे पुरोहितं सूक्तोऽयं वह्निदैवतः शिरसा धारयन् वह्निं योऽब्दं ... होमं त्रिषवणं भैक्ष्यमनग्निर्ज्वल
नं चरेत् अतः परं ऋचः सप्त वाय्वाद्याद्याः प्रकीर्तिताः १० ता जपन् प्रयतो नित्यमिष्टान् कामान् समश्नुते मेधा
कामो जपेन्नित्यं सदसस्पतिमित्यृचं अन्वयो यं नियाः प्रोक्ता नवर्चो मृत्युनाशनाः शुनःशेपऋषिं बद्धः सन्नि
रुद्धोऽथवा जपेत् मुच्यते सर्वपापेभ्यो गदी वाप्यगदी भवेत् य इच्छेच्छाश्वतं काममित्रं प्राज्ञं पुरंदरं ऋग्भिः षो
डशभिः कुर्यादिंद्रस्येति दिने दिने हिरण्यस्तूपमित्येतत् जपन् शत्रून् पराधमेत् १४ क्षेमी भवति चाध्वानमेते
पथा जपन्नरः रौद्रीभिः षड्भिरीशानं स्तूयाद्यो वै दिने दिने १५ चरुं वा कल्पयेद्रौद्रं तस्य शांतिः परा भवेत्
उदित्युद्यंतमादित्यमुपतिष्ठन् दिने दिने १६ क्षिपेज्जलांजलिं सप्त मनोदुःखविनाशनं द्विषत इत्यथार्धर्चं य
द्विष्वांतं जपन् स्मरेत् आगस्कृत् सप्तरात्रेण विद्वेषमधिगच्छति आरोग्यकामी रोगी च प्रमुरवास्योत्तमं ज
पेत् उत्तमस्तस्य चार्धर्चो जप्यो वैरिविनाशने उदयात्यायुरक्ष्यर्यं तेजो मध्यंदिने जपेत् उत्तमस्तस्य चार्धर्चो
जपे द्वैरिविनाशने १९ अस्तं प्रतिगते सूर्ये द्विषंतं प्रति धावते न वयश्चेति सूक्तानि जपन् शत्रून्नियच्छति
२० एकादशां सुपर्णस्य सर्वकामान् विनिर्दिशेत् अध्यात्मिकीः क इत्येता जपन्मोक्षमवाप्नुयात् २१ आनो
भद्रा इत्यनेन दीर्घमायुरवाप्नुयात् त्वं सोमेति च सूक्तेन नवं पश्येन्निशाकरं २२ उपतिष्ठेत्समित्पाणिः वा
सांस्या प्रोत्यसंशयः आयुरीप्सन्निममिति कौत्स्यं सूक्तं सदा जपेत् २३ अप नः शोशुचदिति स्तुत्वाम
ध्ये दिवाकरं यथा पूजादिवैषीकां तथा पापं प्रमुंचति २४ जातवेदस इत्येतत् जपेत्स्वस्त्ययनं प्रति भये
र्विमुच्यते सर्वैः स्वस्तिमानाप्नुयाद्गृहान् २५ सुशयां च तथा रात्र्यामेतद्दुःस्वप्ननाशनं प्रमंदिनेति सूय

त्यां जपेत् गर्भविमोचने २६ जपन्निंद्रमिति स्नातो वैश्वदेवं तु सप्तकं मुंचत्याज्यं तथा जुह्वन् सकलं किल्बिषं नरः २७
इमामिति जपन् शश्वत् कामानाप्नोत्यभीप्सितान् मानस्तोक इति द्वाभ्यां त्रिरात्रोपोषितः शुचिः औदंबरीश्च जुहुयात् समिध
श्चाज्य संस्कृताः छित्वा सर्वान्मृत्युपाशान् जीवेद्रोगविवर्जितः ऊर्ध्वबाहुरनेनैव स्तुत्वा शंभुं तथैव च मानस्तोके तिचर्
चा शिखाबंधे कृते नरः ३० अधृष्यः सर्वभूतानां जायते संशयं विना चित्रमित्युपतिष्ठेत त्रिसंध्यं भास्करं तथा ३१ समित्पाणि
र्नरो नित्यमीप्सितं धनमाप्नुयात् अवस्वप्नेति च जपन् प्रातरर्धं दिने दिने ३२ दुःस्वप्नं दरते कृत्स्नं भोजनं प्राप्नुयाच्छुभं उभे
पुमानीनि तथा रक्षो पुपरिकीर्तिताः ३३ यदिवासादृचेन जपन्कामानवाप्नुयात् जमारयन्निति जपन् मुच्यते चाततायि उ
नः ३४ कयाशुभेति च जपन् ज्ञातिश्रैष्ठ्यमवाप्नुयात् इमं तु सोममित्येतत् सर्वकामानवाप्नुयात् ३५ पितरित्युपतिष्ठेत
नित्यमन्नमुपस्थितं अग्नेनयेति सूक्तेन घृतहोमश्च मार्गगः ३६ वीरान्चयमवाप्नोति सुश्लोक्यं योजपेत्सदा कंकृतो येति
सूक्तेन विषान् सर्वान्व्यपोहति योजात इति सूक्तेन सर्वान्कामानवाप्नुयात् गणानामिति सूक्तेना श्रियमाप्नोत्यनुत्तमां ३८ योनो
राजन्निति मंत्रं दुःस्वप्न शमनीं ऋचं अध्वनि प्रस्थितो यस्तु पश्येच्छत्रुं समुत्थितं ३९ अप्रशस्तं प्रशस्तं वा कुविदंगमिदं जपे
त् द्वाविंशकं जपन् सूक्तमध्यात्मकमनुत्तमं ४० पर्वसु प्रयतो नित्यमिष्टान्कामान्समश्नुते कृणुष्वेति जपन् सूक्तं जुह्व
दाज्यं समाहितः ४१ अरातीनां हरेत्प्राणान् रक्षांस्यपि च नाशयेत् उपतिष्ठेत् स्वयं वन्हिं परेत्यृचा दिने दिने ४२ तं रक्षति
स्वयं वन्हि विश्वतो विश्वतो मुखः हंसः शुचिषदित्येतत् शुचिरीक्षेद्दिवाकरं ४३ कृषिं प्रपद्यमानस्तु स्थालीपाकं यथाविधि जुहुया
त् क्षेत्रमध्ये तु शुनि स्वाहा स्तु पंचभिः ४४ इंद्राय च मरुद्भ्यस्तु पर्जन्याय भगाय च यथालिंगं तु विहरेत् लांगलं तु कृषीवलः ४५ युक्तो
धान्याय सीतायै शुनासीरमथोत्तरं गंधमाल्यनमस्कारैर्यजेदेताश्च देवताः ४६ प्रवापने प्रलवने खलसीतापहारयोः अमोघं
कर्म भवति वर्धते सर्वदा कृषिः ४७ समुद्रादिति सूक्तेन कामानाप्नोति पावकात् विश्वानन इति द्वाभ्यां यो ऋग्भ्यां वन्हिमर्हति ४८
स नरस्त्वपवादात्तु यशः प्राप्नोत्यनुत्तमं विपुलां श्रियमाप्नोति जयं प्राप्नोत्यनुत्तमं ४९ अग्ने त्वमित्यृचा स्तुत्वा धनमाप्नोति
वांछितं प्रजाकामो जपेन्नित्यं वरुणो दैवतत्रयं ५० स्वस्त्यान्नेयं जपेत्प्रातः सदा स्वस्त्ययनं महत् स्वस्तिपंथा इति प्रोच्य स्वस्तिमान्
व्रजतेध्वनि ५१ विजिहीस्व वनस्पते शत्रूणां व्याधितं भवेत् स्त्रिया गर्भप्रमूढाया गर्भमोक्षणमुत्तमं ५२ अच्छावदिति सूक्तं च
वृष्टिकामः प्रयोजयेत् निराहारो क्लिन्नवासा न चिरेण प्रवर्षति ५३ मनसः काममित्येतां पशुकामो नरो जपेत् कर्दमेन इति स्नायात्
प्रजाकामः शुचिव्रतः ५४ अश्वपूर्वा इति स्नायात् राज्यकामस्तु मानवः रोहिते चर्मणि स्नायात् ब्राह्मणस्तु यथाविधि ५५ रा

जा चर्मणि वैयाघ्रे छागे वैश्यस्तथैव च दशसाहस्रिको होमः प्रत्येकं परिकीर्तितः ५६ आगाव इति सूक्तेन गोष्ठे गां लोकमातरं उपतिष्ठे
द्व्रजेश्चैव यदीच्छेत्ताः सदाक्षयाः ५७ उपेति तिस्रभी राज्ञो दुंदुभीनभिमंत्रयेत् तेजो बलं च प्राप्नोति शत्रुं चैव नियच्छति ५८ तृणपाणिर्ज
पेत्सूक्तं रक्षोघ्नं दस्युभिर्वृतः ये केचिन्मेत्यृचं जप्त्वा दीर्घमायुरवाप्नुयात् ५९ जीमूत सूक्तेन तथा सेनांगान्यभिमंत्रयेत् यथालिंगं ततो
राजा विनिहंति रणे रिपून् ६० प्राग्नयेति त्रिभिः सूक्तैर्धनमाप्नोति चाक्षयं अमीव हेति सूक्तेन भूतानि स्थापयेन्निशि ६१ संबाधे विष
मे दुर्गे बद्धो वा निर्गतः क्वचित् पलाय्य च गृहीतो वा सूक्तमेतत्तथा जपेत् ६२ त्रिरात्रं नियतो पोष्य श्रपयेत्पायसं चरुं तेन चाहुतिशतं पू
र्वं जुहुयात्र्यंबकेत्यृचा ६३ समुद्दिश्य महादेवं जीवेदब्दशतं सुखं तच्चक्षुरित्यृचा स्नात उपतिष्ठेद्दिवाकरं ६४ उद्यंतं मध्यमं चैव दी
र्घमायुर्जिजीविषुः सूक्ताभ्यां पर एवाभ्यां हुताभ्यां भूतिमाप्नुयात् ६५ इंद्रासोमेति सूक्तं तु कथितं शत्रुनाशनं यस्य लुप्तं व्रतं मोहात्
व्रात्यैर्वा संसृजेत्सह ६६ उपोष्याज्यं स जुहुयात्त्वमग्ने व्रतपा इति आदित्येत्यृक्चसंम्राजं त्वा वादजयी भवेत् ६७ नहीति च चतुष्के
ण मुच्यते महतो भयात् ऋचं जप्त्वायादित्येत सर्वान्कामानवाप्नुयात् ६८ द्वाचत्वारिंशतं चैंद्रं जप्त्वा नाशयते रिपून् वाचं सही
ति जप्त्वा च प्राप्नोत्यारोग्यमेव च ६९ शंनो भवेति द्वाभ्यां तु भुक्त्वान्नं प्रयतः शुचिः हृदयं पाणिना स्पृष्ट्वा व्याधिभिर्नाभिभूयते ७०
उत्तमेदमिति स्नातो हुत्वा शत्रुं प्रमापयेत् शं नो अग्ने इति सूक्तेन हुतेनार्थमवाप्नुयात् ७१ कन्यावारिति सूक्तेन दिग्दोषात्प्रमुच्यते
यदद्य कच्चवृत्रहन्निति जप्त्वा वश्यं जगद्भवेत् ७२ यद्वागिति च जप्तेन वाग्मी भवति संस्कृता वाचो वदमिति त्वेतां जपन् वाचं समाप्नुते ७३ प
वित्राणां पवित्रं तु पावमान्यो ऋचो मताः वैश्वानरस्य ऋचश्चत्रिंशत्पवित्राः परमा मताः ७४ ऋत्वो द्विपष्ठिः प्रोक्ताश्च परस्येत्यृ विसत्तम
सर्वकल्मषनाशाय पावनाय शिवाय च ७५ स्वादिष्ठयेति सूक्तानां सप्तषष्ठि रुदाहृता दशोत्तराण्यृचश्चैता पावमान्यः शतानि षट्
७६ एतज्जपंश्च जुह्वंश्च घोरमृत्युभयं हरेत् आपो हि ष्ठेति वा रिष्टो जपेत्पापभयार्दने ७७ प्रदेव ब्रेति नियतो जपेच्च मरुधन्व
सु प्राणांतिके भये प्राप्ते क्षिप्रमायुस्तु विंदति ७८ प्रावेयामित्यृचमेकं जपेच्च मनसा निशि सुष्टायामुदिते सूर्ये घृतं जपमवा
प्नुयात् ७९ मा प्र गामेति मोहश्च पंथानं पथि विंदति क्षीणायुरिति मन्येत यं कंचित् सुहृदं प्रियं ८० य ते यममिति स्नातस्तस्य मूर्धान
मालभेत् सहस्रकृत्वः पंचाहं तेनायुर्विंदते महत् ८१ इदमित्थेति जुहुयात् घृतं प्राज्ञः सहस्रशः पशुकामो गवां गोष्ठे अर्थकाम
श्चतुष्पथे ८२ वयः सुपर्ण इत्येतां जपन् वै विंदते श्रियं हविष्यंतीयमभ्यस्य सर्वपापैः प्रमुच्यते ८३ तस्य रोगा विनश्यंति कायाग्नि
र्वर्धते तथा या ओषधय इत्यस्य पनं सर्वव्याधिविनाशनं ८४ बृहस्पते अतीत्येतत् वृष्टिकामः प्रयोजयेत् सर्वत्रेति परा शांतिर्ने
या प्रतिरथस्तथा ८५ सूक्तं सकाश्यपं नित्यं प्रजाकामस्य कीर्तितं अहं रुद्रेति इत्येतत् वाग्मी भवति मानवः ८६ नयो नो जपते वि
द्वान् जपन् स्त्रीन तिरात्रिषु रात्रिसूक्तं जपन् रात्रौ रात्रिं क्षेमी नयेन्नरः ८७ यां कल्पयंतीति जपेत् नित्यं कृत्वा विनाशनं आयुष्यं

चैवयर्चस्यंसूक्तंदाक्षायणंमहत् ८८ उतदेवाइतिजपेदामयघ्नंधृतव्रतः अयमग्नेजनित्येतेजपेदग्निभयेसति
आरण्यानीत्यरण्येषुजपेत्तद्भयनाशनं ब्राह्मीमासाद्यसूक्तेद्वेऋचंब्राह्मींशतावरीं ९० पृथगद्भिर्घृतैर्वाथमेधांलक्ष्मींचविंद
ति शासइत्थासपत्नघ्नंसंग्रामंविजिगीषतः ९१ ब्रह्मणाग्निःसंविदानंगर्भमृत्युनिवारणं अपेहीतिजपेत्सूक्तंशुचिर्दुःस्वप्न
नाशनं ९२ येनेदमितिवैजप्त्वासमाधिंविंदतेपरां मयोभूर्वातइत्येतत् गवांस्वस्त्ययनंपरं ९३ सांवत्सरीमिंद्रजालमाया
मेतेनवारयेत् महित्रीणामवोस्त्विति पतिस्वस्त्ययनंजपेत् ९४ भागतयेविद्विषद्वेषंजपेच्चारिप्रणाशनं वास्तोष्पतेनमंत्रे
णजपेच्चग्रहदेवतां ९५ जपस्यैषविधिःप्रोक्तोहुतेत्वेषोविशेषतः होमांतेदक्षिणादेयापापशांतिर्हुतेनतु ९६ हुतंशाम्यति
चान्नेन अन्नंहेमप्रदानतः विप्राशिषस्त्वमोघास्युर्वह्निःस्नानंतुसर्वतः ९७ सिद्धार्थकामयान्धान्यं पयोदधिघृतंतथा
क्षीरवृक्षितथैधांतुहोमावैसर्वकामदाः ९८ समिधःकंटकिन्यश्चराजिकारुधिरंविषं अभिचारेतथातैलमशनंसक्तवः
पयः ९९ दधिभैक्ष्यंफलंमूलमृग्विधानमुदाहृतं इत्याग्नेयेऋग्विधानं० पुष्करउवाच यजुर्विधानंवक्ष्यामिभुक्तिमु
क्तिप्रदंशृणु ओंकारपूर्विकाराममहाव्याहृतयोमताः १ सर्वकल्मषनाशिन्यःसर्वकामप्रदास्तथा आज्याहुतिसहस्रेणदेवा
नाराधयेत्ध्रुवं २ मनसःकांक्षितंराममनसेप्सितकामदं शांतिकामोयवैःकुर्यात्तिलैःपापापनुत्तये ३ धान्यैःसिद्धार्थकैश्चै
व सर्वकामकरैस्तथा औदुंबरीभिरिध्माभिःपशुकामस्यशस्यते ४ दध्नाचैवान्नकामस्यपयसाशांतिमिच्छतः अपामार्ग
समिद्भिस्तुकामयन्कनकंबहु ५ कन्याकामोघृताक्तानियुग्मशोग्रथितानितु जातीपुष्पाणिजुहुयात्ग्रामार्थीतिलतंडुलान्
६ वश्यकर्मणिशाखोटंशम्यापामार्गमेवच विषासृङ्मिश्रसमिधोव्याधिघातस्यभार्गव ७ क्रुद्धस्तुजुहुयात्सम्यक्शत्रूणां
वधकाम्यया सर्वव्रीहिमयींकृत्वाराज्ञःप्रतिकृतिंद्विजः ८ सहस्रशस्तुजुहुयात्राजावशगतोभवेत् वस्त्रकामस्तुपुष्पाणि
दूर्वाव्याधिशमेरिता ब्रह्मवर्चसकामस्यवासोग्र्यंचविधीयते प्रत्यंगिरेषुजुहुयात् कुशाकंटकभस्मभिः १० विद्वेषणेचप
क्ष्माणिकाककौशिकयोस्तथा कपिलायाघृतंहुत्वातथाचंद्रग्रहेद्विजः ११ वचाचूर्णंचसंपातात्समानीयचतांवचां सहस्र
त्रितयंभुक्त्वामेधावीजायतेनरः १२ एकादशांगुलंशंकुंलौहंखादिरमेवच द्विषतोवधसीतिजपन् निखिलेत्प्रविशेत्गृम
नि उच्चाटनमिदंकर्मशत्रूणांकथितंतव १४ चक्षुष्याइतिजप्त्वाचनष्टंचक्षुरवाप्नुयात् उपयुंजतेइत्येतदनुवाकेनथा
न्नदं १५ तनूनपाग्नेयसदितिदूर्वांहुत्वातिवर्जितः भेषजमसीतिदध्याघैर्होमःपश्वूपसर्गनुत् १६ त्र्यंबकंयजामहेहो
मःसौभाग्यवर्धनः कन्यानामगृहीत्वातुकन्यालाभकरःपरः १७ भयेषुतुजपन्नित्यंभयेभ्योविप्रमुच्यते धत्तूरपुष्पंसघृतं
हुत्वास्यात्सर्वकामभाक् १८ हुत्वातुगुग्गुलंराम स्वप्नेपश्यतिशंकरं युंजतेमनोनुवाकंजप्त्वादीर्घायुराप्नुयात् १९ विष्णोर
राटमित्येतत् सर्वबाधाविनाशनं रक्षोघ्नंचयशस्यंचतथैवविजयप्रदं २० अयंनोअग्निरित्येतत् संग्रामेविजयप्रदं

इदमापःप्रवहतस्नातेपापापनोदनं २१ विश्वकर्मन्हविषाशुचीं लोहींदशांगुलान् कन्यायालिखनेद्वारिसान्यस्मैनप्रदीयते २२ देवसवि
तरेतेनहुतेनैतेनचान्नवान् आग्नेआहेतिजुहुयात्धनकामोद्विजोत्तमः २३ तिलैर्यवैश्चधर्मज्ञोतथापामार्गतंडुलैः सहस्रमंत्रितांकृ
त्वातथागोरोचनांद्विज तिलकंचतथाकृत्वाजनस्यप्रियतामियात् रुद्राणांचतथाजप्यंसर्वाघविनिषूदनं २५ सर्वकर्मकरोहोमस्तथास
र्वत्रशांतिदः अजाविकानामश्वानांकुंजराणांतथागवां २६ मनुष्याणांनरेंद्राणांबालानांयोषितामपि ग्रामाणांनगराणांचदेशाना
मपिभार्गव उपद्रुतानांधर्मज्ञव्याधितानांतथैवच नरकेसमनुप्राप्तेरिपुजेचतथाभये २८ रुद्रहोमःपराशांतिःपायसेनघृतेनच
कूष्मांडघृतहोमेनसर्वान्पापान्व्यपोहति २९ सक्तुयावकभैक्षाशीनक्तंमनुजसत्तम बहिःस्नानरतोमासान्मुच्यतेब्रह्महत्यया
मधुवातेतिमंत्रेणहोमादितोखिलंलभेत् दधिक्राव्णेतिहुत्वातुपुत्रान्प्राप्नोत्यसंशयं ३१ तथाघृतवतीत्येतदायुष्यंस्यात्घृतेनतु
स्वस्तिनइंद्रइत्येनत्सर्वबाधाविनाशनं ३२ इहगावःप्रजायध्वमितिपुष्टिविवर्धनं घृताहुतिसहस्रेणतथालक्ष्मीविनाशनं ३३ स्रु
वेणदेवस्यत्वेतिहुत्वापामार्गतंडुलं मुच्यतेविकृताच्छीघ्रमभिचारान्नसंशयः ३४ शिवोभवेत्यग्न्युत्पातेव्रीहिभिर्जुहुयान्नरः याः
सेनाइतिचैतच्चभस्करेभ्योभयावहं ३५ योस्मभ्यमरातीयाद्धुत्वाकृष्णतिलान्नरः सहस्रशोभिचाराच्चमुच्यतेविकृतात्द्विजः ३६
अन्नेनान्नपतेत्येवंहुत्वाचान्नमवाप्नुयात् रुद्रयत्तेपलाशस्येसमिद्भिःकनकंलभेत् ३७ हंसःशुचिषदित्येतज्जपतोघौघनाशनं
चत्वारिशृंगेत्येतत्तुसर्वपापहरंजले ३८ देवायज्ञेतिजप्त्वातुब्रह्मलोकेमहीयते वसंतीतिचहुत्वाज्यंआदित्याद्वरमाप्नुयात् सुपर्णो
सीतिचेद्यस्यकर्मव्याहृतिवद्भवेत् नमःसूतेतिविजप्त्वाबंधनान्मोक्षमाप्नुयात् ४० अंतर्जलेत्रिरावर्त्यद्रुपदंसर्वपापनुत् इह
गावःप्रजायध्वंमंत्रोयंबुद्धिवर्धनः ४१ हुतस्तुसर्पिषाद्भिःपयसापायसेनवा शतंबाइतिचैतेनहुत्वापर्णफलानिच ४२ आरोग्यं
श्रियमाप्नोतिजीवितंचारितंतथा ओषधीःप्रतिमोदध्वंपवनेलवनेर्धकृत् ४३ अश्वावतीपायसेनहोमाच्छांतिमवाप्नुयात् उच्छु
ष्माइतिचैतेनबंधनस्थोविमुच्यते ४४ युवासुवासाइत्येववासांस्याप्नोतिचोत्तमं मुंचतुमास्तेपथ्यानिसर्वातंकविनाशनं ४५
मामाहिंसीतितिलाज्येनहुतंरिपुविनाशनं नमःसर्पेभ्योहुत्वाघृतेनपायसेनतु ४६ कृणुष्वपाजइत्येतदभिचारविनाशनं
दूर्वाकांडयुताहुत्वाकांडात्कांडेतिमानवः ४७ ग्रामेजनपदेवापिमरकंशमंनयेत् रोगार्त्तोमुच्यतेरोगात् तथादुःखात्तुदुःखि
तः ४८ औदुंबरीश्चसमिधोमधुमान्नोवनस्पति हुत्वासहस्रशोरामधनमाप्नोतिमानवः ४९ सौभाग्यंमहदाप्नोतिव्यवहारेतथा
जयं अपांगर्भमितिहुत्वादेवंवर्षापयेत्ध्रुवं ५० अपःपिबेतिचतथाहुत्वादधिघृतंमधु प्रवर्तयतिधर्मज्ञमहावृष्टिमनंतरं ५१ नमः
स्तेरुद्रइत्येनत्सर्वोपद्रवनाशनं सर्वशांतिकरंप्रोक्तंमहापातकनाशनं ५२ अध्यवोचदित्यनेनरक्षणंव्याधितस्यतु रक्षोघ्नंचयश
स्यंचश्रीरायुःपुष्टिवर्धनं ५३ सिद्धार्थकानांक्षेपेणपथिवैतज्जपन्सुखी असौयस्ताम्रइत्येतत्पठन्नित्यंदिवाकरं उपति
ष्ठेतधर्मज्ञंसायंप्रातरतंद्रितः अन्नमक्षयमाप्नोतिदीर्घमायुश्चविंदति ५५ प्रमुंचधन्वइत्येतत्षड्भिरायुधमंत्रणा रिपूणांभयदे

युद्धेनात्र कार्या विचारणा ५६ मानोमहांत इत्येवं बालानां शांतिकारकं नमो हिरण्यबाहवे इत्यनुवाकसप्तकं ५७ राजिकां कटु तैलाक्तां
जुहुयाच्छत्रुनाशनी नमोवः किरिकेभ्यश्च पद्मलक्षायुतैर्नरः ५८ राज्यलक्ष्मीमवाप्नोति यथा बिल्वैः सुवर्णकं इमारुद्रायेति तिलैर्हो
मांच्च धनमाप्नुयात् ५९ दूर्वाहोमेन चानेन सर्वव्याधिविवर्जितः आशुः शिशान इत्येतदायुधानां च रक्षणे संग्रामे कथितं राम सर्व
शत्रुविनाशनं वाजश्चमेति जुहुयात् सहस्रं पंचभिर्द्विजः आज्याहुतीनां धर्मज्ञ चक्षूरोगात् प्रमुच्यते शंन्नो भवस्येति गृहे होमः स्या
द्वास्तुदोषनुत् ६२ अग्न आयूंषि हुत्वाज्यं द्वेषं नाप्नोति केनचित् अपां फेनेन त्वा जाभि र्हुत्वा जयमवाप्नुयात् ६३ भद्रा इतींद्रियैर्ही
नो जपात्स्यात् सकलेंद्रियः अग्निश्च पृथिवी चेति वशीकरणमुत्तमं ६४ अध्वनेति जपन् मंत्रं व्यवहारे जयी भवेत् ब्रह्मराजन्यमिति
च कर्मारंभे तु शुद्धिकृत् ६५ संवत्सरोसीति घृतलक्षहोमादरोगवान् केतुं कृण्वन्निति इत्येतत् संग्रामे जयवर्धनं ६६ इंद्राग्नी धर्म इत्ये
तद्रणे धर्मनिबंधनं धन्वनागेति मंत्रश्च धनुर्ग्रहणिकः परः ६७ यजीतेति तथा मंत्रो विज्ञेयो ज्याभिमंत्रणे मंत्रश्चाहिरथेत्येतत्
शराणां मंत्रणे भवेत् ६८ बह्वीनां पितरित्येतत्तूणमंत्रः प्रकीर्तितः मुंचतीति तथाश्वानां योजने मंत्र उच्यते ६९ आशुः शिशान इत्ये
तद्यात्रारंभणमुच्यते विष्णोः क्रमेति मंत्रश्च रथारोहणिकः स्मृतः ७० अजं घंति च चाश्वानां ताडनीयमुदाहृतं याः सेना अभीत्वरीति
परसैन्यमुखे जपेत् ७१ दुंदुभ्य इति चाप्येतत् दुंदुभीताडनं भवेत् एतैः पूर्वं हुतैर्मंत्रैः कृत्वैनं विजयी भवेत् ७२ यमेन दत्तमित्यस्य कोटि
होमाद्विचक्षणः रथमुत्पातयेच्छीघ्रं संग्रामे विजयप्रदं ७३ आकृष्टेति तथैतस्य कर्म व्याहृति वद्भवेत् शिवसंकल्पजापेन समाधिं
मनसो लभेत् ७४ पंचनद्यः पंचलक्षं हुत्वा लक्ष्मीमवाप्नुयात् यदाबध्नन् दाक्षायणा मंत्रेणानेन मंत्रितं ७५ सहस्रकृत्वः कनकं धार
येद्रिपुमारणं इमं जीवेत्य इति च सीता लोष्टं चतुर्दिशं क्षिपेत् गृहे न दा तस्य न स्याच्चौरभयं निशि परीमे गामनेमेति वशीकरणमुत्त
मं हंतुमभ्यागतस्तत्र वशी भवति मानवः भक्ष्यताम्बूलपुष्पाद्यं मंत्रितं तु प्रयच्छति ७८ तस्य धर्मज्ञ वश्यः सोस्य वशी घं भविष्यति
शन्नो मित्र इतीत्येतत् सदा सर्वत्र शांतिदं ७९ गणानां त्वा गणपतिं कृत्वा होमं चतुष्पथे वशीकुर्याज्जगत्सर्वं सर्वधान्यैरसंशयं ८० हिर
ण्यवर्णाः शुचयो मंत्रोयमभिषेचने शन्नो देवीरभिष्टये तथा शांतिकरः परं ८१ एकचक्रेभिमंत्रेण हुतेनाज्येन भार्गवः ग्रहेभ्यः शांतिमा
प्नोति प्रसादं न च संशयः ८२ गावो भग इति द्वाभ्यां हुत्वाप्यं गाव आप्नुयात् प्रवादांशा सोपदिति गृहे यज्ञे विधीयते ८३ देवेभ्यो वनस्प
तये इति द्रुमयज्ञे विधीयते गायत्री वैष्णवी ज्ञेया तद्विष्णोः परमं पदं सर्वपापप्रशमनं सर्वकामप्रदं तथा इत्याग्नेये महापुराणे यजु
र्विधानं पुष्कर उवाच यजुर्विधानं कथितं वक्ष्ये साम्नां विधानकं संहितां वैष्णवीं जप्त्वा हुत्वा स्यात् सर्वकामभाक् १ संहितां छां
दसीं साधु जप्त्वा प्रीणाति शंकरं स्कांदीं पित्र्यां संहितां च जप्त्वा स्यात् स प्रसादवान् २ यत इंद्र भयामहे इति हिंसादोषविनाशनं अवकी
र्णी मुच्यते च अग्निस्तिग्मेति वै जपन् ३ सर्वपापहरं परीतो षिंचता सुतं अविक्रेयं च विक्रीय जपेत् घृतवतीति च ४ अयानो देवस
वित इयं दुःस्वप्ननाशनं अबोध्यग्निरिति मंत्रेण घृतं राम यथाविधि ५ अभ्युक्ष्य घृतशेषेण मेखला बंध इष्यते स्त्रीणां या सां तु ग

र्भाणि पतंति भृगुसत्तम ६ मणिं जातस्य बालस्य बध्नीयात्तदनंतरं सोमं राजानमेतेन व्याधिभिर्विप्रमुच्यते ७ सर्पसाम प्रयुंजानो नाप्नु
यात् सर्पजं भयं मा घत्वा वाद्यते त्येतद्धुत्वा विप्रः सहस्रशः ८ शतावरिमणिं बध्वा नाप्नुयाच्छस्त्रतो भयं दीर्घतमसोर्क इति हुत्वान्नं प्राप्नु
याद्धुतु ९ स्वमध्यायंतीति जपन्न म्रियेत पिपासया त्वमिमा ओषधीरित्येतज्जप्त्वा व्याधिं न चाप्नुयात् १० पथि देवव्रतं जप्त्वा भयेभ्यो विप्रमु
च्यते यदिंद्रो मुत येत्विति हुतं सौभाग्यवर्धनं ११ प्राशयेद्बालकं नित्यं वचां संश्रावयेत् स्त्रियं सा तं कामयते राम नात्र कार्या विचारणा
रथंतरं वामदेव्यं ब्रह्मवर्चसवर्धनं प्राशयेद्बालकं वचाचूर्णं घृतप्लुतं १३ इंद्रमिद्गाथिनं जप्त्वा भवेद्बुद्धिधरस्त्वसौ हुत्वा रथंतरं जप्त्वा
पुत्रमाप्नोत्यसंशयं १४ मयि श्रीरिति मंत्रोयं जप्तव्यः श्रीविवर्धनः वैरूपस्याष्टकं नित्यं प्रयुंजानः श्रियं लभेत् १५ सप्ताष्टकं प्रयुंजानः
सर्वान् कामान् समाप्नुयात् गव्योषुणेति योनित्यं स्नायं प्रातरतंद्रितः १६ उपस्थानं गवां कुर्यात्तस्य स्युः स्ताः सदा गृहे घृताक्तं तु चरुं द्रा
वात आवातु भेषजं १७ अनेन हुत्वा विधिवत् सर्वामापां व्यपोहति प्रवेधसे नवतिलान् हुत्वा कामेण कृन्नरः १८ अभि त्वा पूर्वपीतये
वषट्कारसमन्वितं वामदेव्यसहस्रं तु हुतं युद्धे जयप्रदं १९ हस्त्यश्वपुरुषान् कुर्यात् बुधः पिष्टमयान् शुभान् परकीयानथोद्दिश्य
प्रधानपुरुषांस्तथा २० स्वरविन्नाद पिष्टवपने क्षुरेणोत्कृत्य भार्गवः अभि त्वा शूर नोनुमो मंत्रेणानेन मंत्रवित् २१ कृत्वा सर्षप तैला
क्तान् क्रोधेन जुहुयात्ततः एतत्कृत्वा बुधः कर्मसंग्रामे जयमाप्नुयात् २२ गारुडं वामदेवं च रथंतरबृहद्रथौ सर्वपापप्रशमनाः कथि
ताः संशयं विना इत्याग्नेये महापुराणे सामविधानं पुष्कर उवाच साम्नां विधानं कथितं प्रवक्ष्येथर्वणामथ शांतातीयं गणं हु
त्वा शांतिमाप्नोति मानवः १ भैषज्यं च गणं हुत्वा सर्वान् रोगान् व्यपोहति त्रिसप्तीयं गणं हुत्वा सर्वपापैः प्रमुच्यते २ क्वचिन्नाप्नोति
च भयं हुत्वा चैवागणं भयं न कश्चिज्जीर्यते शर्मगणं हुत्वापराजितं ३ आयुष्यं च गणं हुत्वा अपमृत्युं व्यपोहति स्वस्तिमाप्नोति सर्व
त्र हुत्वा स्वस्त्ययनं गणं ४ श्रेयसा योगमाप्नोति शर्ववर्मगणं तथा वास्तोष्पत्यगणं हुत्वा वास्तुदोषान् व्यपोहति ५ तथा रौद्रगणं हुत्वा
सर्वान् दोषान् व्यपोहति एतैर्दशगणैर्होमो ह्यष्टादशसु शांतिषु ६ वैष्णवी शांतिरैंद्री च ब्राह्मी रौद्री तथैव च वायव्या वारुणी चैव
कौबेरी भार्गवी तथा ७ प्राजापत्या तथा त्वाष्ट्री कौमारी वह्निदेवता मारुद्गणी च गांधर्वी शांतिर्नैरृतकी तथा ८ शांतिरांगिरसी
याम्या पार्थिवी सर्वकामदा यस्त्वां मृत्युरितीत्येतज्जप्तं मृत्युविनाशनं ९ सुवर्णस्वेति हुत्वा च भुजंगैर्नैव बाध्यते इंद्रेण दंडमित्येतत्
~~[illegible]~~ सर्वबाधाविनाशनं १० इमा देवीति मंत्रश्च सर्वशांतिकरः परः देवा मरुत इत्येतत् सर्वकामकरं भवेत् ११
यमस्य लोकादित्येतत् दुःस्वप्नशमनं परं इंद्रं च पंचवणिजे पण्यलाभकरं परं १२ कामो मे वाजीति हुतं स्त्रीणां सौभाग्यवर्धनं तुभ्य
मेव जवन्नित्यमावर्षतु हुतं भवेत् १३ अग्ने गोभिर्न्न इत्येतत् मेधावृद्धिकरं परं ध्रुवं ध्रुवेणेति हुतं स्थानलाभकरं भवेत् १४ सुनक्त
सरितिश्च नाकृषिलाभकरं भवेत् अहं ते भग इत्येतत् भवेत् सौभाग्यवर्धनं १५ ये मे प्राणा तथाप्येतत् बंधनान्मोक्षकारणं सपत्न
हन्निति रिपून् नाशयेद्धोमजाप्यतः १६ त्वमुत्तम इतीत्येतत् यशोबुद्धिविवर्धनं यथा मृगवतीत्येतत् स्त्रीणां सौभाग्यवर्धनं १७ ॥

BHAU DAJI

येमेप्राणातथाप्येतत् बंधना करंपरं दूरं वयं वणिजेति पण्यलाभकरं परं १८ शिवः शिवाभिरित्येतत् भवेत्सौभाग्यवर्धनं येमे पाशासुथाप्ये
तत् बंधनान्मोक्षकारकं १९ बृहस्पतिर्नः परिपातु पथिस्वस्त्ययनंभवेत् अयंतेयोनिरित्येतत् पुत्रलाभकरं भवेत् २० मुंचामित्वेतिकथितमप
मृत्युनिवारणं अथर्वशिरसाध्येता सर्वपापैः प्रमुच्यते २१ प्राधान्येन तु मंत्राणां किंचित्कर्मतरेरितं वृक्षाणांयाज्ञियानां तु समिधः प्रथमं ह
रिः २२ आज्यं च व्रीहयश्चैव तथा वै गौरसर्षपाः अक्षतानि तिलाश्चैव दधिक्षीरे च भार्गव २३ दर्भास्तथैव दूर्वाश्च बिल्वानि कमलानि च
शांतिपुष्टिकराण्याहुर्द्रव्याण्येतानि सर्वशः २४ तैलं कणानि धर्मज्ञ राजिकारुधिरं विषं समिधः कंटकोपेताअभिचारेषु यो[redacted]येत् २५ आर्षं
दैवंदैवतं छंदो विनियोगज्ञ आचरेत् इत्याग्नेये महापुराणे अथर्वविधानं॰ पुष्कर उवाच श्रीसूक्तं प्रतिवेदं च ज्ञेयं लक्ष्मीविवर्धनं
हिरण्यवर्णां हरिणीं ऋचः पंचदशश्रियः १ रथे अक्षेषु वाजेति चतस्रो यजुषि श्रियः श्रायंतीयं तथा साम श्रीसूक्तं सामवेदकं २ श्रियंधा
तर्मयि धेहि प्रोक्तमाथर्वणे तथा श्रीसूक्तं योजपेद्भक्त्याहुत्वा श्रीस्तस्य वै भवेत् ३ पद्मानि चाथ बिल्वानि हुत्वाज्यं वा तिलान् श्रियं एकर्णमे
पौरुषं सूक्तं प्रतिवेदं तु सर्वदं ४ सूक्तेन दद्यान्निष्पापो ह्येकैकयाजलांजलिं स्नात एकैकया पुष्पं विष्णोर्दत्वाघहा भवेत् ५ स्नात एकैकया
दत्वा फलं स्यात्सर्वकामभाक् महापापोपपापांतो भवेज्जप्त्वातु पौरुषं ६ कृच्छ्रैर्विशुद्धो जप्त्वा च हुत्वा स्नात्वाथ सर्वभाक् अष्टदशाभ्यः शां
तिभ्यस्तिस्रोन्याः शांतयो वराः ७ अमृता चाभया सौम्या सर्वोत्पातविमर्दनाः अमृता सर्वदैवत्या अभया ब्रह्मदेवता ८ सौम्या स्यात्सौ
म्यदैवत्या एका स्यात्सर्वकामदा अभयायमणिः कार्यो वरुणस्य भृगूत्तम ९ शतकांडमृतायाश्च सौम्यायाः शंखजो मणिः यद्दैवत्या
स्तथा मंत्राः सिद्धोस्यान्मणिबंधनं दिव्यांतरिक्षभौमादिसमुत्पातार्दनाद्भुमाः दिव्यांतरिक्षभौमं तु अद्भुतं त्रिविधं शृणु ११ ग्रहर्क्षवैकृ
तं दिव्यमांतरिक्षं निबोध मे उल्कापातश्च दिग्दाहः परिवेषस्तथैव च १२ गंधर्वनगरं चैव विष्टिश्च विकृता च या त्वरस्थिरभवं भूमौ भूकं
पमपि भूमिजं १३ सप्ताहाभ्यंतरे दृष्टावद्भुतं निष्फलं भवेत् शांतिं विना त्रिभिर्वर्षैरद्भुतं भयकृद्भवेत् १४ देवनाश्च प्रनृत्यंति वेपंते प्रज्व
लंति च आरटंति प्ररोदंति प्रस्विद्यंते हसंति च १५ अर्चाविकारोपशमोभ्यर्च्य हुत्वा प्रजायते अनग्निर्दीप्यते येन यत्र राजन्स निस्वनः
१६ नदीप्यते चेदस्वनवान् वाक्यमुदीर्यते नृपैः अग्निवैकृत्यशमनं अग्निमंत्रैश्च भार्गव १७ अकाले फलिता वृक्षाः क्षारं रक्तं स्रवंति
च वृक्षोत्पातप्रशमनं शिवं पूज्य च कारयेत् १८ अतिवृष्टिरनावृष्टिर्दुर्भिक्षायो भयं मतं अवृष्टौ त्रिदिनारब्धवृष्टिर्ज्ञेया भयावहा
१९ वृष्टिवैकृत्यनाशः स्यात् पर्जन्येंद्वर्कपूजनं नगरादपसर्पंते समीपमुपयांति वा २० नद्योद्भुमप्रस्रवणा विरसाश्च भवंति च
सलिलाशयवैकृत्ये जप्तव्यो वारुणो मनुः २१ अकालप्रसवा नार्यः कालभावा प्रजास्तथा विकृतप्रसवाश्चैव युग्मप्रसवनादिकं ॥
२२ स्त्रीणां प्रसववैकृत्ये स्त्रीविप्रादिप्रपूजयेत् वडवा हस्तिनी गौर्वा यदि युग्मं प्रसूयते २३ विजात्यं विकृतं वापि षड्भिर्मासैः प
तंति वै विकृतं वा प्रसूयंते परचक्रभयं भवेत् २४ होमः प्रसूतिवैकृत्ये जपो विप्रादिपूजनं यांति यानान्ययुक्तानि युक्तानि न वहंति
च २५ आकाशे तूर्यनादश्च महद्भयमुपस्थितं प्रविशंति यदा ग्राममारण्यमृगपक्षिणः २६ आरण्यं यांति वा ग्राम्या स्थलं यांति

जलोद्भवाः जलं वा जलजा यांति राजद्वारादिके शिवं २७ प्रदोषे कुक्कुटो वासो त्सुको वा चार्कोदये भवेत् गृहे कपोतश्च निशि क्रव्याद्वा मूर्ध्नि
लीयते २८ मधुरा मक्षिका कुर्यात् काको मैथुनगो दृशि प्रासादतोरणादीनां द्वारप्राकारवेश्मनां २९ अनिमित्तं तु पतनं दृढानां राजमृत्य
वे रजसा वाथ धूमेन दिशोपन्नसमाकुलाः ३० केतूदयोपरागो च छिद्रता शशिसूर्ययोः ग्रहर्क्षविकृतिर्यत्र तत्रापि भयमादिशेत् ३१ अ
ग्निर्यत्र न दीप्येत स्रवंतो वोदकुंभकाः मृतिर्भयं शून्यतादिरुत्पातानां फलं भवेत् ३२ द्विजदेवादिपूजाभ्यः शांतिर्जप्येति होदूत्याग्नेये
महापुराणे उत्पातशांतिः पुष्कर उवाच॰ देवपूजादिकं कर्म वक्ष्ये चोत्पातमर्दनं आपोहिष्ठेति तिसृभिः स्नातोर्घ्यं विष्णवे र्पयेत् १ हिरण्य
वर्णा इति च पाद्यं च तिसृभिर्द्विज अत्र आपोज्याचमनमिदमापोभिषेचनं २ रथे अक्षे चतसृभिर्गंधं युवेति वस्त्रकं पुष्पं पुष्पवतीत्येव धूपं
धूरसि वाप्यथ ३ तेजोसि शुक्रं दीपं स्यात् मधुपर्कं दधीति च हिरण्यगर्भ इत्यष्टर्चैः प्रोक्तानि वेदने ४ अन्नस्य मनुजश्रेष्ठ पानस्य च सुगं
धिनः चामरव्यजनोपानच्छत्रयानासनेन तथा ५ यत्किंचिदेवमादि स्यात् सावित्रेण निवेदयेत् ६ पौरुषं तु जपेत्सूक्तं तदेव जुहुयात्तथा ६
अर्चाभावे तथा वेद्यां जलपूर्णे घटे तथा नदीतीरेथ कालेवा शांतिः स्याद्विष्णुपूजने ७ ततो होमः प्रकर्तव्यो दीप्यमाने विभावसौ परिसमू
ह्य पर्युक्ष्य परिस्तीर्य परिस्तरैः ८ सर्वान्नायं समुद्धृत्य जुहुयात्प्रयतस्ततः वासुदेवाय प्रभवे चाव्ययाय च विष्णवे अग्नये चैव सोमाय मि
त्राय वरुणाय च इंद्राय च महाभाग इंद्राग्निभ्यां तथैव च १० विश्वेभ्यश्चैव देवेभ्यः प्रजानां पतये नमः अनुमत्यै तथा राम धन्वंतरय एव
तु च ११ वास्तोष्पत्ये ततो देव्यै ततः स्विष्टकृतोग्नये सचतुर्थेन नाम्ना तु हुत्वैतेभ्यो बलिं हरेत् १२ तक्षोपतक्षमभितः पूर्वेणाग्निमतः परं अ
श्वनामानि धर्मज्ञ ऊर्णनामानि चाप्यथ १३ निरुंधी धूम्रिणी काच अस्वपंती तथैव च मेघपत्नी च नामानि सर्वेषामेव भार्गव १४
आग्नेय्याद्याः क्रमेणाथ ततः शक्तिषु निक्षिपेत् नंदिन्यै च सुभाग्यै च सुमंगल्यै च भार्गव १५ भद्रकाल्यै ततो दत्वा पूर्णायां च तथा श्रिये
हिरण्यकेश्यै च तथा वनस्पतय एव च १६ धर्माधर्मयोर्द्वारे गृहमध्ये ध्रुवाय च मृत्यवे च हविर्दद्यात् वरुणायोदकाशये १७ भूतेभ्यश्च
बहिर्दद्यात् श्रवणे धनदाय च इंद्रायेंद्रपुरुषेभ्योदद्यात्पूर्वेण मानवः १८ यमाय तत्पुरुषेभ्यो दद्याद्दक्षिणतस्तथा वरुणाय तत्पुरुषे
भ्यो दद्यात्पश्चिमतस्तथा सोमाय सोमपुरुषेभ्य उदग्दद्यादनंतरं ब्रह्मणे ब्रह्मपुरुषेभ्यो दद्यान्मध्ये तथैव च २० प्राकाशे च तथा चोर्ध्वं
स्थंडिलाय क्षितौ तथा दिवा दिवाचरेभ्यश्च रात्रौ रात्रिचरेषु च बलिं बहिस्तथा दद्यात् सायं प्रातस्तु प्रत्यहं पिंडनिर्वपनं कुर्यात् प्रातः सा
यं न कारयेत् २२ पित्रे तु प्रथमं दद्यात्तत्पित्रे च तदनंतरं प्रपितामहाय तन्मात्रे पितृमात्रे ततोर्पयेत् २३ तन्मात्रे दक्षिणाग्रेषु कुशेष्वेवं य
जेत् पितॄन् इंद्रवारुणवायव्यायाम्यावा नैर्ऋताश्च ये २४ ते काकाः प्रतिगृह्णंतु इमं पिंडं मयोद्धृतं काकपिंडं तु मंत्रेण शुनः पिंडं प्रदा
पयेत् विवस्वतः कुले जातौ द्वौ श्यामशबलेश्वनौ तेषां पिंडं प्रदास्यामि पथि रक्षंतु मां सदा २६ सौ[redacted]रभेय्यः सर्वहिता पवित्राः पापनाशनाः
प्रतिगृह्णंतु मे ग्रासं गावस्त्रैलोक्यमातरः २७ गोग्रासं च स्वस्त्ययनं कृत्वा भिक्षां प्रदापयेत् अतिथीन् पूजयित्वा च गृही भुंजीत च स्वयं
ओंभूः स्वाहा ओंभुवः स्वाहा ओंस्वः स्वाहा ओंभूर्भुवः स्वः स्वाहा ओंदेवकृतस्यैनसो वयजनमसि स्वाहा २९ ओंपितृकृतस्यैनसो

वयजनमसिस्वाहा ओंआत्मकृतस्यैनसोऽवयजनमसिस्वाहा ओंमनुष्यकृतस्यैनसोऽवयजनमसिस्वाहा ओंएनसोवयजनमसिस्वाहा ३१
यच्चाहमेनेविद्वांश्चकारयच्चाविद्वांस्तस्यसर्वस्यैनसोऽवयजनमसिस्वाहा अग्नयेस्विष्टकृतयेप्रजापतयेस्वाहा ३२ विष्णुप्रजावैश्वदे
वोबलिस्तेकीर्तितोमया ३३ इत्याग्नेयेमहापुराणेवैश्वदेवदेवपूजादि अग्निरुवाच सर्वार्थसाधनंस्नानंवक्ष्येशांतिकरंशृणु स्नापयेद्व
सरित्तीरेग्रहारिष्टेविचक्षणः १ देवालयेज्वरार्तान्तुविनायकग्रहार्दिते विद्यार्थिनांहृदेगेहेजयकामस्यतीर्थके २ पद्मिन्यांस्नापयेच्छ्रा
रींगर्भोयस्याःस्रवेत्तथा अशोकसन्निधौस्नाप्याजातोयस्याविनश्यति ३ पुष्पार्थिन्यांचपुष्पाद्यैःपुत्रार्थिन्यांचसागरे गृहसौभाग्य
कामानांसर्वेषांविष्णुसन्निधौ ४ वैष्णवेरेवतीपुष्येसर्वेषांस्नानमुत्तमं स्नानकामस्यसप्ताहंपूर्वमुत्सादनंस्मृतं ५ पुनर्नवांरोचनांच
शताह्वागुरुणीत्वचं मधूकंरजनीद्वेच तगरंनागकेसरं ६ आसुरीचैवमंजिष्ठामांसीयासकमर्दकैः प्रियंगुसर्षपाःकुष्टंबालांबाह्मीं
चकुंकुमं ७ पंचगव्यंसकुम्भिश्चउद्वर्त्तस्नानमाचरेत् मंडलेकर्णिकायांचविष्णुंब्रह्माणमर्चयेत् ८ दक्षेवामेहरंपूर्वंपत्रेपूर्वादिकेक्र
मात् लिखेदिंद्रादिकान्देवान्सायुधान्सहबांधवान् ९ स्नानमंडलकादिक्षुकुर्याच्चैवविदिक्षुच विष्णुब्रह्मेशशक्रादींस्तत्रास्त्रा
न्यस्यचार्चयेत् १० एकैकस्यत्वष्टशतंसमिधस्तुतिलान्घृतं भद्रःसुभद्रःसिद्धार्थःकलशाःपुष्टिवर्धनाः ११ अमोघश्चित्रभानुश्चपर्ज
न्योथसुदर्शनः स्थापयेत्तुघटानेतान्साश्विरुद्रमरुद्गणाः विश्वेदेवास्तथादित्यावसवोमुनयस्तथा आवेशयंतुसुप्रीतास्तथान्याअपि
देवताः ओषधीर्निक्षिपेत्कुंभेजयंतीविजयींजयांशतावरींशतपुष्पांविष्णुक्रांतापराजितां १४ ज्योतिष्मतीमतिबलांचंदनोशीर
केसरं कस्तूरिकांचकर्पूरंवालकंपत्रकंत्वचं १५ जातीफलंलवंगंचमृत्तिकापंचगव्यकं भद्रपीठेस्थितंसा[illegible]ध्यंस्नापयेद्बुद्धिमांश्च
रान् १६ राजाभिषेकमंत्रोक्तदेवानांहोमकाःपृथक् पूर्णाहुतिंततोदत्त्वागुरवेदक्षिणांददेत् १७ इंद्रोभिषिक्तोगुरुणापुरादैत्यान्जघानह
दीक्षास्नानंतुकथितंसंग्रामादौजयादिदं १८ इत्याग्नेयेमहापुराणेदिक्पालादिस्नानं ॥ ६४ पुष्करउवाच विनायकोपसृ
ष्टानांस्नानंसर्वकरंवदे विनायकःकर्मविघ्नसिद्ध्यर्थंविनियोजितः १ गणानामाधिपत्येचकेशवेशपितामहैः स्वप्नेवगाहतेत्यर्थंजलं
मुंडांश्चपश्यति २ विनायकोपसंसृष्टःक्रव्यादानधिरोहति व्रजमानस्तथात्मानंमन्यतेनुगतंपरैः ३ विमनाविफलारंभःसंसीदत्यनिमि
त्ततः कन्यावरंचनाप्नोतिस्नपनंतस्यकारयेत् ४ हस्तपुष्याश्वयुक्सौम्येवैष्णवेभद्रपीठके गौरसर्षपकल्केनसाज्येनोत्सादितस्यच
५ सर्वौषधैःसर्वगंधैःप्रलिप्तशिरसस्तथा चतुर्भिःकलशैःस्नानंतेषुसर्वौषधीःक्षिपेत् ६ अश्वस्थानात्गजस्थानात्वल्मीकात्सं
गमात्हृदात् ८ मृत्तिकांरोचनांगंधान्गुग्गुलुंतेषुनिक्षिपेत् सहस्राक्षंशतधारंऋषिभिःपावनंकृतं ९ तेनत्वामभिषिंचामिपावमा
न्यःपुनंतुते भगंतेवरुणोराजाभगंसूर्योबृहस्पतिः १० भगमिंद्रश्चवायुश्चभगंसप्तर्षयोददुः यत्तेकेशेचदौर्भाग्यंसीमंतेयच्चमू
र्धनि ललाटेकर्णयोरक्ष्णोरापस्तेघ्नंतुसर्वदा दर्भपिंजूलमादायवामहस्तेततोगुरुः १२ स्नातस्यसार्षपंतैलंस्रुवेणौदुंबरेणच
जुहुयात्मूर्धनिदद्यात्सव्येनपरिगृह्यच १३ मितश्चसंमितश्चैवतथाशालकटंकटौ कूष्मांडराजपुत्रश्चएतैःस्वाहासमन्वि

तैः १४ नामभिर्बलिमंत्रैश्चनमस्कारसमन्वितैः दद्याच्चतुष्पथेशूर्पेकुशानास्तीर्यसर्वतः १५ कृताकृतांतंदुलांश्चपललौदनमेवच
मत्स्यान्पक्वांस्तथैवामान्पुष्पंचित्रंसुरांत्रिधा १६ मूलकंपूरिकांपूपांस्तथैवौडरिकास्रजः दध्यन्नंपायसंपिष्टंमोदकंगुडमर्पयेत्
१७ विनायकस्यजननीमुपतिष्ठेत्तथांबिकां दूर्वासर्षपपुष्पाणांदत्त्वार्घंपूर्णमंजलिं १८ रूपंदेहियशोदेहिसौभाग्यंसुभगेमम पुत्रान्
देहिधनंदेहिसर्वान्कामांश्चदेहिमे १९ भोजयेत्ब्राह्मणान्दद्याद्वस्त्रयुग्मंगुरोरपि विनायकंग्रहान्प्रार्च्यश्रियंकर्मफलंलभेत् इ
त्याग्नेयेमहापुराणेविनायकस्नानं पुष्करउवाच स्नानंमाहेश्वरंवक्ष्येराजादेर्जयवर्धनं दानवेंद्रायबलयेयज्जगादोशनाःपुरा
१ [illegible]भास्करेनुदितेपीठेप्रातःसंस्नापयेद्घटैः ओंनमोभगवतेरुद्रायधवलपांडुरोपवीतभस्मानुलिप्तगात्रायतद्यथा २ जयजय
सर्वान्शत्रून्अमुकस्यकलहविग्रहविवादेषुभंज २ ओंमथसर्वप्रत्यर्थिकान्योसौयुगांतकालेदिधक्षति इमांपूजांरौद्रमूर्तिः
सहस्रांशुःशुक्रःसतेरक्षतुजीवितंसंवर्तकालाग्नितुल्यश्चत्रिपुरांतकरःशरः सर्वदेवमयःसोपितवरक्षतुजीवितं ३ निखिलिनि
खिलिस्वाहा एवंस्नातस्तुमंत्रेणजुहुयात्तिलतंदुलं पंचामृतैस्तुसंस्नाप्यपूजयेच्छूलपाणिनं ४ स्नानान्यन्यानिवक्ष्यामिसर्वदावि
जयायते स्नानंघृतेनकथितमायुषोवर्धनंपरं गोमयेनचलक्ष्मीःस्यात्गोमूत्रेणाघमर्षणं क्षीरेणबलवृद्धिःस्याद्दध्नालक्ष्मीविवर्ध
नं ६ कुशोदकेनपापांतःपंचगव्येनसर्वभाक् शतमूलेनसर्वाप्तिःगोशृंगोदकतोघजित् ७ पलाशबिल्वकमलकुशस्नानंतुसर्वदं
वचाहरिद्रेद्वेमुस्तंस्नानंरक्षोहणंपरं ८ आयुष्यंचयशस्यंचधर्ममेधाविवर्धनं हैमाद्भिश्चैवमांगल्यंरूप्यताम्रोदकैस्तथा ९ रत्नोद
कैस्तुविजयःसौभाग्यंसर्वगंधकैः फलाद्भिश्चतथारोग्यंधात्र्यद्भिःपरमांश्रियं ११ तिलसिद्धार्थकैर्लक्ष्मीःसौभाग्यंचप्रियंगुणा
पद्मोत्पलकदंबैश्रीर्बलंबलाश्रियोदकैः १२ विष्णुपादोदकस्नानंसर्वस्नानेभ्यउत्तमं एकाकीएककामायेह्येककंविधिवच्चरेत्
प्र १३ अर्कदयतिसूक्तेनबध्नीयान्मणिकरे कुष्टपापवचाषष्ठीशंखोलोहादिकोमणिः १४ सर्वेषामेवकामानामीश्वरोभगवान्ह
रिः तस्यसंपूजनादेवसर्वान्कामान्समश्नुते १५ स्नापयित्वाघृतक्षीरैःपूजयित्वाचपित्तहा पंचमुद्गबलिंदत्त्वाअतीसारात्प्र
मुच्यते पंचगव्येनसंस्नाप्यवातव्याधिंविनाशयेत् द्विसहस्रपलात्श्लेष्मरोगहाचातिपूजया घृतंतैलंतथाक्षौद्रंस्नानंतुत्रिरसं
परंस्नानंघृताज्यंद्विस्नेहंयमलंघृततैलकैः १७ क्षौद्रमिक्षुरसंक्षीरंस्नानंत्रिमधुरंस्मृतं घृतमिक्षुरसंतैलंक्षौद्रंचंदनसंश्रिये १८
अनुलेपंत्रिशुक्लंतुकर्पूरोशीरचंदनं चंदनागरुक[illegible]र्पूरमलयंसर्वकामदं जातीफलंसकर्पूरचंदनंचविशीतकं २१ पीतानिशु
क्लवर्णानितथाशुक्लानिभार्गव कृष्णानिचैवरक्तानिपंचवर्णानिनिर्दिशेत् २२ उत्पलंपद्मजातीचत्रिशीतंहरिपूजने कुंकुमं
रक्तपद्मानित्रिरक्तंरक्तमुत्पलं २३ धूपदीपादिभिःप्रार्च्यविष्णुंशांतिर्भवेन्नृणां चतुरस्रेकरेकुंडेब्राह्मणाश्चाष्टषोडश २४ लक्ष
होमंकोटिहोमंतिलाज्ययवधान्यकैः ग्रहानभ्यर्च्यगायत्र्यासर्वशांतिःक्रमाद्भवेत् इत्याग्नेयेमहापुराणेकोटिहोमादि ॥

३६

पुष्करउवाच कर्मसांवत्सरं राज्ञां जन्मर्क्षे पूजयेन्नृपं मासिमासि च संक्रांतौ सूर्यसोमादिदेवताः १ अगस्त्यस्योदयेगस्त्यं चातुर्मास्ये हरिंय
जेत् शयनोत्थापने पंचदिनं कुर्यात्समुत्सवं प्रौष्ठपदे सितेपक्षे प्रतिपत्प्रभृति क्रमात् शिबिरात्पूर्वदिग्भागे शक्रार्थं भवनं चरेत् ३ तत्र श
क्रध्वजं स्थाप्य शचीं शक्रं प्रपूजयेत् अष्टम्यां वाद्यघोषेण तां तु यष्टिं प्रवेशयेत् ४ एकादश्यां सोपवासो द्वादश्यां केतुमुत्थितं यजेद्देवादिसंवी
तं पटस्थौ सुरपं शचीं ५ वर्धस्वेंद्र जितामित्र वृत्रहन् पाकशासन देवदेव महाभाग त्वं हि भूमिष्ठतां गतः ६ त्वं प्रभुः शाश्वतश्चैव सर्वभू
तहिते रतः अनंततेजो वैराजो यशोजयविवर्धन ७ तेजस्ते वर्धयंत्वेते देवाः शक्र सहर्षिभिः ब्रह्मविष्णुमहेशाश्च कार्तिकेयो विनायकः
आदित्या वसवो रुद्राः साध्याश्च भृगवो दिशः मरुद्गणा लोकपाला ग्रहा यक्षाद्रिनिम्नगाः ९ समुद्राः श्रीर्महागौरी चंडिका च सरस्वती प्रवर्त
यंतु ते तेजो जय शक्र शचीपते १० तव चापि जयान्नित्यं मम संपद्यतां शुभं प्रसीद राज्ञां विप्राणां प्रजानामपि सर्वशः भवत्प्रसादात्पृथिवी नि
त्यं सस्यवती भवेत् शिवं भवतु निर्विघ्नं शाम्यंतामीतयो भृशं १२ मंत्रेणेंद्रं समभ्यर्च्य जितभूः स्वर्गमाप्नुयात् भद्रकाली पटे लिख्या पूज
येदाश्विने जये शुक्लपक्षे तथाष्टम्यामायुधं कार्मुकं ध्वजं छत्रं च राजलिंगानि शस्त्राद्यं कुसुमादिभिः १४ जागरं निशि बलिं दद्यात् द्वितीये
ऽह्नि पुनर्यजेत् भद्रकालि महाकालि दुर्गे दुर्गार्तिहारिणि १५ त्रैलोक्यविजये चंडि मम शांता जया भव नीराजनविधिं वक्ष्ये ऐशान्यां मंदि
रं चरेत् १६ तोरणत्रितयं तत्र गृहे देवान्यजेत्सदा चित्रास्वात्यां यदा स्वातिं सविता प्रतिपद्यते १७ ततः प्रभृति कर्तव्यं यावत्स्वातौ रविः स्थितः ब्र
ह्मा विष्णुश्च शंभुश्च शक्रश्चैवानिलानलौ १८ विनायकः कुमारश्च वरुणो धनदो यमः विश्वेदेवा वैश्रवणो गजाश्चाष्टौ च तान्यजेत् १९ कु
मुदैरावणौ पद्मः पुष्पदंतश्च वामनः सुप्रतीकांजनो नीलः पूजा कार्या ग्रहादिके २० पुरोधा जुहुयादाज्यं समित्सिद्धार्थकं तिलाः कुंभा अ
ष्टौ पूजिताश्च तैः स्नाप्याश्च गजोत्तमाः २१ अश्वान् स्नाप्याद्देद्यात्पिंडान् ततो हि प्रथमं गजान् निष्क्रामयेत्तोरणैस्तु गोपुरादिन लंघयेत्
२२ निष्क्रमेयुस्ततः सर्वराजलिंगं गृहे यजेत् वरुणं वरुणं प्रार्च्य रात्रौ भूतबलिं ददेत् २३ विशाखायां गते सूर्ये आश्रमे निवसेन्नृपः
अलंकुर्याद्दिने तस्मिन् वाहनं तु विशेषतः पूजिता राजलिंगाश्च कर्तव्या नरहस्तगाः हस्तिनं तुरगं छत्रं खड्गं चापं च दुंदुभिं ध्वजं पताकां
धर्मज्ञ कालज्ञस्त्वभिमंत्रयेत् अभिमंत्र्य ततः सर्वान् कुर्यात्कुंजरधूर्गतान् कुंजरोपरिगौ स्यातां सांवत्सरपुरोहितौ मंत्रितांश्च समारुह्य
तोरणेन विनिर्गमेत् २७ निष्क्रम्य नागमारुह्य तोरणेन विनिर्गमेत् बलिं विभज्य विधिवत् राजा कुंजरधूर्गतः २८ उल्मुकानां तु निचय
मादीपितदिगंतरं राजा प्रदक्षिणं कुर्यात् मेधावान् सुसमाहितः २९ चतुरंगबलोपेतः सर्वसैन्येन नादयन् एवं कृत्वा गृहं गच्छेत्
विसर्जनं जने ३० शांतिनीराजनाख्येयं वृद्धये रिपुमर्दिनी इत्याग्नेये महापुराणे नीराजनाविधिः पुष्कर उवाच छत्रादि
मंत्रान्वक्ष्यामि यैस्तत्पूज्य जयादिकं ब्रह्मणः सत्यवाक्येन सोमस्य वरुणस्य च १ सूर्यस्य च प्रभावेन वर्धस्व त्वं महामते पांडुराभ्रप्रती
काश हिमकुंदेंदुसुप्रभ २ यथांबुदश्छादयते शिवायेमां वसुंधरां तथाच्छादय राजानं विजयारोग्यवृद्धये ३ गंधर्वकुलजातस्त्वं
मा भूयाः कुलदूषकः ब्रह्मणः सत्यवाक्येन सोमस्य वरुणस्य च ४ प्रभावाच्च हुताशस्य वर्धस्व त्वं तुरंगम तेजसा चैव सूर्यस्य मुनी
नां तपसा तथा रुद्रस्य ब्रह्मचर्येण पवनस्य बलेन च स्मर त्वं राजपुत्रोसि कौस्तुभं तु मणिं स्मर ६ यां गतिं ब्रह्महा गच्छेत् पितृहा मातृ
हा तथा भूम्यर्थे नृपवार्ते च क्षत्रियश्च पराङ्मुखः ७ व्रजेस्त्वं तां गतिं क्षिप्रं मा न त्यां पापं भवेत्तव विकृतिं मापगच्छेस्त्वं युद्धध्वनि तुरं
गम ८ रिपून् विनिघ्नन् समरे सह भर्त्रा सुखी भव शक्रकेतो महावीर्य सुपर्णस्त्वामुपाश्रितः ९ पतत्रिराड्वैनतेयस्तथा नारायणध्वजः

काश्यपोमृताहर्ता नागारिर्विष्णुवाहनः १० अप्रमेयो दुराधर्षो रणे देवारिसूदनः महाबलो महावेगो महाकायोमृताशनः ११ गरुत्मा
न् मारुतगतिस्त्वयि संनिहितः स्थितः विष्णुना देवदेवेन शक्रार्थं स्थापितो ह्यसि १२ जयाय भव मे नित्यं वृद्धये च बलस्य च साश्ववर्मा
युधान्योधान् रक्षास्माकं रिपून्दह १३ कुमुदैरावणौ पद्मः पुष्पदंतोथ वामनः सुप्रतीकांजनो नील एतेष्टौ देवयोनयः १४ तेषां पुत्राश्च
पौत्राश्च बलान्यष्टौ समाश्रिताः भद्रो मंद्रो मृगश्चैव गजः संकीर्ण एव च १५ वने वने प्रसूतास्ते स्मर योनिं महागज पांतु त्वा वसवो रुद्रा आ
दित्याः समरुद्गणाः १६ भर्तारं रक्ष नागेंद्र समयः परिपाल्यतां ऐरावणाधिरूढस्तु वज्रहस्तः शतक्रतुः १७ पृष्ठतोनुगतस्त्वेष
रक्षतु त्वां स देवराट् अवाप्नुहि जयं युद्धे स्वस्थश्चैव सदा व्रज १८ अवाप्नुहि बलं चैव ऐरावणसमं युधि श्रीस्ते सोमाद्बलं विष्णोस्ते
जः सूर्याज्जवो निलान्नित्यं १९ स्थैर्यं गिरेर्जयं रुद्राद्यशो देवात्पुरंदरात् युद्धे रक्षंतु नागास्त्वां दिशश्च सह दैवतैः २० अश्विनौ सह गंध
र्वैः पांतु त्वां सर्वदा दिशः मनवो वसवो रुद्रा वायुः सोमो महर्षयः २१ नागाः किन्नरगंधर्वयक्षभूतगणा ग्रहाः प्रमथास्तु सहादित्यैर्भूते
शो मातृभिः सह २२ शक्रः सेनापतिः स्कंदो वरुणश्चाश्रितस्त्वयि प्रदहंतु रिपून् सर्वान् राजा विजयमृच्छतु २३ यानि प्रयुक्तान्यरिभि
र्भूषणानि समंततः पतंतु तव शत्रूणां हतानि तव तेजसा २४ कालनेमिवधे युद्धे युद्धे त्रिपुरघातने हिरण्यकशिपोर्युद्धे वधे सर्वासुरे
षु च २५ शोभितासि तथैवाद्य शोभस्व समयं स्मर नीलश्वेतामिमां दृष्ट्वा नश्यंत्वाशु नृपारयः २६ व्याधिभिर्विविधैर्घोरैः शस्त्रैश्च
युधि निर्जिताः पूतना रेवती लेखा कालरात्रीति पठ्यते २७ दहंत्वाशु रिपून् सर्वान् पताके त्वामुपाश्रिताः सर्वमेधे महायज्ञे देवदेवे
न शूलिना २८ शार्वेण जगतश्चैव सारेण त्वं विनिर्मितः नंदकस्यापरां मूर्तिं स्मर शत्रुनिबर्हण २९ नीलोत्पलदलश्याम कृष्णदुःस्वप्नना
शन असिर्विशसनः खड्गस्तीक्ष्णधर्मा दुरासदः ३० श्रीगर्भो विजयश्चैव धर्मपालस्तथैव च इत्यष्टौ तव नामानि तथोक्तानि स्वयंभु
वा ३१ नक्षत्रं कृत्तिका तुभ्यं गुरुर्देवो महेश्वरः रोहिण्यश्च शरीरं ते दैवतं च जनार्दनः ३२ राजानं रक्ष निस्त्रिंश सबलं सपुरं तथा पि
ता पितामहो देवः स त्वं पालय सर्वदा ३३ शर्मप्रदस्तु समरे वर्मन्सैन्ये यशोसि रक्ष मां रक्षणीयोहं तवानघ नमोस्तु ते ३४ दुंदुभे त्वं
सपत्नानां घोषाद्धृदयकंपनः भव भूमिपसैन्यानां यथा विजयवर्धनः ३५ यथा जीमूतघोषेण हृष्यंति वरवारणाः तथास्तु तव
शब्देन हर्षोस्माकं मुदावह ३६ यथा जीमूतशब्देन स्त्रीणां त्रासोभिजायते तथा तु तव शब्देन नश्यंत्वस्मद्द्विषो रणे ३७ मंत्रैः सदार्च
नीयास्ते योजनीया जयादिषु कुन रक्षां च विष्ण्वादेस्त्वभिषेकं च वत्सरे राज्ञाभिषेकः कर्तव्यो दैवज्ञेन पुरोधसा इत्याग्नेये
महापुराणे मंत्राद्याः पुष्कर उवाच त्रिपुरं जघ्नुषः पूर्वं ब्रह्मणा विष्णुपंजरं शंकरस्य द्विजश्रेष्ठ रक्षणाय निरूपितं १ वागीशे
न च शक्रस्य बलं हंतुं प्रयास्यतः तस्य स्वरूपं वक्ष्यामि तत्त्वं शृणु जयादिमत् २ विष्णुः प्राच्यां स्थितश्चक्री हरिर्दक्षिणतो गदी
प्रतीच्यां शार्ङ्गधृक् चाथ विष्णुः खड्गी ममोत्तरे ३ हृषीकेशो विकोणेषु छिद्रेषु च जनार्दनः क्रोडरूपी हरिर्भूमौ नरसिंहोंबरे मम
४ क्षुरांतममलं चक्रं भ्रमत्येतत्सुदर्शनं अस्यांशुमाला दुष्प्रेक्ष्या हंतुं प्रेतनिशाचरान् ५ गदा चेयं सहस्रार्चिः पतिता पावकोल्बण

३८

रक्षोभूतपिशाचानां डाकिनीनां च नाशिनी शार्ङ्गं विस्फूर्जितं चैव वासुदेवस्य मद्रिपून् तिर्यङ्‌मनुष्यकूष्माण्डप्रेतादीन् हन्त्वशेषतः
७ खड्गधारोज्ज्वलज्योत्स्नानिर्धूता ये समाहिताः तेषां तु शाम्यतां सद्यो गरुडेनेव पन्नगाः ७ ये कूष्माण्डास्तथा यक्षा ये दैत्या ये निशाचराः
प्रेता विनायकाः क्रूरा मनुष्या जंभकाः खगाः सिंहादयश्च पशवो दंदशूकाश्च पन्नगाः सर्वे भवन्तु ते सौम्याः कृष्णशंखरवाहताः
१० चित्तवृत्तिहरा ये मे ये जनाः स्मृतिहारकाः बलौजसां च हर्तारश्छायाविभ्रंशकाश्च ये ११ ये चोपभोगहर्तारः ये च लक्षणनाशकाः
कूष्माण्डास्ते प्रणश्यन्तु विष्णुचक्रवराहताः १२ बुद्धिस्वास्थ्यं मनःस्वास्थ्यं स्वास्थ्यमैंद्रियकं तथा ममास्तु देवदेवस्य वासुदेवस्य कीर्तनात्
१३ पृष्ठे पुरस्तान्मम दक्षिणोत्तरे विकोणपश्चास्तु जनार्दनो हरिः तमीड्यमीशानमनन्तमच्युतं जनार्दनं प्रणिपतितो न सीदति
१४ यथा परं ब्रह्म हरिः परं जगत्स्वरूपं च स एव केशवः सत्येन तेनाच्युतनामकीर्तनात् प्रणाशमेतु त्रिविधं ममाशुभं १५
इत्याग्नेये महापुराणे विष्णुपंजरं पुष्कर उवाच सर्वानुग्राहका मंत्राश्चतुर्वर्गप्र[illegible] ऋग् अथर्व तथा साम यजुः
संख्या तु लक्षणं १ भेदः सांख्यायनश्चैक आश्वलायनो द्वितीयकः २ शतानि दश मंत्राणां ब्राह्मणाद्विसहस्रकं २ ऋग्वेदो हि प्रमाणेन स्मृतो द्वैपायनादिभिः एकोनद्विसहस्रेतु मंत्राणां यजुषस्तथा शतानि दश विप्राणां षडशीतिश्च शालिकाः काण्वमाध्यं
दिनी संज्ञाकठी माध्यकठी तथा ४ मैत्रायणीयं संज्ञा च तैत्तिरीयाभिधानका वैशंपायनिकेत्याद्याः शाखा यजुषि संस्थिताः ५ साम्नः कौथुमसंज्ञैका द्वितीयाथर्वणायनी गानान्यपि च चत्वारि वेद आरण्यकं तथा ६ उआ ऊह चतुर्थं च मंत्रा नव सहस्रकाः
स चतुःशतकाश्चैव ब्रह्मसंकटकाः स्मृताः ७ पंचविंशतिरेवात्र सामगानं प्रकीर्तितं सुमंतुर्जाजलिश्चैव श्लोकायनिरथर्वके
८ शौनकः पिप्पलादश्च मुंजकेशादयोपरे मंत्राणाममुतं षष्ठिशतं चोपनिषच्छतं ९ व्यासरूपी स भगवान् गाथा वेदाद्यकार
यत् शाखाभेदादयो विष्णुरितिहासः पुराणकं प्राप्य व्यासात्पुराणादि सूतो वै रोमहर्षणः सुमतिश्चाग्निवर्चाश्च मित्रयु गो

पा शायनः ११ कृतव्रतोथ सावर्णिः षट् शिष्यास्तस्य चाभवन् शांशपायनादयश्चक्रुः पुराणानां तु संहिताः १२ ब्राह्मादीनि पुराणानि हरिविद्यादशाष्ट च महापुराणेष्वाग्नेये विद्यारूपो हरिः स्थितः १३ सप्रपंचो निष्प्रपंचो मूर्तामूर्तस्वरूपधृक् तं ज्ञात्वाभ्यर्च्य संस्तुत्य भुक्तिमुक्तिमवाप्नुयात् १४ विष्णुर्जिष्णुर्भविष्णुश्च अग्निसूर्यादिरूपवान् अग्निरूपेण देवादेर्मुखं विष्णुः परा
गतिः १५ वेदेषु सपुराणेषु यज्ञमूर्तिश्च गीयते आग्नेयाख्यं पुराणं तु रूपं विष्णोर्महत्तरं १६ आग्नेयाख्यपुराणस्य कर्ता
श्रोता जनार्दनः तस्मात्पुराणमाग्नेयं सर्ववेदसमं महत् सर्वविद्यामयं पुण्यं सर्वज्ञानमयं वरं सर्वज्ञहरिरूपं हि पठतां
शृण्वतां नृणां १८ विद्यार्थिनां च विद्यादमर्थिनां श्रीधनप्रदं राज्यार्थिनां राज्यदं च धर्मदं धर्मकामिनां १९ स्वर्गार्थिनां स्वर्गदं
च पुत्रदं पुत्रकामिनां गवादिकामिनां गोदं ग्रामदं ग्रामकामिनां २० कामार्थिनां कामदं च सर्वसौभाग्यसंप्रदं गुणकीर्तिप्रदं नृणां जयदं जयकामिनां २१ सर्वेच्छानां सर्वदं च मुक्तिदं मुक्तिकामिनां पापघ्नं पापकर्तॄणामाग्नेयं हि पुराणकं २१ इत्याग्नेये

महापुराणे वेदशाखादि पुष्कर उवाच ब्रह्मणाभिहितं पूर्वं यावन्मात्रं मरीचये लक्षार्धार्धं तु तद्ब्राह्मं लिखित्वा संप्रदापयेत् १ वैशाख्यां पौर्णमास्यां च सहान्नं जलधेनुमत् पाद्मं द्वादशसाहस्रं ज्येष्ठे दद्याच्च धेनुमत् २ वाराहकल्पवृत्तान्तमधिकृत्य पराशरः त्रयोविंशतिसाहस्रं वैष्णवं प्राह दापयेत् ३ जलधेनुमदाषाढ्यां विष्णोः पदमवाप्नुयात् चतुर्दशसहस्राणि वायवीयं हरप्रियं ४ श्वेतकल्पप्रसंगेन धर्मं वायुरिहाब्रवीत् दद्याल्लिखित्वा तद्विप्रे श्रावण्यां गुडधेनुमत् ५ यत्राधिकृत्य गायत्रीं कीर्त्यते धर्मविस्तरः वृत्रासुरवधान्वितं तद्भागवतमुच्यते ६ सारस्वतस्य कल्पस्य प्रोष्ठपद्यां तु तद्ददेत् अष्टादशसहस्राणि हेमसिंहसमन्वितं ७ यत्राह नारदो धर्मान् बृहत्कल्पाश्रितानिह पंचविंशत्सहस्राणि नारदीयं तदुच्यते ८ सधेनुं चाश्विने दद्यात् सिद्धिमात्यंतिकीं लभेत् यत्राधिकृत्य शकुनान् धर्माधर्मविचारणा कार्तिक्यां नवसाहस्रं मार्कंडेयमथार्पयेत् अग्निना यद्वशिष्ठाय प्रोक्तं चाग्नेयमेव तत् १० लिखित्वा पुस्तकं दद्यात् मार्गशीर्ष्यां स सर्वदः द्वादशैव सहस्राणि सर्वविद्याप्रबोधनं ११ चतुर्दशसहस्राणि भविष्यं सूर्यसंभवं भवस्तु मनवे प्राह दद्यात् पौष्यां गुडादिमत् १२ सावर्णिना नारदाय ब्रह्मवैवर्तमीरितं रथंतरस्य वृत्तांतमष्टादशसहस्रकं १३ माघ्यां दद्याद्वराहस्य चरितं ब्रह्मलोकभाक् यत्राग्निलिंगमध्यस्थो धर्मान् प्राह महेश्वरः १४ आग्नेयकं मतं लिंगमेकादशसहस्रकं तद्दत्त्वा शिवमाप्नोति फाल्गुन्यां तिलधेनुमत् १५ चतुर्विंशत्सहस्राणि वाराहं विष्णुनेरितं भूम्यै वराहचरितं मानवस्य प्रवृत्तितः १६ सहैवगारुडं चैत्र्यां पदमाप्नोति वैष्णवं चतुरशीतिसाहस्रं स्कांदं स्कंदेरितं महत् १७ अधिकृत्य च धर्मांश्च कल्पं तत्पुरुषं पर्ययेत् वामनं दशसाहस्रं धौम्यकल्पे हरेः कथाः १८ दद्याच्छारदि विषुवे धर्मादिविनिबोधनं कूर्मं चाष्टसहस्रं च कूर्मोक्तं च रसातले १९ इंद्रद्युम्नप्रसंगेन दद्यात्तद्धेमकूर्मवत् त्रयोदशसहस्राणि मात्स्यं कल्पादितोऽब्रवीत् २० मात्स्यं हि मानवे दद्याद्विष्णवे हेममत्स्यवत् गारुडं चाष्टसाहस्रं वैष्णवं तार्क्ष्यकल्पके २१ विश्वांडाद्गरुडोत्पत्तिं तद्दद्याद्धेमहंसवत् ब्रह्मा ब्रह्मांडमाहात्म्यमधिकृत्याब्रवीत् पुनः २२ तच्च द्वादशसाहस्रं ब्रह्मांडं तद्द्विजेऽर्पयेत् भारतपर्वसमाप्तौ वस्त्रगंधस्रगादिभिः २३ वाचकं पूजयेदादौ भोजयेत्पायसैर्द्विजान् गोभूग्रामसुवर्णादि दद्यात्पर्वणिपर्वणि २४ समाप्ते भारते विप्रं संहितापुस्तकान्यजेत् शुभे देशे निवेश्याथ क्षौमवस्त्रादिनावृतान् नरनारायणौ पूज्यौ पुस्तकाः कुसुमादिभिः गोऽन्नभूहेम दत्त्वाथ भोजयित्वा क्षमापयेत् २७ अयनादौ श्रावकस्य रत्नानि विविधानि च मासकौ द्वौ त्रयश्चैव मासे मासे प्रदापयेत् २७ अयनादौ श्रावकस्य दानमादौ विधीयते श्रोतृभिः सकलैः कार्यं श्रावकपूजनं द्विज २८ इतिहासपुराणानां पुस्तकानि प्रयच्छति पूजयित्वायुरारोग्यं स्वर्गं मोक्षमवाप्नुयात् २९ इत्याग्नेये महापुराणे महापुराणादिदानमाहात्म्यं पुष्कर उवाच
सूर्यवंशः सोमवंशो राज्ञां वंशा वदामि ते हरेर्ब्रह्मा पद्मगो भून्मरीचिर्ब्रह्मणः सुतः १ मरीचेः कश्यपस्तस्माद्विवस्वांस्तस्य
पत्न्यपि संज्ञा राज्ञी प्रभा तिस्रो राज्ञी रैवतपुत्रिका २ रैवतं सुषुवे पुत्रं प्रभातं च प्रभा रवेः त्वाष्ट्री संज्ञा मनुं पुत्रं यमलौ

२८

रेवस्य रैवतः पुत्रः ककुद्मी नाम धार्मिकः ज्येष्ठः पुत्रशतस्यासीद्राज्यं प्राप्य कुशस्थलीं

यमुनां यमं ३ छायासंज्ञा च सावर्णिं मनुं वैवस्वतं सुतं शनिं च तपतीं विष्टिं संज्ञायां चाश्विनौ पुनः ४ मनोर्वैवस्वतस्यास
न्पुत्रा वैन्यवत्तसमाः इक्ष्वाकुश्चैव नाभागो धृष्टः शर्यातिरेव च ५ नरिष्यन्तस्तथा प्रांशुर्नाभागो दिष्टसप्तकाः करूष
श्च पृषध्रश्च अयोध्यायां महाबलाः कन्येला च मनोरासीद्बुधात्तस्यां पुरूरवाः पुरूरवसमुत्पाद्य सैव सुद्युम्नतां गता
७ सुद्युम्नादुत्कल गयौ विनताश्वस्त्रयो नृपाः उत्कलस्योत्कलं राष्ट्रं विनताश्वस्य पश्चिमा ८ दिक्पूर्वा राजवर्यस्य गय
स्य तु गया पुरी वशिष्ठवाक्यात्सुद्युम्नः प्रतिष्ठानमवाप ह ९ तत्पुरूरवसे प्रादात्सुद्युम्नो राज्यमाप्त नरिष्यतः शकाः
पुत्रा नाभागस्य च वैष्णवः १० अंबरीषः प्रजापालो धार्ष्टकं धृष्टतः कुलं सुकन्या नतो शर्यातेरेवाद्यानर्त्ततो
नृपः ११ आनर्तविषयश्चासीत्पुरी चासीत्कुशस्थली सकन्यासहितः श्रुत्वा गांधर्वं ब्रह्मणोंतिके १३ मुहूर्तभूतं
देवस्य मर्त्यं बहुयुगं गतं आजगाम जवेनाथ स्वां पुरीं यादवैर्वृतां १४ कृतां द्वारवतीं नाम बहुद्वारां मनोरमां भोजवृष्ण्यंध
कैर्गुप्तां वासुदेवपुरोगमैः रेवतीं बलदेवाय ददौ ज्ञात्वा ह्यनित्यतां ततः समेरुशिखरे तत्वा विष्णवालयं गतः १६ नाभा
गस्य च पुत्रौ द्वौ वैश्यौ ब्राह्मणतां गतौ करूषस्य तु कारूषाः क्षत्रिया युद्धदुर्मदाः १७ शूद्रत्वं च पृथक्प्राप्तो गां हिंस
यित्वा गुरोश्च गां मनुपुत्रादथेक्ष्वाकोर्विकुक्षिर्देवराड् भूत् १८ विकुक्षेस्तु ककुत्स्थोभूत्तस्य पुत्रः सुयोधनः तस्य पु
त्रः पृथुर्नाम विश्वगश्वः पृथोः सुतः १९ आयुस्तस्य च पुत्रोभूद्युवनाश्वस्तथा सुतः युवनाश्वाच्च शावस्तः पूर्वे श्राव
स्तिकी पुरी २० शावस्तात्बृहदश्वोभूत् कुवलाश्वस्ततो नृपः धुंधुमारत्वमगमद्धुंधोर्नाम्ना च यः पुरा २१ धुंधुमा
रात्त्रयोभूपा दृढाश्वो दंडएव च कपिलोथ दृढाश्वात्तु हर्यश्वश्च प्रमोदकः २२ हर्यश्वस्य निकुंभोभूत् संहताश्वो निकुंभ
तः अकृताश्वो रणाश्वश्च संहताश्वसुताबुभौ २३ युवनाश्वो रणाश्वस्य मांधाता युवनाश्वतः मांधातुः पुरुकु
त्सोभून्मुचुकुंदो द्वितीयकः २४ पुरुकुत्साच्च सदस्युः संभूतो नर्मदाभवः संभूतस्य सुधन्वाभूत्त्रिधन्वाथ सुधन्वनः २५
त्रिधन्वनस्त्र्यारुणस्तस्य सत्यव्रतः सुतः सत्यव्रतात्सत्यरथो हरिश्चंद्रश्च तत्सुतः २५ हरिश्चंद्राद्रोहिताश्वो रोहिताश्वाद्वृ
कोभवत् वृकात्तु बाहुश्च बाहोश्च सगरस्तस्य च प्रिये २६ प्रभा षष्टिसहस्राणां सुतानां जननी ह्यभूत् तुष्टादौर्वान्नृपादेकं
भानुमत्यसमंजसं २८ खनंतः पृथिवीं दग्धा विष्णुना बहुसागराः असमंजसोंशुमांश्च दिलीपोंशुमतोभवत् २९ भगीरथो
दिलीपात्तु येन गंगावतारिता भगीरथात्तु नाभागो नाभागादंबरीषकः ३० सिंधुद्वीपोंबरीषात्तु श्रुतायुस्तत्सुतः स्मृतः श्रु श्रु
तायोः ऋतुपर्णोभूत् तस्य कल्माषपादकः ३१ कल्माषात्सर्वकर्माख्य नरण्यस्तत्सुतोभवत् अनरण्यात्तु निघ्नोप्यनमित्रस्त
तो रघुः १ ३२ रघोरभूद्दिलीपस्तु दिलीपाच्चाप्यजो नृपः दीर्घबाहुरजात्तोल स्त्वजात्पालस्ततोभवत् ३३ तथा दशरथो जात
स्तस्य पुत्रचतुष्टयं नारायणात्मकाः सर्वे रामस्तस्याग्रजोभवत् ३४ रावणांतकरो राजा ह्ययोध्यायां रघूत्तमः वाल्मीकिर्यस्य

र्यस्य चरितं चक्रे तन्नारदश्रवात् ३५ रामपुत्रौ कुशलवौ सीतायां कुलवर्धनौ अतिथिश्च कुशाज्जज्ञे निषधस्तस्य चात्मजः
निषधात्तु नलो जज्ञे नभो जायत वै नलात् नभसः पुंडरीकोभूत्सुधन्वा च ततोभवत् ३७ सुधन्वतो देवानीकोह्यहीनाश्व
श्च तत्सुतः अहीनाश्वात्सहस्राश्वश्चंद्रालोकस्ततोभवत् ३८ चंद्रावलोकतस्तारापीडोस्माच्चंद्रपीडतः चंद्रागिरेर्भानुरथः
श्रुतायुस्तस्य चात्मजः ३९ इक्ष्वाकुवंशप्रभवाः सूर्यवंशधराः स्मृताः इत्याग्नेये महापुराणे सूर्यवंशः अग्निरुवाच सो
मवंशं प्रवक्ष्यामि पठितं पापनाशनं विष्णुनाभ्यब्जजो ब्रह्मा ब्रह्मपुत्रोत्रिरत्रितः १ सोमश्चक्रे राजसूयं त्रैलोक्यं दक्षिणां द
दौ समाप्तेवभृथे सोमं तद्रूपालोकनेच्छवः २ कामबाणाभितप्तांग्यो नवदेव्यः सिषेविरे लक्ष्मीर्नारायणं त्यक्त्वा सिनीवाली
च कर्दमं ३ द्युतिर्विभावसुं त्यक्त्वा पुष्टिर्धातारमव्ययं प्रभा प्रभाकरं त्यक्त्वा हविष्मंतं कुहूः स्वयं ४ कीर्तिर्जयंतं भर्तारं वसु
र्मारीचकश्यपं धृतिस्त्यक्त्वा पतिं लक्ष्मीं सोममेवाभजत्तदा ५ स्वकीया इव सोमोपि कामयामास तास्तदा एवं कृतापचारस्य
तासां भर्तृगणस्तदा ६ न शशाकापकाराय शापैः शस्त्रादिभिः पुनः सप्तलोकैकनाथत्वमवाप्तस्तपसा श्रुतं ७ विबभ्राममति
स्तस्य विनयादनपाहृता बृहस्पतेः स वै भार्यां तारां नाम यशस्विनीं ८ जहार तरसा सोमो ह्यवमन्यांगिरः सुतं ततस्तद्युद्धम
भवत्प्रख्यातं तारकामयं ९ देवानां दानवानां च लोकक्षयकरं परं ब्रह्मा निवार्योशनसं तारामांगिरसे ददौ १० तामंतः प्रसवां
दृष्ट्वा गर्भं त्यज्याब्रवीद्गुरुः गर्भस्त्यक्तः प्रदीप्तोथ बुधोभूत्सोमसंभवः ११ एवं सोमाद्बुधः पुत्रस्तस्य पुत्रः पुरूरवाः स्वर्गं
त्यक्त्वोर्वशी सा तं वरयामास चाप्सराः १२ तया सहावसद्राजा दशवर्षाणि पंच च पंच षट् सप्त चाष्टौ च दश चाष्टौ महामुने
१३ एकोग्निरभवत्पूर्वं तेन त्रेता प्रवर्तिता पुरूरवा योगशीलो गांधर्वलोककामीयिवान् १४ आयुर्दृढायुरश्वायुर्वनायुर्दृ
ढमानुषः दिविजातः शतायुश्च सुषुवे चोर्वशी नृपान् १५ आयुषो नहुषः पुत्रो वृद्धशर्मा रजिस्तथा दंभो विपाप्मा पंचा
ग्न्या रजेः पुत्रशतं ह्यभूत् १६ राजेया इति विख्याता विष्णुरत्नवरो रजिः देवासुरे रणे दैत्यानवधीत्सुरयाचितः १७ गतायें
द्राय पुत्रत्वं दत्वा राज्यं दिवं गतः राजपुत्रैः कृतं राज्यं शक्रस्याथ सुदुर्मनाः १८ ग्रहशांत्यादिविधिना गुरुरिंद्राय तद्ददौ मोह
यित्वा रजिसुतानासंस्ते जितधर्मिणः १९ नहुषस्य सुताः सप्त यतिर्ययातिरुत्तमः उत्तरः पंचकश्चैव शर्यातिर्मेघपालिकौ
यतिं कुमारभावेपि विष्णुं ध्यात्वा हरिं गतः देवयानी शुक्रकन्या ययातेः पत्न्यभूत्तदा २१ वृषपर्वजा शर्मिष्ठा ययातेः पंच तत्सु
ताः यदुं च तुर्वसुं चैव देवयानी व्यजायत २२ द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी यदुः पूरुश्च भरतस्तेषां वंशविवर्धनौ
इत्याग्नेये महापुराणे अग्निरुवाच यदोरासन्पंच पुत्रा ज्येष्ठस्तेषु सहस्रजित् नीलाजिकौ रघुः क्रोष्टुः शतजिच्च सह
स्रजित् शतजेर्हैहयो वेणुर्हयो ह यद्वृत्तित्रयः धर्मनेत्रो हैहयस्य धर्मनेत्रस्य संहनः २ महिमा संहनस्यासीत् महिम्नो भ
द्रसेनकः भद्रसेनात्तु दुर्गमोभूद्दुर्गमात्कनको भवत् ३ कनकात्कृतवीर्यस्तु कृतान्गिः करवीरकः कृतौजास्तु चतुर्था

भूवकृतवीर्यात्तु सोर्जुनः ४ वनोर्जुनाय पत्यैसप्तद्वीपां महीमिमां ददौ बाहुसहस्रं च अजयत्वं रणेरिणा ५ अधर्मे वर्तमानस्य विष्णुहस्तान्मृ
तिर्भुवा दशयज्ञसहस्राणि सोर्जुनः कृतवान्नृपः ६ अनष्टद्रव्यता राष्ट्रे तस्य संस्मरणादभूत् न नूनं कार्तवीर्यस्य गतिं यास्यंति वै नृपाः ७
यज्ञैर्दानैस्तपोभिश्च विक्रमेण श्रुतेन च कार्तवीर्यस्य च शतं पुत्राणां पंच वै पुरः ८ शूरसेनश्च शूरश्च धृष्टोक्तः कृष्ण एव च जयध्वज
श्च नामासीदावंत्यो नृपसत्तमः ९ जयध्वजात्तालजंघस्तालजंघात्ततः श्रुताः हैहयानां कुलाः पंच भोजाश्चावंतयस्तथा १० वीतिहो
त्राः स्वयंजातास्तौंडिकेरास्तथैव च वीतिहोत्रादनंतोभूत् [illegible] दनंता[illegible] दुर्जयो नृपः ११ क्रोष्टोर्वंशं प्रवक्ष्यामि यत्र जातो हरिः स्वयं
क्रोष्टोस्तु वृजनीवांश्च स्वाहाश्च वृजिनीवतः स्वाहापुत्रो रुषंगश्च तस्य चित्ररथः सुतः शशबिंदुश्चित्ररथाच्चक्रवर्ती हरौ रतः श
शबिंदोश्च पुत्राणां शतानामभवच्छतं धीमतां चारुरूपाणां भूरिद्रविणतेजसां १४ पृथुश्रवाः प्रधानोभूत्तस्य पुत्रः सुयज्ञकः सु
यज्ञस्योशनाः पुत्रस्तितिक्षुरुशनः सुतः १५ तितिक्षोस्तु मरुत्तोभूत्तस्मात्कंबलबर्हिषः पंचाशद्रुक्मकवचः रुक्मेषुः पृथुरुक्म
कः हविर्ज्यामघपारस्ती ज्यामघस्त्रीजितोभवत् शैब्यायां ज्यामघादासीद्विदर्भस्तस्य कैशिकः १७ लोमपादः क्रथश्रेष्ठात् कृतिः स्या
ल्लोमपाद[illegible]तः कौशिकस्य चिदिः पुत्रस्तस्माच्चैद्या नृपाः स्मृताः १८ क्रथाद्विदर्भपुत्रात्तु कुंतिः कुंतेस्तु धृष्टकः धृष्टस्य निधृतिस्तस्य
उदकार्ख्यो विदूरथः दशार्हपुत्रो व्योमस्तु व्योमाज्जीमूत उच्यते जीमूतपुत्रो विकलस्तस्य भीमरथः सुतः २० भीमरथान्नवरथस्त
तो दृढरथोभवत् स्वकुंतिश्च दृढरथात् स्वकुंतेश्च करंभकः २१ करंभाद्देवरातस्तु देवक्षेत्रश्च तत्सुतः देवक्षेत्रान्मधुर्नाम मधोर्द्रवर
सोभवत् २२ द्रवरसात्पुरुहूतोभूज्जंतु[illegible]रासीत्तु तत्सुतः गुणी तु यादवो राजा जंतुपुत्रस्तु सात्वतः सात्वताद्भजमानस्तु दृष्टिरंध
क एव च देवावृधश्च चत्वारस्तेषां वंशास्तु विश्रुताः २४ भजमानस्य बाह्योभूद्वृष्टिः कृमिर्निमिस्तथा देवावृधाद्बभ्रुरासीत्तस्य श्लो
को थ गीयते २५ यथैव शुश्रुमो दूराद्गुणास्तद्वत्समंतिकात् बभ्रुः श्रेष्ठो मनुष्याणां देवैर्देवावृधः समः २६ चत्वारश्च सुता बभ्रो
र्वासुदेवपरा नृपाः कुकुरो भजमानस्तु शिनिः कंबलबर्हिषः २७ कुकुरस्य सुतो धृष्णुर्धृष्णोस्तु तनयो धृतः धृतेः कपोतरोमा
भूत्तस्य पुत्रस्तु तित्तिरिः तित्तिरेस्तु नरः पुत्रस्तस्य चानकदुंदुभिः पुनर्व[illegible]सुस्तस्य पुत्र आहुकश्चाहुकीसुतः २९ आहुकाद्दे
वकोजज्ञे उग्रसेनस्ततोयमः देववानुपदेवाद्या देवकस्य सुताः स्मृताः ३० तेषां स्वसारः सप्तासन् वसुदेवाय ता ददौ देवकीश्रु
तदेवी च मित्रदेवी यशोधरा[illegible] ३१ श्रीदेवी सत्यदेवी च सुरापी चेति सप्तमी नवोग्रसेनस्य सुताः कंसस्तेषां च पूर्वजः न्यग्रोध
श्च सुनामा च कंकः शंकुश्च भूमिपः सुतनू राष्ट्रपालश्च युद्धमुष्टिः सुमुष्टिकः ३३ भजमानस्य पुत्रोथ रथमुख्यो विदूरथः राजा
धिदेवः शूरश्च विदूरथसुतोभवत् ३४ राजाधिदेवपुत्रौ द्वौ शोणाश्वः श्वेतवाहनः शोणाश्वस्य सुताः पंच शमी शत्रुजिदाद
यः ३५ शमीपुत्रः प्रतिक्षत्रः प्रतिक्षत्रस्य भोजकः भोजस्य हृदिकः पुत्रो हृदिकस्य दशात्मजाः ३६ कृतवर्मा शतधन्वा देवा
र्हो भीषणादयः देवा[illegible]र्हात् कंबलाबर्हिरसमौजास्ततोभवत् ३७ सुदंष्ट्रश्च स्ववासश्च धृष्टोभूदसमौजसः गांधारी चैव मा

द्री च धृष्टभार्ये बभूवतुः ३८ सुमित्रोभूच्च गांधार्यां माद्री जज्ञे युधाजितं अनमित्रं शिनिं धृष्टात् ततो वै देवमीढुषं अनमित्रा
त्सुतो निघ्नो निघ्नस्यापि प्रसेनकः सत्राजितः प्रसेनोथ मणिं सूर्यात्स्यमंतकं ४० प्राप्यारण्ये चरन्तं तु सिंहो हत्वाहरन्मणिं हतो
जांबवता सिंहो जांबवान् हरिणा जितः ४१ तस्मान्मणिं जांबवतीं प्राप्यागाद्द्वारकां पुरीं सत्राजिताय प्रददौ शतधन्वा जघान तं ४२
हत्वा शतधनुं कृष्णो मणिं नाप[illegible] कीर्तिमान् बलयादवमुख्याग्रे अक्रूरान्मणिमर्पयत् मिथ्याभिशस्तिं कृष्णस्य त्यक्त्वा स्वर्गी च से
पवन् सत्राजितो भंगकारः सत्यभामा हरेः प्रिया अनमित्राच्छिनिर्जज्ञे सत्यकस्तु शिनेः सुतः सत्यकात्सात्यकिर्जज्ञे युयुधानाद्धुनि
र्बभूव धुनेर्युगंधरः पुत्रः स्वाद्योभूत्तु युधाजितः ऋषभक्षत्रकौ तस्य ऋषभाच्च श्वफल्ककः श्वफल्कपुत्रो ह्यक्रूरो ह्यक्रूराद्दे
सुधन्वनः शूरात्तु वसुदेवाद्यो पृथा पांडोः प्रियाभवत् धर्माद्युधिष्ठिरः पांडोर्वायोः कुंत्यां वृकोदरः इंद्राद्धनंजयो माद्र्यां नकुलः
सहदेवकः ४८ वसुदेवाच्च रोहिण्यां रामः सारणदुर्गमौ वसुदेवाच्च देवक्यामादौ जातः सुसेनकः ४९ कीर्तिमान् भद्रसेनश्च
उरश्रीरुजुदासकः भद्रदेहः कंस एतान् षड्गर्भान्निजघान ह ५० ततो बलस्ततः कृष्णः सुभद्रा भद्रभाषिणी चारुदेष्णश्च
सांबाद्याः कृष्णाजांबवतीसुताः इत्याग्नेये महापुराणे कृष्णोत्पत्तिः अग्निरुवाच कश्यपो वसुदेवोभूद्देवकी चादितिर्
वरा देवक्यां वसुदेवाच्च कृष्णोभूत्तपसान्वितः १ धर्मसंरक्षणार्थाय ह्यधर्महरणाय च सुरादेः पालनार्थं च दैत्यादेर्मथनाय च
२ रुक्मिणी सत्यभामा च सत्या नाग्नजिती प्रिया सत्यभामा हरेः शैब्यात् गांधारी लक्ष्मणा तथा ३ मित्रविंदा च कालिंदी देवी जां
बवती तथा सुशीला च तथा माद्री कौसल्या विजया तथा एवमादीनि देवीनां सहस्राणि तु षोडश प्रद्युम्नाद्याश्च रुक्मिण्यां भी
माद्याः सत्यभामया जांबवत्यां च सांबाद्याः कृष्णस्यासंस्तथापरे शतं शतसहस्राणां पुत्राणां तस्य धीमतः ६ अशीतिश्च सहस्रा
यादवाः कृष्णरक्षिताः प्रद्यु[illegible]म्नस्य तु वैदर्भ्यामनिरुद्धो रणप्रियः अनिरुद्धस्य वज्राद्या यादवाः सुमहाबलाः तिस्रः कोट्यो याद
वानां षष्टिर्लक्षाणि यादवाः मानुष्यबाधकायेतु तन्नाशाय बभूव सः कर्तुं कर्मव्यवस्थानं मानुष्यजायते हरिः देवासुराणां संग्रामे
दायार्थे द्वादशाभवन् प्रथमो नारसिंहस्तु द्वितीयो वामनो रणः १० संग्रामस्त्वथ वाराहश्चतुर्थो मृतमंथनः तारकामयसंग्रामः
षष्ठो ह्याजीवकोरणः त्रैपुरश्चांधकवधो नवमो वृत्रघातकः जितो हलाहलश्चाथ घोरः कोलाहलो रणः हिरण्यकशिपोश्चो
रो विदार्य च नखैः पुरा नारसिंहो देवपालः प्रह्लादं कृतवान्नृपं १३ देवासुरे वामनश्च छलित्वा बलिमूर्जितं महेंद्राय ददौ राज्यं
कश्यपाददितिसंभवः वराहस्तु हिरण्याक्षं हत्वा देवाद्यपालयत् उज्जहार भुवं मग्नां देवदैवैरभिष्टुतः १५ मंथानं मंदरं कृत्वा र
ज्जुं कृत्वा तु वासुकिं सुरासुरैश्च मथितं देवेभ्यश्चामृतं ददौ तारकामयसंग्रामे तदा देवाश्च पालिताः निवार्येंद्रं गुरुं देवान् दान
वान् सोमवंशकृत् १७ विश्वामित्रवशिष्ठाद्विचक्रयोश्च रणे सुरान् अपालयत्तो निर्वार्य राजहृषादिदानवान् १८ पृथ्वीरथब्र
ह्ययंतुरीशस्य शरणो हरिः अनुरक्तश्च रेवत्यां च केवांधासुरार्दनं अपां फेनमयो भूत्वा देवासुरहरो भवत् रत्रं देवहरं विष्णु
र्वैधर्मान्निपालयत् २१ शाल्वादीन्दानवाञ्जित्वा हरिः परशुरामकः अपालयत्सुरादींश्च दुष्टक्षत्रं निहत्य च २२ हालाहलं
विषं दैत्यं निराकृत्य महेश्वरात् भयं निर्नाशयामास देवानां मधुसूदनः २३ देवासुरे रणे यश्च दैत्यः कोलाहलो जितः पालिताश्च

४०

सुराः सर्वे विष्णुना धर्मपालनात् २४ राजानो राजपुत्राश्च मुनयो देवता हरिः यदुक्तं यच्च नैवोक्तं अवतारा हरेरिमे २५ इत्याग्नेये म
हापुराणे द्वादश संग्रामाः अग्निरुवाच तुर्वसस्य सुतो वर्गो गोभानुस्तस्य चात्मजः गोभानोस्तु त्रैशानि त्रैशाने स्तु करंधमः क
रंधमान्मरुतोभूत् दुष्यंतस्तस्य चात्मजः दुष्यंतस्य वरूथोभूत् गांडीरस्तु वरूथतः २ आंडीराच्चैव गांधारः पंचजानपदास्ततः गां
धाराः केरलाश्चोलाः पांड्याः कोल्ला महाबलाः ३ द्रुह्योस्तु बभ्रुसेतुश्च बभ्रुसेतोः पुरूद्वसुः ततो गांधारो गांधारे धर्मो धर्माद् घृतोभव
भवत् ४ घृतात्तु विदुषस्तस्मात् प्रचेतास्तस्य वै शतं आनदुश्च सभानरश्चाक्षुषः परमेषुकः ५ सभानलात्कालानलः काला
नलजः स्रंजयः पुरंजयः स्रंजयस्य तत्पुत्रो जनमेजयः ६ तत्पुत्रस्तु महाशालस्तत्पुत्रोभूत् महामनाः तस्मादुशीनरो बुल्लतुं	प
गायांतु न्रगस्ततः ७ नरायां तु नरश्चासीत् रुमिस्तु रुमिनः सुतः दर्शायां तु व्रतो जज्ञे द्रूद्धस्यां शिबिस्तथा ८ शिबेः पुत्रास्तु
चत्वारो पृथुदर्भश्च वीरकः कैकयो भद्रकस्तेषां नाम्ना जनपदाः शुभाः ९ तितिक्षुरुशीनरजस्तितिक्षोश्च रुषद्रथः रुषद्र
थादभूत् पैलः पैलाच्च सुतपाः सुतः स्वर्ण्यायां तु बलेर्जाता अंगो वंगश्च राक्षकः पुंड्रः कलिंगो वालेया बलिर्योगीवरान्वितः
११ अंगाद्दधिवाहनोभूत् तस्माद् द्विविरथो नृपः द्विविरथाद्धर्मरथस्तस्य चित्ररथः सुतः १२ चित्ररथात्सत्यरथो लोमपादश्च
तत्सुतः लोमपादाच्चतुरंगः पृथुलाक्षश्च तत्सुतः १३ पृथुलाक्षाच्च चंपोभूत् चंपाद्धर्यंगकोभवत् हर्यंगाच्च भद्ररथः बृहत्कर्मा
च तत्सुतः तस्मादभूत् बृहद्भानुर्बृहद्भानोर्महात्मवान् तस्माज्जयद्रथो ह्यासीत् जयद्रथाद् बृहद्रथः १५ बृहद्रथात् विश्वजिच्च क
र्णो विश्वजितोभवत् कर्णस्य वृषसेनस्तु पृथुसेनस्तदात्मजः १६ एतेंगवंशजाश्च नृपाः पुरोर्वंशं निबोध मे इत्याग्नेये राजवंशो
अग्निरुवाच पुरोर्जनमेजयोभूत् प्राचीत्वर्णस्तु तत्सुतः प्राचीत्वर्णान्मनस्युस्तु तस्माद्वीतमयो नृपः १ शुंधुर्वीतमया
च्चाभूत् शुंधोर्बहुविधः सुतः बहुविधाच्च संपातिरहोवादी च तत्सुतः तस्य पुत्रोथ भद्राश्वो भद्राश्वस्य दशात्मजाः ऋचेयुश्च कक्ष
युश्च सन्नतेयुस्तथात्मजः ३ घृतेयुश्च चितेयुश्च स्थंडिलयुश्चस[illegible]तमः धर्मेयुः सन्नतेयुश्च ऋचेयोर्मतिनारकः तंसुरो
धः प्रतिरथः सुरस्तो मतिनारजाः आसीत् प्रतिरथात् कण्वः कण्वान्मेधातिथिस्त्वभूत् ५ तंसुरोधाच्च चत्वारो दुष्यंतोथ प्रवीर
कः सुकेतुश्चानयावीरो दुष्यंताद्भरतोभवत् ६ शकुंतलायां तु बली यस्य नाम्नातु भारताः सुतेषु मातृकोपेन नष्टेषु भरते
पुरा ७ ततो मरुद्भिरानीय पुत्रः स तु बृहस्पतेः संक्रामितो भरद्वाजः क्रतुभिर्वितथोभवत् स चापि वितथः पुत्रान् जनयामा
स पंच वै सुहोत्रं च सुहोतारं गयं गर्गं तथैव च ९ कपिलं च महात्मानं सुकेतुं च सुतद्वयं कौशिकं गृत्सपतिं च तथा गृत्सपतेः सु
ताः १० ब्राह्मणाः क्षत्रिया वैश्याः काश्यादीर्घतमासुतः ततो धन्वंतरिश्चासीत् तत्सुतोभूच्च केतुमान् ११ केतुमतो हेमरथो
दिवोदास इति स्मृतः प्रतर्दनो दिवोदासात् भर्गवत्सौ प्रतर्दनात् वत्साद नर्क आसीच्च अनर्कात्क्षेमकोभवत् क्षेमकाद्
र्षकेतुश्च वर्षकाच्च विभुः स्मृतः १३ विभोरानर्दः पुत्रोभूत् विभोश्च सुकुमारकः सुकुमारात्सुकेतुश्च सभूमिस्तु सुवत्स

कात् १४ सुहोत्रश्च बृहत्पुत्रो बृहतस्तनयास्त्रयः अजमीढो द्विमीढश्च पुरुमीढस्तु वीर्यवान् अजमीढस्य केशिन्यां जज्ञे जन्हुः प्रतापवान्	1
जन्होरभूदजकोश्यो बलाकाश्वस्तदात्मजः बलाकाश्वस्य कुशिकः कुशिकाद्गाधिरिंद्रकः गाधेः सत्यवती कन्या विश्वामित्रः सुतोत्तमः १७ देव
रातः कृतिमुखा विश्वामित्रस्य ते सुताः शुनःशेपाष्टकश्चान्यो ह्यजमीढात् सुतोभवत् १८ नीलिन्यां शांतिरपरः पुरुजातिः सुशांतितः पुरुजातेस्तु
बाह्याश्वो बाह्याश्वात्पंच पार्थिवाः १९ मुकुलः स्रंजयश्चैव राजा बृहदिषुस्तथा यवीनरश्च कृमिलः पंचाला इति विश्रुताः २० मुकुलस्य तु मौ
द्गल्याः क्षत्रोपेता द्विजातयः पंचाश्वा मुकुलाज्जज्ञे पंचाश्वान्मिथुनं ह्यभूत् २१ दिवोदासो ह्यहल्या च अहल्यायां शरद्वतात् शतानंदः शतानंदा
त् सत्यधृग्मिथुनं ततः २२ रूपः रूपी दिवोदासान्मैत्रेयः सोमपस्ततः स्रंजयात् पंचधनुषः सोमदत्तश्च तत्सुतः २३ सहदेवः सोमदत्तात्सह
देवात्तु सोमकः आसीच्च सोमकाज्जंतुर्जंतोश्च पृषतः शतं २४ पृषताद्द्रुपदस्तस्माद् धृष्टद्युम्नोथ तत्सुतः धृष्टकेतुश्च भूमिन्यामृक्षोभूदजमी
ढतः २५ ऋक्षात्संवरणो जज्ञे कुरुः संवरणात्ततः यः प्रयागादपाक्रम्य कुरुक्षेत्रं चकार ह २६ कुरोः सुधन्वा सुधनुः परीक्षिच्चारिमेजयः सुध
न्वनः सुहोत्रोभूत् सुहोत्राच्च्यवनोह्यभूत् २७ वसुश्रेष्ठोपरिचरः सप्तासन् गिरिकासुताः बृहद्रथः कुशो वीरो यदुः प्रत्यग्रहो बलः २८ मत्स्य
काली कुशाग्राभात्यासीद्राज्ञो बृहद्रथात् कुशाग्रादृषभो जज्ञे तस्य सत्यहितः सुतः सुधन्वात सुतश्चोर्जो ऊर्जादासीच्च संभवः संभवाच्च जरा
संधः सहदेवश्च तत्सुतः सहदेवादुदापिश्च उदापेः श्रुतकर्मकः परीक्षितस्य दायादो धार्मिको जनमेजयः ३१ जनमेजयाच्च सदस्युर्जन्होस्तु
सुरथः सुतः श्रुतसेनोग्रसेनौ च भीमसेनश्च नामतः ३२ जनमेजयस्य पुत्रौ तु सुरथो महिमांस्तथा सुरथाद्विदूरथोभूदृक्ष आसीद्विदूरथा
त् ऋक्षस्य तु द्वितीयस्य भीमसेनोभवत्सुतः प्रतीतो भीमसेनात्तु प्रतीपस्य तु शांतनुः ३४ देवापिर्बाल्हिकश्चैव सोमदत्तस्तु शांतनोः बाल्ही
कात्सोमदत्तोभूत् भूरिर्भूरिश्रवाः शलः ३५ गंगायां शांतनोर्भीष्मः काश्यां विचित्रवीर्यकः कृष्णद्वैपायनश्चैव क्षेत्रे वैचित्रवीर्यके ३६ धृत
राष्ट्रं च पांडुं च विदुरं चाप्यजीजनत् पांडोर्युधिष्ठिरः कुंत्यां भीमश्चैवार्जुनस्त्रयः ३७ नकुलः सहदेवश्च पांडोर्माद्र्यां च देवतः अर्जुनस्य च सो
भद्रः परीक्षिदभिमन्युतः ३८ द्रौपदी पांडवानां च प्रिया तस्यां युधिष्ठिरात् प्रतिविंध्यो भीमसेनात् श्रुतकीर्तिर्धनंजयात् ३९ सहदेवाच्छ्रु
तकर्मा शतानीकस्तु नाकुलिः भीमसेनाद्धिडिंबायामन्य आसीत् घटोत्कचः ४० एते भूता भविष्याश्च नृपाः संख्या न विद्यते गताः कालेन
कालो हि हरिस्तं पूजयेद्द्विज होममस्यो समुद्दिश्य कुरु सर्वप्रदं यतः इत्याग्नेये महापुराणे सोमवंशः अग्निरुवाच आयुर्वेदं प्रवक्ष्या
मि सुश्रुताय यमब्रवीत् देवो धन्वंतरिः सारं मृतसंजीवनीकरं सुश्रुत उवाच आयुर्वेदं मम ब्रूहि नराश्वादिरुगर्दनं सिद्धयोगान्सि
द्धमंत्रान् मृतसंजीवनीकरान् २ धन्वंतरिरुवाच रक्षन् कुलं हि ज्वरितं लंघितं भोजयेद्भिषक् सविश्वं लाजमंडं तु क्षुत्तृट् ज्वरांत
श्रृतं जलं ३ मुस्तपर्पटकोशीरचंदनोदीच्यनागरैः षडहे च व्यतिक्रांते तिक्तकं पाययेन्द्रकं ४ स्नेहाय स्यक दोषं तु ततस्तं तु विरेचयेत्
जीर्णाः षष्टिकनीवाररक्तशालिप्रमोदकाः ५ तद्विधास्ते ज्वरिणां ये यवानां विकृतास्तथा मुद्गा मसूराश्चणकाः कुलत्थाश्च सकुष्ठकाः
६ आढक्यो लावकाश्चाश्च कर्कोटिककर्कोदकं पटोलं सफलं निंबं पर्पटं दाडिमं ज्वरे ७ अधोरुवसनं शस्तमूर्ध्वगे च विरेचनं रक्तपि
त्ते तथा पानं षडंगं शुंठिवर्जितं ८ सक्तुगोधूमलाजाश्च यवशालिमसूरकाः सकुष्ठचणका मुद्गा भक्ष्या गोधूमिका हिताः ९ साधिता

89

घृतदुग्धाभ्यांक्षौद्रं च षरसोमधु अतीसारे पुराणानां शालीनां भक्षणं हितं १० अनभिष्यंदियच्चान्नं लोध्रवल्कलसंयुतं मारुति• वर्जयेधु
स्तुकार्यगुल्मेषु सर्वदा ११ खादयं क्षीरेण चाश्नीयात् वास्तुकं घृतसाधितं गोधूमशालयस्तिक्ता हिता जवरिणो मधु १२ गोधूमशालयो स्वर्गो
ब्रलक्षरखदिरोभया पंचकोलं जांगलाश्च निर्युधान्यैः पचोलकाः १३ मातुलुंगं तथा जाति शुष्कमूलक सैंधवाः कुष्ठितां च तथा शस्त्रं पानार्थे
खदिरोदकं १४ मसूरमुद्गौ सूपार्थे भोज्या जीर्णाश्च शाल्कयः निंबपर्पटकैः शाकैः जंगलानां तथा रसः विडंगं मारिचं मुस्तं कुष्ठं लोध्रं सु
वर्चिकाः मनःशिलावचालापः कुष्ठहा मूत्रपेषितः १६ अपूपकुष्ठकुल्माषयवाद्या मेहिनां हिताः यवान्नं विकृतिः स्वर्गाः कुलत्था जीर्णशा
लयः १७ तिक्तरूक्षाणि शाकानि तिक्तानि हरितानि च तैलानि तिलशिग्रूक बिभीतकेंगुदानि च १८ मुद्गाः सयवगोधूमा धान्यं वर्षस्थितं
च यत् जांगलस्य रसः शस्तो भोज्यानि राजयक्ष्मिणां १९ कौलत्थमोकुलेनाम्ल शुष्कमूलक जांगलैः यूषैर्वा रिक्षीरसिद्धैर्दधि दाडिमसा
धितैः २० मातुलुंगरसक्षौद्र द्राक्षीपेषादिसंस्थितैः यवगोधूमशाल्यन्नैर्भजियेद् श्वासकासिनं २१ दशमूलबलारास्नाकुलत्थै रुपसाधि
ताः मेपूपेपरसाः क्वाथाः श्वासहिक्कानिवारणाः २२ शुष्कमूलक कौलत्थमूलजां•गलजै रसैः यवगोधूमशाल्यन्नं जीर्णं शोषी समाचरेत्
शोथवान् सगुडां पथ्यो खादेद्वा गुडनागरं तक्रं च चित्रकं चाभौ ग्रहणी रोगनाशनो २४ पुराणयवगोधूमशालयो जांगलोरसः मुद्गामलक
खर्जूरमृद्विकाबदराणि च २५ मधुसर्पिः पयः शुक्लं निंबपर्पटकौरघं तकारिष्टाश्च शस्यं ते सततं वातरोगिणां हृद्रोगिणो विरेच्यास्तु पिप्पल्यो
हिक्किणां हिताः तक्रारनालसिंधूत्थयुक्तानि शिशिरांभुसा युक्ताः सौवर्चलाजाजी मधं शस्तं मदाभये सक्षौद्रपयसा लाक्षां पिबेत्क्षतवान्नरः
२८ क्षयं मांसरसाहारो वह्निसंरक्षणात् जयात् शालयो भोजरकाश्च नीवारकलमादयः २९ यवान्नविकृतिर्मांसं शाकं सौवर्चलं सटी पथ्या
तथैवार्शसां च पथ्यं तक्रं च वारिणा ३० मुस्ताभ्यासस्तथा लोपश्च चित्रकेण हरिद्रया यवान्नविकृतिः शालि वास्तुकं सस्तु वर्वर्लं त्रपुषे वा
रुणोधूमाः क्षीरेषु घृतसंयुताः मूत्रकृच्छ्रे च शस्तास्तु यानेमंडसुरादयः ३२ लाजाः सक्तुस्तथा क्षौद्रं शूल्यं मांसं पुरूषकं वार्ताकुला
वशाखिनश्छर्दिघ्नाः पानकानि च ३३ शाल्यन्नं तोय पयसा मेवलोड्य घृते पिवा तृष्णाघ्नी मुस्तगुडयोः गुटिका वा मुखे धृता ३४
यवान्न विकृतिर्रूक्षं शुष्कमूलकजं तथा शाकं पटोलवेत्राश्च अरुस्तंभविनाशनं मुद्गचक मसूराणां सतिले जांगलै रसैः
ससैंधवघृतद्राक्षा शुंठ्यामलककोलजैः ३६ यूषैः पुराणगोधूमयवशाल्यन्नमभ्यसेत् विसर्पिसमिताक्षौद्र मृद्विका दाडिमो
दकं ३७ रक्तषष्टिकगोधूमयवमुद्गादिकं लघु काकमारीच शाखं वास्तुकं च सुवर्चला ३८ वातशोणितनाशाय तोयं शस्तं
सितामधु नासारोगेषु चाहितं घृतं दूर्वाप्रसाधितं भृंगराजरसे सिद्धं तैलं धात्रीरसे पिवा नस्यं सर्वामयेष्विष्टं मूर्धजं तद्वदेषु च
शीततोयान्नपानं च तिलानां विप्रभक्षणं द्विजदार्ढ्यकरं प्रोक्तं तथा तुष्टिकरं मुखं पुरं ४१ गंडूषस्तिल तैलेन द्विजदार्ढ्यकरः परः
विडंगचूर्णं गोमूत्रं सर्वत्र कृमिनाशने धात्रीफलप्रयोगं च शिरोलेपनमुत्तमं शिरोरोगविनाशाय स्निग्धमुष्णं च भोजनं ४३
तैलं वा वस्तमूत्रं वा कर्णपूरणमुत्तमं कर्णमूलविनाशाय सर्वशुक्लानि वा द्विज गिरिमृच्चंदनं लाक्षा मालती कालिका तथा ॥
संयोज्याः पाकतावर्तिः क्षतशुक्रहरी तु सा व्योषं च त्रिफला युक्तं तुत्थकं च तथा जलं सर्वाक्षिरोगशमनं तथा चैव रसांजनं ४६

आज्यपृष्ठं शिलापृष्टं

आज्यपृष्ठं शिलापृष्ठं लोध्रं कांजिक सैंधवैः आमवातविनाशाय सर्वनेत्रामये हितं ४७ गिरिमृच्चंदनैर्लेपो बहिर्नेत्रस्य शस्यते 2
नेत्रामयविघातार्थं त्रिफलां सेवयेत्सदा ४८ रात्रौ तु मधुसर्पिर्भ्यां दीर्घमायुर्जिजीविषुः शतावरीरसे सिद्धौ वृष्योक्षीरघृतौ स्मृतौ
४९ कलंबिकानि माषाश्च वृष्यो क्षीरघृतौ तथा आयुष्या त्रिफला ज्ञेया पूर्ववन्मधुकान्विता ५० मधुकाद्योवलोपेता वलीपलितना
शिनी वचासिद्धघृतं विप्र भूतदोषविनाशनं ५१ कव्यं बुद्धिप्रदं चैव तथा सर्वार्थसाधनं बलाकल्ककषायेण सिद्धमभ्यंजने हितं
५२ रास्ना सहचरैर्वापि तैलं वातविकारिणां अनभिष्यंदियच्चान्नं तद्व्रणेषु प्रशस्यते ५३ सक्तुपिंडी तथैवान्ना क्लावनाय प्रशस्य
ते पक्षस्य च तथा भेदे निंबचूर्णं च रोपणे ५४ तथा सूत्युपचारश्च बलिकर्म विशेषतः सूतिकाच तथा रक्षा प्राणिनां च सदा हिता
भक्षणं निंबपत्राणां सर्पदष्टस्य भेषजं तालनिंबदलं केशा जीर्णं चैनं यवा घृतं ५६ धूपो वृश्चिकदष्टस्य शिथिपत्रं घृतेन वा अर्क
क्षीरं तिलं तैलं पललं च गुडं समं ५७ पानाज्जयति दुर्वारं श्वविषं शीघ्रमेव तु पीत्वा मूलं तु रंतस्य तंडुलीयस्य सर्पिषा ५८ सर्पकी
टविषाण्याशु जयंत्यतिबलान्यपि चंदनं पद्मकं कुष्ठं लता घुशिर पाटलाः ५९ निर्गुंडी सारिवा सेलुस्मृता विषहरो गदः शिरोविरेचनं
शस्तं गुडनागरकं द्विज ६० स्नेहपाने तथा बस्तौ तैलं घृतमनुत्तमं स्वेदनीया परो वह्निः शीतांभः स्तंभनं परं ६१ तृष्णाघ्नं द्विविरेच
ने श्रेष्ठा रमने मदनं तथा बस्तिर्विरेको वमनं तैलसर्पिस्तथा मधु ६२ वातपित्तबलाशानां क्रमेण परमौषधं इत्याग्नेये महापु
राणे सिद्धौषधानि धन्वंतरिरुवाच• शारीरमानसागंतुसहजा व्याधयो मताः शारीरज्वरकुष्ठाद्या क्रोधाद्या मानसा मताः १
आगंतुकाभिघातोत्थाः सहजाः क्षुत्ज्वरादयः शारीरागंतुनाशाय सूर्यवारे घृतं गुडं २ लवणं सहिरण्यं च विप्रायापि समर्पयेत्
चंद्रे चाभ्यंगदो विप्र सर्वरोगैः प्रमुच्यते ३ तैलं शनैश्चरे दद्यात् आश्विने गोरसान्नदः घृतेन पयसा लिंगं संस्नाप्य पेत् गुडेन तु
गायत्र्याहारये द्वौ दूर्वां त्रिमधुनाप्लुतां यस्मिन्नेव व्याधिमाप्नोति तस्मिन्नस्थाने बलिः शुभे ५ मानसानां रुजादीनां विष्णोः स्तोत्रं
हरं भवेत्• वातपित्तकफा दोषा धातवश्च तथा शृणु ६ भुक्तं पक्वाशयादन्नं द्विधा याति च सुश्रुम अंशेनैकेन किट्टत्वं रसतां चापरे
ण च ७ किट्टभागो मलस्तत्र विण्मूत्रस्वेददूषिकाः नासामलं कर्णमलं तथा देहमलं च यत् रसभागं रसस्तत्र शायच्छोणिततां व्रजेत्
मांसं रक्तात्ततो मेदो मेदसः स्नायुसंभवः स्नायोर्मज्जा ततः शुक्रं शुक्राद्रागस्तथौजसः देशं सात्म्यं बलं शक्तिं कालं प्रकृतिमेव च ज्ञात्वा
चिकित्सितं कुर्यात् भेषजस्य तथा बलं तिथिं रिक्तां त्यजेद्भौमे मंदं मंदारुणोत्तरकं हरिगोद्विजचंद्रार्कसुरादीन् प्रतिपूज्य च शृणु मंत्रमि
दं विद्वान् भेषजारंभमाचरेत् ब्रह्मदक्षाश्विरुद्रेंद्र भूचंद्रार्कानिलोनलः ऋषयः सोमपाग्रामा भूतसंघाश्च पांतु ते रसायनमिवर्षी
णां देवानाममृतं यथा सुधेवोत्तमनागानां भैषज्यमिदमस्तु ते १४ वातश्लेष्मातको देशो बहुवृक्षो बहूदकः अनूपइति विख्यातो जां
गलस्तद्विवर्जितः किंचिद्वृक्षोदको देशः तथा साधारणः स्मृतः जांगलः पित्तबहुलो मध्यः साधारणः स्मृतः १६ रूक्षः शीतश्चलो वायुः

पित्तमुष्णंकटुत्रयं स्थिराम्लस्निग्धमधुरंरसालंच प्रचक्षते १७ वृद्धिःसमानैरेतेषांविपरीतैर्विपर्ययः रसाःस्वाद्विक्षुलवणाः श्लेष्म
लावायुनाशनाः १८ कटुतिक्तकषायाश्च वातलाः श्लेष्मनाशनाः कट्वम्ललवणाज्ञेयास्तथापित्तविवर्धनाः तिक्तस्वादुकषायाश्च तथापि
त्तविनाशनाः रसस्यैतद्गुणंनास्ति विपाकस्यैतदिष्यते वीर्योष्णाः कफवातघ्नाः शीताः पित्तविनाशनाः प्रभावतस्तथाकर्मतेकुर्वंतिचसु
श्रुतः शिशिरेचवसंतेचनिदाघेचतथाक्रमात् चयप्रकोपप्रशमाः कफस्यतुप्रकीर्तिताः २२ निदाघवर्षरात्रेचतथाशरदिसुश्रुत
चयप्रकोपप्रशमाःपवनस्यप्रकीर्तिताः मघकालेचशरदिहेमंतेचयथाक्रमात् चयप्रकोपप्रशमास्तथापित्तस्यकीर्तिताः वर्षादयो
विसर्गास्तु हेमंतांतास्तथात्रयः शिशिराद्यास्तथादानं ग्रीष्मांताऋषयस्त्रयः २५ सौम्योविसर्गस्त्वादानमाग्नेयंपरिकीर्तितं ॥
वर्षादींस्त्रीनृतून्सोमश्चरन्पर्यायशोरसान् २६ जनयत्यम्ललवणमधुरांस्त्रीन्यथाक्रमं शिशिरादीनृतूनर्कश्चरन्
पर्यायशोरसान् विवर्धयत्तथातिक्तकषायकटुकान्क्रमात् यथारजन्योवर्धंते बलमेवंहिवर्धते २८ क्रमशोथमनुष्याणां
हीयमानासुहीयते रात्रिभुक्तदिनानांच वयसश्चतथैवच आदिमध्यावसानेषु कफपित्तसमीरणाः प्रकोपंयांति कोपादौ का
लेतेषांचयःस्मृताः प्रकोपोत्तरकेकाले शमस्तेषांप्रकीर्तितः अतिभोजनतोविप्र तथाचाभोजनेनच २९ आदिमध्यावसाने
षु कफपित्तसमीरणाः प्रकोपंयांतिकोपादौ कालेतेषांचयःस्मृतः प्रकोपोत्तरकेकाले शमस्तेषांप्रकीर्तितः अतिभोजनतोविप्र
तथाचाभोजनेनच रोगाहिसर्वेजायंते वेगोदीरणधारणैः अन्नेनकुक्षेर्द्वावंशौ वेकपानेनपूरयेत् ३२ आश्रयंपवनादीनांतथैक
मवशोषयेत् व्याधेर्निदानस्यतथाविपरीतमथौषधं ३३ कर्तव्यमेतदेवात्र मयासारंप्रकीर्तितं नाभेरूर्ध्वमधश्चैवगुदश्रोण्यो
स्तथैवच बलासपित्तवातानांदेहेस्थानंप्रकीर्तितं तथापिसर्वगाश्चैतेदेहेवायुर्विशेषतः देहस्यमध्येहृदयंस्थानंतन्मन
सःस्मृतं कृशोल्पकेशश्चपलो बहुवाग्विषमानलः ३६ व्योमगश्चतथास्वप्ने वातप्रकृतिरुच्यते अकालपलितःक्रोधी
प्रस्वेदीमधुरप्रियः ३७ स्वप्नेचदीप्तिमत्प्रेक्षी पित्तप्रकृतिरुच्यते दृढांगःस्थिरचित्तश्च सुप्रभःस्निग्धमूर्धजः शुक्लांबु
दर्शीस्वप्नेच कफप्रकृतिकोनरः तामसाराजसाश्चैव सात्विकाश्चतथास्मृताः ३९ मनुष्यमुनिशार्दूल वातपित्तकफात्मिकाः
रक्तकर्मव्यवायाच्च गुरुकर्मप्रवर्तनैः ४० कदन्नभोजनाद्वायुर्वैरूक्षात्कुप्यति विदाहिनांतथोल्कानांसुष्णाध्याननिषेवणात्
वाताद्युत्थानिरोगाणि ज्ञात्वाशाम्यानिलक्षणैः अस्थिभंगःकषायत्वमास्येशुष्कास्यतातथा जृंभणंलोमहर्षश्च वातिकव्याधि
लक्षणं नखनेत्रशिराणांतुपीतत्वंकटुतामुखे तृष्णादाहोष्णताचैव पित्तव्याधिनिदर्शनं ४५ आलस्यंचप्रसेकश्च गुरुतामधु
रास्यता उष्णाभिलाषिताचैव श्लैष्मिकव्याधिलक्षणं ४६ स्निग्धोष्णमधुमभ्यंगस्तैलपानादिवातनुत् आद्यंक्षीरंशिताद्यंच चंदन
स्याद्विपित्तनुत् ४७ सक्षौद्र[illegible]त्रिफलातैलंव्यायामादिकफापहं सर्वरोगप्रशांत्यैस्याद्विष्णोर्ध्यानंचपूजनं इत्याग्ने रोगहरौषधादि

Dr BHAU DAJI MEMORIAL

धन्वंतरिरुवाच रसादिलक्षणंवक्ष्ये भिषजोलक्षणंशृणु रसवीर्यविपाकज्ञो नृपादीन्रक्षयेन्नरः १ रसाःस्वादू[illegible]ल
वणाःसौमजाःपरिकीर्तिताः कटुतिक्तकषायाणि तथाग्नेयामहाभुज २ त्रिधाविपाकोद्रव्यस्य कट्वम्ललवणात्मकः
द्विधावीर्यंसमुद्दिष्टमुष्णंशीतंतथैवच ३ अनिर्देश्यःप्रभावश्च औषधीनांद्विजोत्तम मधुरश्चकषायश्चतिक्तश्चै
वतथारसः ४ शीतवीर्याःसमुद्दिष्टाः शेषाउष्णाःप्रकीर्तिताः गुडूची त्वतितिक्तापि भवत्युष्णातिवीर्यतः ५ उष्णा
कषायापितथापथ्याभवतिमानद मधुरोपितथामाषउष्णएवप्रकीर्तितः ६ लवणोमधुरश्चैव विपाकमधुरौस्मृतौ अ
म्लोम्लस्यतथाप्रोक्तः शेषाःकटुविपाकिनः ७ वीर्येपाकेविपर्यस्ते स्वभावात्तस्यनिश्चयः मधुरोपिकटुःपाके यवक्षौद्रंप्र
कीर्तितं ८ क्वाथयेत्षोडशगुणं पिबेद्द्रव्याच्चतुर्गुणं कल्पनैषाकषायस्य यत्रनोक्तोविधिर्भवेत् । ९ कषायात्तुभवेत्तो
यंस्नेहपाकेचतुर्गुणं द्रव्यतुल्यंसमुद्धृत्य स्वेस्नेहंक्षिपेद्बुधः १० तावत्प्रमाणंद्रव्यस्य स्नेहपादंततःक्षिपेत् तोयव
८ र्जंतुयद्द्रव्यंस्नेहद्रव्यंतथाभवेत् ११ संवर्तितौषधःपाकः स्नेहानांपरिकीर्तितः तत्तुल्यभातुरूह्यस्यतथाभवति
सुश्रुत १२ स्वच्छमत्यौषधंकाथंकषायंचोक्तवन्भवेत् अक्षचूर्णस्यनिर्दिष्टंकषायस्यचतुःपलं १३ मध्यमेषाश्रुता
मात्रानास्तिमात्राविकल्पना वयःकालंबलंवह्निंदेशंद्रव्यंरजस्तथा १४ समवेक्ष्यमहाभागमात्रायाःकल्पनाभवेत्
सौम्यास्तत्ररसाःप्रायोविज्ञेयाधातुवर्द्धनाः १५ मधुरस्तुविशेषेणविज्ञेयोधातुवर्धनः दोषाणांचैवधातूनांद्रव्यंसप्त
गुणंचयत् १६ तदेवहृद्येज्ञेयंविपरीतंक्षयावहं उपस्तंभत्रयंप्रोक्तंदेहेस्मिन्मनुजोत्तम १७ अहारमैथुनेनि
द्रातेषुयत्तःसदाभवेत् असेवनात्सेवनाच्च अत्यंतंनाशमाप्नुयात् १८ क्षयस्यबृंहणंकार्यं स्थूलदेहस्यकर्षणं
रक्षणंशुष्ककायस्यदेहभेदास्त्रयोमताः १९ उपक्रमद्वयंप्रोक्तं तर्पणंवाप्यतर्पणं हिताशीचमिताशीचजीर्णाशी
चतथाभवेत् २० औषधीनांपंचविधातथाभवतिकल्पना रसःकल्कःशृतःशीतःफांटश्चमनुजोत्तम २१ रस

८ स्वपीडकाज्ञेयः कल्कआलोडिताभवेत् कथितास्तु तोज्ञेयः शीतः पर्युषितोनिशां २२ सद्यो[illegible]धृतपूतंयत्तत्फांट मभिधीयते करणानांशतंचैवषष्टिचैवाधिकास्मृता २३ योवेत्ति सह्यजेयस्यात्समूहेबाहुशौंडिकः आहारशुद्धि रन्यर्थमग्निस्थलंबलंनृणां २४ ससिंधुत्रिफलांवाद्यात्सरग्निमतिवर्णदां जांगलंचरसंसिंधुयुक्तंदधिपयःकणा २५ रसाधिकंशमंकुर्यान्नरोवाताधिकोपिवा निदाघेमर्दनंप्रोक्तंशिशिरेचश्रमंबहु २६ वसंतेमध्यमंज्ञेयंनि दाघेमर्दनेगुणं त्वचंतुप्रथमंमध्यंमज्जांचलदनंतरं २७ स्नायुंरुधिरदेहेषुअस्थिचातीवमांसलं स्कंधौबाहू तथैवेहतथाजंघेचजानुनी २८ अचिरान्मर्दयेत्प्राशोजन्तुवक्षस्तुपुष्पवत् अंगसंधिषुसर्वासुनिष्पीड्यबहु लंतथा २९ प्रसारयेदंगसंधीन्नचक्षेपेणचाक्रमात् नाजीर्णेतुश्रमंकुर्यान्नभुक्त्वापीतवांस्तथा ३०
दिनस्यतुचतुर्भागे उर्ध्वंतुप्रहरार्द्धके व्यायामोनैवकर्त्तव्यःस्नायाच्छीतांबुनासकृत् ३१ वायुरुद्धंचश्रमंजह्यात् हा ८६
श्वासंनधारयेत् व्यायामश्चकफंहन्याद्वातंहन्याच्चमर्दनं ३२ स्नानंपित्तादिकंहन्यात्प्रशस्यंतेचोभयाःक्रि याः ३३ आतपक्लेशकर्मादोक्षमाव्यायामनोत्तरा ३३ आग्नेयेमहापुराणेआयुर्वेदे ॥ धन्वंतरिरुवाच
वृक्षायुर्वेदमाख्यास्येप्लक्षश्चोत्तरतःशुभः प्राग्वटोयाम्यतस्त्वाम्रआप्येश्वत्थःक्रमेणतु १ दक्षिणादिशमुत्पन्नाः समीपेकंटकद्रुमाः उद्यानंगृह वामेस्यात्तिलान्वाप्यथपुष्पितान् २ गृह्णीयाद्रोपयेद्वृक्षान्द्विजंचंद्रंप्रपू ज्यच ध्रुवाणिपंचवायव्यंहस्तंप्राजेशवैष्णवं ३ नक्षत्राणितथामूलंशस्यंतेद्रुमरोपणे प्रवेशयेन्नदीवाहा न्पुष्करिण्यस्तुकारयेत् ४ हस्तोमघातथामैत्रमाद्यंपुष्यंसवासवं जलाशयसमारंभेवारुणंचोत्तरात्रयं ५ संपूज्यवरुणंविष्णुंपर्जन्यंतत्समारभेत् अरिष्टाशोकपुन्नागशिरीषाःसप्रियंगवः ६ अशोककदलीजंबूस्तथा

बकुलदाडिमाः सायंप्रातस्तुघर्मान्तेशीतकालेदिनांतरे ७ वर्षारात्रौभुवःशोषेसेक्तव्यारोपिताद्रुमाः उत्तमंविंशतिहस्ता मध्यमंषोडशांतरं स्थानात्स्थानांतरंकार्यंवृक्षाणांद्वादशांतरं ८ विफलास्युर्घनावृक्षाःशस्त्रेणादौहिशोधनं ९ विडंगघृ तपंकाक्तान्सेचयेच्छीतवारिणा फलनाशेकुलत्थैश्चमाषैर्मुद्गैर्यवैस्तिलैः १० घृतशीतपयःसेकःफलपुष्पायसर्वदा आविकाजशकृच्चूर्णंयवचूर्णंतिलानिच ११ गोमांसमुदकंचैवसप्तरात्रंनिधापयेत् तत्सेकःसर्ववृक्षाणांफलपुष्पादि वृद्धिदः १२ मत्स्यांभसातुसेकेनवृद्धिर्भवतिशाखिनः विडंगतंदुलोपेतंमात्स्यंमांसंहिदोहदं १३ सर्वेषामविशेषे णवृक्षाणांरोगमर्दनं १४ इत्याग्नेयेमहापुराणेवृक्षायुर्वेदे धन्वंतरिरुवाच ॥ ॥ सिंहीषष्ठीनिशायुग्मंवत्सकं क्वाथसेवनं शिशोःसर्वातिसारेषुस्तन्यदोषेचशस्यते १ शृंगीसकृष्णातिविषांचूर्णितांमधुनालिहेत् एकांचाति विषांकासच्छर्दीज्वरहरींशिशोः २ बालैःसेव्यावचासाज्यसदुग्धायसतैलका षष्ठिकांशंखपुष्पींवाबालःक्षीरान्वितां पिबेत् ३ वाग्रूपसंपद्युक्तायुर्मेधाश्रीर्वर्द्धतेशिशोः वचाद्यग्निशिखावासाशुंठीकृष्णानिशागदं ४ सषष्ठिसैंधवंबालं प्रातर्मेधाकरंभवेत् देवदारुसहाशिग्रुफलत्रयपयोमुचां ५ क्वाथःसकृष्णामृद्वीकाकल्कःसर्वान्कृमीन्हरेत् त्रिफला
शृंगविश्वानांरसेषुमधुसर्पिषोः ६ मेषीक्षीरेचगोमूत्रेसिक्तंरोगेहितंदृशोः नासारक्तहरोनस्योदुर्वारसइहोत्तमः ७ ल शुनार्द्रकशिग्रूणांरसःकर्णस्यपूरणं तैलमार्द्रकजाद्यंवाशूलहंचौष्ठरोगनुत् ८ जातीपत्रंफलंव्योषकवलंमूत्रकंनिश्च दुग्धक्वाथेभयाकल्केसिद्धंतैलंद्विजार्तिनुत् ९ धान्यांबुनारिकेलगोमूत्रकमुकविश्वयुक् कथितंकवलंकार्यमधिजि ह्वाधिशांतये १० साधितंलांगलीकल्केतैलंनिर्गुंडिकारसैः गंडमालागलगंडौनाशयेत्तस्यकर्मणा ११ पथ्यैरर्क यूथीनस्तुहीरम्यातिजातिकैः उद्वर्तयेत्सगोमूत्रैःसर्वत्वग्दोषनाशनैः १२ बाकूचीसतिलाभुक्त्वावत्सरात्कुष्ठनाशिनी
चूर्ण
पथ्याभल्लातकीतैलगुडपिंडीतुकुष्ठजित् १३ पूतीकवह्निरजनीत्रिफला[illegible]व्योषयुक् तक्रंगुदां[illegible]कुरेपेयंभस्थावा

सगुडाभया २४ फलादार्वीविशालादिक्वाथोधात्रीरसोथवा पालक्योरजनीकल्कः क्षौद्रः क्षौद्रः प्रमेहिणा २५ वासाग
ध/ ४४ र्भ्याधिघातक्वाथएरंडतैलयुक् वातशोणितकृत्सानात् पिप्पलीस्यात्तृप्तिहाहरी २६ सेव्याजगन्धिणाकृष्णा जाती
रखहु भाविता पयोवाव्र चाप्रा ग्निविडंगव्योषकल्कयुक् २७ ग्रंथिकोग्राभयाकृष्णा विडंगाक्काघृते स्थिता मासंतत्प्रग
हण्यर्शःपांडुगुल्मकृमीन्हरेत् २८ फलत्रयमृतावासातिक्ता भूनिंबजस्तथा क्वाथःसमाक्षिकोहन्यात् पांडुरोगंसका
मलं १९ रक्तपित्तेपिबेद्वासा स्वरसंससितामधु वरीद्राक्षाबलाशृंगी साधितंवापयःपृथक् २० वरीविदारीपथ्यात्व
बलात्रयनवायुतं स्वदंष्ट्रामधुसर्पिर्भ्यामालिहेत्क्षयरोगिणां २१ पथ्याशिग्रुकरंजार्कवकामामधुसिंधुमल् समूत्रंवि
द्रधिंहंतिपरिपाकायतंत्रजित् २२ त्रिवृत्तेजोवतीदंतीमंजिष्ठाशार्वरीद्वयं तार्क्ष्यजंनिंबपत्रंचलेपःशस्तोभगंदरे २३
रुग्वातरजनीलाक्षाचूर्णाथक्षौद्रसंयुता वासोवर्तीव्रणेयोज्याशोधनीगदनाशिनी २४ शामायष्ठिमिशालोध्र [illegible] पद्मको
त्पलचंदनैः समरीचैःशृततैलंक्षीरेस्याद्व्रणरोहणं २५ श्रीकर्प्यासदलैर्भस्मफलोषणवनानिशा तदपिं डस्वेदनंतान्
सतैलंस्यात्क्षततौषधं २६ कुंभीसारपयोयुक्तं वन्हिदग्धव्रणंलिपेत् तदेवनाशयेत्सेकान्नारिकेलरजोघृतं २७ वि
श्वाजमोदसिंधुंचविश्वात्वग्भीःसमाभया तक्रेणोष्णांबुनावाथपीतातिसारनाशनी २८ वत्सकातिविषाविश्वाविघुमु
स्तशृतंजलं सामेपुराणेतीसारेसास्रक्शूलेचपाययेत् २९ अंगारदग्धंस्वगतं सिंधुमुष्णांबुनापिबेत् शूलवानथवातद्वासिं
धुहिंगुकणाभया ३० कटुलोहत्कणातंक आपूर्णमधुपूतं वस्त्रछिद्रगतंवक्रे न्यस्तंतृष्णांविनाशयेत् ३१ पाश
वं दर्वीआतिदलशाखाम्रतफलत्रयैः साधितंसमधुक्वाथंकवलंमुखपाकनुत् ३२ तुच्छायविषतिक्तेंद्रदारुयोगपयोमु
चां क्वाथोमूत्रेशृतःक्षौद्रीसर्वकंगदापहः ३३ पथ्यागोक्षुरदुस्पर्शाराजवृक्षशिलाभिदां कषायःसमधुःपीतोमूत्र
कृच्छ्रमपोहति ३४ वंशत्वग्वरुणःक्वाथःशर्कराश्मविघातनः शाखोटक्वाथमक्षौद्रंक्षीराशील्लीपदीपिबेत् ३५
माषार्कलक्पयस्तैलंमधूत्सिक्तंहिसैंधवं पादरोगंहरेत्सर्पिर्जलकुकुटजंतथा ३६ शुंठीसौवर्चलाहिंगुचूर्णंशु

दूवि ठीरसैर्घृतं रुजंहरेदथक्वाथोर्वि बंधाग्निसाधने ३७ सौवर्चलाग्निहिंगूनांसदीप्यानांरसैर्युतं विडदीप
कयुक्तंवातकृगुल्मार्तवः पिबेत् ३८ धात्रीपटोलमुद्गानांक्वाथःसाज्योविसर्पिहा शुंठीदारुलवाक्षीरक्वाथोमू
नि त्रों तोपरः ३९ संशापेयोरजःक्षीरफलक्वाथश्चशोकनुत् गुडशिग्रुत्रिवृद्धिश्वसैंधवानांरजोयुतः ४० सं त्रि
वेवं फलकःक्वाथःसगुडःस्याद्विरोचकः वचाफलकषायोथपयोवमनकृद्भवेत् ४१ त्रिफलायाःपलशतंपृथ-
ग्भृंगजभावितं विडंगलोहचूर्णंचदशभागसमन्वितं ४२ शतावरीगुडूच्यग्निपलानांपंचविंशतिः मध्वाज्य
तिलजैर्लिह्यात्वलीपलितवर्जितः ४३ शतमब्दंहिजीवेतसर्वरोगविवर्जितः त्रिफलासर्वरोगघ्नीसमधुः
शर्करान्विता ४४ सितामधुघृतैर्युक्तासकृष्णात्रिफलातथा पथ्याचित्रकशुंठ्यश्वगुडूचीमुसलीरजः ४५ सगुडंभ
क्षितंरोगहरंत्रिशत्वर्षकृत् किंचित्चूर्णजपापुष्पपिंडितंविसृजेज्जले ४६ तैलंभवेत्घृताकारंकिंचिच्चूर्णज
लान्वितं धूपार्थंदृश्यतेचित्तंवृषदंशजवायुना ४७ पुनर्माक्षिकधूपेनदृश्यतेतद्यथापुरा कर्पूरजलुकाभेकतैलं
पाटलिमूलयुक् ४८ पिष्ठालिप्यपदेद्वेचचरेदंगारके नरः तृणोत्थानादिकंव्यूह्यदर्शयन्वैकुतूहलं ४९ विषघ्न
हरुजध्वंसंक्षुद्रंनर्मचकामिनां एकसद्गुकर्मकंप्रोक्तंसिद्धिद्वयसमाश्रयं ५० मंत्रध्यानौषधिकथामुद्रेज्यायंत्रमु
खयः चतुर्वर्गफलंप्रोक्तंयःपठेत्सदिवंव्रजेत् ५१ आग्नेयेमहापुराणेऔषधानि ॥ ॥ धन्वंतरिरुवाच
अयुरारोग्यकर्त्तारॐकाराद्याश्चमंत्रकाः ॐकारःपरमोमंत्रस्तंजप्त्वाचामरोभवेत् १ गायत्रीपरमोमंत्रस्तां
जप्त्वाचामरोभवेत् गायत्रीपरमोमंत्रस्तंजप्त्वाभुक्तिमुक्तिभाक् २ ॐनमोनारायणायमंत्रःसर्वार्थसाधकः
ति ॐनमोभगवतेवासुदेवायसर्वदः ३ ॐहुंनमोविष्णवेमंत्रोयंचौषधंपरं अनेनदेवाह्यसुराःसश्रियोनीरु
जोभवन् ४ भूतानामुपकारश्चतथाधर्मोमहौषधं धर्मायुर्धर्महृदुमःएतैर्द्रुमैश्चनिश्चलः ५ श्रीदःश्रीशः
श्रीनिवासःश्रीधरःश्रीनिकेतनः श्रियःपतिःश्रीपरमएतैःश्रियमवाप्नुयात् ६ कामिनीकामदःकामःकामपा

लुस्तथाहरिः आनंदोमाधवश्चैव नामकामायवैहरेः ७ रामःपरशुरामश्चनृसिंहोविष्णुरेवच त्रिविक्रमश्चनामा
खा पद्मलिंगाष्टकं दिशि मेखलाभागसंयुक्तं कंठंद्विपदिकं भवेत् आचार्यबुद्धिमाश्रित्य कल्पयेच्चलतादिकं चतुःषट्लक्षमष्टादिरवाछिद्यादि मंडलं
क्षीं तु सूर्यगंसर्वं रवासिवेदैं दुवर्णनात् चत्वारिंशादधिकानि चतुर्दशशतानि तु मंडलानि हरेः शंभोर्देव्याः सूर्यस्य सप्ति च दशासप्तविभक्ते तुलताल्लिं
गाद्वष्टसु दिक्षु पंचत्रयं चैकं त्रयं पंच चलोपयेत् ऊर्ध्वगे द्विपदालिंगं मंदिरं पार्ष्णिकोष्टयोः मध्येन द्विपदं पद्मं मथ यैकं त्वपभकं लिंगस्य पार्श्वयोर्भद्रे
पदद्वारमलोपनात् तत्पार्श्वे शोभासिंहाथलता शोभास्तथा हरेः ऊर्ध्वं द्विपदकं लोप्यरवेर्भद्राष्टकं स्मृतं रश्मिमालासमायुक्तं वेदलोपाच्च शोभिका पंच
विंशतिभिः पद्मं ततः पीठमथीतकं द्वयद्वयं उपशोभास्तथाष्ट च देव्यादिव्यापकं भद्रं स्वस्मध्ये परं लघु मध्येन वपरं पद्मं कोणभद्रं चतु
ष्टयं त्रयोदशपदं शेषं बुध्याधारस्तु मंडलं शतपत्रं षष्ट्यधिकं बुध्याधारं हरादिषु इत्याग्नेयपुराणे मंडलानि ॥ ईश्वर उवाच अस्त्रयागः पुराकार्यः
सर्वकर्मसु सिद्धिदः मध्ये पूज्यं शिवाधस्त्वं वज्रादीन् पूर्वतः क्रमात् पंचवक्त्रं दशाकरं रणादौ पूजयंति ये ग्रहपूजा रविर्मध्ये पूर्वाद्याः सोमकादयः
सर्व एकादशास्थातु ग्रहास्युर्ग्रहपूजनात् अस्त्रशांतिं प्रवक्ष्यामि सर्वोत्पातविनाशिनीं ग्रहरोगादिशमनीं मारीशत्रुविमर्दिनीं विनायकोपशा
पश्चीमघोरास्त्रं जपेन्नरः लक्ष्ययज्ञादिनाशः स्यात् उत्पाते तिलहोमतः दिव्यलक्षनर्धनं व्योमजोत्पातनाशनं घृतेन लक्षपातेन जपातेन भूमि
जे हितं घृतगुग्गुलहोमेन सर्वोत्पातविमर्दनं दूर्वाक्षताज्यहोमेन व्याधयोथ घृतेन तु सहस्रेण तु दुःस्वप्नाविनश्यंति न संशयः अयुतात् ग्रहदोष
घ्नाय वात्घृतविमिश्रितात् विनायकार्तिशमनमयुतेन घृतस्य च भूतवेतालशांतिस्तु गुग्गुलेनायुतेन च महारक्षस्य भंगे तु व्यालकाके गृहस्थिते
आरण्यानां प्रवेशे च दूर्वाज्यघृतहावनात् उल्कापाते भूमिकंपे तिलाज्येन हुनात् छिवं रक्तस्रावे तु वृक्षाणामयुताद् गुग्गुलाः शिवं अकाले फलपुष्पाणां
राष्ट्रभंगे च मारणे द्विपदादेर्यदा मारी लक्षात् पञ्चतिलाज्यतः हस्तिमारीप्रशांत्यर्थं करिणीदंतवर्धने हस्तिन्याम दृष्टे च अयुताच्छांतिरिष्यते अका
लगर्भपाते तु जातं यत्र विनश्यति विरूपायत्र जायंते यात्राकाले घृतं हुनेत् तिलाज्यलक्षहोमस्तु उत्तमः सिद्धिसाधने मध्यमायांतदर्धेन उत्पाताद् धमा
स्त्रेण शांतिं जाप्यादि पूर्ववत् पादतः पूर्वनाशो हि फट् तंचापदादि तु तु ओं नमो भगवते पाशुपताय अतुलबलवीर्यपराक्रमाय त्रिपंचनयनाय नानारूपा
य नानाप्रहरणोद्यताय सर्वांगरक्ताय भिन्नांजनचयप्रख्याय श्मशानवेतालप्रियाय सर्वविघ्ननिकृंतनाय सर्वसिद्धिप्रदाय भक्तानुकंपिने असंख्यभुजपादा
य तस्मिन् सिद्धाय वेतालवित्रासिने शाकिनीक्षोभजननाय व्याधिनिग्रहकारिणे पापभंजनाय सूर्यसोमाग्निनेत्राय विष्णुकवचाय खड्गवज्रहस्ताय यमदंड
वरुणपाशाय रुद्रशूलाय ज्वलज्जिह्वाय सर्वरोगविद्रावणाय ग्रहनिग्रहकारिणे दुष्टनागक्षयकारिणे ओं कृष्णपिंगलाय फट् हूंकाराय फट् वज्रहस्ताय फट्
शक्तये फट् दंडाय फट् यमाय फट् खड्गाय फट् नैर्ऋताय फट् वरुणाय फट् पाशाय फट् ध्वजाय फट् अंकुशाय फट् गदायै फट् कुबेराय फट् त्रिशूलाय फट्
मुद्गराय फट् चक्राय फट् पद्माय फट् नागास्त्राय फट् ईशानाय फट् खेटकास्त्राय फट् मुंडाय फट् मुंडास्त्राय फट् कंकालास्त्राय फट् पिच्छिकास्त्राय
फट् क्षुरिकास्त्राय फट् ब्रह्मास्त्राय फट् शक्त्यस्त्राय फट् सिद्धास्त्राय फट् पिलिपिच्छास्त्राय फट् गंधर्वास्त्राय फट् पूर्वास्त्राय फट् दक्षिणास्त्राय फट्
वामास्त्राय फट् पश्चिमास्त्राय फट् शाकिन्यस्त्राय फट् योगिन्यस्त्राय फट् दंडास्त्राय फट् महादंडास्त्राय फट् नमोस्त्राय फट् शिवास्त्राय फट् ईशाना
स्त्राय फट् पुरुषास्त्राय फट् घोरास्त्राय फट् वामदेवास्त्राय फट् सद्योजातास्त्राय फट् हृदयास्त्राय फट् महास्त्राय फट् गरुडास्त्राय फट् राक्षसास्त्राय
फट् दानवास्त्राय फट् क्षौं नरसिंहास्त्राय फट् दुष्टास्त्राय फट् सर्वास्त्राय फट् नः फट् यः फट् मायास्त्राय फट् कामास्त्राय फट् क्षेत्रपालास्त्राय
फट् ओंकारास्त्राय फट् भास्करास्त्राय फट् चंद्रास्त्राय फट् विघ्नेश्वरास्त्राय फट् गोः गों फट् खों खों फट् कौं कौं फट् खौं खौं फट् कौं फट् भ्रामय २
फट् उन्मूलय उन्मूलय फट् त्रासय त्रासय फट् संजीवय २ फट् विद्रावय २ फट् सर्वदुरितं नाशाय फट् सहस्रावर्तनादेव सर्वविघ्ना
न्नाशयेत् शतावर्तेन महोत्पातान् रणादौ विजयी भवेत् घृतगुग्गुलहोमाच्च असाध्यानपि साधयेत् पठनात्सर्वशांतिः स्यात् अस्त्रपाशुपत

स्यन्व इत्याग्नेये पाशुपतशांतिः ॥

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्यस्य स्मारकम्

७९

ईश्वरउवाच ॐ हूंसः इति मंत्रेण मृत्युरोगादि शाम्यति लक्षाहुतिभिर्दूर्वाभिः शांतिं पुष्टिं प्रसाधयेत् १ अ
थवा प्रणवेनैव मायया वा षडानन ॥ दिव्यांतरिक्षभौमानां शांतिरुत्पातरक्षके २ ॐ नमो भगवति गंगे का
लि २ महाकालि २ मांसशोणितभोजने रक्तकृष्णमुखि वशमानय मानुषान् स्वाहा ॐ लक्षं जप्त्वा दशांशेन हुत्वा
स्यात् सर्वकर्मकृत् वशं नयति सर्वादीन् मानुषेष्वत्र का कथा अंतर्धानकरी विद्या मोहनी जंभनी तथा ३ वशं नय
ति वा चूर्णा शत्रुबुद्धिप्रमोहिनी कामधेनुरियं विद्या सप्तधा परिवर्णिता ४ मंत्रराजं प्रवक्ष्यामि शत्रुचोरादिमो
हनं महाभयेषु सर्वेषु स्मर्तव्यं हरपूजितं ५ लक्षं जप्त्वा तिलैर्होमः सिद्धे दुद्धारकं शृणु ॐ हले शूले एहि ब्रह्म
सत्येन विष्णुरुद्रसत्येन रक्ष मां ६ वाचेश्वराय स्वाहा दुर्गां तारयते यस्मात्तेन दुर्गा शिवा मता ॐ ह्रीं चंडकपालि
नि दंतान् किट २ क्षिटि २ गुह्ये ग्रां अनेन मंत्रराजेन क्षालयित्वा तु तंडुलान् त्रिशाढाराणि जप्त्वा नितश्चौरेषु प्रदापये
त् ॥ ७ दंतैश्चूर्णानि शुक्लानि पतितानि हि शुद्धये ॐ ज्वलल्लोचन कपिलजटाभारभासुरविद्रावण त्रैलोक्यडा
मरदर २ भ्रम २ आकृष्ट २ तोटय २ मोटय २ दह २ पच २ एवं सिद्धि रुद्रो ज्ञापयति यदि ग्रहोपगतः स्वर्गलोकं देवलो
कं वा आरामविहाराचलं तथापि तमावर्तयिष्यामि बलिं गृह्ण २ ददामि ते स्वाहेति क्षेत्रपालबलिं दत्वा ग्रहोन्यासा
दुदनुप्रजेन शत्रवो नाशमायांति रणे वैरिगणक्षयः हंसबीजं तु विन्यस्य विषं त्रिविधं हरेत् ८ अगरुं चंद
नं कुष्टं कुंकुमं नागकेशरं नखं वै देवदारुं च समं कृत्वाथ धूपकः ९ माक्षिकेन समायुक्तो देहवस्त्रादि धूपनात्
विवादे मोहने स्त्रीणां मंडले कलहे शुभः १० कंन्यायाव रणे भाग्ये मायामंत्रेण मंत्रितः ह्रीं रोचनानागपुष्पाणि कुंकु
मं च मनःशिला ११ ललाटे तिलकं कृत्वा यं पश्येत्स वशी भवेत् शतावर्यास्तु चूर्णं तु दुग्धपीतं च पुत्रकृत् १२ नाग
केसरचूर्णं तु घृतपक्वं तु पुत्रकृत् पालाशबीजपानेन लभते पुत्रकं तथा १३ ॐ उत्तिष्ठ चामुंडे जंभय २ मोहय २

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्यस्य स्मारकम्

अमुकंवशमानय २ स्वाहा षड्विंशासिद्धविद्येयंनदीतीरमृदास्त्रियं कृत्वोन्मत्तरसेनैवनामालिख्यार्कपत्रके
१३ मूत्रोत्सर्गंनतत्रकृत्वाजपेत्तामानयेस्त्रियं ॐक्षुंसःवषट् महामृत्युंजयोमंत्रोजप्याद्धोमाच्चपुष्टिकृत्
ॐह्रूंसःसौंखौः मृतसंजीवनीविद्याअष्टार्णारुद्रणे मंत्रईशानमुख्याश्चधर्मकामादिदायकाः १४ ईशानः
सर्वविद्यानामीश्वरःसर्वभूतानां ब्रह्मणश्चाधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेस्तुसदाशिवः ॐतत्पुरुषायवि
द्महेमहादेवायधीमहि तन्नोरुद्रःप्रचोदयात् ॐअघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः सर्वेभ्यःसर्वसर्वेभ्योन
मस्तेअस्तुरुद्ररूपेभ्यः ॐवामदेवायनमोज्येष्ठायनमोरुद्रायनमःकालायनमः कलविकरणायनमोबलविकरण
यनमोबलायनमोबलप्रमथनायनमः सर्वभूतदमनायनमोमनोन्मनायनमः ॐसद्योजातंप्रपद्यामिसद्योजाताय
वैनमः भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः पंचब्रह्मांडषड्ंचवक्ष्येहंभुक्तिमुक्तिदं ॐनमःपरमात्मनेप
रायकामदायपरमेश्वराययोगाययोगसंभवायसर्वशंकरायकुरु २ सद्य २ भव २ भवोद्भववामदेवसर्वकार्यकरपा
पत्रशमनसदाशिवप्रसन्ननमोस्तुतेस्वाहा हृदयंसर्वार्थदंसत्यक्षरसंयुतं ॐशिवशिवायनमःशिरःॐशिवहृ
दयेज्वालिनिस्वाहाशिखा ॐशिवात्मकमहातेजः सर्वज्ञप्रभुरावर्तयमहाघोरकवचपिंगलंनमः महाकवचशि
वास्त्रयाहृदयंबंधबंधघूर्णय २ चूर्णय २ सूक्ष्मास्त्रक्ष्मवज्रपाशधरवज्रशरीरमच्छरीरमनुप्रविश्यसर्वदुष्टान्स्तं
भय २ हूं अष्टार्णकवचंशंपंचाक्षराधिकं ॐश्नेजसेनेत्रं ॐपुस्फुर २ तनुरूप २ चट २ प्रचट २ कट २ वम २ घात
यहूंफट् २ अघोरास्त्रं आग्नेयेब्रह्मास्त्रषडंगानि ईश्वरउवाच शिवशांतिंप्रवक्ष्यामिकल्पाघोरप्रपूर्वकं स
सकोद्यधिकोघोरोब्रह्महत्याद्यघार्दनः १ उत्तमाधमसिद्धिनामाल्योविल्लरोगनुत् दिव्यांतरिक्षभौमानामुत्पाता

नांविमर्दनः २ विषग्रहपिशाचानांग्रसनःसर्वकामकृत् प्रायश्चित्तमघोघानेदौर्भाग्यार्तिविनाशनं ३ एकवीरं
तुविन्यस्यध्येयःपंचमुखःसदा शांतिकेपौष्टिकेशुक्लोरक्तोवश्येथपीतकः ४ स्तंभनेधूम्रउच्चाटेमारणेकृष्णवर्णकः
कर्षणेकपिलोनोहेहृशांतिशाद्गर्णमर्चयेत् ५ त्रिंशल्लक्षजपेन्मंत्रंहोमंकुर्याद्दशांशतः गुग्गुलंघृतयुक्तेनसिद्धेसिद्धा
थसर्वकृत् ६ अघोरान्नापरोमंत्रोविद्यतेभुक्तिमुक्तिकृत् अब्रह्मचारीब्रह्मचारीअस्नातःस्नातकोभवेत् ७ अघो
रास्त्रमघोरस्तुद्वाविमौमंत्रराजकौ जपहोमार्चनाद्युद्धेशत्रुसैन्यंविमर्दयेत् ८ रुद्रशांतिंप्रवक्ष्यामिशिवांसर्वार्थ
साधनीं पुत्रार्थंग्रहनाशार्थंविषव्याधिविनष्टये ९ दुर्भिक्षमारीशांत्यर्थंदुःस्वप्नहरणायचबलादिराजप्राप्त्यर्थं
शि प्रूर्णांनाशनायच। १० अकालेफलितेरक्षेसर्वग्रहविमर्दनेप्रजनेतुनमस्कारःस्वाहांतेहवनंतथा ११ अप्या
यनेवषट्कारंपुष्टौवौषड्नियोजयेत् ॐकाराद्वितयस्थानेयानियोगेनुकारयेत् १२ ॐरुद्रायठ ॐवृषभायनमः
अविमुक्तायअसंभवायपुरुषायपंचपूज्यायईशापत्रेपौरुषेयंचचोत्तरेविश्वरूपायकरालायविकृतरूपायनिकृतो
वापरेकालेअस्कमायाचनेत्रकृते एकपिंगलाय श्वेतपिंगलायकृष्णपिंगलायनमः मधुपिंगलायनिपतितोअ
नंताशायसक्षापययोगणाय कालतत्वेकरालाय विकरालायहैमायातत्वे सहस्रशीर्षायसहस्रवक्त्रायसहस्र
लिंगायविद्यातत्वेसहस्राक्ष्यादिन्यसेत् दक्षिणेदले एकजटायद्विजटायत्रिजटायस्वाहाकारायस्वधाकाराय
वषट्कारायषड्दायईशानत्वेभुवनहिपत्रेस्थितागुह भूपतयेभूतपतयेमहाभूतपतयेपाशुपतयेउमापतये
कलाधिपतयेसदाशिवाख्यतत्वेषट्पूज्याःपूर्वदलेस्थिताः उमायैकरूपधारिणिॐतुरु २ रुहिणि २ रुद्रोसिदेवानां
देवदेवाविशासहन २ दहपच २ मथ २ तुर २ अरु २ स्वरु २ रुद्रशांतिमनुसरकृष्णपिंगलकालपिशाचाधिपतिर्विश्वे

श्वरायनमः शिवनत्वेकर्णिकायांपूज्यौह्यक्रमामहेश्वरौ ॐ व्योमव्यापिने व्योमरूपाय सर्वव्यापिने शिवाय अनंताय अ
नाश्रिताय शिवाय शिवतत्वेन नवपदानि व्योमव्याप्यभिधास्य हि द्वाश्वत्ताय योगपीठसंस्थिताय नित्ययोगिने ध्या
नाहाराय नमः शिवाय सर्वभावशिवाय ईशानमूर्द्धापनत् पुरुषवक्त्राय नवपदं पूर्वदले सदाख्ये पूजयेद्गुह अघोर
हृदयाय वामदेवगुह्याय सद्योजातमूर्त्तये ॐ नमः गुह्याति गुह्याय गोप्त्रे अनिधनाय सर्वयोगाधिकृताय ज्योतीरूप
य अग्नि पुत्रे हि शान्तत्वे विद्यातत्वे तु याम्यगे परमेश्वराया अचेतन २ व्योमन २ व्योमन २ व्यापिन २ अरूपिन् २ प्रमथ
२ तेजस्ते २ एवमायातत्वेनैर्ऋते नेतृकालतत्वे थवारुणे ॐ धृ धृ नांनावांवां अनिधन निधनोद्भव शिव सर्व परमा
त्मन्महादेव सद्भावेश्वर महातेज योगविधिपते यमुंच प्रमथ २ सर्व २ भव २ भवोद्भव सर्वभूतसुखप्रद वायु पुत्रेथ नित्य
तो पुरुषेन्वोत्तरेनव सर्वसान्निध्यकर ब्रह्मविष्णुरुद्रपद अनिर्चित अस्कन्नसाक्षिण २ तरु २ पतंग २ ज्ञान २ शद्ध २ सूक्ष्म
२ शिवपद २ ॐ नमः शिवाय ॐ नमोनमः शिवाय ॐ नमोनमः ईशाने शाकुनेतत्वे पूजयेज्जुहुयात् जपेत् ग्रहरोगादि
मायानिर्नाशमानीं सर्वसिद्धिकृत् आग्नेयेमहापुराणे रुद्रशांतिः ईश्वरउवाच रुद्राक्षकटकं धार्य्यं विषमं सुसमं दृ
ढं एकत्रिपंचवदनं यथालाभं तु धारयेत् १ द्विचतुःषण्मुखं शस्तमव्रणं तीव्रकंटकं दक्षबाहौ शिखादौ च धारये
च्चतुराननं २ अब्रह्मचारी ब्रह्मचारी अस्नानः स्नानको भवेत् हैमीवामुद्रिकाधार्या शिवमंत्रेण चार्च्युत ३ शिवः
शिखा तथा ज्योतिः सावित्रश्चेति गोचराः गोचरं तु कुलं ज्ञेयं तेन लक्ष्यस्तु दीक्षितः ४ प्राजापत्यो महीपालः कापोतो
ग्रंथिकः शिवे कुंडिकाश्चैव वेतालाः पद्माहंसा शिखाकुले ५ धृतराष्ट्र वकाः काका गोपाला ज्योतिसंज्ञके कुटि

का साठरा चैव गुटिका दंडिनोपरे ६ सावित्रिगोचरे चैवमेकैकस्तु चतुर्विधः। सिद्धाद्यंशकमाख्यास्येयेन
मंत्रः सुसिद्धिदः ७ भूमौ तु मातृकालेख्याः कूटमंत्रविवर्जिताः मंत्राक्षराणि विश्लिष्य अनुस्वारं नयेत् पृ
थक् ८ साधकस्य तु या संज्ञा तस्य विश्लेषणं चरेत् मंत्रस्यादौ तथांते च साधकार्णानि योजयेत् ९ सिद्धः
सुसिद्धोरिः संज्ञां तु गणयेत्क्रमात् मंत्रस्यादौ तथांते च सिद्धिदः स्याच्छतांशतः १० सिद्धादिश्चांतसिद्धिश्च तत्क्ष
णादेव सिद्ध्यति असिद्धादिः सुसिद्धांतः सिद्धवत् परिकल्पयेत् ११ आदिमादौ तथांते च दूरतः परिवर्जये
त् सिद्धः सुसिद्धश्चैकार्थे अरिः साध्यस्तथैव च १२ आदौ सिद्धस्थितो मंत्रोंतदंते तद्वदेव हि मध्ये रिपुसह
स्राणि न दोषाय भवंति हि १३ मायाप्रसादप्रणवेनास्त्यंशकाख्यातमंत्रके ब्रह्मांशको ब्रह्मविद्या विष्णूंगो वैष्ण
वः स्मृतः १४ रुद्रांशको बलीवीर इंद्रांशश्चेश्वरः प्रियः नागांशो नागतत्वाक्षो यक्षांशो भूषणः प्रियः १५ गंधर्वां
शोतिनागादिभीमाक्षो राक्षसांशकः दैत्यांशः स्मायुद्धकर्था मानी विद्याधरांशकः १६ पिशाचांशो मलाक्रां
तो मंत्रं दद्यान्निरीक्ष्य च मंत्र एकात् फडंतः स्यात् विद्यापंचाशदावधि १७ बालाविंशाक्षरांतान्त्वर्णाद्धि द्वि
शागायुवा ततऊर्ध्वं तु ये मंत्रा वृद्धा यावच्छतत्रयं १८ अकारादि हकारांता क्रमात्पक्षौ सितासितौ अनुस्वा
र विसर्गेण विना चैव स्वरा दश १९ ह्रस्वाः शुक्लादीर्घाः शामास्तिथयः प्रतिपन्मुखाः उदिते शांतिकादीनि भ्रमिते व
श्यकादिकं २० भ्रामिते मध्ययाद्वेषोच्चाटने स्तंभने स्तकं। इडावाहे शांतिकार्यं पिंगले कर्षकादिकं २१ मार
णोच्चाटनादीनि विषुवे पंचधा पृथक् अधरस्य गृहे पृथ्वी उर्द्धे तेजोंतरा द्रवः २२ रंध्रपार्श्वे बहिर्वायुः सर्वव्या
प्य महेश्वरः स्तंभनं पार्थिवे शांतिर्ज्जले वश्यादि तेजसे २३ वायुः स्यात् भ्रमणं शून्यं पुण्यंकालं समभ्यसेत् २४

अग्नेयेमहापुराणेअंबाकादि ईश्वरउवाच सौभाग्यदामुपापूजांवक्ष्येहंभुक्तिमुक्तिदं मंत्रंध्यानंमंडलंचमुद्रांहो
मादिसाधनं १ चित्रभानुंशिवंकामंमहाशक्तिसमन्वितं इडाद्यंपरतोद्धृत्यसकेवंसविकारणं २ द्वितीयंद्वार
काक्रांतंगौरिगतिपदान्वितं चतुर्थंतत्रकर्तव्यंगौर्य्यावैमूलवाचकं ३ ॐह्रींसःशौंगौर्य्यैनमः तत्त्वार्णत्रितयेनै
वजातिमुक्तंषडंगकं आसनंप्रणवेनैवमूर्तिंवैहृदयेनतु ४ क्रूहुकंचतथाकालंशिवबीजंसमुद्धरेत् प्राणंदीर्घ
स्वराक्रांतंषडंगंजातिसंयुतं ५ आसनंप्रणवेनात्रमूर्तिन्यासंहृदाचरेत् यामलंकथितंवत्सएकवीरंवदाम्य
हं ६ व्यापकंसृष्टिसंयुक्तंवह्निमायाकृशानुभिः शिवशक्तिमयंबीजंहृदयादिविवर्जितं ७ गौरींयजेद्धेमरूपां
कांस्यजांशैलजादिकां पंचपिंडांतथाव्यक्तांकोणेमध्येतुपंचमं ८ ललितासुभगागौरीक्षोभणीचाग्नितः
क्रमात् वामाज्येष्ठाक्रियाज्ञानीवृत्तेपूर्वादितोयजेत् ९ सपीठवामभागेतुशिवस्याव्यक्तरूपकं व्यक्ताद्विनेत्रा
त्र्यक्षावाशुद्धावाशंकरान्विता १० पीठपद्मद्वयस्थाराद्विभुजावाचतुर्भुजा सिंहस्थावाथकस्थावाअष्टाष्टदशास
नूकरा ११ स्रगक्षसूत्रकलिकाबालकोत्पलपिंडिका शरंधनुर्वासव्येनपाणिनान्यतमंचयत् १२ वामेनपुस्तकं
शूलदंडाभयकमंडलुन् गणेशंदर्पणंष्वासान्दद्यादेकैकशःक्रमात् १३ व्यक्ताव्यक्ताथवाकार्य्यापद्ममुद्रा
स्मृतासने लिंगमुद्राशिवस्योक्तामुद्राचावाहनीद्वये १४ शक्तिमुद्रातुयोन्यास्याच्चतुरस्रंतुमंडलं चतुर्ह
स्तंत्रिपत्राब्जंमध्यकोष्ठचतुष्टयं १५ त्र्यस्रार्थेचार्धचंद्रंतुद्विपदंद्विगुणंक्रमात् द्विपदंद्वारकंठंतुद्विगुणादु
पकंठतः १६ द्वारत्रयंत्रयंदिक्षुअथवाभद्रकेयजेत् स्थंडिलेवाथसंस्थाप्यपंचगव्याद्यनादिना १७ रक्तपुष्पा
[illegible]षानिपूजयित्वात्वुदङ्मुखः शतंहुत्वाघृताद्यंचपूर्णादःसर्वसिद्धिभाक् १८ बलिंदत्वाकुमारीश्चस्त्रियो

वाचाष्टभोजयेत् नैवेद्यंशिवभक्तेषुदद्यान्नस्वयमाचरेत् १९ कन्यार्थीलभतेकन्यांअपुत्रःपुत्रमाप्नुयात् दु
र्भगाचैवसौभाग्यंराजाराज्यंजयंरणे २० अष्टलक्षैश्चवाक्सिद्धिर्देवाद्यावशमाप्नुयुः अनिवेद्यनचाश्नीया
द्वामहस्तेनचार्चयेत् २१ अष्टम्यांचचतुर्दश्यांतृतीयायांविशेषतः मृत्युंजयार्चनंवक्ष्येपूजयेत्कलशोद
रे २२ ऊमासनंचप्रणवोमूर्तिरोजंसईदृशां मूलंचवौषडंतेनकुंभमुद्रांप्रदर्शयेत् २३ होमयेत्क्षीरदूर्वा
ज्यममृतांचपुनर्नवां पायसंचपुरोडाशमयुतंतुजपेत्मनुं २४ चतुर्मुखंचतुर्बाहुंद्वाभ्यांचकलशंदधत् वर
दाभयकंद्वाभ्यांस्नापयेद्वैकुंभमुद्रया २५ आरोग्यैश्वर्यदीर्घायुरौषधंमंत्रितंशुभं अपमृत्युहरोध्यातःपूजितोद्य
तएवसः २६ अग्नेयेगौर्यादिपूजा ईश्वरउवाच व्रतेश्वरांश्चसत्यादीनिष्टाव्रतसमर्पणं अरिष्टदामनेशास्त
मरिष्टंसत्नतायकं १ हेमरत्नमयंभूत्यैमहाशंखंचमारणे आप्यायनेशंखसूत्रंमौक्तिकंपुत्रवर्द्धने २ स्फाटि
कंभूतिदंकौशंमुक्तिदंरुद्रनेत्रजं धात्रीफलप्रमाणेनरुद्राक्षंचोत्तमंतथा ३ समेरुंमेरुहीनंवासूत्रंजप्यंतुमा
नसं अनामांगुष्ठमाक्रम्यजपंभाष्यंतुकारयेत् ४ तर्जन्यंगुष्ठमाक्रम्यनमेरुंलंघयेज्जपे प्रमादात्पतितेसू
त्रेजप्तव्यंतुशतद्वयं ५ सर्ववाद्यमयीघंटातस्यावादनमर्थकृत् गोशकृन्मूत्रवल्मीकमृत्तिकाभस्मवारिभिः
६ वेश्यायतनलिंगाद्यैःकार्यमेवंविशोधनं स्कंदोन्नमःशिवायेतिमंत्रःसर्वार्थसाधकः ७ गीतःपंचाक्षरोवेदेलो
केगीतःषडक्षरः ॐमित्यंतेस्थितःशंभुर्महार्थंवटबीजवत् ८ क्रमान्नमःशिवायेतिईशानाद्यानवैविदुः षड
क्षरस्यसूत्रस्यभाष्यंविद्याकदंबकं ९ यदोन्नमःशिवायेतिएतावत्परमंपदं अनेनपूजयेल्लिंगंलिंगेयस्मा
त्स्थितःशिवः १० अनुग्रहायलोकानांधर्मकामार्थमुक्तिदः योनपूजयतेलिंगंनसधर्मादिभाजनं ११ लिंगा

र्चनाद्भुक्तिमुक्तीयावज्जीवमनोयजेत् यरंप्राणपरित्यागोभुंजीतापूज्यनैवतं १२ रुद्रस्यपूजनाद्रुद्रोविष्णु
स्याद्विष्णुपूजनात् सूर्य्यःस्यात्सूर्य्यपूजनाःशक्त्यादिःशक्तिपूजनात् १३ सर्वयज्ञतपोदानंतीर्थेवेदेषुयत्फलं
तत्फलंकोटिगुणितस्थाप्यलिंगंलभेन्नरः १४ त्रिसंध्यंयोर्चयेल्लिंगंकृत्वालिंगंचपार्थिवं शतैकादशिकंयावत्
कुलमुद्धृत्यनाकभाक् १५ भक्त्यावित्तानुसारेणकुर्यात्प्रासादंसंचयं अल्पेमहतिवातुल्यंफलमाढ्यदरिद्रयोः १६
भोगद्वयंचधर्मार्थकल्पयेज्जीवनायच धनस्यार्थार्थमेकंतुअनित्यंजीवितंयतः १७ त्रिःसप्तकुलमुद्धृत्यदेवागा
रकृदर्थभाक् मृद्दार्वश्मकशैलाद्यैःक्रमात्कोटिगुणंफलं १८ अष्टेष्टकसुरागारकारीस्वर्गमवाप्नुयात् पांसुना
क्रीडमानोपिदेवागारकृदन्नभाक् १९ इत्याग्नेयेमहापुराणेदेवालयमहात्म्यादिसमाप्तं अग्निरुवाच छंदो
वक्ष्येमूलवाक्यैःपिंगलोक्तंयथाक्रमं सर्वादिमध्यांतगणौम्नौभ्यौज्यौस्तौत्रिकागणाः १ ह्रस्वोलघुर्वापादांतेपूर्वो
योगेविसर्गतः अनुस्वाराद्व्यंजनात्स्यात्जिह्वामूलीयतस्तथा २ उपध्मानीयतोदीर्घोगुरुर्ल्गौसगलाविह वसवो
सोचचत्वारोवेदाइत्यादिलोकतः ३ इत्याग्नेयेछंदसारेप्रथमोध्यायः अग्निरुवाच छंदोधिकारेगायत्रीदेवी
चैकाक्षराभवेत् पंचदशाक्षरास्फरीस्यात्प्राजापत्याष्टवर्णिका १ यजुषांषड्वर्णगायत्रीसाम्नांस्याद्द्वादशाक्षरा
ऋचामष्टादशार्णास्यात्साम्नावर्द्धतचद्वयं २ ऋचांत्रयंचवर्द्धतंप्राजापत्याच्चतुष्टयं वर्द्धदेकैकंशेषेआसुर्या
एकमुत्सृजेत् ३ उष्णिगनुष्टुप्बृहतीपंक्तित्रिष्टुप्जगत्यपि तानिस्त्रेयानिक्रमशोगायत्र्योब्राह्म्यएवताः ४ नि
स्रस्त्रिस्त्रःसनाम्न्यःस्युरेकैकाआर्ष्यएवच प्राग्याजुषांचसंज्ञाःस्युश्चतुःषष्टिपदेलिखेत् ५ अग्नयेद्वितीय
अग्निरुवाच पादअपादपुरेणगायत्र्यावसवःस्मृताः जगत्याआदित्यपादोविराजोदिशाईरिताः १ त्रिष्टुभो

रुद्रःपादःस्याच्छंदएकादिपादकं अयंचतुष्पादतुभिस्त्रिपासप्ताक्षरैकचित् २ सागायत्रीपादनिचृत्प्र
तिष्ठाद्विषट्त्रिपात् वर्द्धमानाषडष्टांत्रिपात्षडष्टभूधरे ३ गायत्र्यतिपादनिचृत्नागानवनवर्तुभिः
वाराहीरसद्विरंध्रेश्छंदसाथतृतीयकं ४ द्विपाद्वादशवस्वर्णैस्त्रियानुत्रैष्टुभैःस्मृतं उष्णिकूछंदोष्टवस्व
कैःपादेवेदित्रकीर्तितं ५ ककुबुष्णिगनुष्टुप्सूर्यवस्वर्णाग्निभिरेवसः पुरुष्णिकृसूर्यवस्कवस्वर्णैश्चत्रिपाद्भ
वेत् ६ परोष्णिकपरतस्तुस्याच्चतुष्पाद्दाषिभिर्भवेत् अष्टाक्षरैरनुष्टुप्स्याच्चतुष्पाच्चत्रिपात्कचित् ७ अ
ष्टार्कसूर्यवर्णैःस्यान्मध्येत्येनचकचिद्भवेत् बृहतीजगतस्त्रयोगायत्र्याःपूर्वकोयदि ८ तृतीयःपथ्याभवती
द्वितीयोन्यंकुसारिणी स्कंधोग्रीवाक्रोष्टुकेशाद्यास्कंधोरोबृहत्यपि ९ उपरिष्टाद्बृहत्यंतेपुरस्ताद्बृहतीपु
रः कचिन्नवकाश्चत्वारोदिग्दिगष्टाष्टवर्णिका १० महाबृहतिभागतैःस्यात्रिभिःसंतोबृहत्यपि तांडिनः
पंक्तिःछंदस्यात्सूर्यार्काष्टाष्टवर्णके ११ पूर्वेविदयुजौसंतःपंक्तिश्चविपरीतकौ प्रस्तारपंक्तिःपुरतः
पश्चादास्तारपंक्तिका १२ विस्तारपंक्तिरंतश्चद्वहिःसंस्तारपंक्तिका अक्षरपंक्तिपंचकाश्चत्वारश्चास
वोद्वयं १३ पदपंक्तिःपंचभवेत्चतुष्कषट्कपंचकं षड्कपंचभिर्गायत्रैषड्भिश्चजगतीभवेत्तु एकेनत्रि
ष्टुप्ज्योतिष्मतीतथैवजगतीरिता पुरस्तात्ज्योतिःप्रथमेमध्येज्योतिश्चमध्यतः १५ उपरिष्टाज्योतिरंत्या
देकस्मिन्पंचकेतथा भवेच्छंदः शंकुमतीषाटच्छंदःककुद्मती १६ त्रिपादशिशुमध्यास्यात्सापिपीलिकम
ध्यमा विपरीतायवमध्यानिवृदेकेनवर्जिता १७ भूरिजेकेनाधिकेनद्विहीनाच्चविराट्भवेत् स्वराड्द्वा
भ्यामधिकंसंदिग्धेदेवतादितः १८ आदिपादान्निश्चयःस्याच्छंदसांदेवताक्रमात् अग्निःसूर्यःशशी

७६९

जीवोवरुणश्चंद्र एवच १९ विश्वेदेवाश्चषड्जाद्याः स्वराषड्जोवृषःक्रमात् गांधारोमध्यमश्चैवपंचमोधैवतस्तथा २०
निषादोवर्षाःश्वेतश्चसारंगाशापिसंगकः कृष्णोनीलोलोहितश्चगौरोगायत्रिमुख्यके २१ गोरोचनाभ्यारुनयो
द्युतिश्छंदोहिश्यामलं अग्निवैष्णकाश्यपश्चगोतमांगिरसःक्रमात् २२ भार्गवःकौशिकःश्चैववामिष्ठोगोत्रमी
रितं २३ आग्नेयेतृतीयः आग्निरुवाच- चतुःशतमुत्कृतिस्यादुत्कृतेश्चतुरस्त्यजेत् अभिसंख्याप्रत्यकृतिस्त
निश्छंदांसिवैपृथक् १ कृतिश्चातिधृतिर्धात्रीत्यष्टिश्चाष्टिरित्यतः अतिशक्करीशक्करीतिअतिजगतिजग
त्यपि २ छंदोत्रलौकिकंस्याच्चआर्षामत्रैस्थर्मतत्स्मृतं त्रिष्टुप्चपंक्तिर्बृहतीअनुष्टुबुष्णिगीरितं ३ गायत्री
स्यात्सुप्रतिष्ठामध्ययासह अत्युक्तात्युक्तआदिश्च एकैकाक्षरवर्द्धितं ४ चतुर्भागोभवेत्पादोगणछंदःप्रद
र्शते भवेंतःसमुद्रागणाद्यादिमध्यांतसर्वगाः ५ चतुर्वर्णःपंचगणाआर्यालक्षणमुच्यते स्वरार्द्धंचार्ध्यार्द्धं
स्यादार्यामांविषमेनरः ६ षष्ठोजोनलघुर्वास्याद्वितीयादिपदेंतल्ले सप्तमेंतेप्रथमाच्चद्वितीयेपंचमेनले
७ अर्द्धेपदंप्रथमादिषष्ठएकोलघुर्भवेत् त्रिषुगणेषुपादःस्यादार्यापंचाद्यकेस्मृता ८ विपुलान्याथचप
लागुरुमध्यंगतौचजौ द्वितीयचतुर्थपूर्वेचचपलांचमुखपूर्विका ९ द्वितीयेजघनेपूर्वाच्चिचपलार्ध्योप्रकीर्तिता
उभयोर्महाचपलागीतिर्वार्ध्यर्द्धतुल्यका १० अंत्येनार्द्धेनोपगीतिरुद्गीतिश्चोत्क्रमात्तस्मृता अर्द्धेवस्रगणाआर्या
गीतिश्छंदोथमात्रया ११ वैतालीपंक्तिःस्वराक्याचतुष्पादेसमेनल्लैः वसवोतेंगलगाश्चगोपछंदसकंभवे
त् १२ भगणांतापातलिकाशेषेपरेचपूर्ववत् साकंषष्ठाभिश्चयुजिप्राच्यवृत्तिःप्रदर्शते १३ पंचमेनपूर्वसा
कंतृतीयेनसहस्त्रयुक् उदिच्यवृत्तिराद्यस्यायुगपच्यप्रवर्तकं १४ आमुक्तचारहासिनीस्याद्युगपच्चांतीका

भवेत् गताद्विर्वसवश्चैवमात्रारामकगीरितं १५ भवेन्नल्लरमौलश्चद्वादशायोवानवासिका विश्लोकःपंचमा
ष्टौनौचित्रानवमकश्चल्लः १६ परयुक्तेनोपचित्रापादाकुलकमित्यतः गीत्यार्यालोपश्चेत्सौम्यालपूर्वाज्योतिरी
रिता १७ स्याच्छिखाविपर्यस्तार्द्धाचूलिकासमुदाहृता एकोनत्रिंशादंतेगःस्यात्रिंशनसमाबला १८ गणश्चैवंगु
रुसंख्यास्यात्वर्णादिश्चविपर्ययात् १९ अग्नेयेमहापुराणेजात्याध्यायः अग्निरुवाच वृत्तंसमंचार्द्धसमंविष
मंचत्रिधावदे। समंतावत्तःहृदुत्हृतमर्द्धसमंचकारयेत् १ विषमंचैवतद्गंच्चतग्नंवृत्तंसमान्यपि गलौचतुःप्रमाणी
स्यादाभ्यामन्यद्वितानकं २ पादस्याधस्तवक्रस्यात्सनौनप्रथमास्मृतो। धान्यगुश्चतुर्थाद्वर्णात्पथ्यावक्रंस्वयो
जतः ३ विपरीतपथ्यान्यासाश्चचपलावायुजःस्यतः विपुलाप्रश्चसप्तमःसर्वेतस्यैरतस्यच ४ डौनौवारिपुला
नेकावक्रजातिःसमीरिता भवेत्पदंचतुरूर्द्धचचतुर्वृद्धापदेषुच ५ गुरुत्वेस्यातुआपीडःप्रत्यापीडोगणाधि
कः नथमस्यविपर्यासेमंजरीलवनीक्रमात् ६ भवेदमृतधाराथउद्गतेत्युच्यतेधुना एकतःसजसातस्तु
र्नसौज्योगोथभाजतो ७ लौगोथराजसानेनस्तृतीयचरणस्यच सौरभेरनभागालडितंचनलौचसो गु
पस्थितप्रचुपितंप्रथमाद्योसनौजभौ गोगथोसनजारोगःसनौचरजयाःपदे ९ वर्द्धमानंततोभ्वेतसोअथौ
तौजोरईरिता शुद्धविराडषभंचवक्ष्येचार्द्धसमंततः १० इत्याग्नेयेविषमाध्यायः अग्निरुवाच उपचित्रं
समससनागथभोडभगागथो द्रुतमध्याभभभगानथोननजयाःस्मृताः १ वेगवतीसमसगाभभभगो
गथोस्मृता। रुद्रविस्तारांतासरगासमजागथोस्मृता २ रजसागोगथोत्रौनौगोगोवकेतुमत्यपि आ
ख्यानिकीततजगागथोथजजगागथा ३ विपरीताख्यानिकीतौजमगौतौजगोगथ सौमलौगथलभभा

६६

रोभवेद्धरिणप्लुता ४ नौषणौगथनज्जायास्याद्परवक्त्रकं पुष्पिताग्रानलवयानज्जजारोगथोरजौ ५ रोजथोज
रजारोगोमूलएवमनीशिखा अभ्राविद्धानिलागंताश्रिशोम्लागननोयुजि ६ खंजानःद्विपरीतं स्यान् समवृत्तंप्रदर्श
ति ७ आग्नेयेमहापुराणे अर्धसमाध्यायः अग्निरुवाच यतिर्विछेदइत्युक्तस्तनुमध्यांनयोगणौ योस
कुमारललितानौगौचित्रपदास्मृता १ विद्युन्मालामममगणैर्भूतगणैर्भवेत् माणवकाक्रीडितकंर
नोहलमुखीरसः २ स्याद्भुजंगशिशुसृतानौमोहंसरुतंननो भवेच्छुद्धविराट्तंप्रतिपादंसमौगजौ ३
पणवोमनयागःस्याज्जौगौमयुरसारिणी संतानभसगात्वृत्तंभजगादेश्युपस्थिता ४ रुक्मवतीभससगा
विंद्रवज्रानतौसगौ जतौजगौतूपपूर्वरिद्यंतावुपजातयः ५ दोधकंभगभागोस्यान्शालिनीमतभागगौ
यतिःसमुद्राऋषयःसवर्षभिरतागगौ ६ चतुःस्वरास्याद्भ्रमरीविलसितामभौनलौ यतिःसमुद्राऋषयास्नौ
लौगौरथोद्धता ७ स्वागतारनभागोगौवृतानानसमाश्वसः स्येनीरजरंदागस्याद्रस्यानपरगागनः ८ जग
तीवंशस्थावृत्तंजचथतौजरौ इंद्रवंशोतोटकंसैश्चतुर्भिःप्रतिपादितः ९ भवेन्द्रुतविलंबितानभौभरा
वथोनलौ स्योश्रीपरोवस्कवेदानजलोद्धनजतिज्ञलौजसौच १० जसौरसन्नवेश्वाथततंननमराःस्मृ
तं कुसुमविचित्रिनाद्योयोनौनौरौम्यांचंचलाक्षिका ११ भुजंगप्रयातंयैःस्याच्चतुर्भिःस्रग्विणीतरैः
प्रतिमान्यूरासजौसौकांनोसीलामतोसमौ १२ वैश्वदेवीममयया:पंचांगानवमालिनी नजौभयौप्रतिपादं
गणायदिजगत्यपि १३ प्रहर्षणीमरजरागोपतिवन्हिदिक्षुच रुचिराजभजसजगाछिन्नावेदैर्ग्रहैःस्मृता
मतमयूरंमनयासतौवेदग्रहैर्यति गौरीननसनसामःस्यान्नसंबाधानतौनसौ १५ गोगइंद्रयनवकौ

ननौयसलगास्सुराः स्वराश्चापराजितास्यानभानलगाःस्वराः १६ द्विप्रहरणकलिकायसंततिलकानभौ
जौगौभिंहोद्धतासास्यान्मुलेरुद्धर्षणीत्वसा १७ चंद्रावर्त्तानौनौसौमावर्त्तर्न्निवकःस्मृता मणिगुणनिकारासौमा
लिनीनौमयौयसः १८ यतिर्वस्कराभौवोनततलमद्रिसग्रहा ऋषभजगजविलासितंसेयाशिखरिणीयसौ १९
वसलालग्रृतरुद्राःपृथ्वीजसमायनौ गोवस्कग्रहविछिन्नापिंगलेनेरितापुरा २० वंशपत्रपतितंस्यात्भरतौभोल
गोसादिक् हरिणीनसमारःसोलभौसरचतुःस्वराः २१ मंदाक्रांतानभननंनगोराब्धिवसुःसुराः कुसुमितलतावि
ल्लितामतोयमयया:पराः २२ रथाःप्रतिचथससजाःसत्तताःस्वराः शार्दूलविक्रीडितंस्यादादित्यमुनयोयतिः २३
कृतिःसुवदनामोरोभनयाभनगाःसुराः यतिर्मुनिरसाश्वाथाग्निभिर्वृत्तंक्रमात्स्मृतं २४ स्रग्धरामरतानोयो
ययौत्रिःसप्तकायतिः मुद्रकंभरनागौनोनगादशभास्कराः २५ अश्वललितंनजभाजभजलभमीशतः मत्त
क्रीडाममनवानौमग्नोशोष्ट्रमातिथिः २६ तन्वीभनतसाभोभोलयोबाणसुरार्क्कऋः क्रौंचपदाभमसतानौ
नौयान्शात्तास्वतः २७ भुजंगविजृंभितममतननानरासनौ अष्टेशामुनिभिरछेदोत्कपवाहाख्यमीदृशं २८ म
मननानननानःसोगणैग्रहरसोरसान् नौससरोदंडदःस्याच्चंडवृष्टिप्रपातकं २९ रिफवृद्ध्यातरलास्युर्व्या
लजीमूतमूषकाः शेषेवमतितोज्ञेयोगाथाप्रस्तारमुच्यते ३० अग्नेयेसमवृत्ताध्यायः अग्निरुवाच छंदो
त्रसिद्धंगाथास्यात्पादेसर्वगुरोतथा प्रस्तारआद्यगाध्रोलःपरतुल्योथपूर्वगः १ नष्टमूलर्द्धसंकोलःसैकेर्द्धे
विषमेगुरुः प्रतिलोमगुणंनाद्यंद्विरूद्दिष्टगएकनुत् २ संख्याद्विरर्द्धेरूपेतुशून्यंशून्येद्विरीरितं तावदर्द्धेतद्गु
णितंद्विघ्नंचतदंततः ३ परेपूर्णंपरेपूर्णमेरुप्रस्तारतोभवेत् नगसंख्याऋतुसंख्यावाध्वांगुलमधोर्द्धतः

Dr BHAU DAJI MEMORIAL

७८

४ संख्येयद्विगुणेकोनाछंदःसारोपमीदिति: ५ आग्नेयेप्रस्ताराध्यायः अग्निरुवाच वक्ष्येशिक्षांत्रिषष्टिःसुर्वर्णा
वाच्चतुराधिकाः स्वराविंशतिरेकश्चस्पर्शानांपंचविंशतिः १ यादयश्चस्मृताह्येष्टौश्चत्वारश्चयमाःस्मृताः अनुस्वा
रोविसर्गश्चकःपौव्वापिपराश्रितौ २ दुस्पृष्टश्चापिविज्ञेयऐंकारःप्लुतएवच रंगश्चखेअरंप्रोक्तंमकारःपंचमैर्युतः
३ अंतस्थाभिःसमायुक्तऔरस्यःकंठ्यएकलः आत्मावुध्यासमेत्यार्थान्मनोयुंक्तविवक्षया ४ मनःकायाग्निमाहं
तिसप्रेरयतिमारुतं मारुतस्तूरसिचरंन्मंद्रंजनयतिस्वरं ५ प्रातःसवनयोगंतच्छंदोगायत्रमाश्रितं कंठेमाध्यंदि
नयुतंमध्यमंत्रैष्टुभानुगं ६ तारंतार्तीयसवनंशीर्षण्यंजागतानुगं सोदीर्णोमूर्ध्न्यभिहितोवक्त्रमापद्यमारुतः
७ वर्णान्जनयतेतेषांविभागःपंचधास्मृतः स्वरकालगतःस्थानात्प्रयत्नार्थप्रदानतः ८ अष्टौस्थानानिवर्णा
नामुरःकंठशिरस्तथा जिह्वामूलंचदंताश्चनासिकौष्ठौचतालुच ९ अनुस्वारोविसर्गश्चशषसारेफएवच जि
ह्वामूलमुपध्मात्वगतिरष्टविधोष्मणः १० यद्योभावप्रसंधानमुकारादीपरंपदं स्वरांतंतादृशंविद्यादृदन्य
द्व्यक्तमूष्मणः ११ कुतीर्थादागतंदग्धमपवर्णंचभक्षितं एवमुच्चारणंपापमेवमुच्चारणंशुभं १२ सुतीर्थादाग
तंव्यक्तंस्वाम्नायंसुव्यवस्थितं सुस्वरेणसुवक्त्रेणप्रयुक्तंब्रह्मराजिति १३ नकरालोनलंबोष्ठोनाव्यक्तोनानुना
सिकः गद्गदोबद्धजिह्वश्चनवर्णान्वक्तुमर्हति १४ यथाव्याघ्रीहरेत्पुत्रान्दंष्ट्राभ्यांनचपीडयेत् एवंवर्णाश्रयोक्त
व्यानाव्यक्तानचपीडिताः १५ सम्यग्वर्णप्रयोगेणब्रह्मलोकेमहीयते उदात्तश्चानुदात्तश्चस्वरितश्चस्वरा[illegible]यः
१६ ह्रस्वोदीर्घःप्लुतइतिकालतोनियमाअपि कंठ्यौकुहाविचुयशास्तालव्याओष्ठजावुपू १७ स्युर्मूर्द्धन्याऋटुर
षादंत्यालृतुलसास्मृताः जिह्वामूलेतुकुःप्रोक्तोदंत्योष्ठ्योवःस्मृतोबुधैः १८ एऐतौकंठतालव्यौओऔकंठ्योष्ठ
जौस्मृतौ अर्द्धमात्रातुकंठस्यएकारैकारयोर्भवेत् १९ अयोगवाहविज्ञेयाआश्रयस्थानभागिनः अचोस्पृष्टायणस्त्वीषन्नेमिस्पृष्टाशलःस्मृताः २० शेषाः स्पृ

ष्टाहलःप्रोक्ताविवृतस्थानुप्रधानतः यमोनुनासिकानह्रोनादिनोहझषःस्मृताः २१ ईषन्नादा

यणयवाः श्वासिनस्त्वखकादयः ईषच्छ्वासंस्वरंविद्यादोर्द्धामैनत्प्रचक्षते २२ इत्याग्नेयेशिक्षाध्यायः

संकृत पुढे पृष्ठ ८३ वर श्लोक ३८ अखेरपर्यंत मजकूर किरकोळ आहे. ती पृष्ठे ७९ - ८० शेवटी नेलेली आहेत.

अग्निरुवाच काव्यस्यनाटकादेश्चअलंकारान्वदाम्यथ ध्वनिर्वर्णपदंवाक्यमित्येतद्वाङ्मयंमतं १ शास्त्रेतिहासवाक्यानांत्रयंय
त्रसमाप्यते शास्त्रेशब्दप्रधानत्वमितिहासेषुनिष्ठता २ अभिधायाःप्रधानत्वात्काव्यंताभ्यांविभिद्यते नरत्वंदुर्लभंलोकेविद्या
तत्रचदुर्लभा ३ कवित्वंदुर्लभंतत्रशक्तिस्तत्रचदुर्लभा व्युत्पत्तिर्दुर्लभातत्रविवेकस्तत्रदुर्लभः ४ सर्वंशास्त्रमविद्वद्भिर्मृग्यमा
णंनसिध्यति आदिवर्णोद्वितीयश्चमहाप्राणस्तुरीयकः ५ वर्गेषुवर्णवृंदंस्यात्पदंसुप्तिङ्प्रभेदवत् संक्षेपाद्वाक्यमिष्टार्थ
व्यवच्छिन्नापदावली ६ काव्यंस्फुरदलंकारंगुणवद्दोषवर्जितं योनिर्वेदश्चलोकश्चसिद्धमर्थादयोनिजं ७ वेदादीनांसंस्कृतंस्या
न्प्राकृतंत्रिविधंस्मृतं गद्यंपद्यंचमिश्रंचकाव्यादित्रिविधंस्मृतं ८ अपादःपदसंतानोगद्यंतदपिगद्यते चूर्णकोत्कलिकावृत्तगं
धिभेदात्त्रिरूपकं ९ अल्पार्थविग्रहंनातिमृदुसंदर्भनिर्भरं चूर्णकंनामतोदीर्घसमासोत्कलिकाभवेत् १० भवेन्मध्यमसंदर्भंनाति
कुत्सितविग्रहं वृत्तच्छायाहरंवृत्तगंधिनैतत्तुकिंचनोत्कटं ११ आख्यायिकाकथाखंडकथापरिकथाकथा कथानिकेतिमन्यंतेगद्यंका
व्यंचपंचधा १२ कर्त्तृवंशप्रशंसास्यांसातुसूत्रगद्येनविस्तरात् कन्याहरणसंग्रामविप्रलंभविपत्तयः १३ भवंतियत्रदीप्ताश्चरीतिवृ
त्तिप्रवृत्तयः उच्छ्वासैश्चपरिच्छेदोयत्रयाचूर्णकोत्तरा १४ वक्त्रंचापरवक्त्रंचयत्रसाख्यायिकास्मृता श्लोकैःस्ववंशंसंक्षेपात्कविर्य
त्रप्रशंसति १५ मुख्यस्यार्थावताराय भवेद्यत्रकथांतरं परिच्छेदोनयत्रस्याद्भवेद्वालंभकैःक्वचित् १६ साकथानामतद्गर्भेनिब
ध्नीयाच्चतुष्पदीं भवेत्खंडकथायासौकथापरिकथानयोः १७ आमात्यंसार्थकंवापिद्विजंवानायकंविदुः स्यात्तयोःकरुणंविप्रलं
भश्चचतुर्विधः १८ समाप्यतेतयोर्नाद्यासाकथामनुधावति कथाख्यायिकयोर्मिश्रभावात्परिकथास्मृता १९ भयानकंसुखपरं
गर्भेचकरुणोरसः अद्भुतोंतेसुक्लृप्तार्थोनोदात्ताकथानिका २० पद्यंचतुष्पदीतच्चवृत्तंजातिरितिद्विधा वृत्तमक्षरसंख्येयमुज्यते
तद्विशेषणं २१ मात्राभिर्गणनायत्रसाजातिरितिकाश्यप सममर्द्धसमंवृत्तंविषमंपैंगलंत्रिधा २२ साविद्यानौस्तितीर्षूणांगभीरंका
व्यसागरं महाकाव्यंकलापश्चपर्यावंधोविशेषकं २३ कुलकंमुक्तकंकोशइतिपद्यकुटुंबकं सर्गबंधोमहाकाव्यमारब्धंसंस्कृतेनय

त् २४ नातात्यमजहत्तत्रतनृसमंनातिदुष्यति इतिहासकथोद्भूतमितरद्वासदाश्रयं २५ मंत्रदूतप्रयाणाजिनियतंनातिविस्तरं श
कर्यातिजगत्यातिशक्वर्यात्रिष्टुभातथा २६ पुष्पिताग्रादिभिर्वक्राभिजनैश्चारुभिःसमैः मुक्तानुभिन्नवृत्तांताभातिसंस्थितसर्गकं २७
अतिशक्वरिकाष्टाभ्यामेकसंकीर्णकैःपरः मात्रयाप्यपरःसर्गःप्राशस्तेषुचपश्चिमाः २८ कल्पोतिनिंदितस्तस्मिन्विशेषानादरःसतां न
गरार्णवशैलर्तुचंद्रार्काश्रमपादपैः २९ उद्यानसलिलक्रीडामधुपानरतोत्सवैः दूतीवचनविन्यासैरसतीचरिताद्भुतैः ३० तमसाम
रुताप्यन्यैर्विभावैरतिनिर्भरैः सर्ववृत्तिप्रवृत्तंचसर्वभावप्रभावितं ३१ सर्वरीतिरसैस्पृष्टंपुष्टंगुणविभूषणैः अतएवमहाकाव्यंतत्कर्
त्तीचमहाकविः ३२ वाग्वैदग्ध्यप्रधानेपिरसएवानुजीवितं पृथक्प्रयत्नंनिर्वर्त्यंवाग्वक्रिम्णिरसाद्वपुः ३३ चतुर्वर्गफलंविश्वग्या
ख्यातंनायकाख्यया समानवृत्तनिर्व्यूढःकौशिकीवृत्तिकोमलः ३४ कलापोत्रप्रवासप्रागनुरागाह्वयोवसुः सविशेषकंचप्राप्त्यादिसं
स्कृतेनेतरेणच ३५ श्लोकैःस्वैरनेकैःकुलकंस्यात्सदानीतकानितत् मुक्तकंश्लोकएकैकश्चमत्कारक्षमःसतां ३६ सूक्तिभिःकवि
सिंहानांसुंदरीभिःसमन्वितः कोशोब्रज्यापरिच्छिन्नःसर्वविश्रामरोचते ३७ आभासोपमशक्तिश्चसर्गेयभिन्नवृत्तता मिश्रंवपुरिति
ख्यातंप्रकीर्णमितिचद्विधा ३८ श्रव्यंचैवाभिनेयंचप्रकीर्णसकलोक्तिभिः ३९ इत्याग्नेयेअलंकारकाव्यादिलक्षणं
अग्निरुवाच नाटकंसप्रकरणंडिमईहामृगोपिवा ज्ञेयःसमवकारश्चभवेत्प्रहसनंतथा १ व्यायोगभाणवीथ्यंकत्रोटकान्यथना A1 338
टिका सट्टकंशिल्पकःकर्णाएकोदुर्मल्लिकातथा २ प्रस्थानंभाणिकाभाणीगोष्ठीहल्लीसकानिच काव्यंश्रीगदितंनाट्यरासकंरासकं
तथा ३ उल्लोप्यकंप्रेक्षणंचसप्तविंशतिरेवच सामान्यंचविशेषश्चलक्षणस्यद्वयीगतिः ४ सामान्यंसर्वविषयंविशेषःक्वापिवर्त्तते
पूर्वरंगेनिवृत्तेद्वेदेशकालावुभावपि ५ रसभावविभावानुभावाअभिनयास्तथा अंगःस्थितिश्चसामान्यंसर्वत्रैवोपसर्पणात् ६ विशे
षोवसरेवाच्यःसामान्यंपूर्वमुच्यते त्रिवर्गसाधनंनाट्यमित्याहुःकरणंचयत् ७ इतिकर्त्तव्यतातस्यपूर्वरंगोयथाविधि नांदीमुखानि
द्वात्रिंशदंगानिपूर्वरंगके ८ देवतानांनमस्कारोगुरूणामपिचस्तुतिः गोब्राह्मणनृपादीनामाशीर्वादादिगीयते ९ नांद्यंतेसूत्र

धारोसौरूपकेषुनिबध्यते गुरुपूर्वक्रमंवंशप्रशंसापौरुषंकवेः १० संबंधार्थौचकाव्यस्यपंचैतानेषनिर्दिशेत् नटीविदूषकोवापिपारि
पार्श्विकएवच ११ सहितासूत्रधारेणसंलापंयत्रकुर्वते चित्रैर्वाक्यैःस्वकार्योत्थैर्वीथ्यंगैरन्यथापिवा १२ आमुखंतत्तुविज्ञेयंबुधैः
प्रस्तावनापिवा प्रवृत्तकंकथोद्घातःप्रयोगातिशयस्तथा १३ आमुखस्यत्रयोभेदाबीजांशेषूपजायते कालंप्रवृत्तमाश्रित्यसूत्र
धृग्यत्रवर्णयेत् १४ तदाश्रयश्चपात्रस्यप्रवेशस्तत्प्रवृत्तकं सूत्रधारस्यवाक्यंवायत्रवाक्यार्थमेववा १५ गृहीत्वाप्रविशेत्पात्रंक
थोद्घातःसउच्यते प्रयोगेषुप्रयोगंतुसूत्रधृग्यत्रवर्णयेत् १६ ततश्चप्रविशेत्पात्रंप्रयोगातिशयोहिसः शरीरंनाटकादीनामितिवृत्तं
प्रचक्षते १७ सिद्धमुत्प्रेक्षितंचेतितस्यभेदावुभौस्मृतौ सिद्धमागमदृष्टंचसृष्टमुत्प्रेक्षितंकवेः १८ बीजंबिंदुपताकाचप्रकरीकार्यमेवच
अर्थप्रकृतयःपंचपंचचेष्टाअपिक्रमात् १९ प्रारंभश्चप्रयत्नश्चप्राप्तिःसद्भावएवच नियताचफलप्राप्तिःफलयोगश्चपंचमः २० मुखंप्रति
मुखंगर्भोविमर्शश्चतथैवच तथानिर्वहणंचेतिक्रमात्पंचैवसंधयः २१ अल्पमात्रंसमुद्दिष्टंबहुधायत्प्रसर्पति फलावसानंयच्चै
वबीजंतदभिधीयते २२ यत्रबीजसमुत्पत्तिर्नानार्थरससंभवा काव्येशरीरानुगतातन्मुखंपरिकीर्त्तितं २३ इष्टस्यार्थस्यरचना
वृत्तांतस्यानुपक्षयः रागप्राप्तिप्रयोगस्यगुह्यानांचैवगूहनं २४ आश्चर्यवदभिख्यातंप्रकाश्यानांप्रकाशनं अंगहीनोनरोयद्व
न्नैवश्रेष्ठंकाव्यमेवच २५ देशकालौविनाकिंचिदितिवृत्तंप्रवर्त्तते अतस्तयोरुपादाननियमःपदमुच्यते २६ देशेषुभारतंवर्षंकालेकृतयुगत्रयं
नर्त्तिताभ्यांप्राणभृतांसुखदुःखादयःक्वचित् २७ विस्मयोतिशयेनार्थदर्शनाच्चिविकृतिः सर्गेसर्गादिवार्त्ताचप्रसज्जंतिनदुष्यति २८ आग्ने
येमहापुराणेअलंकारे अग्निरुवाच अक्षरंपरमंब्रह्मसनातनमजंविभुं वेदांतेषुवदंत्येकंचैतन्यंज्योतिरीश्वरं १ आनंदःसहजस्तस्य A1 339
व्यज्यतेसकदाचन व्यक्तिःसातस्यचैतन्यचमत्काररसाह्वया २ आद्यस्तस्यविकारोयःसोहंकारइतिस्मृतः ततोभिमानस्तत्रेदंसमाप्तंभुवन
त्रयं ३ अभिमानाद्रतिःसाचपरिपोषमुपेयुषी व्यभिचार्यादिसामान्यात्शृंगारइतिगीयते ४ तद्भेदाकाममितरेहास्याद्याअप्यनेकशः स्वस्व
स्थायिविशेषोत्थपरिपोषस्वलक्षणा ५ सत्वादिगुणसंतानाजायंतेपरमात्मनः रागाद्भवतिशृंगारोरौद्रस्तैक्ष्ण्यात्प्रजायते ६ वीरोवष्टम्भ

जःसंकोचभूर्बीभत्सइष्यते श्रृंगाराज्जायतेहासोरौद्रात्तुकरुणोरसः ७ वीराच्चाद्भुतनिष्पत्तिःस्याद्बीभत्साद्भयानकः श्रृंगारहास्यकरुणारौद्र-
वीरभयानकाः ८ बीभत्साद्भुतशांताख्याःस्वभावाश्चतुरोरसाः लक्ष्मीरिवविनात्यागान्नवाणीभातिनीरसा ९ अपारेकाव्यसंसारेकविरेवप्रजापतिः
यथास्मैरोचतेविश्वंतथेदंपरिवर्तते १० श्रृंगारीचेत्कविःकाव्येजातंरसमयंजगत् सचेत्कविर्वीतरागोनीरसंव्यक्तमेवतत् ११ नभावहीनोस्तिर
सोनभावोरसवर्जितः भावयंतिरसानेभिर्भाव्यंतेचरसाइति १२ स्थायिनोष्टौरतिमुख्याःसंचारिणोव्यभिचारिणः मनोनुकूलेनुभवःसुखस्यरतिरिष्यते॥
१३ हर्षादिभिश्चमनसोविकासोहासउच्यते मनोवैकल्यमिच्छंतिशोकमिष्टक्षयादिभिः १४ क्रोधस्तैक्ष्ण्यप्रबोधश्चप्रतिकूलानुकारिणी पुरुषानुस
मोप्यर्थोवःसउत्साहउच्यते १५ चित्रादिदर्शनाच्चेतोवैक्लव्यंब्रुवतेभयं जुगुप्साचपदार्थानांनिंदादौर्भाग्यवाहिनां १६ विस्मयोतिशयेनार्थदर्शनाच्चित्त
विस्तृतिः अष्टौस्तंभादयःसत्त्वाद्रजसस्तमसःपरं १७ स्तंभश्चेष्टाप्रतीघातोभयरागाद्युपाहितः श्रमरागाद्युपेतांतःक्षोभोजन्मप्रवर्जनं १८ स्वेदोहर्षा
दिभिर्देहोच्छ्वासोंतःपुलकोद्गमः हर्षादिजन्मवाक्संगःस्वरभेदोभयादिभिः १९ चित्तक्षोभभवःस्तंभोवेपथुःपरिकीर्तितः वैवर्ण्यंचविषादादिजन्माकां
तिविपर्ययः २० दुःखानंदादिजंनेत्रजलमश्रुचविश्रुतं इंद्रियाणामस्तमयःप्रलयोलंघनादिभिः २१ वैराग्यादेर्मनःखेदोनिर्वेदइतिकथ्यते मनः
पीडादिजन्माहिसादोग्लानिःशरीरगः २२ शंकानिष्टागमोत्प्रेक्षास्यादसूयाचमत्सरः मदिराद्युपयोगोत्थंमनःसंमोहनंमदः २३ क्रियातिशयज-
न्मांतःशरीरोत्थःक्लमःश्रमः ।श्रृंगारादिक्रियाद्वेषश्चित्तस्यालस्यमुच्यते २४ दैन्यंसत्त्वादपभ्रंशश्चिंतार्थपरिभावनं इतिकर्तव्यतोपायादर्शनंमोहउ-
च्यते २५ स्मृतिःस्यादनुभूतस्यवस्तुनःप्रतिबिंबनं मतिरर्थपरिच्छेदस्तत्त्वज्ञानोपनायितः २६ व्रीडानुरागादिभवःसंकोचःकोपिचेतसः भवेच्चप
लतास्थैर्यंहर्षःचित्तप्रसन्नता २७ आवेगश्चप्रतीकारशयावैधुर्यमात्मनः कर्तव्येप्रतिभाभ्रंशोजडतेत्यभिधीयते २८ इष्टप्राप्तेरुपचितःसंपदाभ्यु
दयोधृतिः गर्वःपरेष्ववज्ञानमात्मन्युत्कर्षभावना २९ भवेद्विषादोदैवादेर्विघातोभीष्टवस्तुनि औत्सुक्यमीप्सितप्राप्तिर्वांछयातरलास्थितिः ३० चित्ते
न्द्रियाणांस्तैमित्यमपस्मारोनवस्थितिः युद्धेव्यायादिभिस्त्रासोवीप्साचित्तचमत्कृतिः ३१ क्रोधस्याप्रशमोहर्षप्रबोधश्चेतनोदयः अवहित्थंभवेद्गुप्तिरिं
गिताकारगोचरा ३२ रोषतोगुरुवाग्दंडःपारुष्यंविदुरुग्रतां ऊहोवितर्कःस्याद्व्याधिर्मनोवपुरनुग्रहः ३३ अनिबद्धप्रलापादिरुन्मादोमदनादिभिः त
त्त्वज्ञानादिनाचेतःकषायोपरमःशमः ३४ कविभिर्योजनीयाभावाःकाव्यादिकेरसाः विभाव्यतेहिरत्यादिर्यत्रतेनविभाव्यते ३५ विभावोनामसद्वेधा

लंबनोद्दीपनात्मकः रत्यादिभावरंगोयंयमाजीव्योपजायते ३६ आलंबनविभावोसौनायकादिभवस्तथा धीरोदात्तोधीरोद्धतःस्याद्धीरललितस्तथा
३७ धीरःप्रशांतइत्येवंचतुर्धानायकःस्मृतः अनुकूलोदक्षिणश्चशठोधृष्टःप्रवर्तितः ३८ पीठमर्दोविटश्चैवविदूषकइतित्रयः श्रृंगारेनर्मसचि
वानायकस्यानुनायकाः ३९ पीठमर्दःसभक्तःश्रीमांस्तद्देशजोविटः विदूषकोवैहसिकअष्टनायकनायिकाः ४० स्वकीयापरकीयाचपुनर्भूरि-
तिकौशिकाः सामान्याचपुनर्भूस्त्वइत्याद्यावहुभेदतः ४१ उद्दीपनविभावास्तेसंस्कारैर्विविधैःस्मृताः आलंबनविभावेषुभावानुद्दीपयंतिये ४२ च
तुःषष्टिकलाद्वेधाप्रव्याधैर्गीतिकादिभिः कुहकंस्मृतिरप्येषांप्रायोहासोपकारकः ४३ आलंबनविभावस्यभावैरुद्बुद्धसंस्कृतैः मनोवाग्बुद्धिवपुषांस्मृती
च्छाद्वेषप्रयत्नतः ४४ आरंभएवविदुषामनुभावइतिस्मृतः सचानुभूयतेत्रान्यभवत्युतनिरुच्यते ४५ मनोव्यापारभूयिष्ठोमनआरंभउच्यते द्विविधः-
पौरुषस्त्रैणइतिसोपिप्रसिध्यति ४६ शोभाविलासोमाधुर्यंस्थैर्यंगांभीर्यमेवच ललितंचतथौदार्यंतेजोष्टाविमिपौरुषाः ४७ नीचनिंदोत्तमस्पर्द्धा
शौर्यंदाक्ष्यादिकारणं मनोधर्मेभवेच्छोभाशोभतेभवनंयथा ४८ भावोहावश्चहेलाचशोभाकांतिस्तथैवच दीप्तिर्माधुर्यशौर्येचप्रागल्भ्यंस्यादुदार
ता ४९ स्थैर्यंगंभीरतास्त्रीणांविभावाद्वादशोरिताः भावोविलासोहावःस्याद्भावःकिंचिच्चहर्षजः ५० वाचोयुक्तिर्भवेद्वाचामारंभोद्वादशैवसः तत्रभा
षणमालापःप्रलापोवचनंबहु ५१ विलापोदुःखवचनमनुलापोसकृद्वचः संलापउक्तिप्रत्युक्तमपलापोन्यथावचः ५२ वार्ताप्रयाणंसंदेशोनिर्देशः
प्रतिपादनं तत्त्वदेशोतिदेशोयमपदेशोन्यवर्णनं ५३ उपदेशश्चशिक्षावाक्व्याजोक्तिर्व्यपदेशकः वाचोपदेशोव्यापारःसबुध्यारंभइष्यते ५४ तस्यभे-
दास्त्रयस्तेचरीतिवृत्तिप्रवृत्तयः ५५ इतिआग्नेयेमहापुराणेअलंकारे अग्निरुवाच वाग्विद्यासंप्रतिज्ञानेरीतिःसापिचतुर्विधा पां
चालीगौडदेशीयावैदर्भीलाटजास्तथा १ उपचारयुतामृद्वीपांचालीह्रस्वविग्रहा अनवस्थितसंदर्भागौडीस्याद्दीर्घविग्रहा २ उपचारैर्नबहुभि
रुपचारैर्विवर्जिता नातिकोमलसंदर्भावैदर्भीमुक्तविग्रहा ३ लाटीयास्फुटसंदर्भानातिविस्फुरविग्रहा परित्यक्ताप्यभूयोपिरुपचारैरुदाहृता॥
४ क्रियास्वविषमाःवृत्तिभारत्यारभटीतथा कैशिकीसात्वतीचेतिसाचतुर्धाप्रतिष्ठिता ५ वाक्प्रधानानरप्रायास्त्रीयुक्ताप्राकृतोक्तिता भर-
तेनप्रणीतत्वात्भारतीतिनिरुच्यते ६ चत्वार्यंगानिभारत्यावीथीप्रहसनंतथा प्रस्तावनानाटकादेःश्रृंगारश्चनयोदश ७ उद्घातकंतथै-

वानलगितंस्याद्वितीयकं असत्प्रलापोवाग्वेणीनालिकाविपणंतथा ८ व्याहारस्त्विमतंचैवप्रलापश्चंदितेनतथा गंडोथमृदवश्चैव त्रयोदशमथोचितं ९ तापसादेःप्रहसनंपरिहासपरंवचः मायेंद्रजालंयुक्तादिबहुलारभटीस्मृता १० संक्षिप्तकारप्रवरोवस्तूत्थापनमेवच ११ आग्नेयेअलंकारे अग्निरुवाच चेष्टाविशेषमप्यंगप्रत्यंगौकर्मचानयोः शरीरारंभमिच्छंतिप्रायःपूर्वोवलाश्रयः १ लीलाविलासोविच्छितिर्विभ्रमंकिलकिंचितं मोट्टायितंकुट्टमितंबिब्बोकोललितंतथा २ विहृतंक्रीडितंकेलिरितिद्वादशधैवसः लीलेष्टजनुचेष्टाचकरणेसंटनक्षये ३ विशेषाख्यसनंकिंचिद्विलासःषड्भिरिष्यते हसितक्रंदितादीनांसंकरःकिलकिंचितं ४ विकारःकोपिबिब्बोकोललितंसौकुमार्यतः शिरःपाणिकुचःपार्श्वकटिरंघ्रिरितिक्रमात् ५ अंगानिभ्रूलतादीनिप्रत्यंगान्यभिजायते अंगप्रत्यंगयोःकर्षप्रियत्नजनितंविना ६ नप्रयोगःकचिन्मुख्यंतिरश्चीनंचनतुक्वचित् आकंपितंकंपितंचधुतंविधुतमेवच ७ परिवाहितमाधूतमवधूतंतथाचितं निकुंचितंपरावृत्तमुत्क्षिप्तंचाप्यधोगतं ८ ललितंचेतिविज्ञेयंत्रयोदशविधंशिरः भ्रूकर्मसप्तधाज्ञेयंपातनभ्रुकुटीमुखं ९ दृष्टिस्त्रिधारसस्थायिसंचारिप्रतिबंधना षड्त्रिंशद्भेदभिदुरारसजानवचाष्टधा १० नवधा तारकाकर्मभ्रमणंचलनादिकं षोढाचनासिकाज्ञेयानिश्वासोनवधामतः ११ षोढौष्ठकर्मकंपाद्यंसप्तधाचिबुकक्रिया कलुषादिमुखं षोढाग्रीवानवविधास्मृता १२ असंयुतःसंयुतश्च द्वधाहस्तप्रयुज्यते पताकस्त्रिपताकश्चतथावैकर्त्तरीमुखः १३ अर्द्धचंद्रोत्करालश्चशुकतुंडस्तथैवच मुष्टिश्चशिखरश्चैवकपित्थःकटकामुखः १४ सूच्यास्यपद्मकोशोहिशिखाःसमृगशीर्षकः कामूलकालपद्मंचचतुरभ्रमरौतथा १५ हंसास्यहंसपक्षौचसंदंशमुकुलौतथा ऊर्णनाभस्ताम्रचूडश्चतुर्विंशातिरितीयमी १६ असंयुतकराःप्रोक्ताः संयुतास्त्रयोदश अंजलिश्चकपोतश्चकर्कटःस्वस्तिकस्तथा १७ कटकोवर्द्धमानिश्चाप्यासंगोनिषधस्तथा दोलःपुष्पपटश्चैवतथामकरएवच १८ गजदंतोबहिस्तंभश्चवर्द्धमानोपरेकराः उरःपंचविधंस्यात्तुआभुग्ननिर्भुग्नकादिकं १९ उदरंतनुतिक्षामंखलुपूर्णमितित्रिधा पार्श्वयोः पंचकर्माणिजंघाकर्मचपंचधा अनेकधापादकर्मतत्तादौनाटकेस्मृतं २० इत्याग्नेयेअलंकारे अग्निरुवाच अभिमुख्यत्वंयतालाभिज्ञेयोभिनयोबुधैः चतुर्द्धासंभवैकैःसवागंगाहरणाश्रयः १ स्तंभादिःसात्विकोरागारंभोवाचिकः आंगिकः शरीरारंभआहार्य्योबुध्यारंभप्रवर्तयः २

रसादिविनियोगोथकथ्यतेइतिमानतः तमंतरेणसर्वेषामपार्थैवस्वतंत्रता ३ संभोगोविप्रलंभश्चशृंगारोद्विविधःस्मृतः प्रच्छन्नश्चप्रकाशश्च तावपिद्विविधौपुनः ४ विप्रलंभाभिधानोयःशृंगारःसचतुर्विधः पूर्वानुरागमानाख्यःप्रवासकरुणात्मकः ५ एतेभ्योनंतरंजायमानंसंभोगलक्षणं विवर्ततेचतुर्द्धैवनचप्रागतिवर्तते ६ स्त्रीपुंसयोस्तद्धृदयंतस्यनिर्वर्त्तिकारतिः निखिलासात्विकास्तत्रवैवर्ण्यप्रलयौविना ७ धर्मार्थकाममोक्षैश्चशृंगारउपचीयते आलंबनविशेषैश्चतद्विशेषैर्निरंतरः ८ शृंगारंद्विविधंविद्याद्वाङ्नेपथ्यक्रियात्मकं हासश्चतुर्विधोलक्ष्यदंतःस्मितइतीरितः ९ किंचिल्लक्षितदंताग्रंहसितंफुल्ललोचनं विहसितंसस्वनंस्यादजिह्मोपहसितंतुतत् १० सशब्दंपापहसितमशब्दमितिहासितं यश्चासौकरुणोनामसरसस्त्रिविधोभवेत् ११ धर्मोपघातजश्चित्तविलासजनितस्तथा शोकःशोकाद्भवेत्स्थायीकुत्स्थायीपूर्वजः पुनः १२ अंगनेपथ्यवाक्यैश्चरौद्रोपित्रिविधोरसः तस्यनिर्वर्तकःक्रोधःस्वेदोरोमांचवेपथुः १३ दानवीरोधर्मवीरोयुद्धवीरइतित्रयं वीरस्तस्यचनिष्पत्तिहेतुरुत्साहइष्यते १४ आरंभेषुभवेद्यत्रवीरमेवानुवर्तते भयानकोनामरसस्तस्यनिर्वर्त्तकंभयं १५ उद्वेजनःक्षोभणश्चबीभत्सोद्विविधःस्मृतः उद्वेजनस्यात्पूत्याद्यैःक्षोभणोरुधिरादिभिः १६ जुगुप्साराभिकातस्यासात्विकांशोनिवर्तते काव्यशोभाकरान्धर्मानलंकारान्प्रचक्षते १७ अलंकरिष्णवस्तेतुशब्दमर्थमुभौत्रिधा येव्युत्पत्त्यादिनाशब्दमलंकर्तुमिहक्षमाः १८ शब्दालंकारमाहुस्तान्काव्यमीमांसकाविदुः छायामुद्रातथोक्तिश्चयुक्तिर्गुंफनयासह १९ वाकोवाक्यमनुप्रासश्चित्रंदुष्करमेवच ज्ञेयानवालंकृतयःशब्दानामित्यसंकरात् २० तत्रान्योन्यकरानुकृतिश्छायासापिचतुर्विधा लोकच्छेकार्भकोक्तीनामेकोक्तेरनुकारतः २१ आभानकोहिलोकोक्तेःसर्वसामान्यएवताः यानुधावतितोकोक्तिंछायामित्युतितांबुधाः २२ छेकाविदग्धावैदग्ध्यंकलासुकुशलामतिः तामुल्लिखंतीछेकोक्तिश्छायाकविभिरिष्यते २३ अव्युत्पन्नोक्तिरखिलैर्बालकोक्तेरुपलक्ष्यते तेनार्भकोक्तिच्छायातन्मात्रोक्तिमनुकुर्वती २४ विपुलाक्षरतानुल्लीलवचोमेतस्यतादृशी यासाभवतिमत्तोक्तिश्छायोक्ताप्यतिशोभते २५ अभिप्रायविशेषेणकविशक्तिविवृण्वतीं उदरोभीतिसामुद्रासैवसभ्यापिनोमते २६ उक्तिःसाकथ्यतेयस्यामर्थःकोप्युपपत्तिमान् लोकयात्रार्थोवोविधिनाधुनोतिहृदयंसतां २७ उभौविधिनिषेधौचनियमानियमावपि विकल्पपरिसंख्येचतदीयाःषोडशोन्नयः २८ अयु

कयोरिमिथोवाच्यवाचकयोर्द्वयोः योजनाकल्प्यमानायायुक्तिरुक्तामनीषिभिः २९ पदेनैवपदार्थश्चवाक्यंवाक्यार्थमेवच विषयोस्याःप्र-
करणंप्रपंचश्चेतिषड्विधः ३० कल्पनारचनाचार्थशब्दार्थक्रमगोचरा शब्दानुकारादर्थानुपूर्व्यायस्क्रमात्त्रिधा ३१ उक्तिप्रत्युक्तिमदा-
क्यंवाक्यंवाक्यविभेदतत् ऋजुवक्रोक्तिभेदेनतत्रायंसहजंवचः ३२ सापूर्वप्रश्निकाप्रश्नपूर्विकेतिद्विधाभवेत् वक्रोक्तिस्तुभवेद्भंग्याकाकु-
स्वेनद्विधाकृता ३३ आग्नेयेमहापुराणेअलंकारे अग्निरुवाच स्यादावृत्तिरनुप्रासोवर्णानांपदवाक्ययोः एकवर्णाने-
62 कवृत्तैर्वर्णगणोद्विधा १ एकवर्णगतावृत्तिर्जायतेपंचवृत्तयः मधुराललिताप्रौढाभद्रापरुषयासह २ मधुरायावर्ग्यान्त्यादधोवर्ण्यारणो-
र्नौ ह्रस्वस्वरेणांतरितौसंयुक्ताढ्लकारयोः ३ नकार्यान्वर्ग्यवर्णानामावृत्तिःपंचसाधिका महाप्राणोष्मसंयोगंविमुच्यस्युर्लघूत्तमौ ४ ललिता
चसभूइषिष्ठाप्रौढायापणवर्गजा ऊर्ध्वरेफेणयुज्यंतेनटवर्गेणपंचमाः ५ भद्रायांपरिशिष्टास्तुःपरुषासाभिधीयते भवंतियस्यामूष्माणःसंयुक्ता
स्तुतदक्षरैः ६ अकारवर्ज्यमावृत्तिःस्वराणामतिभूयसी अनुस्वारविसर्गौचपारुष्यायनिरंतरौ ७ शषसारेफसंयुक्तावाकारश्चापिभूयसा
अंतस्थाभिर्नमाभ्यांचदुःपारुष्यायसंयुताः ८ अन्यथापिगुरुर्वर्णःसंयुक्तोपरिपंथिनी पारुष्यायादिमांस्तत्रपूजितानानुपंचमी ९ क्षेपेशब्दा
नुकारेचपुरुषापिप्रयुज्यते कर्णाटीकौंतलीकौंनीकौंकणीवामनामिका १० द्रावडीमाथवीपंचवर्णतिस्थाप्यभिःक्रमात् अनेकवर्णावृत्तिर्याभि-
न्नार्थप्रतिपादिका ११ यमकंसाव्यपेतंचव्यपेतंचेतितद्द्विधा आनंतर्यादव्यपेतंव्यपेतंव्यवधानतः १२ द्वैविध्येनानयोस्थानपादभेदाच्चतु
र्विधं आदिपादादिमध्यांतएकद्वित्रिवियोगतः १३ सप्तधासप्तपूर्वेणचोदपादेनोत्तरोत्तरः एकद्वित्रिपदारंभास्तुल्याःषोढातदापरं १४ तृती
यंत्रिविधंपादस्यादिमध्यांतगोचरं पादांतयमकंचैवकांचीयमकमेवच १५ समुद्गयमकंचैवविक्रांतयमकंतथा पादादियमकंचैवतथाम्रे-
डितमेवच १६ चतुर्व्यवसितंचैवमालायमकमेवच दशधायमकंश्रेष्ठंतद्भेदाबहवोपरे १७ स्वतंत्रस्यान्यतंत्रस्यपदस्यावर्णनाद्द्विधा भिन्नप्रयो-
जनपदस्यावृत्तिंतुजातिदुः १८ द्वयोरावृत्तिपदयोःसमस्तास्यात्समासतः असमासातयोर्व्यस्तापादेत्वेकत्रविग्रहात् १९ वाक्यस्यावृत्तिरप्ये-
कंयथासंभवमिष्यते आलंकारोनुप्रासोलघुमध्येनगर्हणात् २० यथाकथाचित्तुल्यायनतुसमानमनुभूयते तद्रूपादिपदासद्भिःसानुप्रासार
सावहा २१ गोष्ठ्यांकुतूहलाध्यासोवाक्बंधश्चित्रमुच्यते प्रश्नःप्रहेलिकागुप्तंच्युतंदत्तंतथोभयं २२ समस्यासप्ततद्भेदानानार्थस्यानुयोगतः

यत्रप्रदीयतेतुल्यवर्णविन्यासमुत्तरं २३ सप्रश्नःस्यादेकपृष्टेद्विपृष्टोभयभेदतः द्विधैकपृष्टेद्विविधःसमस्तोव्यस्तएवच २४ द्वयोरप्य-
र्थयोर्गुप्तमानशब्दाप्रहेलिका साद्विधार्थीचशाब्दाचतत्रार्थीचार्थबोधनः २५ शब्दानुबोधनःशाब्दीप्राहुःषोढाप्रहेलिका यस्मिन्गुप्तेपि
वाक्यांगेभाव्यर्थोपिरसापिकः २६ तदंगाविहिताकांक्षस्तदुसंगूढमप्यदः यत्रार्थांतरनिर्भासोवाच्यांगच्यवनादपि २७ तदंगीविहिताकांक्षत्
च्युतंस्याच्चतुर्विधं स्वरव्यंजनबिंदूनांविसर्गस्यचविच्युते २८ दत्तेपियत्रवाक्यांगेद्वितीयोर्थःप्रतीयते दत्तंतदाहुस्तद्भेदाःस्वराद्यैःपूर्ववच्चताः २९
अपनीताक्षरस्थानेन्यस्तेवर्णांतरेपिच स्फुरिष्टपथमेकंयचानाश्चोकाशनिर्मितं ३० सासमस्यापरस्यात्मपरयोःकृतिसंकरात् दुःखेनकृतमत्य-
र्थकविसामर्थ्यसूचकं ३१ दुष्करंनीरसत्वेपिविदग्धानांमहोत्सवः नियमाच्चविदर्भाच्चछंदाच्चभवतित्रिधा ३२ कवेःप्रतिज्ञानिर्माणरम्यस्यनियमः
स्मृतः स्थानेनापिस्वरेणापिसत्रिधा ३३ विकल्पःप्रातिलोम्यानुलोम्यमेवाभिधीयते प्रातिलोम्यानुलोम्यंचशब्देनार्थेनजायते ३४ अनेकधावृत्त
वर्णविन्यासैःशिल्पकल्पना तत्तत्प्रसिद्धवस्तूनांबंधइत्यभिधीयते ३५ गोमूत्रिकार्धभ्रमणेसर्वतोभद्रमंबुजं चक्रंचक्राब्जकंदंडोमुरजाश्चेतिचा
ष्टधा ३६ प्रत्यर्धंप्रतिपादंस्यादेकांतरसमाक्षरा द्विधागोमूत्रिकापूर्वेऔतुरश्चपदंपरे ३७ अंत्यांगोमूत्रिकांधेनुंजानुबंधंवदंतिहि अर्धाभ्या
मथपादैश्चकुर्याद्विन्यासमेतयोः ३८ न्यस्तानामिहवर्णानामधोधःक्रमशायिनां अधोधःस्थितवर्णानांयावत्तुर्यपदंनयेत् ३९ तुर्यपादंनिमंत्र-
लकुपादादौप्रातिलोम्यतः तदेवसर्वतोभद्रंत्रिविधंसरसीरुहं ४० चतुःपत्रंततोपिप्रंचतुःपत्रेउभेअपि अथप्रथमपादस्यमूर्ध्नस्थिपदाक्षरं
४१ सर्वेषामेवपादानामंतेतद्दृश्यते प्राक्पदस्यांतिमंत्यक्त्वापादादौप्रातिलोम्यतः ४२ अंत्यपादांतिमंचाद्यपदाद्यक्षरद्वयं चतुश्छदेय
वेदष्टछदेवर्णत्रयंपुनः ४३ स्यान्षोडशच्छदेचैकांतरैरेकमक्षरं कर्णिकांतेलिखेदूर्ध्वपत्राकारक्षरावलिं ४४ प्रवेशायेनकर्णिकायाश्चतुः
पत्रंसरोरुहे कर्णिकायांलिखेदेवंद्वेद्वेदिक्षुविदिक्षुच ४५ प्रवेशानिर्गमौदिक्षुकुर्यादष्टच्छदेंबुजे विश्वंविषमवर्णानांतावनृपानावल्गुषां ४६
मध्येसमाक्षरंन्यासःसरोजेषोडशच्छदे द्विधाचक्रंचतुररंषडरंतत्रचादिमं ४७ पूर्वार्धेसदृशावर्णाःपादप्रथमपंचमाः अयुजश्चयुजश्चैव
वर्णायावष्टमावपि ४८ तस्योदक्भागवाक्प्रत्यगरेषुचयथाक्रमं स्यात्पादांतर्वाचतुष्कंतुनाभौतस्यायमक्षरं ४८ पश्चिमारावधिन

Dr. BHAU DAJI MEMORIAL

C3

येत्रेमौ तोपपदे द्वयी तृतीयं तुर्य्यपादांते प्रथमौ सदृशावुभौ ४९ वर्णौ पादत्रयस्यापि दशमः सदृशो यदि प्रथमे चरमे तस्य षड् वर्णाः प
श्चमे यदि ५० भवंति अंतरं तर्हि बृहच्चक्रमुदाहृतं संमुखा चद्वयोः पादमेकैकं क्रमशो लिखेत् ५१ नाभौ तु वर्णदशमं नेमौ तुर्यपदं त-
येत् श्लोकसार्द्धं तु दशमाः समा आद्यंतिमौ युजोः ५२ आदौ वर्णः समौ तुर्य्यपंचमा वा च तुर्य्ययोः द्वितीयप्रातिलोम्येन तृतीयं जायते य
दि ५३ पदं विदध्यात् पत्रस्य दंडश्चक्राब्जकं कृतैः द्वितीयो प्रागद्ले नुत्यौ ससमौ च तथापरौ ५४ सदृशा उत्तरदले द्वितीयाभ्याम
थार्द्धयोः द्वितीयषष्ठाः सदृशाश्चतुर्थौ पंचमावपि ५५ आद्यंतपादयोस्तुल्यौ पराद्धे सप्तमावपि समौ तुर्यपंचमं तु क्रमेण विनियोजयेत्॥
५६ तुर्य्यायां ज्यौ च नद्वयदलांताः क्रमपादयोः अर्द्धयोरंतिमावौ तु मुरजे सदृशावुभौ ५७ पादार्द्धपतितो वर्णः प्रातिलोम्यानुलोमतः अंति-
मं परिव्रीयायावत्तुर्यमिहादिमात् ५८ पादान्तुर्य्यान्सदेवाक्षं नवमात् षोडशावपि अक्षरात् पुटकौमध्येमध्ये क्षरचतुष्टयं ५९ कृत्वा कुर्यात
येभस्ममुरजाकारतो भवेत् द्वितीयं च कृशार्दूलविक्रीडितकसंपदं ६० गोमूत्रिकासर्वतैरन्येरतास्त्वनुष्टुभा नामधेयं यदि न चेदमी पुष्प-
निकाय्ययोः ६१ मित्रधेयानि तुष्पंति नामितः खिपतेतथा बाणबाणासनव्योमरत्नम्ंकुरशक्तयः ६२ द्वित्रतुर्थात्रिशृंगादादंभोलिमुशला-
कुशाः पदं रथस्य नागस्य पुष्करिण्यसिपुत्रिका ६३ एते वंधास्तथा चान्ये एवं ज्ञेयास्त्वयं बुधैः ६४ इत्याग्नेये ऽलंकारे अधिरुपाच
रूभगीकरणोर्थानामथालंकार इष्यते यं विना शब्दसौंदर्य्यमपि नास्ति मनोहरं १ अथालंकाररहिता विधवेव सरस्वती सरूपमथसादृ
श्यं उत्प्रेक्षातिशयावपि २ विभावना विरोधश्च हेतुश्च सममष्टधा स्वभाव एव भावानां स्वरूपमभिधीयते ३ निजआगंतुकं चेति द्विविधं तद्
दाहृतं सांसिद्धिकं निजं नैमित्तिकमागंतुकं तथा ४ सादृश्यं धर्म्मसामान्यमुपमारूपकं तथा सहोक्त्यर्थान्तरन्यासावितिस्यात् तु चतुर्विधं॥
५ उपमा नाम सा यस्यामुपमानोपमेययोः सत्तांतरसामान्ययोगित्वेपि विवक्षितं ६ किंचिदादाय सारूप्यं लोकयात्रा प्रवर्त्तते समासेनासमा
सेन सा द्विधा प्रतियोगिनः ७ विग्रहादभिधानस्य ससमासोन्यथोत्तरः उपमाद्योतकपदेनोपमेयपदेन च ८ ताभ्यां च विग्रहात् त्रेधा ससमासं
निगदिता विशेष्यमाणा उपमा भवंत्यष्टादशस्फुटाः ९ यत्र साधारणो धर्मः कथ्यते गम्यतेपि वा ते धर्म्मवस्तुप्राधान्यात् धर्म्मवस्तूपमे उभे १०

तुल्यमेवोपमीयेते यत्रान्योन्येन धर्मिणौ परस्परोपमा सा स्यात् प्रसिद्धेरन्यथा तयोः ११ विपरीतोपमा यस्यां व्याहतिनियमोपि वा अन्य
त्राप्यनुवृत्तेस्त्रभवे च नियमोपमा १२ समुच्चयोपमातोन्यधर्म्मबाहुल्यकीर्त्तनात् बहोर्द्धर्म्मस्य साम्येपि वैलक्षण्यविवक्षिता १३ यदुच्यते अति-
रिक्तत्वव्यतिरेकोपमा तु सा यत्रोपमा स्याद्बहुभिः सदृशैः सा बहूपमा १४ धर्मोल्पत्वमुपमानं चेदन्यामानोपमेव सा उपमानविकारेण तुल्यथा
विक्रियोपमा १५ त्रैकाल्यासंभविकमप्यारोप्य प्रतियोगिनि। कल्पितोपमीयते या प्रथते सा द्भुतोपमा १६ प्रतियोगिनमारोप्यतदभेदेन कीर्त्तनं
उपमेयस्य सा मोहोपमासौ भ्रांतिमद्वचः १७ उभयोर्द्धर्म्मिणोस्तथ्यनिश्चयात् संशयोपमा उपमेयस्य संशय्य निश्चयान्निश्चयोपमा १८ वाक्या
र्थेनैव वाक्यार्थोपमा स्यादुपमानतः आलोपमानादुपमा साधारण्यातिशायिनी १९ उपमेयं यदन्यस्य तदन्यस्योपमानता यद्युत्तरोत्तरं याति त
था सौगमनोपमा २० प्रशंसा चैव निंदा च कल्पिता सदृशी तथा किंचिच्चासदृशी ज्ञेया उपमा पंचधा पुनः २१ उपमानेन यत्तत्त्वमुपमेयस्य रूप्य
ते गुणानां समतां दृष्ट्वा रूपकं नाम तद्विदुः २२ उपमैव तिरोभूतभेदा रूपकमेव वा सहोक्तिः सहभावेन कथनं तुल्यधर्मिणां २३ भवेदर्थान्तरन्यासः
सादृश्येनोत्तरेण सः अन्यथोपस्थिता वृत्तिश्चेतनस्येतरस्य च २४ अन्यथामन्यते यत्र तामुत्प्रेक्षां प्रचक्षते लोकसीमातिवर्त्तस्य वस्तु धर्मस्य की-
र्त्तनं २५ भवेदतिशयो नाम सम्भवासंभवाद्द्विधा गुणजातिक्रियादीनां यत्तु वैकल्यदर्शनात् २६ विशेषदर्शनायैव सा विशेषोक्तिरुच्यते प्रसिद्ध
हेतुव्यावृत्त्या यत्किंचित्कारणांतरं २७ यत्र स्वाभाविकत्वं वा विभाव्यं सा विभावना संगतीकरणं युक्त्या यदसंगच्छमानयोः २८ विरोधपूर्वकत्वेन
द्विरोधमिस्मृतं सिसाधयिषितार्थस्य हेतुर्भवति साधकः २९ कारको ज्ञापकश्चेति द्विधा सोप्युपजायते प्रवर्त्तते कारकाख्यः प्राक्पश्चात् कार्य
कीकसं॥६॥ वासः कुटी द्वयोः शाला सभा संजवनं त्विदं॥ चतुःशालं मुनीनां तु पर्णशालोटजोस्त्रियां॥७॥ चैत्यमायतनं तुल्ये वाजिशाला तु मंदिरा॥ ह
र्म्यादि धनिनां वासः प्रासादो देवभूभुजां॥८॥ स्त्री द्वार्द्वारं प्रतीहारः स्याद्वितर्दिस्तु वेदिका॥ कपोतपालिकायां तु विटंकं पुन्नपुंसकं॥९॥ कपाटमररं
तुल्ये निःश्रेणिस्त्वधिरोहिणी॥ संमार्जनी शोधनी स्यात्संकरो वकरस्तथा॥१०॥ अद्रिगोत्रगिरिग्रावागहनं काननं वनं॥ आरामः स्यादुपवनं कृत्रिमं
वनमेव यत्॥११॥ स्यादेतदेव प्रमदवनमंतःपुरोचितं॥ वीथ्यालिरावलिः पंक्तिश्रेणी लेखास्तु राजयः॥१२॥ वानस्पत्यः फलैः पुष्पात्तैरपुष्पाद्वनस्प
तिः॥ ओषध्यः फलपाकांताः पलाशी द्रुद्रुमागमाः॥१३॥ स्थाणुर्वा ना ध्रुवः शंकुः प्रफुल्लोत्फुल्लसंस्फुटाः॥ पलाशं छदनं पत्रमिध्ममेधः समित्स्त्रि-
यां॥१४॥ बोधिद्रुमश्चलदलो दधित्थग्राहिमन्मथाः॥ तस्मिन्दधिफलः पुष्पफलदंतशठावपि॥१५॥ उदुंबरे हेमदुग्धः कोविदारे द्विपत्रकः॥
सप्तपर्णो विशालत्वक् कृतमाले सुवर्णकः॥१६॥ आरेवतव्याधिघातसंपातचतुरंगुलाः॥ स्याज्जंबीरे दंतशठो वरुणे तिक्तशाककः॥१७॥
पुन्नागे पुरुषस्तुंगः केसरो देववल्लभः॥ पारिभद्रे निंबतरुर्मंदारः पारिजातकः॥१८॥ वंजुलश्चित्रकश्चाथ द्वौ पीतनकपीतनौ॥ आम्रातके म
धूके तु गुडपुष्पफलद्रुमौ॥१९॥ पीलौ गुडफलस्स्रंसी नादेयी चांबुवेतसः॥ सौभांजने शिग्रुतीक्ष्णगंधकाक्षीवमोचकाः॥२०॥ रक्तोसौ मधु

गुःस्यादरिष्टःफेनिलःसमौ॥ गालवःशाबरोलोध्रस्तिरीटस्तिल्वमार्जुनौ॥२१॥ शेलुश्श्लेष्मातकःशीतःउद्दालोबहुवारकः॥विकंकतःस्रुवावृ
क्षोग्रंथिलोव्याघ्रपादपि॥२२॥तिंदुकःस्फूर्जकःकालोनादेयीभूमिजंबुका॥ काकतिंदौपीलुकःस्यात्पाटलिर्मोक्षपुष्पकौ॥२३॥ क्रमुकः
पट्टिकाख्यःस्यात्कुंभीकैडर्यकट्फलौ॥वीरवृक्षोरुष्करोग्निमुखीभल्लातकीत्रिषु॥२४॥सर्जकासनजीवाश्वपीतसालेथसालके॥सर्जो-
श्वकर्णौवीरेंद्रौइंद्रद्रुःककुभोर्जुनः॥२५॥ इंगुदीतापसतरुर्मोचाशाल्मलिरेषच॥चिरिबिल्वोनक्तमालःकरजश्चकरंजके॥२६॥प्रकी-
र्यःपूतिकरजोमकव्यंगारवल्लरी॥रोहीरोहितकःप्लीहशत्रुर्दाडिमपुष्पकः॥गायत्रीबालतनयःखदिरस्तथा॥२७॥अरिमेदोविट्खदिरःकदरःखदिरेसिते॥पंचांगुलोव
र्धमानःचंचुर्गंधर्वहस्तकः॥२८॥पिंडीतकोमरुबकःपीतदारुचदारुच॥देवदारुःपीतकाष्ठंशामानुमदिराह्वया॥२९॥लतागोवंदनीगुं
द्राप्रियंगुःफलिनीफली॥मंडूकपर्णपत्रोर्णनटकट्वंगटुंटुकाः॥३०॥स्योनाकशुकनासर्क्षदीर्घवृंतकुटंनटाः॥पीतद्रुःसरलश्चाथनिचु
लोहिंजुलोबुकाः॥३१॥काकोदुंबरिकाफल्गुररिष्टःपिचुमर्दकः॥सर्वतोभद्रकोनिंबेशिरीषस्तुकपीतकः॥३२॥बकुलोवंजुलःप्रोक्तःपिच्छि-
लागुरुशिंशपाः॥जयाजयंतीतर्कारीकलिकागणिकारिका॥३३॥श्रीपर्णमग्निमंथःस्याद्वत्सकोगिरिमल्लिका॥कालस्कंधस्तमालःस्यात्तं
डुलीयोल्पमारिषः॥३४॥सिंधुवारस्तुनिर्गुंडीनीलस्फोटावनोद्भवा॥गणिकायूथिकांबष्ठासप्तलानवमल्लिका॥३५॥अतिमुक्तःपुंड्रकः-
स्याद्कुमारीतरणीसहा॥तत्रशोणेकुरबकःस्तत्रपीतेकुरंटकः॥३६॥नीलाझिंटीद्वयोर्बाणाझिंटीमेयैरेकस्तथा॥तस्मिन्रक्तेकुरवः
पीतेसहचरेद्वयोः॥३७॥धत्तूरःकितवोधूर्तोरुचकोमातुलुंगके॥समीरणोमरुबकःप्रस्थपुष्पःफणिज्जकः॥३८॥कुबेरकस्तुकर्णीशो-
ल्लास्मोनोवस्तुकार्कके॥शिवमल्लीपाशुपतोवृंदावृक्षादनीतथा॥३९॥जीवंतिकावृक्षरुहागुडूचीतंत्रिकामृता॥सोमवल्लीमधुपर्णीमू
र्वातुमोरटीतथा॥४०॥मधूलिकामधुश्रेणीगोकर्णीपीलुपर्ण्यपि॥पाठांबष्ठाविद्धकर्णीप्राचीनावनतिक्तिका॥४१॥कटुःकटुंभराचाथच-
क्रांगीशकुलादिनी॥आत्मगुप्ताप्रावृषण्याकपिकच्छुश्चमर्कटी॥४२॥अपामार्गःशैखरिकःप्रत्यक्पर्णीमयूरकः॥फंजिकाब्राह्मणीभार्गी
द्रवंतीशंबरीवृषा॥४३॥मंडूकपर्णीभंडीरीसमंगाकालमेषिका॥रोदनीकच्छुरानंतासमुद्रांतादुरालभा॥४४॥पृश्निपर्णीपृथक्पर्णी

कलशीधावनीगुहा॥निदिग्धिकास्पृशीव्याघ्रीक्षुद्रादुःस्पर्शयासह॥४५॥ अवल्गुजःसोमराजीसुवल्लिःसोमवल्लिका॥कालमेषीकृष्णफलावा
कुचीपूतिपर्ण्यपि॥४६॥ कणोषणोपकुल्यास्याद्वैदेहीमागधीचपला॥ श्रेयसीगजपिप्पली॥ चव्यंतुचविकाकाकचिंचीगुंजेतुकृष्णला॥४७॥विश्वाविषाप्रतिविषावनशृं
गाटगोक्षुरौ॥नारायणीशतमूलीकालेयकहरिद्रवः॥४८॥दार्वीपचंपचाचाथशुक्लाहैमवतीतिच॥वचोग्रगंधाषड्ग्रंथागोलोमीशतपर्विका
॥४९॥आस्फोटागिरिमल्लीस्यात्सिंहास्योवासकोवृषः॥मिसीमधुरिकाछत्राकोकिलाक्षेक्षुरक्षुराः॥५०॥विडंगोस्त्रीकृमिघ्नःस्याद्वज्रद्रुस्तु
स्नुहीसुधा॥मृद्वीकागोस्तनीद्राक्षाबलावाट्यालकस्तथा॥५१॥कालामसूरविदलात्रिपुटात्रिवृतात्रिवृत्॥मधुकंक्लीतकंयष्टिमधुकामधुयष्टिकास्थिरासारख्याका
रवीस्मृता॥५२॥विदारीक्षीरशुक्लेक्षुगंधाक्रोष्टीचयासिता॥गोपीश्यामासारिवास्यादनंतोत्पलसारिवा॥५३॥मोचारंभाचकदलीमंडूकीदु
ग्धपर्णिणी॥स्थिराध्रुवाशालपर्णीवृंगीगुरुवृषभौवृषः॥५४॥गांगेरुकीनागबल्लीमुसलीतालमूलिका॥ज्योत्स्नीपटोलिकाजालीअजशृंगी
विषाणिका॥५५॥स्याल्लांगलिकाग्निशिखातांबूलीनागपर्ण्यपि॥हरेणूरेणुकाकुंतीह्रीबेरोदीच्यबालकं॥५६॥कालानुसार्यवृद्धाश्मपुष्पशीता
शिवानितु॥शैलेयतालपर्णीतुदैत्यागंधकुटीमुरा॥५७॥ग्रंथिपर्णशुकंबर्हिरेलानुत्रिपुटावृटिः॥शीवानामलकीचाथहनुर्हट्टविलासिनी॥५८॥कु
टनटंदशपुरंवानेयंपरिपेलवं॥तपस्विनीजटामांसीवृकुदेवीलतालघुः॥५९॥कर्चूरकोद्राविडकोगंधमूलीसटीस्मृता॥स्याद्वक्षगंधाछगलाआवेदीगंध
दारकः॥६०॥तुंडीकेरीरक्तफलाबिंबिकापीलुपर्ण्यपि॥चांगेरीचुक्रिकांबष्ठास्वर्णक्षीरीहिमावती॥६१॥सहस्रवेधीचुक्रोम्लवेतसःशतवेध्यपि॥जीवं-
तीजीवनीजीवाभूमिनिंबःकिरातकः॥६२॥कूर्चशीर्षोमधुकरश्चंद्रकःपित्तकस्तथा॥दद्रुघ्नःस्यादेडगजोवर्षाभूःशोथहारिणी॥६३॥संकुलंदंतिनिभस्त्वाय
मानावर्षिकास्तथा॥लशुनंगृंजनारिष्टमहाकंदरसोनकाः॥६४॥वाराहीबदरीगृष्टिःकाकमाचीतुवायसी॥शतपुष्पासितच्छत्रातिच्छत्रामधुरामिसिः॥६५॥
भंगाकपुष्पीकारवीचसारणाप्रसारिणी॥कटुंभराभद्रावलाकर्चूरश्चसटीत्वथ॥६६॥पटोलःकुलकस्तिक्तःकारवेल्लःकठिल्लकः॥कूष्मांडकस्तुक-
र्कारुःर्वारुःकर्कटीस्त्रियौ॥६७॥इक्ष्वाकुःकटुतुंबीस्याद्विशालाइंद्रवारुणी॥अर्शोघ्नःसूरणःकंदोस्त्रस्तिकःकुरुविंदकः॥६८॥वंशेत्वक्सारक-
र्मारवेणुमस्करतेजनाः॥छत्रातिछत्रपालघ्नौमालातृणकभूस्तृणं॥६९॥तृणराजाह्वयस्तालोघोंटाक्रमुकपूगकाः॥७०॥ ॥शार्दूलद्वीपिनौव्या-

प्रेदर्षसः केसरीहरिः॥ कोलः पोत्री वराहः स्यात्कोकईहामृगो वृकः॥ ७१॥ लंगूर्णनाभौ च समौ लूतातु वायश्च मर्कटः॥ वृश्चिकः शूककीटः स्यात्सारंगः स्तो
कक: समौ॥ ७२॥ कृकवाकुस्ताम्रचूडः पिकः कोकिलइत्यपि॥ काकेतु करटारिष्टौ बकः कंकः उदाहृतः॥ ७३॥ कोकश्चक्रश्चक्रवाकः कदंबः कलहंसकः॥ प
तंगिकापुत्तिकास्यात्सरघा मधुमक्षिका॥ ७४॥ द्विरेफ पुष्पलिड्भृंगाः षट्पदभ्रमरालयः॥ केकीशिखस्यवाक्केकाशकुंतशकुनद्विजाः॥ ७५॥ स्त्री प
क्षतिः पक्षमूलं च चंच्चोटिरुभेस्त्रियौ॥ गतिरुड्डीनसंडीनौ कुलायो नीडमस्त्रियां॥ ७६॥ पेशीकोशो द्विहीनेंडं पृथुकः शावकः शिशुः॥ पोतः पाकोर्भकोडिंभः
संदोहव्यूहकौ गणः॥ ७७॥ स्तोमौघनिकरव्रातानिकुरुंबं कदंबकं॥ संघातसंचयौ वृंदं पुंजराशी तु कूटकं॥ ७८॥ ॥ इत्याग्नेये भूपुरशैलवनौषध्यादि
वर्गः॥ ॥ अग्निरुवाच॥ नृब्रह्मक्षत्रविट्शूद्रवर्गान्वक्ष्येथनामतः॥ नरः पंचजनामर्त्या योषित्योषाबलावधूः॥ १॥ कांतार्थिनी तु यायाति संकेतं सा
भिसारिका॥ कुलटा पुंश्चल्यसती नग्निकास्त्री च कोटवी॥ २॥ कात्यायन्यर्धवृद्धा या सैरंध्री परवेश्मगा॥ असिक्नीस्यादवृद्धा या मलिनी तु रजस्वला॥ ३॥ वारस्त्री
गणिका वेश्या भ्रातृज्या यास्तु यातरः॥ ननांदा तु स्वसा पत्युः सपिंडास्तु सनाभयः॥ ४॥ समानोदर्यसोदर्यसगर्भसहजाः समाः॥ सगोत्र बांधव
ज्ञातिबंधुस्वस्वजनाः समाः॥ ५॥ दंपती जंपती जायापती भार्यापती च तौ॥ गर्भाशयो जरायुः स्यान्नुल्बं च कललोस्त्रियां॥ ६॥ गर्भो भ्रूण इमौ तुल्यौ क्लीब
पंडौ नपुंसकं॥ स्यादुत्तानशया डिंभा बालो माणवकः स्मृतः॥ ७॥ पिचिंडिलो बृहत्कुक्षिरवभ्रटो नतनासिके॥ विकलांगस्तु पोगंड आरोग्यं स्यादनामयं॥
॥ ८॥ स्यादेडे बधिरः कुब्जे गडुलः कुकरे कुणिः॥ क्षयः शोषश्च यक्ष्मा च प्रतिश्यायस्तु पीनसः॥ ९॥ स्त्रीक्षुत् क्षुतं क्षवः पुंसि कासस्तु क्षवथुः पुमान्॥
शोथस्तु श्वयथुः शोफः पादस्फोटो विपादिका॥ १०॥ किलाससिध्मकच्छ्वा तं पामपामाविचर्चिका॥ कोठोमंडलकं कुष्ठं श्वित्रे दुर्नामकार्शसी॥ ११॥ -
आनाहस्तु विबंधः स्याद्ग्रहणी रुक्प्रवाहिका॥ बीजवीर्येंद्रियं क्रव्यं पललं क्रव्यमामिषं॥ १२॥ बुक्कायमांसं हृदयं हृन्मेदस्तु वपा वसा॥ पश्चाद्ग्रीवा
शिरामन्या नाडी तु धमनिः शिरा॥ १३॥ तिलकं क्लोम मस्तिष्कं दूषिका नेत्रयोर्मलं॥ अंत्रं पुरीतं गुल्मस्तु प्लीहा पुंस्यथ वस्नसा॥ १४॥ स्नायुस्त्रियां कालं
खंड्यकृन्नीतु समेइमे॥ स्यात्कर्परः कपालोस्त्री कीकसं कुल्यमस्थि च॥ १५॥ स्याच्छरीरास्थि कंकालः पृष्ठास्थि तु कशेरुका॥ शिरोस्थिनि करोटिस्त्री
पार्श्वास्थिनि तु पार्श्वकं॥ १६॥ अंगं प्रतीकोपघनः शरीरं वर्ष्म विग्रहः॥ कटो नाश्रोणिफलकं कटिः श्रोणिः ककुद्मती॥ १७॥ पश्चान्नितंबः स्त्रीकट्याः -

क्लीबे तु जघनं पुरः॥ कूपकौ तु नितंबस्थौ द्वयहीने कुकुंदरे॥ १८॥ स्त्रियां स्फिचौ कटिप्रोथावुपस्थो वक्ष्यमाणयोः॥ भगं योनिर्द्वयोः शिश्नो मेढ्रो
मेहनशेफसी॥ १९॥ पिचंडकुक्षी जठरोदरं तुंदं कुचौ स्तनौ॥ चूचुकं तु कुचाग्रं स्यान्न नाक्रोडंभुजांतरं॥ २०॥ स्कंधो भुजशिरोंसोस्त्री संधिस्तस्यैव जत्रु
णी॥ पुनर्भवं कररुहो नखोस्त्री नखरोस्त्रियां॥ २१॥ प्रादेशतालगोकर्णास्तर्जन्यादियुते तते॥ अंगुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशांगुलः॥ २२॥ पा
णौ चपेटप्रतलप्रहस्ता विस्तृतांगुलौ॥ बद्धमुष्टिः करो रत्निः सरत्निः सकनिष्ठवान्॥ २३॥ कंबुग्रीवा त्रिरेखा सा वदुर्घाटा कृकाटिका॥ अधः स्याच्चु
बुकं चौष्ठादथ गंडो गल्लो हनुः॥ २४॥ अपांगौ नेत्रयोरंतौ कटाक्षोपांगदर्शने॥ चिकुरः कुंतलो बालः प्रतिकर्म प्रसाधनं॥ २५॥ आकल्पवेषौ नेपथ्यं प्रत्यक्षं
लेनयोगजं॥ चूडामणिः शिरोरत्नं तरलो हारमध्यगः॥ २६॥ कर्णिका तालपत्रं स्यात्लंबनं स्याल्ललंतिका॥ मंजीरं नूपुरं पादे किंकिणी क्षुद्रघंटिका॥ २७॥
दैर्घ्यमायाम आरोहः परिणाहो विशालता॥ पट्टच्चरं जीर्णवस्त्रं संव्यानं चोत्तरीयकं॥ २८॥ रचनास्यात्परिस्पंद आभोगः परिपूर्णता॥ समुद्गकः संपुटकः प्रति
ग्राहः पतद्ग्रहः॥ ॥ इत्याग्नेये महापुराणे नृवर्गः॥ ॥ अग्निरुवाच॥ वंशोन्वायो गोत्रं स्यात्कुलान्यभिजनान्वयाः॥ मंत्रव्याख्याकृदाचार्य
आदेशी त्वध्वरे व्रती॥ १॥ यष्टा च यजमानः स्यात्ज्ञात्वारंभ उपक्रमः॥ सतीर्थ्याश्चैकगुरवः सभ्याः सामाजिकास्तथा॥ २॥ सभासदः सभास्तारा ऋत्विजो या
जकश्च ते॥ अध्वर्यूद्गातृहोतारो यजुःसामर्ग्विदः क्रमात्॥ ३॥ चषालो यूपकटकः समे स्थंडिलचत्वरे॥ आमिक्षा सा शृतोष्णे या क्षीरे स्याद्दधियोगतः॥
॥ ४॥ पृषदाज्यं सदध्याज्ये परमान्नं तु पायसं॥ उपाकृतः पशुरसौ योभिमंत्र्य क्रतौ हतः॥ ५॥ परंपराकं शमनं प्रोक्षणं च वधार्थकं॥ पूजा नमस्यापचितिः स
पर्यार्चार्हणाः समाः॥ ६॥ वरिवस्या तु शुश्रूषा परिचर्याप्युपासनं॥ नियमो व्रतमस्त्री तच्चोपवासादि पुण्यकं॥ ७॥ मुख्यः स्यात्प्रथमः कल्प अनुकल्पस्ततोऽधमः॥
कल्पो विधिक्रमौ ज्ञेयौ विवेकः पृथगात्मता॥ ८॥ संस्कारपूर्वं ग्रहणं स्यादुपाकरणं श्रुतेः॥ भिक्षुः परिव्राट् कर्मंदी पाराशर्यपि मस्करी॥ ९॥ ऋषयः सत्यवच
सः स्नातकश्चाप्लुतव्रती॥ ये संयतेंद्रियग्रामा यतिनो यतयश्च ते॥ १०॥ शरीरसाधनापेक्षं नित्यं यत्कर्म तद्यमः॥ नियमस्तु स यत्कर्म नित्यमागंतुसाधनं॥ -
॥ ११॥ स्याद्ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपि॥ १२॥ मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट्॥ राजा तु प्रणताशेषसामंतः स्यादधीश्वरः॥ १३॥
चक्रवर्ती सार्वभौमो नृपोन्यो मंडलेश्वरः॥ मंत्री धीसचिवो मात्यो महामात्रः प्रधानकः॥ १४॥ द्रष्टरि व्यवहाराणां प्राड्विवाकाक्षदर्शकौ॥ सौविदः कनक

९९ ध्यक्षोध्यक्षाधिकृतौ समौ॥१५॥ अंतःपुरेत्वधिकृतः स्यादंतर्वंशिको जनः॥ सौविदल्लाः कंचुकिनः स्थापत्याः सौविदाश्च ते॥१६॥ षंढो वर्षवरस्तु-
ल्याः सेवकार्थ्यनुजीविनः॥ विषयानंतरो राजा शत्रुर्मित्रमतः परं॥१७॥ उदासीनः परतरः पार्ष्णिग्राहस्तु पृष्ठतः॥ चरः स्पशः स्यात्प्रणिधिरुत्तरः काल
आयतिः॥१८॥ तत्कालस्तु तदात्वं स्यादुदर्कः फलमुत्तरं॥ अदृष्टं वह्नितोयादि दृष्टं स्वपरचक्रजा॥१९॥ भद्रकुंभः पूर्णकुंभो भृंगारः कनकालुका॥
प्रभिन्नो गर्जितो मत्तो वमथुः करशीकरः॥२०॥ स्त्रियां सृणिस्त्वंकुशोस्त्री परिस्तोमः कुथो द्वयोः॥ कर्णीरथः प्रवहणं दोला प्रेंखादिका स्त्रियां॥२१॥ शी-
र्षण्यं च शिरस्त्रेथ तनुत्रं वर्म दंशनं॥ आयुक्तः परियुक्तश्च पिनद्धश्चापिनद्धवत्॥२२॥ व्यूहस्तु बलविन्यासश्चक्रं चानीकमस्त्रियां॥ एकेभैकरथा त्र्य-
श्वा पत्तिः पंचपदातिका॥२३॥ पत्त्यंगैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरं॥ सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः॥२४॥ अनीकिनी दशानीकिन्यक्षौ-
हिण्यो गजादिभिः॥ धनुः कोदंड इष्वासौ धनुःकोटिस्त्वटनी स्मृता॥२५॥ लस्तकस्तु धनुर्मध्यं मौर्वी ज्या शिंजिनी गुणः॥ पृषत्कबाणविशिखा अजि-
ह्मगखगाशुगाः॥२६॥ तूणोपासंगतूणीरनिषंगा इषुधिर्द्वयोः॥ असिऋष्टिश्च निस्त्रिंशः करवालः कृपाणवत्॥२७॥ त्सरुः खड्गादिमुष्टौ स्यादानीतु करपालि-
का॥ द्वयोः कुठारः स्वधितिश्छुरिका चासिपुत्रिका॥२८॥ प्रासस्तु कुंतो विजयः सर्वला तोमरोस्त्रियां॥ वैतालिका बोधकरा मागधा बंदि[illegible]॥२९॥ संसप्तकासु
समकास्तु समयात्संग्रामादनिवर्तिनः॥ पताका वैजयंती स्यात्केतनं ध्वजमस्त्रियां॥३०॥ अहंपूर्वमहंपूर्वमित्यहंपूर्विका स्त्रियां॥ अहमहमिका सा स्याद
हंकारः परस्परं॥३१॥ शक्तिः पराक्रमः प्राणः शौर्यं स्थाम सहो बलं॥ मूर्छा तु कश्मलं मोहः पटहाडंबरौ समौ॥३२॥ अभ्यवस्कंदनमभ्यासादनं विजयो जनः
निर्वापणं संज्ञपणं मारणं प्रतिघातनं॥३३॥ स्यात्पंचता कालधर्मो दिष्टांतः प्रलयोत्ययः॥३४॥ ॥विशो भूमिस्पृशो वैश्या वृत्तिर्वर्तनजीवने॥ कृ-
ष्यादिवृत्तयो ज्ञेयाः कुसीदं वृद्धिजीविका॥३५॥ उद्धारोर्थप्रयोगः स्यात्कणिशं सस्यमंजरी॥ किंशारुः सस्यशूकं स्यात्स्तंबो गुच्छस्तृणादिनः॥३६॥ धान्य-
व्रीहिस्तंबकरिः कडंकरं बुसं स्मृतं॥ माषादयः शमीधान्ये शूकधान्ये यवादयः॥३७॥ तृणधान्यानि नीवाराः शूर्पं प्रस्फोटनं स्मृतं॥ स्यूतप्रसेवौ कंदोलपिटौ
कटकिलिंजकौ॥३८॥ समानौ रसवत्यां तु पाकस्थानमहानसौ॥ पौरोगवस्तदध्यक्षः सूपकारस्तु बल्लवः॥३९॥ आरालिका आंधसिकाः सूदा औदनिका गु-
णाः॥ क्लीबेंबरीषं भ्राष्ट्रो ना कर्कर्यालुर्गलंतिका॥४०॥ अलिंजरः स्यान्मणिकं ससरी कृष्णजीरके॥ आरनालं तु कुल्माषं बाल्हीकं हिंगु रामठं॥४१॥ कृषि-

काशीर्विकृतिः स्निग्धं मसृणं चिक्कणं॥ पृथुकः स्याच्चिपिटको धाना भ्रष्टयवास्त्रियाः॥४२॥ जेमनं लेप आहारो माहेयी सौरभी च गौः॥ युगादीनां तु वो-
ढारो युग्यप्रासंगशाकटाः॥४३॥ चिरप्रसूता वष्कयणी धेनुः स्यान्नवसूतिका॥ संधिनी वृषभाक्रांता वेहद्गर्भोपघातिनी॥४४॥ पण्याजीवो ह्यापणिको
न्यासश्चोपनिधिः पुमान्॥ विपणो विक्रयः संख्याः संख्येये कादयः स्त्रिषु॥४५॥ विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः॥ संख्यार्थे द्विबहुत्वे स्तः तासु चान
वतेस्त्रियः॥४६॥ पंक्तेः शतसहस्रादि क्रमाद्दशगुणोत्तरं॥ मानं तुलांगुलिप्रस्थैर्गुंजाः पंचाद्यमाषकः॥४७॥ ते षोडशाक्षः कर्षोस्त्री पलं कर्षचतुष्टयं॥ सुव-
र्णनिष्को हेम्नोक्षे कुरुविंदस्तु तत्पले॥४८॥ तुलास्त्रियां पलशतं भारः स्याद्विंशतिस्तुलाः॥ कार्षापणः कार्षिकः स्यात्कार्षिके ताम्रिके पणः॥४९॥ द्रव्यं वित्तं धा-
गधेयं रिक्थमृक्थं धनं वसु॥ रीतिः स्त्रियामारकूटं मस्त्रियामथ ताम्रकं॥५०॥ शुल्वमौदुंबरं लोहे तीक्ष्णं कालायसायसी॥ क्षारः काचोथ चपलो रसः सू-
तश्च पारदे॥५१॥ गरलं माहिषं शृंगं गंधपुरीसकपित्थटं॥ डिंडीरोब्धिकफः फेनो मधूच्छिष्टं तु सिक्थकं॥५२॥ रंगवंगेपि पिचुस्तूले कुलक्षी तु मनःशिला॥ यव-
क्षारस्तु पाक्यः स्यात्त्वक्क्षीरी वंशरोचना॥५३॥ ॥श्वपचा जघन्यजाः शूद्राः चंडालांताश्च संकराः॥ कारुः शिल्पी संहतैस्तैर्द्वयोः श्रेणिः सजाति-
भिः॥५४॥ रंगाजीवश्चित्रकरस्त्वष्टा तक्षा च वर्धकिः॥ नाडिंधमः स्वर्णकारो नापितांत्यावसाय्यपि॥५५॥ जाबालः स्यादजाजीवो देवाजीवस्तु दे-
वलः॥ जायाजीवास्तु शैलूषा भृतको भृतिभुक्तथा॥५६॥ विवर्णः पामरो नीचः प्राकृतश्च पृथग्जनः॥ निहीनोपसदो जाल्मो भृत्ये दासेर चेटकाः
॥५७॥ पटुस्तु जमने दक्षो मृगयुर्लुब्धकः स्मृतः॥ चंडालस्तु दिवाकीर्तिः पुस्तं लेप्यादिकर्मणि॥५८॥ पंचालिका पुत्रिका स्याद्वर्करस्तरु-
णः पशुः॥ मंजूषा पेटकः पेटा तुल्यसाधारणौ समौ॥५९॥ प्रतिमा स्यात्प्रतिकृतिर्वर्गो ब्रह्मादयः स्मृताः॥६०॥ ॥इत्याग्नेये महापुरा-
णे ब्रह्मक्षत्रविट्शूद्रवर्गः॥ ॥अग्निरुवाच॥ सामान्यान्यथ वक्ष्यामि नामलिंगानि तच्छृणु॥ सुकृती पुण्यवान्धन्यो महेच्छस्तु महाश-
यः॥१॥ प्रवीणनिपुणाभिज्ञविज्ञनिष्णातशिक्षिताः॥ स्युर्वदान्यस्थूललक्ष्यदानशौंडा बहुप्रदे॥२॥ कृती कृतज्ञः कुशल आसक्तो युक्त उत्स-
काः॥ इभ्य आढ्यः परिवृढोप्यधिभूर्नायकोधिपः॥३॥ लक्ष्मीवान्लक्ष्मणः श्रीलः स्वतंत्रः स्वैर्यात्मनः॥ खलपूः स्याद्बहुकरो दीर्घसूत्रश्चिरक्रि-
यः॥४॥ जाल्मोसमीक्ष्यकारी स्यात्कुंठो मंदः क्रियासु यः॥ कर्मशूरः कर्मठः स्याद्भक्षको घस्मरो घरः॥५॥ लोलुपो गर्धनो गृध्नुर्विनीतप्रश्रितौ त

900

था॥लिंगालिंगिनिन्वन्यथार्थानिभृतः प्रतिभान्विते॥६॥प्रगल्भोभीरुकोभीलुर्वदारुरभिवादके॥भूष्णुर्भविष्णुर्भविताज्ञानाविदुरविंदुकौ॥७॥मत्तशौंडोक
कटक्षीवास्वंडस्वंत्वनकोपनः॥देवानंचतिदेवद्र्यङ्विष्वद्र्यङ्विष्वगंचति॥८॥यःसहांचतिसध्र्यङ्सघूर्णितःप्रचलायितः॥वाचोयुक्तिपटुर्वाग्मीवाव-
दूकश्चवक्तरि॥९॥स्याज्जल्पाकस्तुवाचालोवाचाटोबहुगर्ह्यवाक्॥अपभ्रस्तोधिकृतस्स्यानुबद्धेकालिनसंयतौ॥१०॥नांदीनांदीकरोवंदीरवणःशब्द
नःसमाः॥व्यसनार्त्तोपरक्तौद्वौवद्धेकालिनसंयतौ॥११॥विह्वलस्याकुलोनुस्यौन्दशंसक्रूरघातकाः॥पापोधूर्तोवंचकःस्यान्मूर्खेवैधेयबालिशौ॥१२॥कद
र्येकृपणक्षुद्रौमार्गणोयाचकार्थिनौ॥अहंकारवानहंयुःस्याच्छुभंयुस्तुशुभान्वितः॥१३॥कांतंमनोरमंरुच्यंहृद्याभीष्टेस्यभीप्सिते॥असारंफल्गुशून्यंवै
मुख्यवर्यवरेण्यकाः॥१४॥श्रेयान्श्रेष्ठःपुष्कलःस्यात्प्रत्ययार्थीयमप्रियं॥वड्रोरुविपुलंपीनंपीव्नीस्थूलपीवरे॥१५॥स्तोकाल्पक्षुल्लकाःसूक्ष्मंश्ल
क्ष्णंदभ्रंकृशंतनु॥मात्रात्रुटीलवकणाभीविष्वपुरुहंपुरु॥१६॥अखंडंपूर्णसकलमुपकंठांतिकाभितः॥समीपेसन्निधाभ्याशौनेदिष्टंसुसमीपके॥
॥१७॥सुदूरेतुदविष्ठंस्यात्वृत्तंनिस्तलवर्तुले॥उच्चप्रांशून्नतोदग्राध्रुवोनित्यःसनातनः॥१८॥आविद्धंकुटिलंभुग्नंवेल्लितंवक्रमित्यपि॥चंचलंचपलं-
चैवकठोरंजरठंदृढं॥१९॥प्रत्यग्रोभिनवोनव्योस्त्रसमस्तंनपश्चिमं॥एकतानोनन्यवृत्तिरुच्चरंडमविलंबितं॥२०॥उच्चावचंनैकभेदंसंबाधःकलिलंत
था॥तिमितंस्तिमितंक्लिन्नमभियोगस्त्वभिग्रहः॥२१॥स्फातिर्वृद्धौप्रथाख्यातौसमाहारःसमुच्चयः॥अपहारस्त्वपचयोविहारस्तुपरिक्रमः॥२२॥प्रत्या
हारउपादानंनिर्हारोस्वकर्षणं॥विघ्नोंतरायःप्रत्यूहःस्यादास्यादासनास्थितिः॥२३॥सन्निधिःसन्निकर्षःस्यात्संक्रमोदुर्गसंचरः॥उपालंभस्त्वनुभ
वःप्रत्यादेशोनिराकृतिः॥२४॥परिरंभःपरिष्वंगःसंश्लेषउपगूहनं॥अनुमापक्षहेत्वाये---------॥२५॥असन्निकृष्टेर्थेज्ञानंशब्दार्थाः
शाब्दमीरितं॥समस्यदर्शनानुल्लेखबुद्धिःस्यादुपमानकं॥२६॥कार्यंदृष्ट्वाविनाभस्यादर्थापत्तिःपरार्थधीः॥प्रतियोगिन्यग्रहीतेनंविनास्तीत्यभाव
कः॥६७॥इत्यादिनामलिंगाद्धिहरिरुक्तोन्दरक्षये॥२८॥ ॥इत्याग्नेयेमहापुराणेनामलिंगोद्धरिः॥ ॥अग्निरुवाच॥चतुर्विधस्तु
प्रलयोनित्योयःप्राणिनांलयः॥सदाविनाशोजातानांब्राह्मोनैमित्तिकोलयः॥१॥चतुर्युगसहस्रांतेप्राकृतःप्राकृतोलयः॥लयआत्यंतिकोज्ञाना
दात्मनःपरमात्मनि॥२॥नैमित्तिकस्यकल्पांतेवक्ष्येरूपंलयस्यते॥चतुर्युगसहस्रांतेक्षीणप्रायेमहीतले॥३॥अनावृष्टिरतीवोग्राजायतेशतवा

र्षिकी॥ततःसत्वक्षयःस्याच्चततोविष्णुर्जगत्पतिः॥४॥स्थितोजलानिपिवतिभानोःसप्तसुरश्मिषु॥भूपातालसमुद्रादितोयंनयतिसंक्षयं॥५॥ततः-
स्तस्यानुभावेनतोयाहारोपबृंहिताः॥तएवरश्मयःसप्तजायंतेसप्तभास्कराः॥६॥दहंत्यशेषंत्रैलोक्यंसपातालतलंद्विज॥कूर्मपृष्ठसमाभूःस्यात्ततः
कालाग्निरुद्रकः॥७॥शेषाहिश्वाससंपातःपातालानिदहत्यधः॥पातालेभ्योभुवंविष्णुर्भुवःस्वर्गंदहत्यतः॥८॥अंबरीषमिवाभातित्रैलोक्यमखि
लंतदा॥ततस्तापपरीतास्तुलोकद्वयनिवासिनः॥९॥गच्छंतितेमहर्लोकंमहर्लोकाज्जनंततः॥रुद्ररूपीजगद्दग्ध्वामुखनिश्वासतोहरेः॥१०॥उत्तिष्ठं
तिततोमेघानानारूपाःसविद्युतः॥शतंवर्षाणिवर्षंतःशमयंत्यग्निमुत्थितं॥११॥सप्तर्षिस्थानमाक्रम्यस्थितेंभसिशतंमरुत्॥मुखनिश्वासतोवि-
ष्णोर्नाशंनयतितान्घनान्॥१२॥वायुंपीत्वाहरिःशेतेशेषेचैकार्णवेप्रभुः॥ब्रह्मरूपधरःसिद्धैर्दिनगैर्मुनिभिस्तुतः॥१३॥आत्ममायामयींदिव्यांयो
गनिद्रांसमास्थितः॥आत्मानंवासुदेवाख्यंचिंतयन्मधुसूदनः॥१४॥कल्पंशेतेप्रबुद्धोथब्रह्मरूपास्तृजत्यथ॥द्विपरार्धंततोव्यक्तंप्रकृतौलीयतेद्विज
॥१५॥स्थानात्स्थानंदशगुणमेकस्माद्गुण्यतेमुने॥ततोष्टादशमेभागेपरार्धमभिधीयते॥१६॥परार्धंद्विगुणंयत्तुप्राकृतःसलयःस्मृतः॥अनावृ
ष्ट्याग्निसंपर्कात्कृतेसंज्वलनेद्विज॥१७॥महदादिविकारस्यविशेषांतस्यसंक्षये॥कृष्णेच्छाकारितेतस्मिन्संप्राप्तेप्रतिसंचरे॥१८॥आपोग्रसंति
वैपूर्वंभूमेर्गंधादिकंगुणं॥आत्तगंधाततोभूमिःप्रलयत्वायकल्पते॥१९॥रसात्मिकाश्चतिष्ठंतिआपस्तासांरसोगुणः॥पीयतेज्योतिषातासुन
ष्टास्वग्निश्चदीप्यते॥२०॥ज्योतिषोपिगुणोरूपंवायुर्ग्रसतिभास्वरं॥नष्टेज्योतिषिवायुश्चबलीदोधूयतेमहान्॥२१॥वायोरपिगुणंस्पर्शमाकाशंग्र
सतेततः॥वायौनष्टेथचाकाशंनातदतिष्ठतिद्विज॥२२॥आकाशस्याथवैशब्दंभूतादिर्ग्रसतेपरं॥अभिमानात्मकंतंचभूतादिंग्रसतेमहान्॥२३॥
भूमिर्यातिलयंचाप्सुआपोज्योतिषितत्वजेत्॥वायौवायुस्तखेखंचअहंकारेलयंसहि॥२४॥महत्तत्वेमहांतंचप्रकृतिर्ग्रसतेद्विज॥व्यक्ता
व्यक्ताचप्रकृतिर्व्यक्तस्याव्यक्तेलयः॥२५॥पुमानेकोक्षरःशुद्धःसोप्यंशःपरमात्मनः॥प्रकृतिःपुरुषश्चैतौलीयतेपरमात्मनि॥२६॥नसं-
तितत्रसर्वेशेनामजात्यादिकल्पनाः॥सत्तामात्रात्मकेज्ञेयेज्ञानात्मन्यात्मनःपरे॥२७॥इत्याग्नेयेमहापु॰नित्यनैमित्तिकप्राकृतप्रलयाः॥
अग्निरुवाच॥आत्यंतिकलयंवक्ष्येज्ञानादात्यंतिकोलयः॥आध्यात्मिकादिसंतापंज्ञात्वात्मस्यविरागतः॥१॥आत्यंतिक

909

स्तु संतापः शारीरो मानसो द्विधा ॥ शारीरो बहुभिर्भेदैस्तापो सौ श्रूयतां द्विजाः ॥ २ ॥ स्वर्गाज्जीवो भोगदेहं गर्भमाप्नोति कर्मभिः ॥ आतिवा
हिकसंज्ञस्तु देहो भवति वै द्विज ॥ ३ ॥ आतिवाहिकसंज्ञस्तु देहो भवति वै द्विज ॥ केवलं स मनुष्याणां मृत्युकाल उपस्थिते ॥ ४ ॥ या
म्यैः पुंभिर्मनुष्याणां तच्छरीरं द्विजोत्तम ॥ नीयते याम्यमार्गेण नान्येषां प्राणिनां मुने ॥ ५ ॥ ततः स्वर्गाणि नरकं सभ्रमैर्घटयंत्रवत् ॥ कर्मभूमि
रियं ब्रह्मन् फलभूमिरसौ स्मृता ॥ ६ ॥ यमो योनीश्च नरकान्निरूपयति कर्मणा ॥ पूरणीयाश्च तेनैव यमं वै भात्र पश्यतां ॥ ७ ॥ वायुभूताः
प्राणिनश्च गर्भाते ग्रभुंजंतिते ॥ मनुष्यो यमदूतैस्तैर्नीयते तं च पश्यति ॥ ८ ॥ धर्मी च पूज्यते तेन पापिष्ठस्ताड्यते गृहे ॥ शुभाशुभं कर्म तस्य चि
त्रगुप्तो निरूपयेत् ॥ ९ ॥ बांधवानामशौचे तु देहस्तत्रातिवाहिके ॥ तिष्ठत्यथ तु धर्मज्ञ दत्तपिंडाशनं ततः ॥ १० ॥ नहि मांसमवाप्नोति पिंडांस्त-
त्रैव सोश्नुते ॥ कृते सपिंडीकरणे नरः संवत्सरात्परं ॥ ११ ॥ प्रेतदेहं समुत्सृज्य भोगदेहं प्रपद्यते ॥ भोगदेहावुभौ प्रोक्तावशुभाशुभसंज्ञकौ ॥ १२ ॥
भुक्त्वा तु भोगदेहेन कर्म स्वर्गान्निपात्यते ॥ तं देहं पततस्तस्माद्भक्षयंति निशाचराः ॥ १३ ॥ पापे तिष्ठति चेत्स्वर्गे तेन भुक्ते तदा द्विज ॥ तदा द्वितीयं गृह्णाति-
भोगदेहं तु पापिनं ॥ १४ ॥ भुक्त्वा पापं तु वै पश्चात्तेन भुक्तं त्रिविष्टपं ॥ शुचीनां श्रीमतां गेहे स्वर्गभ्रष्टोभिजायते ॥ १५ ॥ पुण्ये तिष्ठति चेत्पापं तेन भुक्ते तदाभ
वेत् ॥ तस्मिन्नु संभक्षिते देहे शुभं स्वर्गानिवियहं ॥ १६ ॥ कर्मण्यल्पावशेषे तु नरकादपि मुच्यते ॥ मुक्तस्तु नरकाद्याति तिर्यग्योनिं न संशयः ॥ १७ ॥ जीवः प्र
विशेद्गर्भं तु कललेप्यवतिष्ठति ॥ घनीभूतं द्वितीये तु तृतीये चावयवास्ततः ॥ १८ ॥ चतुर्थेस्थीनि त्वङ्मांसं पंचमे रोमसंभवः ॥ षष्ठे चेतोथ जीवस्य दुःखं विंदति स
प्तमे ॥ १९ ॥ जरायुवेष्टितो देहे मूर्ध्नि बद्धांजलिस्तथा ॥ मध्ये क्लीबस्तु वामे स्त्री दक्षिणे पुरुषस्थितिः ॥ २० ॥ तिष्ठत्युदरभागे तु पृष्ठस्याभिमुखस्तथा ॥ यस्यां
तिष्ठत्यसौ योनौ तां स वेत्ति न संशयः ॥ २१ ॥ सर्वं च वेत्ति वृत्तांतमारभ्य नरजन्मतः ॥ अंधकारे च महतीं पीडां विंदति मानवः ॥ २२ ॥ मातुराहारपीतं तु सप्तमे मा
स्युपाश्नुते ॥ अष्टमे नवमे मासि भृशमुद्विजते तथा ॥ २३ ॥ व्यवाये पीडामाप्नोति मातुर्व्यायामके तथा ॥ व्याधिश्च व्याधितायां स्यात् मुहूर्तं शतवर्षवत् ॥ २४ ॥
संतप्यते कर्मभिस्तु कुरुते च मनोरथान् ॥ गर्भाद्विनिर्गतो गर्भमोक्षज्ञानं करिष्यति ॥ २५ ॥ सूतिवातैरधोभूतो निःसरेद्योनियंत्रतः ॥ पीड्यमानो मासमात्रं-
करस्पर्शेन दुःखितः ॥ २६ ॥ शब्दादिस्तु द्रवो ग्रांसि देहे स्रोतांसि विवितथा ॥ श्वासो द्वागो गतिर्वायोर्वक्संस्पर्शनं तथा ॥ २७ ॥ अग्ने रूपं दर्शनं स्यात् उष्मा

पक्तिश्च पित्तकं ॥ मेधा वर्णं बलं छाया तेजः शौर्यं शरीरके ॥ २८ ॥ जलात्स्वेदश्च रसनं देहे वै संप्रजायते ॥ क्लेदो रक्तं च सारक्तं शुक्र
मूत्रकफादिकं ॥ २९ ॥ भूमेर्घ्राणं केशनखं गौरसं स्थिरतास्थिता ॥ मातृजानि मृदून्यत्र त्वङ्मांसहृदयानि च ॥ ३० ॥ नाभिमेद्रं
च हृत्मेदः क्लेदोत्रं मातृजानि च ॥ पितृजानि शिराः स्नायुः शुक्रं चैवात्मजानि तु ॥ ३१ ॥ कामक्रोधौ भयं हर्षो धर्माधर्मा
र्थता तथा ॥ व्याकृतिः स्वर्णवर्णौ तु मेहना यं तथा च यत् ॥ ३२ ॥ तामसानि तथाज्ञानं प्रमादालस्यतृट् क्षुधाः ॥ मोहमात्सर्यवैगु
ण्य शोकायासभयानि च ॥ ३३ ॥ कामक्रोधौ तथा शौर्यं यज्ञेप्सा बहुभाषिता ॥ अहंकारः परावज्ञा राजसानि तथा मुने ॥ ३४ ॥ धर्मेप्सा-
मोक्षकामित्वं पराभक्तिश्च केशवे ॥ दाक्षिण्यं व्यवसायश्च सात्विकानि विनिर्दिशेत् ॥ ३५ ॥ चपलः क्रोधनो भीरुर्बहुभाषी कलिप्रियः ॥
स्वप्ने गगनगश्चैव बहुवातो नरो भवेत् ॥ ३६ ॥ अकालपलितः क्रोधी महाप्राज्ञो रणप्रियः ॥ स्वप्ने च दीप्तिमान्प्रेक्षी बहुपित्तो नरो भवे
त् ॥ ३७ ॥ स्थिरमित्रः स्थिरोत्साहः स्थिरांगो द्रविणान्वितः ॥ स्वप्ने जलसितालोकी बहुश्लेष्मा नरो भवेत् ॥ ३८ ॥ शिरस्तु प्राणिनां देहे जीव
नं रुधिरं तथा ॥ लेपनं च तथा मांसं मेदः स्नेहकरं तु यत् ॥ ३९ ॥ धारणं त्वस्थि मज्जा स्यात् पूरणं वीर्यवर्धनं ॥ शुक्रं गर्भकरं सो जः प्रा
णकृज्जीवसंस्थितिः ॥ ४० ॥ ओजः शुक्रात्सारतरमापीतं हृदयोपगं ॥ षडंगं सक्थिनी बाहू मूर्धा जठरमीरितं ॥ ४१ ॥ षट्त्वचा बाह्यतो
या हृद्यन्या रुधिरधारिका ॥ किलासधारिणी चान्या चतुर्थी कुंडधारिणी ॥ ४२ ॥ पंचमी पींद्रियस्थानं षष्ठी प्राणधरा मता ॥ कला सप्त
मीमांसधरा द्वितीया रक्तधारिणी ॥ ४३ ॥ शकृत्प्लीहाश्रिता चान्या मेदोधारास्थिधारिणी ॥ मज्जा श्लेष्मपुरीषाणां धरा पक्वाशयस्थि
ता ॥ ४४ ॥ षष्ठी पित्तधरा शुक्रधरा शुक्राश्रया परा ॥ ४५ ॥ ॥ इत्याग्नेये महापुराणे गर्भोत्पत्तिः ॥ ॥ छ छ छ
अग्निरुवाच ॥ श्रोत्रं त्वक् चक्षुषी जिह्वा घ्राणं धीः स्वं च भूतगं ॥ शब्दस्पर्शौ रूपरसगंधाः स्वादिषु तद्गुणाः ॥ १ ॥ पायूपस्थौ करौ पा-
दौ वाग्भवेत्कर्मखं तथा ॥ उत्सर्गानंदकादानगतिश्वासादिकर्म तत् ॥ २ ॥ पंच कर्मेंद्रियाण्यत्र पंच बुद्धींद्रियाणि च ॥ इंद्रियार्थाश्च
पंचैव महाभूतामनोधिपः ॥ ३ ॥ आत्माव्यक्तं चतुर्विंशत् तत्त्वादि पुरुषः परः ॥ संयुक्तश्च वियुक्तश्च यथा मत्स्योदके उभे ॥ ४ ॥

MEMORIAL

अवक्रमाश्विनानीहरजःसत्वतमांसि च ॥ आंतरः पुरुषो जीवः स परं ब्रह्मकारणं ॥५॥ ॥७॥ ॥७॥ ॥७॥ ॥
१०२ स याति परमं स्थानं यो वेत्ति पुरुषं परं ॥ सप्ताशयाः स्मृता देहे रुधिरस्यैक आश्रयः ॥६॥ ७॥ ॥७॥ ॥७॥
श्लेष्मणश्चामपित्ताभ्यां पक्वाशयस्तु पंचमः ॥ वायुमूत्राशयौ सप्त स्त्रीणां गर्भाशयोऽष्टमः ॥७॥ ७ ॥७ ॥७
पित्तात्पक्वाशयोग्नेः स्यात् योनिर्विकसिता ऋतौ ॥ पद्मवत्तु गर्भाशयः स्यात्तत्र धत्ते सरक्तकं ॥८॥ ७॥ ॥७॥ ॥७॥
शुक्रं स्वशुक्रतश्चांगं तेनांगान्यत्र कालतः ॥ न्यस्तं शुक्रमतो योनौ नेति गर्भाशयं मुने ॥९॥ ७ ॥७ ॥७
ऋतावपि च योनिश्चेद्वातपित्तकफावृता ॥ भवेत्तदा विकोशत्वं नैव तस्यां प्रजायते ॥१०॥ ७॥ ७ ॥७॥ ७॥७॥
उल्कानुपुप्फासकहीहृत्तनुकोष्ठांग्यकृतात्मना ॥ डुंडुकस्त्वमहाभागनिबद्धान्याशयेततः ॥११॥ ७॥ ७॥७॥
रसस्य पच्यमानस्य साराद्भवति देहिनः ॥ प्लीहा यकृच्च धर्मज्ञ रक्तफेनाच्च पुप्फुसः ॥१२॥ ७ ॥ ७ ॥ ७
रक्तं पीतं च भवति तथा डुंडुकसंज्ञिकं ॥ मेदोरक्तप्रसादाच्च वृक्कयोः संभवः स्मृतः ॥१३॥ ७॥ ७ ॥७॥ ७ ॥ ७॥
रक्तमांसप्रसादाच्च भवंत्यन्त्राणि देहिनां ॥ सार्धत्रिव्यामसंख्यानि तानि नृणां विनिर्दिशेत् ॥१४॥ ७॥ ॥७॥ ॥७॥
त्रिव्यामानि तथा स्त्रीणां प्राहुर्वेदविदो जनाः ॥ रक्तवायुसमायोगात्काठीयस्योद्भवः स्मृतः ॥१५॥ ७॥७॥७॥७॥७॥
कफप्रसादाद्भवति हृदयं पद्मसन्निभं ॥ अधोमुखं तत्सुषिरं यत्र जीवो व्यवस्थितः ॥१६॥ ७ ७ ७ ७ ७ ७ ७ ७ ७॥
चैतन्यानुगता भावाः सर्वे तत्र व्यवस्थिताः ॥ तस्य वामे तथा प्लीहा दक्षिणे च तथा यकृत् ॥१७॥ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७॥
दक्षिणे च तथा क्लोम पद्मस्यैवं प्रकीर्तितं ॥ स्रोतांसि यानि देहेस्मिन् कफरक्तवहानि च ॥१८॥ ७ ७ ७ ७ ७ ७ ७ ७ ७
तेषां भूतानुमानात्तु भवतींद्रियसंभवः ॥ नेत्रयोर्मंडलं शुक्लं कफाद्भवति पैतृकं ॥१९॥ ७ ७ ७ ७ ७ ७ ७
कृष्णं च मंडलं वातात्तथा भवति मातृकं ॥ पित्ताद्बहुमंडलं ज्ञेयं मातापितृसमुद्भवं ॥२०॥ ७॥ ॥७॥ ॥७॥

समांसासृक्कफाज्जिह्वा मेदोसृक्कफमांसजौ ॥ वृषणौ दशप्राणस्य ज्ञेया ह्यायतनानि तु ॥२१॥ ७॥ ॥७॥ ॥७॥
मूर्धा हृन्नाभिकंठाश्च जिह्वा शुक्रं च शोणितं ॥ गुदं बस्तिश्च गुल्फं च कंडराः षोडशेरिताः ॥२२॥ ७॥ ॥७॥ ॥७॥
द्वे करे द्वे च चरणे चतस्रः पृष्ठतो गले ॥ द्वे द्वे ग्रीवादिपादांते जानुनी द्वे च षोडश ॥२३॥ ॥ ७॥ ॥७॥ ॥७॥
मांसस्नायुशिरास्थिभ्यश्चत्वारश्च पृथक् पृथक् ॥ मणिबंधनगुल्फेषु निबद्धानि परस्परं ॥२४॥ ७॥ ॥७॥ ॥७॥ ॥
षट् कूर्चादि स्मृतानीह हस्तयोः पादयोः पृथक् ॥ ग्रीवायां च तथा मेढ्रे कथितानि मनीषिभिः ॥२५॥ ७॥ ॥७॥ ॥७॥
पृष्ठवंशस्योपगताश्चतस्रो मांसरज्जवः ॥ तावंत्यश्च तथा पेश्यस्तासां बंधनकारिकाः ॥२६॥ ७॥ ॥७॥ ॥७॥
सीवंत्यश्च तथा सप्त च मूर्धानमाश्रिताः ॥ एकैका मेढ्रजिह्वास्था अस्थ्नां षष्टिशतत्रयं ॥२७॥ ॥७॥ ॥७॥ ॥७॥
सूक्ष्मैः सह चतुःषष्टिर्दशनाविंशतिर्नखाः ॥ पाणिपादशलाकाश्च तासां स्थानचतुष्टयं ॥ ७॥ ॥७॥ ॥७॥
षष्ट्यंगुलीनां द्वे पार्ष्ण्योर्गुल्फेषु च चतुष्टयं ॥ चत्वार्यरत्न्योरस्थीनि जंघायास्तद्वदेव तु ॥२९॥ ॥७॥ ॥७॥ ॥७॥
द्वे द्वे जानुकपोलोरुफलकांशसमुद्भवे ॥ अक्षस्थानांपकश्रोणिफलकैवमादिशेत् ॥३०॥ ॥७॥ ॥७॥ ॥७॥
भगास्थ्येकं तथा पृष्ठे चत्वारिंशच्च पंच च ॥ ग्रीवायां च तथास्थीनि जत्रुकं च तथा हनुः ॥३१॥ ७॥ ॥७॥ ॥७॥
तन्मूले द्वे ललाटाक्षिगंडनासाघ्नवस्थिता ॥ पार्श्वकाः स्थालकैः सार्धमर्बुदैश्च द्विसप्ततिः ॥३२॥ ७॥ ॥७॥ ॥७॥ ॥
द्वे शंखके कपालानि चत्वार्येव शिरस्तथा ॥ उरः सप्तदशास्थीनि संधीनां द्वे शते दश ॥३३॥ ७॥ ॥७॥ ॥७॥
अष्टषष्टिस्तु शाखासु षष्टिश्चैव विवर्जिता ॥ अंतरा वै व्यशीतिश्च स्नायोर्नवशतानि च ॥३४॥ ७॥ ॥७॥ ॥७॥

903

त्रिंशत्यधिके द्वे शते अंतराधौ नु सप्ततिः ॥ ऊर्ध्वगाः षट्शतान्येव शाखास्कः कथितानि तु ॥ ३५॥ पंचपेशी शता
न्यथ चत्वारिंशतयो र्ध्वगाः ॥ चतुःशतं तु शाखास्क सस्कंधगाधौ च षष्टिका ॥३६॥ स्त्रीणां चैकाधिकापेशो
विंशतिश्च तुरुत्तरा ॥ स्तनयोर्दश योनौ च नयोर्दश तथाशये ॥ ३७॥ गर्भस्य च च तस्तः स्तः शिरणां च
शरीरिणां ॥ त्रिंशच्चतसहस्राणि तथान्यानि न वै च तु ॥ ३८॥ षट्पंचाशत्सहस्राणि रसं देहे वहंति ताः ॥
केदारइव कुल्याश्च क्लेदलेपादिकं च यत् ॥ ३९॥ द्वासप्ततिस्तथा कोट्यो रोम्णामिह महामुने ॥ मज्जा मेद
सस्नैव वसायास्त्वनथा द्विज ॥ ४०॥ मूत्रस्य चैव पित्तस्य श्लेष्मणः शकृतस्तथा ॥ रक्तस्य सरसस्यात्र क्रमशोंजलयो
मताः ॥ ४१॥ अर्धार्धाभ्यधिकाः सर्वा पूर्वपूर्वा अविर्मता ॥ अर्धांजलिस्त्व शुक्रस्य तदर्धं च तथौ जसः ॥ ४२॥
रजसस्तु तथा स्त्रीणां चतस्रः कथिता बुधैः ॥ शरीरं मलदोषादि पिंडं ज्ञात्वा त्वनित्यजेत् ॥ ४३॥ इत्याग्नेये महा
पुराणे शारीरनिर्णयः ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥ ॥
॥अग्निरुवाच ॥ उक्तानि यममार्गादि वक्ष्येथ मरणे नृणां ॥ उष्मा प्रकुपितः काये तीव्रवायुसमीरितः ॥ १॥
शरीरमुपरुध्याथ कृत्स्नान् दोषान् रुणद्धि यौ ॥ छिनत्ति प्राणस्थानानि पुनर्मर्माणि चैव हि ॥ २॥ शैत्यात् प्र-
कुपितो वायुः छिद्रमन्विष्यते ततः ॥ द्वे नेत्रे द्वौ तथा कर्णौ द्वौ तु नासापुटौ तथा ॥३॥ ऊर्ध्वं तु षट् च छिद्राणि सप्तमं वदनं तथा ॥
एतैः प्राणा विनिर्यांति प्रायशः शुभकर्मणां ॥४॥ अधःपायुरुपस्थं च अनेन शुभकारिणः ॥ मूर्धानं योगिनो भित्वा जीवो यातस्थ चेच्छया ॥
॥५॥ अंतकाले तु संप्राप्ते प्राणापानमुपस्थिते ॥ तमसा संवृते ज्ञाने संवृतेषु च कर्मसु ॥६॥ स जीवो नाभ्यधिष्ठान श्चाल्यते मातरिश्व

ना चाल्यमानस्त्वाश्वयते अष्टांगाः प्राणवृत्तिका ७ च्यवनं जायमानं वा प्रविशंतं च योनिषु प्रपश्यंति च तं सिद्धा देवं दिव्येन चक्षुषा ८ गृह्णा
ति तत्क्षणात्यागे शरीरं चातिवाहिकं आकाशवायुतेजांसि विग्रहादूर्ध्वगामिनः ९ जलं मही च पंचत्वमापन्नः पुरुषः स्मृतः आतिवाहिकदे
हं तु यमदूतानयंति तं १० याम्यमार्गं महाघोरं षडशीतिसहस्रकं अन्नोदकं नीयमानं बांधवैर्दत्तमश्नुते ११ यमं दृष्ट्वा यमोक्तेन चित्रगुप्तेन चेरि
तान् प्राप्नोति नरकान्रौद्रान् धर्मी शुभपथैर्दिवं १२ भुज्यंते पापिभिर्घोरा नरकास्तांश्च यातनाः अष्टाविंशतिरेवाधः क्षितेर्नरककोटयः १३ स
समस्य तलस्यांते घोरे तमसि संस्थिताः घोराख्या प्रथमा कोटिः सुघोरा तदधः स्थिता १४ अतिघोरा महाघोरा घोररूपा च पंचमी षष्ठी तरलता
राख्या सप्तमी च भयानका १५ भयोत्कटा कालरात्री महाचंडा च चंडया कोलाहला प्रचंडा च पद्मा नरकनायिका १६ पद्मावती भीषणा च-
भीमा चैव करालिका विकराला महावज्रा त्रिकोणा पंचकोणिका १७ सुदीर्घा वर्तुला सप्तभौमा चैव सुधूमिका दीप्तायामष्टविंशत्याः कोटयः
पापिदुःखदाः १८ अष्टाविंशतिकोटीनां पंचपंच च नायिकाः रौरवाद्याः शतं चैव चत्वारिंशच्चतुष्टयं १९ तामिस्रमंधतामिस्रं महारौरवरौरवौ
असिपत्रवनं चैव लोहभारं तथैव च २० नरकं कालसूत्रं च महानरकमेव च संजीवनं महावीचि तपनं संप्रतापनं २१ संहारं सकाकोलं कुड्मलं
पूतिमृत्तिकं लोहशंकुमृजीषं च प्रधानं शाल्मलीं नदीं २२ नरकान्विद्धि कोटीशान्संस्थान्वै घोरदर्शनान् पात्यंते पापकर्माण एकैकस्मिन्बहुष्वपि
२३ मार्जाररक्षगोमायुगृध्रादिवदनाश्च ते तैलद्रोण्यां नरं क्षिप्त्वा ज्वालयंति हुताशनं २४ अंबरीषेषु चैवान्यांस्ताम्रपात्रेषु चापरान् अयःपा
त्रेषु चैवान्यान् दग्ध्वा वह्निकणेषु च २५ शूलाग्रारोहिताश्चान्ये छिद्यंते नरकेऽपरे ताड्यंते च कशाभिस्तु भोज्यंते चाप्ययोगुडान् २६ यमदूतैर्नराः
पांसून्विष्ठारक्तकफादिकान् तप्तमद्यं पाययंति पाटयंति पुनर्नरान् २७ यंत्रेषु पीडयंति स्म भक्ष्यंते वायसादिभिः तैलेनोष्णेन सिच्यंते छिद्यंते नै-
कधा शिरः २८ हा तातेति क्रंदमानाः स्वकं निंदंति कर्म ते महापातकजान्घोरान्नरकान्प्राप्य गर्हितान् २९ कर्मक्षयाज्जायंते महापातकिनस्त्विह
मृगश्वसूकरोष्ट्राणां ब्रह्महा योनिमृच्छति ३० खरपुल्कसम्लेच्छानां मद्यपः स्वर्णहार्यपि कृमिकीटपतंगत्वं गुरुगस्तृणगुल्मतां ३१ ब्रह्महा क्ष
यरोगी स्यात् सुरापः श्यावदंतकः स्वर्णहारी च कुनखी दुश्चर्मा गुरुतल्पगः ३२ यो येन संस्पृशत्येषां स तल्लिंगो भिजायते अन्नहर्तामयावी स्या

तृ मूकोवागपकारकः ३३ धान्यंहृत्वातिरिक्ताङ्गः पिशुनः पूतिनासिकः तैलहृत्तैलपाईस्यात् पूतिवक्त्रस्तुसूचकः ३४ परस्ययोषितंहृत्वाब्र
ह्मस्वमपहृत्यच अरण्येनिर्जलेदेशेजायतेब्रह्मराक्षसः ३५ रत्नहारीहीनजातिर्गन्धांछुछुंदरिःशुभान् पत्रशाकंशिखीहृत्वामूषकोधान्यहारकः
३६ अजःपशुंपयःकाकोयानमुष्ट्रःफलंकपिः मधुदंशःफलंगृध्रोगृहकारउपस्करं ३७ श्वित्रीवस्त्रंसारसंचझिल्लीलवणहारकः उक्तस्त्वाध्याति
कस्तापःशस्त्राद्यैराधिभौतिकः ३८ ग्रहाग्निदेवपीडाद्यैराधिदैविकईरितः त्रिधातापंहिसंसारंज्ञानयोगाद्विनाशयेत् ३९ कृच्छ्रैर्व्रतैश्चदानाद्यैर्विष्णुपू
जादिभिर्नरः ४० इत्याग्नेयेमहापुराणेनरकाः अग्निरुवाच संसारतापमुक्त्यर्थंवक्ष्याम्यष्टांगयोगकं ब्रह्मप्रकाशकंज्ञानंयोगस्तत्रैकचित्तता १
चित्तवृत्तिनिरोधश्चजीवब्रह्मात्मनोःपरः अहिंसासत्यमस्तेयंब्रह्मचर्यापरिग्रहौ २ यमाःपंचस्मृताविप्रनियमाभुक्तिमुक्तिदाः शौचंसंतोषतपसीस्वाध्या
येश्वरपूजने ३ भूतःपीडाह्यहिंसास्यात् अहिंसाधर्मउत्तमः यथानागपदेन्यानिपदानिपदगामिनां ४ एवंसर्वमहिंसायांधर्मार्थमभिधीयते उद्वेगजन
नंहिंसासंतापकरणंतथा ५ रुक्कृतिःशोणितकृतिःपैशुन्यकरणंतथा हितस्यातिनिषेधश्चमर्मोद्घाटनमेवच ६ सुखापन्हुतिःसंरोधोवधोदशविधा
चसा यद्भूतहितमत्यंतंवचःसत्यस्यलक्षणं ७ सत्यंब्रूयात्प्रियंब्रूयान्नब्रूयात्सत्यमप्रियं प्रियंचनानृतंब्रूयादेषधर्मःसनातनः ८ मैथुनस्यपरित्यागोब्र
ह्मचर्यंतदष्टधा स्मरणंकीर्तनंकेलिःप्रेक्षणंगुह्यभाषणं ९ संकल्पोऽध्यवसायश्चक्रियानिर्वृत्तिरेवच एतन्मैथुनमष्टांगंप्रवदंतिमनीषिणः १० ब्रह्म
चर्यंक्रियामूलमन्यथाविफलाःक्रियाः वसिष्ठश्चंद्रमाःशुक्रोदेवाचार्यःपितामहः ११ तपोवृद्धावयोवृद्धास्तेपिस्त्रीभिर्विमोहिताः गौडीपैष्टीचमाध्वीचविज्ञे
यास्त्रिविधासुराः १२ चतुर्थीस्त्रीसुराज्ञेयायथेदंमोहितंजगत् माद्यतिप्रमदांदृष्ट्वासुरांपीत्वाचमाद्यति १३ यस्माद्दृष्टमदानारीतस्मात्तांनावलोकयेत्
यद्वातद्वापरद्रव्यमपहृत्यबलान्नरः १४ अवश्यंयातितिर्यक्त्वंजग्ध्वाचैवाहुतंहविः कौपीनाच्छादनंवासःकंथांशीतनिवारणीं १५ पादुकेचापिगृण्ही
यात्कुर्यान्नान्यस्यसंग्रहं देहस्थितिनिमित्तस्यवस्त्रादेस्त्वपरिग्रहः १६ शरीरंधर्मसंयुक्तंरक्षणीयंप्रयत्नतः शौचंतुद्विविधंप्रोक्तंबाह्यमाभ्यंतरंत
था १७ मृज्जलाभ्यांस्मृतंबाह्यंभावशुद्धिस्तथांतरं उभयेनशुचिर्यस्तुसशुचिर्नेतरःशुचिः १८ यथाकथंचित्प्राप्त्यासंतोषस्तुष्टिरुच्यते मनसश्चें
द्रियाणांचऐकाग्र्यंतपउच्यते १९ तज्जयःसर्वधर्मेभ्यःसधर्मःपरउच्यते वाचिकंमंत्रजप्यादिमानसंरागवर्जनं २० शारीरंदेवपूजादिसर्वदंतुत्रिधावि-

तपः प्रणवाद्यास्त्रयोवेदाःप्रणवेपर्यवस्थिताः २१ वाङ्मयःप्रणवःसर्वस्तस्मात्प्रणवमभ्यसेत् अकारश्चतथोकारोमकारश्चार्द्धमात्रया २२
तिस्रोमात्रास्त्रयोवेदालोकाभूराद्योगुणाः जाग्रत्स्वप्नसुषुप्तिश्चब्रह्मविष्णुमहेश्वराः २३ ब्रह्मामहेश्वरोविष्णुःस्कंददेवीमहेश्वराः प्रद्युम्नः
श्रीर्वासुदेवःसर्वमोंकारकःक्रमात् २४ अमात्रोनंतमात्रश्चद्वैतस्योपशमःशिवः ॐकारोविदितोयेनसमुनिर्नेतरोमुनिः २५ चतुर्थमात्रागां
धारीप्रयुक्तामूर्ध्निलक्ष्यते ततुरीयंपरंब्रह्मज्योतिर्दीपोघटेयथा २६ तथाहृत्पद्मनिलयंध्यायेन्नित्यंजपेन्नरः प्रणवोधनुःशरोह्यात्माब्रह्मल
क्ष्यमुच्यते २७ अप्रमत्तेनवेद्धव्यंशरवत्तन्मयोभवेत् एतदेवाक्षरंब्रह्मएतदेवाक्षरंपरं २८ एतदेवाक्षरंज्ञात्वायोयदिच्छतितस्यतत्
छंदोस्यदेवीगायत्रीअंतर्यामीऋषिःस्मृतः २९ देवतापरमात्मास्यनियोगोभुक्तिमुक्तये भूरग्न्यात्मनेहृदयंभुवःप्राजापत्यात्मनेशिरः ३० स्व
सूर्यात्मनेचशिखाकवचमुच्यते ॐभूर्भुवःस्वःकवचंसत्यात्मनेनेत्रोत्स्वकं ३१ विन्यस्यपूजयेद्विष्णुंजपेद्वैभुक्तिमुक्तये जुहुयाच्चतिलाज्यादिसर्वं
संपद्यतेनरे ३२ यस्तुद्वादशसाहस्रंजपमन्वहमाचरेत् तस्यद्वादशभिर्मासैःपरब्रह्मप्रकाशते ३३ अणिमादिकोटिजप्याल्लुक्षात्सारस्वतादिकं
वैदिकस्तांत्रिकोमिश्रोविष्णोर्वैत्रिविधोमखः ३४ त्रयाणामीप्सितेनैवविधिनाहरिमर्चयेत् प्रणम्यदंडवद्भूमौनमस्कारेणयोर्चयेत् ३५ सयांगति
मवाप्नोतिनतांक्रतुशतैरपि यस्यदेवेपराभक्तिर्यथादेवेतथागुरौ ३६ तस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मनः ३७ इत्याग्नेयेमहापुराणेयम
नियमाः अग्निरुवाच आसनंकमलाद्युक्तंतद्बध्वाचिंतयेत्परं शुचौदेशेप्रतिष्ठाप्यस्थिरमासनमात्मनः १ नात्युच्छ्रितंनातिनीचंचैलाजिनकु
शोत्तरं तत्रैकाग्रंमनःकृत्वायतचित्तेंद्रियक्रियः २ उपविश्यासनेयुंज्याद्योगमात्मविशुद्धये समंकायशिरोग्रीवंधारयन्नचलंस्थिरः ३ संप्रेक्ष्यना
सिकाग्रंस्वंदिशश्चानवलोकयन् पार्ष्णिभ्यांवृषणौरक्षंस्तथाप्रजननंपुनः ४ ऊरुभ्यांउपरिस्थाप्यबाहूतिर्यक्प्रयत्नतः दक्षिणंकरपृष्ठंतन्य
सेद्वामतलोपरि ५ तथास्यंतानकेवक्त्रंमुरस्तंविष्टभ्यचाप्रतः प्राणःस्वदेहजोवायुस्तस्यायामोनिरोधनं ६ नासिकापुटमंगुल्यापीड्यैकमपरेणच
उदरेरेचयेद्वायुंरेचनाद्रेचकःस्मृतः ७ बाह्येनवायुनादेहंदृतिवत्पूरयेद्यथा तथापूर्णस्तसंतिष्ठेत्पूरणात्पूरकःस्मृतः ८ नमुंचतिनगृह्णाति
यो अंतर्बहिःस्थितं संपूर्णःकुंभवत्तिष्ठेदचलःसतुकुंभकः ९ कन्यसःसकृदुद्घातःसचैद्वादशमात्रिकः मध्यमश्चद्विरुद्घातश्चतुर्विंशतिमात्रि

९०५ कः १० उन्नमय्यद्विरुद्घातः षड्विंशात्समाविकः स्वेदकंपाभिघातानां जनकश्चोत्तमोत्तमः ११ अजितां नारुहेद्भूमिं हिक्काश्वासादयस्तथा जि
तेप्राणे स्खलरोषविण्मूत्रादि प्रजायते १२ आरोग्यं शीघ्रगामित्वमुत्साहः स्वरसौष्ठवं बलवर्णप्रसादश्च सर्वदोषक्षयः फलं १३ जपध्यानं विना ग
र्भः सगर्भस्तत्समन्वितः इंद्रियाणां जयार्थाय सगर्भं धारयेत्परं १४ ज्ञानवैराग्ययुक्ताभ्यां प्राणायामवशेन च इंद्रियांश्च विनिर्जित्य सर्वमेव जि
तं भवेत् १५ इंद्रियाण्येव तत्सर्वं यत्स्वर्गनरकावुभौ निगृहीतविसृष्टानि स्वर्गाय नरकाय च १६ शरीरं रथमित्याहुरिंद्रियाण्यस्य वाजिनः मनश्च
सारथिः प्रोक्तः प्राणायामः कशः स्मृतः १७ ज्ञानवैराग्यरश्मिभ्यां यस्यापि धृतं मनः शनैर्निश्चलतामेति प्राणायामैकसंहितं १८ जलबिंदुकुशा
ग्रेण मासे मासे पिबेत्तु यः संवत्सरशतं साग्रं प्राणायामश्च तत्समः १९ इंद्रियाणि प्रसक्तानि प्रविश्य विषयोदधौ आहृत्य यो निगृह्णाति प्रत्याहा
रः स उच्यते २० उद्धरेदात्मनात्मानं मज्जमानं यथांभसि भोगनद्यातिवेगेन ज्ञानवृक्षं समाश्रयेत् २१ इति आग्नेये महापुराणे आसनप्राणायामप्र
त्याहाराः अग्निरुवाच ध्यैचिंतायां स्मृतो धातुर्विष्णुचिंता मुहुर्मुहुः अनाक्षिप्तेन मनसा ध्यानमित्यभिधीयते १ आत्मनः समनस्कस्य मुक्ताशेषो
पधस्य च ब्रह्मचिंतासमाशक्तिर्ध्यानं नाम तदुच्यते २ ध्येयालंबनसंस्थस्य सदृशप्रत्ययस्य च प्रत्ययांतरनिर्मुक्तः प्रत्ययो ध्यानमुच्यते ३ ध्येयावस्थि
तचित्तस्य प्रदेशे यत्र कुत्रचित् ध्यानमेतत्समुद्दिष्टं प्रत्ययस्यैकभावना ४ एवं ध्यानसमायुक्तः स्वदेहं यः परित्यजेत् कुलं स्वजनमित्राणि समुद्धृत्य हरि
र्भवेत् ५ एवं मुहूर्तमर्द्धं वा ध्यायेद्यः श्रद्धया हरिं सोपि यां गतिमाप्नोति न तां सर्वैर्महामखैः ६ ध्याता ध्यानं तथा ध्येयं यच्च ध्यानप्रयोजनं एतच्चतुष्टयं ज्ञा
त्वा योगं युंजीत तत्त्ववित् ७ योगाभ्यासाद्भवेन्मुक्तिरैश्वर्यं चाष्टधा महत् ज्ञानवैराग्यसंपन्नः श्रद्दधानः क्षमान्वितः ८ विष्णुभक्तः सदोत्साही ध्यातैवं पुरुषः
स्मृतः मूर्तामूर्तं परं ब्रह्म हरेर्ध्यानं हि चिंतनं ९ सकलो निष्कलो ज्ञेयः सर्वज्ञः परमो हरिः अणिमादिगुणैश्वर्यं मुक्तिं ध्यानप्रयोजनं १० फलेन योजको विष्णु
रतो ध्यायेत्परेश्वरं गच्छंस्तिष्ठन्स्वपन्जाग्रदुन्मिषन्निमिषन्नपि ११ शुचिर्वाप्यशुचिर्वापि ध्यायेत्सततमीश्वरं स्वदेहायतनस्यांते मनसि स्थाप्य केशवं
१२ हृत्पद्मपीठिकामध्ये ध्यानमार्गेण पूजयेत् ध्यानयज्ञः परः शुद्धः सर्वदोषविवर्जितः १३ तेनेष्ट्वा मुक्तिमाप्नोति बाह्यैः शुद्धैश्च नाध्वरैः हिंसादोषवि
मुक्तत्वाद्विशुद्धिश्चित्तसाधनः १४ ध्यानयज्ञः परस्तस्मादपवर्गफलप्रदः तस्मादशुद्धं संत्यज्य ह्यनित्यं बाह्यसाधनं १५ यज्ञार्थं कर्म संत्यज्य योगमत्यर्थमभ्य

स्येत् विकारमुक्तमव्यक्तं भोग्यभोगसमन्वितं १६ चिंतयेद्धृदये पूर्वं क्रमादादौ गुणत्रयं तमः प्रच्छाद्य रजसा सत्वेनाच्छादयेद्रजः १७ ध्याये
त्त्रिमंडलं पूर्वं कृष्णं रक्तं सितं क्रमात् सत्वोपाधिगुणातीतः पुरुषः पंचविंशकः १८ ध्येयमेतदशुद्धं च त्यक्त्वा शुद्धं विचिंतयेत् ऐश्वर्यं पंकजं दिव्यं
पुरुषोपरि संस्थितं १९ द्वादशांगुलविस्तीर्णं शुद्धं विकसितं सितं नालमष्टांगुलं तस्य नाभिकंदसमुद्भवं २० पद्मपत्राष्टकं ज्ञेयमणिमादिगुणाष्टकं
कर्णिकाकेसरं नालं ज्ञानवैराग्यमुत्तमं २१ विष्णुधर्मश्च तत्कंदमिति पद्मं विचिंतयेत् तद्धर्मज्ञानवैराग्यं शिवैश्वर्यमयं परं २२ ज्ञात्वा पद्मासनं स
र्वं सर्वदुःखांतमाप्नुयात् तत्पद्मकर्णिकामध्ये स्वच्छदीपशिखाकृतिं २३ अंगुष्ठमात्रममलं ध्यायेदोंकारमीश्वरं कदंबगोलकाकारं तारारूपमिव
स्थितं २४ ध्यायेद्वा रश्मिजालेन दीप्यमानं समंततः प्रधानं पुरुषातीतं स्थितं पद्मस्थमीश्वरं २५ ध्यायेज्जपेच्च सततमोंकारं परमाक्षरं मनःस्थि
त्यर्थमिच्छंति स्थूलध्यानमनुक्रमात् २६ तद्भूतं निश्चलीभूतं लभेत्सूक्ष्मेपि संस्थितिं नाभिकंदे स्थितं नालं दशांगुलसमायतं २७ नालेनाष्टदलं पद्मं
द्वादशांगुलविस्तृतं सकर्णिके केसराले सूर्यसोमाग्निमंडलं २८ अग्निमंडलमध्यस्थः शंखचक्रगदाधरः पद्मी चतुर्भुजो विष्णुरथवाष्टभुजो हरिः
२९ शार्ङ्गाक्षवलयधरः पाशांकुशधरः परः स्वर्णवर्णः श्वेतवर्णः सश्रीवत्सः सकौस्तुभः ३० वनमाली स्वर्णहारी स्फुरन्मकरकुंडलः रत्नोज्वल
किरीटश्च पीतांबरधरो महान् ३१ सर्वाभरणभूषाढ्यो वितस्तिर्वा यथेच्छया अहं ब्रह्म ज्योतिरात्मा वासुदेवो विमुक्त ॐ ३२ ध्यानाच्छ्रांतो जपे
न्मंत्रं जपाच्छ्रांतश्चिंतयेत् जपध्यानाभियुक्तस्य विष्णुः शीघ्रं प्रसीदति ३३ जपयज्ञस्य वै यज्ञाः कलां नार्हंति षोडशीं व्याधिभ्यो न स्पृशंति
आधयश्चाधयोप्यतः ३४ भुक्तिर्मुक्तिर्भवेत्तस्य जपाज्जपेन प्राप्नुयाद्धरिं ३५ आग्नेये महापुराणे ध्यानं अग्निरुवाच धारणा मन
सि ध्येये संस्थितिर्ध्यानवद्द्विधा मूर्तामूर्तहरिध्याने मनोधारणतो हरिः १ यद्बाह्यावस्थितं लक्ष्यं तस्मान्न चलते मनः तावत्कालं प्रदेशे
षु धारणां मनसि स्थितिः २ कृत्वा तपि परिच्छिन्नं देहे संस्थापितं मनः न प्रच्यवति यल्लक्ष्याद्धारणा साभिधीयते ३ धारणाभ्यासयुक्तात्मा
यदि प्राणैर्विमुच्यते कुलैकविंशमुत्तार्य स्वर्यात्यतिपरं पदं ५ यस्मिन्यस्मिन्भवेदंगे योगिनां व्याधिसंभवः तत्तदंगं धिया व्याप्य धारयेत
त्त्वधारणां ६ आग्नेयी वारुणी चैव ऐशानी चामृतात्मिका साग्निः शिखा फडंता च विष्णोः कार्या द्विजोत्तम ७ नाडीविभिन्नं स्थित्वा
धारणा द्वादशायामा ध्यानं द्वादश धारणाः ध्यानं द्वादशकं यावत्समाधिरभिधीयते ४

कायंतेषु मुखं पादांगुष्ठकपालांतं रश्मिमंडलमावृतं ८ तिर्यक्चाधोर्ध्वभागेभ्यः प्रयांति ज्योतींषि तेजसा चिंतयेत्साधकेंद्रस्तु यावत्सर्वं महामु
ने ९ भस्मीभूतं शरीरस्थं ततश्चैवोपसंहरेत् शीतश्लेष्मादयः पापं विनश्यंति द्विजात्मना १० शीर्षे धीरं विकारं च कंठे चाधोमुखं स्मरेत् ध्यायेदच्छि
न्नचित्तार्थः पाणीभूतेन चात्मना ११ स्फुरच्छीकरसंस्पर्शप्रभूतमिह गामिभिः धाराभिरखिलं विश्वमापूर्णं भुवि चिंतयेत् १२ ब्रह्मरंध्राच्च संक्षोभात् यावदा
धारमंडलं सुषुम्नांतर्गतो भूत्वा संपूर्णेंदुकृतालयं १३ संप्लाव्य हिमसंस्पर्शतोयेनामृतमूर्तिना क्षुत्पिपासामयप्रायसंतापपरिपीडितः १४ धारये
द्वारुणीं मंत्री तुष्ट्यर्थं चाप्यतंद्रितः वारुणीधारणा प्रोक्ता ऐशानीं धारणां शृणु १५ व्योम्नि ब्रह्मसमे पद्मे प्राणापानेक्षयं गते प्रसादं चिंतयेद्विष्णोर्यावच्चिं-
ताक्षयं गता १६ महाभावं ततो जपेत्तु सर्वव्यापकमीश्वरः अर्धेंदुपरमं शांतं निराभासं निरंजनं १७ असत्यं सत्यमाभाति तावत्सर्वं चराचरं यावत्त्वं
स्पंदरूपं तु न दृष्टं गुरुवक्त्रतः १८ दृष्टे तस्मिन् परे तत्त्वे आब्रह्मसचराचरं प्रमातृमानमेयं च ध्यानहृत्पद्मकल्पनं १९ मातृमोदकवत्सर्वं जपहोमार्च
नादिकं विष्णुमंत्रेण वा कुर्यादमृतां धारणां वदे २० संपूर्णेंदुनिभं ध्यायेत् कमलस्थं विमुच्छिगं शिरस्थं चिंतयेद्यत्नात् शशांकायुतवर्चसं २१ सं
पूर्णमंडलं व्योम्नि शिवकल्लोलपूरितं तथा हृत्कमले ध्यायेत्तेन संततं स्मरेत् २२ साधको विगतक्लेशो जायते धारणादिभिः २३ इत्याग्नेये महापुरा
णे धारणा॥ अग्निरुवाच यदात्ममात्रनिर्भासं स्तिमितोदधिवत्स्थितं चैतन्यरूपवद्ध्यानं तत्समाधिरिहोच्यते १ ध्यायन्मनः संनिवेश्य यस्तिष्ठेद
चलं स्थिरः निर्वाणानलवद्योगी समाधिस्थः प्रकीर्तितः २ न शृणोति न चाघ्राति न पश्यति न रज्यति न च स्पर्शं विजानाति न संकल्पयते मनः ३ न-
चाभिमन्यते किंचिन्न च बुध्यति काष्ठवत् एवमीश्वरसंलीनो यस्तिष्ठेत्स तु स्थिरः ४ यथा दीपो निवातस्थो नेंगते सोपमा स्मृता ध्यायतो विष्णुमात्मा-
नं समाधिस्थस्य योगिनः ५ उपसर्गाः प्रवर्तंते दिव्याः सिद्धिप्रसूचकाः पातितः श्रावणो वार्ता दर्शनः कामवेदनः ६ प्रार्थयंति च तं देवा भोगैर्दिव्यैश्च
योगिनं नृपाश्च पृथिवीदानैर्धनैश्च समुपस्थिताः ७ वेदादिसर्वशास्त्रं च स्वयमेव प्रवर्तते अभीष्टछंदोविषयं काव्यं चास्य प्रवर्तते ८ रसायनानि
दिव्यानि दिव्याश्चौषधयस्तथा समस्तानि च शिल्पानि कलाः सर्वाश्च विंदति ९ सुरेंद्रकन्याद्याश्च गुणाश्च प्रतिभादयः तृणवत्तांस्त्यजेद्यस्तु तस्य
विष्णुः प्रसीदति १० अणिमादिगुणैश्वर्यः शिष्ये ज्ञानं प्रकाशयन् भुक्त्वा भोगान्यथेच्छानस्तनुं त्यक्त्वा लयान्ततः ११ तिष्ठेत्स्वात्मनि विज्ञाने आनंदे

ब्रह्मण्यक्षरे मलिनो हि यथादर्शो आत्मज्ञानाय न क्षमः १२ तथा विपक्वकरण आत्मज्ञानाय न क्षमः सर्वाश्च याति जे देहे देही विंदति वेदनां १३
योगी युक्तः सर्वाश्च योगाभावो न वेदनां आकाशमेकं हि यथा घटादिषु पृथग्भवेत् १४ तथात्मैको ह्यनेकेषु जलाधारेष्विवांशुमान् ब्रह्मखानिलते-
जांसि जलभूः क्षितिधातवः १५ इमे लोका एष चात्मा तस्माच्च सचराचरं मृद्दंडचक्रसंयोगात् कुंभकारो यथा घटं १६ करोति तृणमृत्काष्ठैर्गृहं वा
गृहकारकः करणान्येवमादाय तासु तास्विह योनिषु १७ सृजत्यात्मानमात्मैव संभूय करणानि च कर्मणा दोषमोहाभ्यामिच्छयैव स बध्यते १८
ज्ञानाद्विमुच्यते जीवो धर्माद्योगी न रोगभाक् वर्त्याधारस्नेहयोगाद्यथा दीपस्य संस्थितिः १९ विक्रियापि च दृष्टैवमकाले प्राणसंक्षयं अनंतार-
श्मयस्तस्य दीपवत्संस्थितो हृदि २१ सितासिताः कद्रुनीलाः कपिलाः पीतलोहिताः ऊर्ध्वमेकः स्थितस्तेषां यो भित्त्वा सूर्यमंडलं २२ ब्रह्मलोकमति
क्रम्य तेन याति परां गतिं यदस्यान्यद्रश्मिशतमूर्ध्वमेव व्यवस्थितं २३ तेन देवनिकायानां धामानि प्रतिपद्यते ये नैकरूपाश्चाधस्ताद्रश्मयोऽस्य मृदुप्रभाः
२४ इह कर्मोपभोगाय तैः संचरते ह्यसौ बुद्धींद्रियाणि सर्वाणि मनः कर्मेंद्रियाणि च २५ अहंकारश्च बुद्धिश्च पृथिव्यादीनि चैव हि अव्यक्त आ
त्मा क्षेत्रज्ञः क्षेत्रस्यास्य निगद्यते २६ ईश्वरः सर्वभूतस्थः सन्नसत्सदसच्च सः बुद्धेरुत्पत्तिरव्यक्तात्ततोऽहंकारसंभवः २७ तस्मात्खादीनि जायंते एकोत्त
रगुणानि तु शब्दः स्पर्शश्च रूपं च रसो गंधश्च तद्गुणाः २८ यो यस्मिन्नाश्रितश्चैषां स तस्मिन्नेव लीयते सत्त्वं रजस्तमश्चैव गुणास्तस्यैव कीर्तिताः
२९ रजस्तमोभ्यामाविष्टश्चक्रवद्भ्राम्यते ह्यसौ अनादिरादिमान्यश्च स एव पुरुषः परः ३० लिंगेंद्रियैरुपग्राह्यः सविकार उदाहृतः यतो वेदाः
पुराणानि विद्योपनिषदस्तथा ३१ श्लोकसूत्राणि भाष्याणि यच्चान्यद्वाङ्मयं भवेत् पितृयानोऽजवीथ्याश्च यदगस्त्यस्य चांतरं ३२ तेनाग्निहो-
त्रिणो यांति प्रजाकामा दिवं प्रति ये च दानपराः सम्यगष्टभिश्च गुणैर्युताः ३३ अष्टाशीतिसहस्राणि मुनयो गृहमेधिनः पुनरावर्तिनो
बीजभूता धर्मप्रवर्तकाः ३४ सप्तर्षिनागवीथ्यंतर्देवलोकं समाश्रिताः तावंत एव मुनयः सर्वारंभविवर्जिताः ३५ तपसा ब्रह्मचर्येण सं
गत्यागेन मेधया यत्र यत्रावतिष्ठंते यावदाभूतसंप्लवं ३६ वेदार्थवक्तनयज्ञा ब्रह्मचर्यं तपो दमः श्रद्धोपवासः सत्यत्वमात्मनो ज्ञानहेतवः
३७ सत्त्वाश्रमैर्निदिध्यासः समस्तैरेवमेव तु द्रष्टव्यस्त्वथ मंतव्यः श्रोतव्यश्च द्विजातिभिः ३८ य एवमेनं विंदंति ये चारण्यकमाश्रिताः उपास

१०८ नेहिजाः सत्यंश्रद्धयापरयायुताः ३९ क्रमात्तेसंभवंत्यर्चिरहःशुक्लंतथोत्तरं अयनंदेवलोकंचसवितारंसविद्युतं ४० ततस्ता-
न्पुरुषोऽभ्येत्यमानसोब्रह्मलौकिकान् करोतिपुनरावृत्तिस्तेषामिहनविद्यते ४१ यज्ञेनतपसादानैर्येहिस्वर्गजितोजनाः धू
मंनिशांकृष्णपक्षंदक्षिणायनमेवच ४२ पितृलोकंचंद्रमसंनभोवायुंजलंमहीं क्रमात्तेसंभवंतीहपुनरेवव्रजंतिहि ४३ एतद्योनविजा
नातिमार्गद्वितयमात्मनः दंदशूकःपतंगोवाभवेत्कीटोऽथवाकृमिः ४४ हृदयेदीपवद्ब्रह्मध्यानाज्जीवोमृतोभवेत् न्यायागतध
नस्तत्त्वज्ञाननिष्ठोतिथिप्रियः ४५ श्राद्धकृत्सत्यवादीचगृहस्थोपिहिमुच्यते ४६ आग्नेयेमहापुराणेसमाधिः अग्निरुः
ब्रह्मज्ञानंप्रवक्ष्यामिसंसाराज्ञानमुक्तये अहमात्मापरंब्रह्म अहमस्मीतिमुच्यते १ देहआत्मानभवतिदृश्यत्वाद्घटादिवत् सुषु
प्तेमरणेदेहाद्‌आत्मान्योज्ञायतेध्रुवं २ देहःसचेद्व्यवहरेदविकार्यादिसन्निभः चक्षुरादीनींद्रियाणिनात्माचैकरणत्वतः ३ प्राणोप्यात्मा
नभवतिसुषुप्तेचित्प्रभावतः जाग्रत्स्वप्नेचचैतन्यंसंकीर्णत्वान्नबुध्यते ४ विज्ञानरहितःप्राणःप्रसुप्तेज्ञायतेयतः अतोनात्मेंद्रियंतस्मादिंद्रि
यादिकमात्मनः ५ अहंकारोपिनैवात्मा देहवव्द्यभिचारतः उक्तेभ्योन्यतिरिक्तोयमात्मासर्वहृदिस्थितः ६ सर्वद्रष्टाचभोक्ताचनक्तमेवप्रदी
पवत् समाध्यारंभकालेचएवंसंचिंतयेन्मुनिः ७ मनोब्रह्मण आकाशःस्याद्वायुर्वायुतोनलः आपोग्नापोजलात्पृथ्वीततःसूक्ष्मंशरीरकं ८
अपंचीकृतभूतेभ्य आसन्पंचीकृतात्मनः स्थूलंशरीरंध्यात्वास्यलयंब्रह्मणिचिंतयेत् ९ पंचीकृतानिभूतानितत्कार्यंचविराट्स्मृतं एतत्स्थू
लशरीरंहिआत्मनोज्ञानकल्पितं १० इंद्रियैरर्थविज्ञानंधाराजागरितंविदुः विश्वस्तदभिमानीस्यात्त्रयमेतदकारकं ११ अपंचीकृतभूतानि
तत्कार्यंलिंगमुच्यते संयुक्तंसप्तदशभिर्हिरण्यगर्भसंज्ञकं १२ शरीरमात्मनःसूक्ष्मंलिंगमित्यभिधीयते जाग्रत्संस्कारजःस्वप्नःप्रत्ययोविषयात्म
कः १३ आत्मातदभिमानीस्यात्तैजसोस्यप्रपंचतः स्थूलसूक्ष्मशरीराख्यंद्वयस्यैकंहिकारणं १४ आत्माज्ञानंरसाभासंतदव्याकृतमुच्यते नस
न्नासन्नसदसदेतत्सावयवंनतत् १५ निर्गतावयवंनेतिनाभिन्नंभिन्नमेवच भिन्नाभिन्नंह्यनिर्वाच्यंबंधसंसारकारणं १६ एकंसद्ब्रह्मविज्ञानान्नाश्यं
नैवचकर्मभिः सर्वात्मनांद्रियाणांसंहारःकारणात्मना १७ बुद्धेःस्थानंसुषुप्तंस्यात्तद्वयस्याभिमानवान् प्राज्ञआत्मात्रयंचैतन्मकारःप्रणवःस्मृतः १८

अकारउत्युकारोसौमकारोत्यहमेवच अहंसाक्षीचचिन्मात्रोजाग्रत्स्वप्नादिकस्यच १९ नाज्ञानंचैवतत्कार्यंसंसारादिकबंधनं नित्यशुद्धंमुक्तसत्यमानं
दरूपमद्वयं २० विज्ञानमानंदंब्रह्मसत्यंज्ञानमनंतकं अयमात्मापरंब्रह्मतद्ब्रह्मत्वमसीतिच २१ ब्रह्माहमस्म्यहंब्रह्मपरंज्योतिर्विमुक्त ॐ
अहंब्रह्मोद्भवंज्ञानंसमाधिर्बंधपातकः २२ गुरुणाबोधितोजीवोस्यहंब्रह्मास्मिवात्मनः योसावादित्येपुरुषःसोसावहमखंड ॐ मुच्यते-
सारसंसारात्सारज्ञोब्रह्मसंभवेत् २३ आग्नेयेमहापुराणेब्रह्मज्ञानं अग्निरुवाच अहंब्रह्मपरंज्योतिःपृथिव्यप्‌अनलोज्झितं अहंब्रह्म
परंज्योतिर्वायुराकाशवर्जितः १ अहंब्रह्मपरंज्योतिरादिकार्यविवर्जितं अहंब्रह्मपरंज्योतिर्विराडात्मविवर्जितं २ अहंब्रह्मपरंज्योति
र्जाग्रत्स्थानविवर्जितं अहंब्रह्मपरंज्योतिर्विश्वभावविवर्जितं ३ अहंब्रह्मपरंज्योतिरकाराक्षरवर्जितं अहंब्रह्मपरंज्योतिर्वाक्पाण्यंघ्रि-
विवर्जितं ४ अहंब्रह्मपरंज्योतिःपायूपस्थविवर्जितं अहंब्रह्मपरंज्योतिःश्रोत्रत्वक्चक्षुरुज्झितं ५ अहंब्रह्मपरंज्योतिर्जिह्वाघ्रा-
